Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

KÂVYAMÂLÂ. 16.

THE

# MUKUNDÂNANDA BHÂNA

OF

# KÂS'ÎPATI.

EDITED BY

PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS

BOMBAY.

1889.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

( *Registered according to act XXV of 1867.* )

( *All rights reserved by the publisher.* )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काव्यमाला. १६.

श्रीकाशिपतिविरचितः

# मुकुन्दानन्दभाणः ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितः ।

स च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः ।

१८८९

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

# काव्यमाला ।

## श्रीकाशीपतिकविप्रणीतो

## मुकुन्दानन्दभाणः ।

वन्दे वन्दारुमन्दारमिन्दुभूषणनन्दनम् ।
अमन्दानन्दसंदोहबन्धुरं सिन्धुराननम् ॥ १ ॥

कण्ठालिङ्गनमङ्गलं घनकुचाभोगोपभोगोत्सवं
श्रोणीसंगमसौभगं च सततं मत्प्रेयसीनां पुरः ।
प्राप्तुं कोऽयमितीर्ष्ययेव यमुनाकूले बलाद्यः स्वयं
गोपीनामहरद्दुकूलनिचयं कृष्णः स पुष्णातु नः ॥ २ ॥

पि च ।

चन्द्रे शीतलयत्यलीकनयनं शंभोः सुधाशीकरै-
र्विष्वग्व्याकुलयत्सु संयमधनान्कान्तादृगन्तेषु च ।
लीलायै परमैक्षवं धनुरिपून्बिभ्रत्प्रसूनात्मनः
स्वच्छन्दं रतिवल्लभो विजयते त्रैलोक्यवीरः स्मरः ॥ ३ ॥

(नान्द्यन्ते)

**सूत्रधारः**—(पुरोऽवलोक्य । सप्रमोदम् ।) अद्य खलु फलितमामूलचूडमस्म-
ायपुरातनपुण्यकल्पलताभिः । यतः, इत एव नूतनपुरपरिसरालंकारभद्र-

---

१. कवेर्देशकालौ न ज्ञायेते. भाति चायं कश्चन द्रविडः, नातिप्राचीनश्च. २. एतद्भा-
मुद्रणावसरे पुस्तकत्रयमस्माभिरधिगतम्. तत्र प्रथमं पुण्यपत्तने 'काव्येतिहाससंग्रह'-
त्रे मासिकपत्रे मुद्रितं **क**-संज्ञकम्, द्वितीयं जयपुरराजगुरुभट्टलक्ष्मीदत्तसूनुश्रीदत्त-
ानां संग्रहात्प्राप्तं १८५३ मिते विक्रमाब्दे काश्यां लिखितं **ख**-संज्ञकम्, तृतीयमपि
ामेवासमासमशुद्धं च **ग**-संज्ञकम्. ३. **क**-पुस्तके प्रारम्भे 'वन्दामहे महेशानचण्डको-
डखण्डनम् । जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥' अयं श्लोकोऽधिकोऽस्ति. ४.
:' **ख**. ५. 'अपि च' **क**-पुस्तके नास्ति. ६. 'तरुमूलचूडं' **ख**. ७. 'पुण्य' **ख-ग**-
कयोर्नास्ति. ८. 'परिषदा' **ख**, 'परिसदा' **ग**.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गिरिचूडामणेर्भगवतश्चूडेश्वरस्य वसन्तोत्सवदर्शनसमुत्सुकाः सामाजि कल्याणमण्डपमध्यासते । तदेनानुपसृत्य चिरपरिचितलास्यकलाविले नाय सविनयमभ्यर्थये । (पदान्तरं गत्वा सप्रश्रयमञ्जलिं बद्ध्वा ।) भो भो सकलकलाविदः सभासदः, एष भरताचार्यपुत्रः कलाप्रवीणो निजविद्या- प्रदर्शनायात्रभवतामनुग्रहमाकाङ्क्षते । (आकाशे । कर्णं दत्त्वा ।) किं ब्रूथ— 'साधु भरताचार्यपुत्र, साधु । वयमपि चिरात्कस्यापि सरसकवेः सूक्तिमु- क्तामणिग्रथितमभिनवं मिश्रभाणमवलोकयितुमुत्कण्ठिताः । तदधुना तादृ- शमेव कमपि भाणमभिनीय दर्शयतु भवान्' इति । अनुगृहीतोऽस्मि । (आत्मगतम् ।) अधुना विरलः खलु मिश्रभाणप्रचारः । विरलाश्च तथा- विधाः कवयः । अयं गरीयान्खलु सामाजिकानामादेशः । तत्कथमिदमशा- क्यसंघटनमापतितम् । (स्मरणमभिनीय ।) अहो, मया प्रणयकुपितगृहि- णीमनोविनोदव्यासक्तचित्तेन विस्मृतमपि सामाजिकानुग्रहेण पुनरनति- चिराभ्यस्तमिवं तादृशमेव रूपकं स्मर्यते । भवतु तावत् । गृहिणीमेवाहूय कथयामि । (प्रकाशम् ।) आर्ये, इतस्तावत् ।

(प्रविश्य ।)

**नटी**—एसह्मि । को णिओओ आणवेदु अज्जो । (क)

**सूत्रधारः**—आर्ये,

कौडिन्यवंशरत्नस्य कवेः काशीपतेः कृतिः ।
मुकुन्दानन्दनामायं मिश्रभाणः प्रयुज्यते ॥ ४ ॥

तदत्र—(इत्यर्धोक्ते ।)

---

(क) एषास्मि । को नियोग आज्ञापयत्वार्यः ।

---

१. 'तत्रभवतां' ख-ग. २. 'कस्यापि चिरात्' ख-ग. ३. 'तदद्य तादृशमपि' क. ४. 'सूत्रधारः—अनु–' ख. ५. 'संघट्टनं' ख-ग. ६. 'विस्मृततमं' ख, 'वि- स्मृततमः' ग. ७. 'पुनरपि' ख-ग. ८. 'एव' ख-ग. ९. 'आणवेदु अज्जो' ख-ग- पुस्तकयोर्नास्ति. १० 'गोत्ररत्नस्य' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नटी**—अज्ज, अच्चरिअं अच्चरिअं ।

तक्के कक्कसवक्कोत्तिणिट्ठुरा तस्स भारई ।

जादा महुरसंदब्भे कव्वम्मि मिउला कहम् ॥ ५ ॥ (क)

**सूत्रधारः**—(सपरिहासम् ।) त्वमेव तावत्कथय ।

क्षणं प्रणयकोपे त्वं निष्ठुरापि कथं पुनः ।

प्रेमार्द्रहृदया जाता मृदुलप्रकृतिः प्रिये ॥ ६ ॥

**नटी**—एक्कावि भारई कहं कक्कसा मिउला एत्ति पुच्छिदे किं अण्णं कहेहि अज्जो । (ख)

**सूत्रधारः**—कोऽत्र विरोधः । उक्तं चैतेनैवे कविना—

तर्के कर्कशवक्रवाक्यगहने या निष्ठुरा भारती

सा काव्ये मृदुलोक्तिसारसुरभौ स्यादेव मे कोमला ।

या प्रायः प्रियविप्रयुक्तवनिताहृत्कर्तने कर्तरी

प्रेयोलालितयौवते न मृदुला सा किं प्रसूनावलिः ॥ ७ ॥

**नटी**—कुसुमसिरीविअ मिउला से कइणो भारई । (ग)

**सूत्रधारः**—किमुच्यते कुसुमश्रीरिवेति ।

व्याकोचप्रसवश्रियोऽपि मृदुला वाचामियं प्रक्रिया

मन्दस्यन्दिमरन्दतोऽपि मधुरस्तत्रायमर्थक्रमः ।

सौरभ्यादपि संमतं पुनरिह व्यङ्ग्यं पिकेभ्योऽप्यमी

मद्वर्ग्या मधुरस्वराः कविरयं श्लाघ्यो वसन्तादपि ॥ ८ ॥

---

(क) आर्य, आश्चर्यमाश्चर्यम् ।

तर्के कर्कशवक्रोक्तिनिष्ठुरा तस्य भारती ।

जाता मधुरसंदर्भे काव्येऽपि मृदुला कथम् ॥

(ख) एकापि भारती कथं कर्कशा मृदुला चेति पृष्टे किमन्यत्कथयत्यार्यः ।

(ग) कुसुमश्रीरिव मृदुलास्य कवेर्भारती ।

---

१. 'कर्कशा' ख. २. 'चैतेन' ख, 'चैवैतेन' ग. ३. 'मधुरोक्ति' ख-ग. ४. 'कृन्तने' क. ५. 'यौवने' क-ग. ६. 'मिउला' ख-ग-पुस्तकयोर्नास्ति. ७. 'संगतं' ख-ग. ८. 'काव्येऽस्मिन्' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नटी**—(सर्वतोऽवलोक्य ।) अज्ज, एदं चूदवणं कहेहि वसन्दाअमणम् । ईदो पेक्ख पेक्ख ।

किसलयकरसंपुडेण वल्ली किरइ पुरो कुसुमञ्जलिं णडन्ती ।
पवणणिहदतालपत्ततालज्झणिमणुगाअइ बंम्भरावलीआ ॥ ९ ॥ (क)

**सूत्रधारः**—आर्ये, साधु निरूपितम् । इतोऽपि

मन्दानिलेरितमनोहरपल्लवाग्रै-
    र्माकन्दवीरुदियमाह्वयतीव रागात् ।
प्रत्युत्तरं परभृतोऽपि दिशन्निवास्यै
    कूजन्कुहूरिति समेति सपक्षपातम् ॥ १० ॥

इतोऽपि पुनः

श्रेणीभूय मदालसा मधुकराः पुष्णन्ति वेणीश्रियं
    प्राञ्चद्गुच्छभरोऽप्युरोजकलशप्रागल्भ्यमालम्बते ।
रागोल्लासि च पल्लवं कलयते रम्याधरप्रक्रियां
    वासन्तीलतिकापि तेन वहते वामालकाविभ्रमम् ॥ ११ ॥

(विमृश्य ।) आर्ये, सर्वमपि सुघटितमस्मद्भाग्यवशात् । यतः ।

कालः कोकिलकोमलोक्तिमधुरः काव्यज्ञमान्यः कविः
    काव्यस्यापि स एव कामजनको राधाविटो नायकः ।
सारज्ञाश्च सभासदः पुनरमी नाट्ये प्रवीणा वयं
    किं चायं समुदञ्चितो भगवतश्चूडेश्वरस्योत्सवः ॥ १२ ॥

तदत्र संगीतकमनुतिष्ठतु भवती ।

---

(क) आर्य, इदं चूतवनं कथयति वसन्तागमनम् । इतः पश्य पश्य ।
किसलयकरसंपुटेन-वल्ली किरति पुरः कुसुमाञ्जलिं नटन्ती ।
पवननिहततालपत्रतालध्वनिमनुगायति बंम्भरावलीका ॥

---

१.'सर्वतोऽवलोक्य' क-पुस्तके नास्ति. २.'अज्ज' ख-ग-पुस्तकयोर्नास्ति. ३.'गमणं' ख. ४.'इदो पेक्ख इदो पेक्ख' क. ५.'रमइ' ख-ग. ६.'ज्झणि' ख-ग. ७.'बम्भरावलिः' ख-ग. ८.'इहमन्त्रयतीव' ख. ९.'रमयति' ख. १०.'बम्भरावलिः' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नटी—**

पल्लइदचूदलदिअं कोइलतरुणा रमन्दि रमणिज्जम् ।
उज्झन्दोवि मुहुत्तं काअउलकूरणिस्सणं सुणिअ ॥ १३ ॥ (क)

**सूत्रधारः—**(सशिरःकम्पम् ।) अहो संगीतमाधुर्यम् ।

(नेपथ्ये ।)

प्राप्य प्रबोधमधुना रटतीव नाथो
हा हा हतास्मि विधिनेति विनिन्द्य दैवम् ।
निःश्वस्य मत्करधृतं निजमम्बरान्त-
माकृष्य हन्त चलितैव कथं प्रिया मे ॥ १४ ॥

**सूत्रधारः—**(श्रुत्वा नेपथ्याभिमुखमवलोक्य ।) अयं किल मञ्जरीवियुक्तस्य मन्दारोद्यानगतस्य भुजंगशेखरस्य भगवतो मुकुन्दस्य भूमिकामादाय इत एवाभिवर्तते मातुलपुत्रो मधुकरः । तदावामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

## प्रस्तावना ।

(ततः प्रविशति यथानिर्दिष्टो भुजंगशेखरः ।)

**भुजंगशेखरः—**('प्राप्य प्रबोधम्–' इति पठित्वा । विमृश्य ।) तदानीमेवाहं तस्याः

स्फुटघनपुलककदम्बं स्पृष्ट्वा कुचकलशयुगलमविलम्बम् ।
मधुमधुराधरबिम्बं मदवत्याः किमिति मङ्क्षु नाचुम्बम् ॥ १५ ॥

---

(क) पल्लवितचूतलतिकां कोकिलतरुणा रमन्ते रमणीयाम् ।
उज्झन्तोऽपि मुहूर्तं काककुलकूरनिस्वनं श्रुत्वा ॥

---

१. 'तरुणो रमइ' ख-ग. २. 'संगीतस्य' क. ३. 'नटतीव' ख. ४. 'विधिनैव' ग. ५. 'मन्दारमसदनोद्यान' ख-ग. ६. लतायां' क. ७. 'रमन्ति' क, 'रमति' ख-ग. ८. 'उज्झन्नपि' क-ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(पुनर्विमृश्य ।) कथमेतावतोऽपि[1] तत्कालेऽवकाशः । यतः[2] ।

कुञ्जे कोमलशाद्वले पदमिह द्रागर्पितं वा न वा
किंचिच्चाटु चमत्कृतं च वचनं किं व्याहृतं वा न वा ।
साकूतप्रणयं च सामि नयनं व्यापारितं वा न वा
तन्व्या हन्त तदन्तरे विधिवशात्तस्याः प्रबुद्धः पतिः ॥ १६ ॥

इयं च[3] पुनरभागधेयेन मया

उत्सङ्गे विनिवेशयामि पुलकिन्याघ्राय वक्त्राम्बुजं
वक्षोजौ परिरभ्य वारिजदृशश्चुम्बामि बिम्बाधरम् ।
जल्पन्त्याः श्रवणे रहः किमपि मे विश्लेषयामि च्छला-
न्नीवीमित्यफलैर्मनोरथशतैर्नीता निशा केवलम् ॥ १७ ॥

अथवा कृतमनया[4] व्यतीतचिन्तया[5] । (निःश्वस्य ।) अत्रैवोद्याने पुनरप्येषा

आरुह्योरुयुगं प्रसह्य रभसादुन्नीय नीवीं प्रिया
काञ्चीकिङ्किणिकानिनादचकिता मन्दोच्चलन्मध्यमा ।
किंचित्कूजितकंधरा रतिपरिश्रान्ता च दष्टाधरा
कामं मे परिपूरयिष्यति न किं श्वो वा परश्वोऽपि वा ॥ १८ ॥

(क्षणमात्रं विचिन्त्य ।) अलमनयाप्यनागतावगाहिन्या वाञ्छावाहिन्या । किंत्वेतावदाशासनीयम् ।

आनीलकुन्तलपरिष्कृतमायताक्ष-
मापाटलाधरदलाञ्चितमन्दहासम् ।
आपीनतुङ्गकुचमप्रतिमावलग्न-
मङ्गं पुरः स्फुरतु मे पुनरङ्गनायाः ॥ १९ ॥

(स्मृतिमभिनीय ।) इदमपि मे दुर्लभं मन्दभाग्यस्य । यतः (आकाशे ।) या

पत्युः प्रयासि सदनं मृत्योरिव सपदि भीषणं वदनम् ।
सा त्वं प्रिये कथं मे यास्यसि भूयोऽपि नयनयोरयनम् ॥ २० ॥

---

१ 'एतावता' ख. २. 'यतः' ख-ग-पुस्तकयोर्नास्ति. ३. 'च' ख-ग-पुस्तकयोर्नास्ति. ४. 'कृतं कृतमनया' क. ५. 'व्यतीतगोचरया' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(सास्रम् ।)

लीलापाङ्गतरङ्गितं तव किमप्यालम्ब्य भूयश्चिरा-
देतावत्कुपितं तृणाय यमहं मत्वा सधैर्यं स्थितः
तस्यैवाद्य करे त्वया विनिहितो मारस्य निःसंशयं
कान्ते किं नु करोमि को नु शरणं का वा गतिः कथ्यताम्॥२१॥

(पुनः 'तस्यैव–' इत्यादि पठति ।)

(नेपथ्ये ।)

अयमयमुदयाद्रेर्नातिदूरे विवस्वा-
नयमयममृतांशुः पातकी याति चास्तम् ।
इयमियमुपकण्ठे त्वद्वियोगासहत्वा-
न्निवसति तरुणी ते कोक शोकं विमुञ्च ॥ २२ ॥

(श्रुतिमभिनीय सहर्षम् । नयनयोरस्रमपमृज्य ।) प्रियावियोगविक्लवं गृहदीर्घिकाचक्रवाकं शोकारवमुखरमुखं मन्दंमन्दमाश्वासयता मन्दारेण मञ्जरीवियुक्तोऽप्यहमाश्वासित इवास्मि । (हृदयं प्रति ।) हृदय, धैर्यमाकलय । इयमुपश्रुतिरवश्यं प्रियासमागमं फलिष्यति । (विचिन्त्य ।) अद्यैवाध्यवसितगमनो माधवो मञ्जरीधवः कथमेनामनादाय गच्छति । (सविमर्शम् ।) उपश्रुत्या तु पत्युरेव प्रस्थानं प्रियायाः पुनरिहैवावस्थानं सूचितम् । अतः सर्वथा प्रियासंमागमेन भवितव्यम् । (पुनः सोच्छ्वासम् ।) कथमिदमकृतसुकृतस्यासंभावनीयमेव मम संभावनां गोचरयति ।

उत्ताम्यतोरतिचिरादपि मन्मथाग्ने-
रद्यावयोर्घटनमत्र कथंचिदासीत् ।
तत्रान्तरे पतिरभूत्पुनरन्तरायः
संगृह्यते तदपि हन्त मनोरथो मे ॥ २३ ॥
निर्याति किं न पतिरेष कुतोऽपि हेतो-
र्द्रक्ष्यामि वा किमहमिन्दुमुखीं न भूयः ।

१. 'भूयस्तरां' ख-ग. २. 'कुपिते' ख. ३. 'अहमप्याश्वासित' ख-ग. ४. 'संगममाफलिष्यति' क. ५. 'संगमेन' क. ६. 'पुण्यस्य' ग. ७. 'एव' ग. ८. 'संत्रायते सपदि' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(सगद्गदम् ।)

हा हन्त किंतु मदनो मम तावदेव
मर्माणि कृन्तति कृतान्त इवाततायी ॥ २४ ॥

(किंचिद्धैर्यमवलम्ब्य ।) पञ्चापि युगपदेवायं मयि

अशोकपद्मोत्पलचूतमल्लिकाशराननङ्गो यदि [1]संदधाति सः ।
[2]तथाविधानेतत्समसंख्याकान्
करास्यनेत्राधरहासमार्गणांस्त[3]दा प्रियाया अनुसंदधाम्यहम् ॥२५॥

इति तामेव तामरसलोचनां मनसा गोचरयन्किं करोमि प्रियामे[4]वं चिन्तयन्नपि न पारयामि विरहपारावारम् । यतः, [5]मम सा प्रियतमापि

मन्दस्मितेन मधुराधरपल्लवेन
कुम्भोन्नमत्कुचभरेण कृशोदरेण ।
विद्युन्निभाङ्गलतया च विचिन्त्यमाना
चेतो धुनोति [6]च धिनोति च चञ्चलाक्षी ॥ २६ ॥

(किंचिदिव [7]स्मित्वा ।) अहो दुःशीलता मदीयहृदयस्य यदिदं तथापि

तत्पादाम्बुरुहं तदूरुयुगलं तान्नितम्बस्थलं
तन्मध्यं स गभीरनाभिवलयस्तावानुरोजक्रमः ।
तद्वक्रं तदपाङ्गमुग्धवलनं ते नीलनीलालकाः
सा तन्वीति तदङ्गकेषु हृदयं धावन्न विश्राम्यति ॥ २७ ॥

(स्पर्शमभिनीय ।) कथमियं प्रभातप्राया रजनी संवृत्ता ।

पुरातनपरीमलप्रकरमेदुरा मारुता
न वान्ति मुकुलीभवत्कुमुदगर्भलीना इव ।
चरन्ति नवसौरभाः पुनरमी समीराङ्कुराः
सजृम्भणसरोजिनीसरसिजास्यमुक्ता इव ॥ २८ ॥

---

१. 'संदधानः' ख-ग. २. 'तथाविधान्—' इत्यादि ख-ग-पुस्तकयोर्नास्ति. ३. 'तथा' ख-ग. ४. 'एवं' क. ५. 'मम प्रिया दूती' ख, 'मामतिप्रियायुवतिः' ग. ६. 'चपला मम चञ्चलाक्षि' ख-ग. ७. 'स्थित्वा' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(प्रतीचीमवलोक्य ।) अयमिह

जरठ इव मरालो जर्जराग्रैर्मयूखैः
स्खलति शिशिरभानुः पश्चिमाम्भोधिपारे ।

(ऊर्ध्वमवलोक्य ।) अत्र पुनः

श्लथगरुत इवामूस्तत्र तत्रान्तरिक्षे
विरलविरलभासः किं च तारा लुठन्ति ॥ २९ ॥

कलङ्कदाशो गगनाम्बुराशौ प्रसार्य चन्द्रातपतन्तुजालम् ।
लग्नोडुमीनांछ्रवु संजिघृक्षुश्चन्द्रछवस्थश्चरमाब्धिमेति ॥ ३० ॥

नभोवनं नक्तमसौ विगाह्य नक्षत्रसेनासहितः शशाङ्कः ।
कराग्रलग्नान्कतिचित्प्रहृत्य पान्थान्प्रभाते प्रपलायतेऽद्य ॥ ३१ ॥

अपि च ।

आलोकैरतिपाटलैरचरमां विस्तारयद्भिर्दिशं
नक्षत्रद्युतिमाक्षिपद्भिरचिरादाशङ्क्य सूर्योदयम् ।
पुञ्जीभूय भयादिवान्धतमसं मन्ये द्विरेफच्छला-
न्मीलन्नीलसरोरुहोदरकुटीकोणान्तरे लीयते ॥ ३२ ॥

तदितो निष्कुटवनाद्बहिरद्यैव गन्तव्यम् । (इत्युत्थाय [1]वनप्राकारमुल्लङ्घ्य वीथीं प्रविश्य हर्म्यालीमवलोक्य [2]च ।)

व्यामिश्रैकैकबाहु [3]प्रवलितपृथुलैकैकचारूरुकाण्डं
[4]दंष्ट्रादष्टाधरोष्ठं दरशिथिलतनुश्लेषमालिङ्ग्य कान्ताः ।
शश्वन्निःश्वासवेगस्फुरितगुरुकुचद्वन्द्वसंघृष्टवक्षाः
श्रान्तः शेते रतान्ते सुखमिह सुकृती लीलया कामिलोकः॥३३॥

किं च काश्चन पुनरिहैव

निःशेषं व्यपनीय नीविवसनं मञ्जुक्वणन्मेखलं
क्रीडान्दोलनखिन्नमध्यलतिकं किंचित्प्रकम्प्रस्तनम् ।

---

१. 'भवन' क. २. 'च' ख-ग-पुस्तकयोर्नास्ति. ३. 'प्रचलित' ख. ४. 'दष्ट्वा दष्ट्वा' क.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्यत्कुण्डलताण्डवं च रुचिरं विक्रम्य कान्तोपरि
क्लान्ता वक्षसि कामिनां मुकुलितप्रान्ताक्षिकं शेरते ॥ ३४ ॥

अन्यच्च।

वीरायितेषु मृगशावविलोचनानां
कण्ठोदितान्यचरमं कलकूजितानि।
आम्रेडयद्भिरथ सौधगतैः कपोतैः
शङ्के गृहीत इव संप्रति शिष्यभावः ॥ ३५ ॥

(पदान्तरं गत्वा।) कोऽयं कमलापीडसदनप्राकारादवतीर्य पर्यायस्खलितचरणस्तरुण इत एवाभिवर्तते। (निपुणं निरूप्य स्वगतम्।) कोऽन्यो वसन्तकादृतेऽस्मन्मित्रादेतादृशे चरित्रे प्रगल्भः। (प्रकाशम्।) सखे वसन्तक, चिराय शीतलयसि मे लोचने। सत्रासगद्गदं किं ब्रवीषि—'वयस्य, मन्दं मन्दं जल्प' इति। सखे, कुतस्ते भयमिदम्। किं ब्रवीषि—'कमलापीडात्' इति। सखे, मा भैषीः। (हस्ते गृहीत्वा।) तिष्ठतु कमलापीडानां शतं सहस्रमयुतं वा।

जिष्णुर्वा विष्णुर्वा स्रष्टालिकदृष्टिरष्टमूर्तिर्वा।
स्प्रष्टुं वा प्रष्टुं वा मत्सखमीष्टेऽपि नान्ततो द्रष्टुम् ॥ ३६ ॥

(कतिचित्पदान्यतिक्रम्य।) कथमद्यापि विकम्पसे। किं ब्रवीषि—

'उद्यत्करालकरवालतडित्कराग्र-
मुद्भ्रान्तभीमतरशोणितशोणदृष्टिम्।
उद्दण्डदण्डधरदुर्धरचाण्डिमान-
मुद्वीक्ष्य तं कथय हन्त न कम्पते कः ॥ ३७ ॥' इति।

सत्यम्। तथाविध एव कमलापीडः। किंतु दूरप्रवासिनस्तस्यासंभावितमालोकनम्। अथवा स्वप्नविजृम्भितमेतत्प्रियसखस्य भवितव्यम्। किं ब्र-

१. 'विश्रम्य कान्ता परिक्लान्ता' ख-ग. २. 'प्रान्तेक्षणं शेरते' ख, 'प्रान्ताक्षि संशेरते' ग. ३. 'वीरायितेन' ख. ४. 'इति' क-ग. ५. 'पर्याय' ख-ग-पुस्तकयोर्नास्ति. ६. 'चकोरतरुण इवायाति' ख-ग. ७. 'नयने' ख-ग. ८. 'वयस्य' क-पुस्तके नास्ति. ९. 'हस्तं' ख-ग. १०. 'वत्सर्बालष्ठेऽपि' ख. ११. 'शोणितकोण' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीषि—'वयस्य, नायं स्वप्नः' इति । कथं तर्हि तव पुनरागमनम् । किं तावत् 'अणुमात्रमपि नात्र मया मिथ्या वचः कथ्यते । सत्यं दूरप्रवासीति । अहमपि तथैव दूतीवचनलम्भितविस्रम्भतया तया सममसमशरसंभ्रमसंभृत-हृदयो यथापूर्वं तैस्तैर्विलासैर्विलासगृहविद्रुमचरणपर्यङ्कपर्यन्त एव शयानो निःशङ्को निशामनैषम् । अयं तु कमलापीडहतकः प्रच्छन्न एव कदा वागत्य निजकलत्रवृत्तपरिशोधनाय कुत्र वा निलीय स्थित इति नावेदिषम् । ततो निशावसाने निःशङ्कमेव तस्मान्निशान्तान्निर्गतः प्राङ्गणगतं तं घातुकमपश्यम्' इति । वयस्य, कष्टं कष्टम् । कथं पुनर्निष्क्रान्तोऽसि । किं ब्रवीषि—

'स मां दृष्ट्वा हन्तुं करधृतकृपाणः प्रचलितो
बहिर्द्वारं यावत्त्वरितमरुणज्जालमहतकः ।
अहं दैवात्तावत्कथमपि चलन्निष्कुटपथा-
दुदग्रप्राकारं लघु समतिलङ्घ्यागत' इति ॥ ३८ ॥

दिष्ट्या पुनरपि जातं वयस्येन । किं ब्रवीषि—'विशेषतः प्राणसंरक्षकं प्रियसखमुपलभ्य' इति । भवतु तावत् । तिष्ठ[1] । कोऽयं कमलापीडसदनाङ्गणे कलकलः । (श्रुतिमभिनीय सगद्गदम् ।) किं ब्रवीषि—'सखे, नूनं कमलापीडेन खड्गपाणिना सा मत्प्राणवल्लभा कलवाणी व्यापादिता । तत्कृतोऽयममन्दः परिजनाक्रन्दः । हा प्रिये कलवाणि, हा मदर्थत्यक्तजीविते, हा मत्प्राणवल्लभे, कथं पत्यपदेशेन पापीयसा मृत्युना दुर्दशां नीतासि । अथवा किमिति पतिरिहोपालभ्यते । किंत्वहमेव तावदुपालभ्भ्यः ।

कण्ठाश्लेषं शशिमुखि मया तन्वता दोरहिभ्यां[2]
प्राणान्पातुं प्रणयगरलं नूनमापूरि गात्रे ।
नो चेत्पूर्वं यदमृतमयं नेत्रयोर्गात्रमासी-
त्तत्ते भर्तुः कथमिव भवेत्तादृशामर्षपात्रम् ॥ ३९ ॥' इति ।

वयस्य, कलकलमात्रेण कथमेवमधीर[3] इवासह्यशोकपावके पतितोऽसि ।

---

१. 'तिष्ठ तिष्ठ' ख. २. 'दोर्युगाभ्यां' ख, 'दोरगाभ्यां' ग. ३. 'कथमापीतमदिर इव' ख, 'कमापीतहृदय इव' ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नात्मनः प्राणान्गणयसि । किं ब्रवीषि—'सखे, किं ममापि प्राणेष्वभिष्वङ्गः । येनैवं

त्रैलोक्याद्भुतजीवरत्नम[1]चलां स्वप्राणनाडीं पतिः
किं कुर्यात्कुपितोऽपि तामिति मया दुस्तर्कवे[2]क्रात्मना ।
जाल्मेनानुपकारिणा जडधिया भूयः कृतघ्नेन म-
त्प्राणा एव निरीक्षिता न तु पुनः प्राणप्रिया रक्षिता ॥४०॥' इति[4] ।

(स्वगतम् ।) कथमप्रतिकारशोकवेगः संवृत्तो वयस्यस्य । किमत्र कर्तव्यम् । इत्थं तावत्कथयामि । (प्रकाशम् ।) वयस्य, तत्त्वतः कमलापीडस्य तस्यां प्रवृत्तिमनवेक्ष्य के[3]वलेन कलकलेन किमप्यमङ्गलमुत्प्रेक्ष्य गदितुमेवमनुभवितुं वा क्लेशमनुचितम् । तदेहि । कलवाणीवृत्तान्तं तत्त्वतो ज्ञास्यावः' इति । (कतिचित्पदानि गत्वा विलोक्य च ।) वयस्य, पश्य कोऽयं कक्षान्तरनिक्षिप्तकृपाणद्वि[5]तीयोऽर्धावगुण्ठितमूर्धा इ[6]त एव सत्वरमायाति । (निर्वर्ण्य ।) किं ब्रवीषि—'सखे, अयं मदनुचरः कलकण्ठो म[7]दवलोकनोत्कण्ठो जवादभिपतति । यः किल निशीथे कलवाणीविलासगृहं प्रविशता मया मदीयकृपाणं [8]प्रदाय बाह्यकक्षान्तरे म[9]म रक्षणाय निक्षिप्तः' इति । भवतु । एनमेव पृच्छावः । [10]अरे कलकण्ठ, इत इतः । खड्गमुत्तंसयन्प्रणम्य किं ब्रवीषि—'सम्मक्खु अणुट्ठिदं देवस्स वअस्सेण म[11]म सामिणा णि[12]अघातादिण्णजीविदंवि जणं परिहरिअ अत्ताणं रक्खअन्तेण ।' (क) इति । (स्वगतम् ।) कथमयं वयस्यमुपालभमानः कलवाणीगतं किंचिद[13]शुभं

(क) सम्यक्खल्वनुष्ठितं देवस्य वयस्येन मम स्वामिना निजघातदत्तजीवितमपि जनं परिहृत्यात्मानं रक्षता ।

१. 'अमलां' ख-ग. २. 'धौतात्मना' ख-ग. ३. 'केवलं' ख-ग. ४ 'इति' क-पुस्तके नास्ति. ५. 'द्वितयः' ख-ग. ६. 'इत एव' ख-ग-पुस्तकयोर्नास्ति. ७. 'मदवलोकनकृतोत्कण्ठो' ख-ग. ८. 'आदाय' ख. ९. 'ममैव' ख-ग. १०. 'अरे' ख-पुस्तके नास्ति. ११. 'अम्हे' ख. १२. 'णिअपादविसण्ण' ख. 'निजपादविषण्ण' इति तच्छाया. १३. 'अशुभं शुभं वा न' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिशुनयति । (प्रकाशम् ।) अरे मूर्ख, किं दुःखितमेव वयस्यं पुनरेवमरुंतुदैर्वचनैर्दुःखयसि । किं ब्रवीषि—'किंदि दुक्खिदो दे वअस्सो ।' (क) इति । केनापि न रक्षिता निजवल्लभा कमलापीडेन व्यापाद्यमाना कलवाणी । किं ब्रवीषि—'अह इं । केणावि ण रक्खिदा सा–' (ख) (इत्यर्धोक्ते ।) वयस्य, सास्रगद्गदं किं ब्रवीषि—

'द्वाभ्यामाभ्यां कुवलयमयी मालिका मत्कराभ्यां
यस्मिन्क्रीडाविधिषु निहिता सस्पृहं सानुकम्पम् ।
सोऽयं कण्ठः कनककदलीकन्दलीगर्भसारः
कान्ते जातः कथमसिलताघोरपातस्य पात्रम् ॥ ४१ ॥' इति ।

(स्वगतम् ।) कथं वयस्यमाश्वासयामि ।

शोकं त्यजेति परुषं किमितः शुचेति
निन्दानुशोचनविधिर्बहुशोकहेतुः ।
मौनं कृपाविधुरता कथमात्तशोक-
माश्वासयन्ति सुहृदं सुहृदो न विद्मः ॥ ४२ ॥

(प्रकाशम् ।) वयस्य, निःशेषमसंबद्धप्रलापिनोऽस्य वचनमनाकर्ण्य न युक्तमेवं विलपितुम् । अरे, किं ब्रवीषि—'एव्वं णेदम् । एसो मह वअणं समग्गं ण सुणादि' (ग) इति । समग्रमेव तावत्कथय । किं ब्रवीषि—'सुणिअदु दाव । एदं कहिअदि । ण केणावि रक्खिदा सा अप्पणो बुद्धिमन्दरेण' (घ) इति । वयस्य, तव प्रियतमात्मनो बुद्ध्या रक्षितेत्युक्तं भवति । तदलममङ्गलेन शोकेन । तत्प्रकारमेव पृच्छावः । (इति पटाञ्चलेनाश्रूणि परि-

(क) किमिति दुःखितस्ते वयस्यः ।

(ख) अथ किम् । केनापि न रक्षिता सा ।

(ग) एवमिदम् । एष मम वचनं समग्रं न शृणोति ।

(घ) श्रूयतां तावत् । एतत्कथ्यते । न केनापि रक्षिता सात्मनो बुद्धिमन्तरेण ।

१. 'मे वयस्यं' ख. २. 'कमलकदली' ख. ३. 'दूरघातस्य' ख-ग. ४. 'आकर्ण्य' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृज्य कलकण्ठमालोक्य च ।) अरे कलकण्ठ, किं सा विनिष्क्रम्य सौभाग्यवीथिकां प्रविष्टा। यत्र भर्तुः क्षितिभर्तुर्वा भयं न भवति स्वैरिणीनाम्। वयस्य, किं ब्रवीषि—'यदि[1] गणिकासरणिमवतरति मदनकरिणी[2] सा तरुणी तदा

सौधे सुधाकिरणचुम्बिनि लम्बमान-
मुक्तावितानवति मञ्चतले शयानः।
आरोप्य वक्षसि ममानिशमायताक्षी-
मज्ञातरात्रिदिनभेदमहं वसेयम् ॥ ४३ ॥' इति।

(कलकण्ठमालोक्य ।) अरे, किं ब्रवीषि—'देव, एव्वं णेदम्।

धम्मिल्लअं सिरिमुहं हसिअं विआसि
णेत्ताथि सोणमहरं अ घणत्थणे अ।
ताए विलोइअ सआविदिणं दिणंति
जाणादु को णु खु कहंवि णिसं णिसेति ॥ ४४ ॥

किदु तह ताए ण किदम्' (क) इति। तर्हि ततः किं कृतं कलवाण्या। किं ब्रवीषि—'देव, जाव इमो घरादो णिग्गदुअ तुवरिदं घरवणपहेण चलिदो दाव एव्व सा चदुरा अत्तणो आहरणाइं कहिंवि णिक्खिविअ णिअवक्खताडणपुव्वअं इमो इमो चोरो मह आहरणाइं आहरिअ गच्छइ। हा, हदम्हि। सुवो एव्व दूरदेसादो आअदे अज्जउत्ते किं करिस्सम्। किं कहइस्सम्। का गई। को णु सरणं ति अदिमेत्तं अक्कन्दन्ती

(क) देव, एवमेतत्।

धम्मिल्लकं श्रीमुखं हासितं विकासि
नेत्रे च शोणमधरं च घनस्तनौ च।
तस्या विलोक्य सदापिदिनं दिनमिति
जानातु को नु खलु कथमपि निशां निशेति ॥

किंतु तथा तया न कृतम्।

1. 'तथा यदि' ख-ग. 2. 'मदनमकरिणी' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्सुधाराकिलिण्णलोअणा सअण्णादो णिग्गदा' (क) इति । (सबहुमानम् ।) साधु कलवाणि, साधु । वयस्य, अन्यादृशमेव खलु पतिप्रतारणचातुर्यमस्यास्तव प्रेयस्याः । (कलकण्ठं प्रति ।) ततस्ततः । किं ब्रवीषि—'तदो सोवि कमलापीडो सव्वं चोरचरिअं एव्व मण्णन्तो अइ हिअअवल्लहे, मा होहि, मा होहि भआउला । एसो दे रक्खिदा संणिहितो कमलापीडोत्ति भणिअ तं एव्व घरवणं किवाणपाणि पविट्ठो । अहंवि दाव एव्व सुण्णद्धण्णकुम्भट्ठिदो लहु णिग्गमिअ देवपाअसण्णिहिं आअदोम्हि' (ख) इति । वयस्य, सा तव पुरातनपुण्यविभवेन विपदमिमाम[1]तीतवती नितम्बिनी । किं ब्रवीषि—'तस्या एव नैपुण्यविभवेनेति वक्तव्यम्' इति । भवतु । तथैव [2]यथाभिलषितं भवतः । (पदान्तरं गत्वा अङ्गुल्या निर्दिश्य ।) [3]इयं

बिभ्राणा दरशिथिलां करेण नीवीं
निश्वासस्फुरितकुचौ मुहुः स्पृशन्ती ।
पश्यन्ती चकितमितस्ततो मृगाक्षी
पर्यायस्खलित[4]पदं प्रयाति तूर्णम् ॥ ४९ ॥

किं ब्रवीषि—'किं न जानासि । इयं [5]रत्नगुप्तस्नुषा' इति । तर्हि जानामि । इयं किल

---

(क) देव, यावदसौ गृहान्निर्गत्य त्वरितं गृहवनपथेन चलितस्तावदेव सा चतुरात्मन आभरणानि कुत्रापि निक्षिप्य निजवक्षस्ताडनपूर्वकम् 'अयमयं चोरो ममाभरणान्याहृत्य गच्छति । हा, हतास्मि । श्व एव दूरदेशादागते आर्यपुत्रे किं करिष्यामि । किं कथयिष्यामि । का गतिः । को नु शरणम्' इत्यतिमात्रमाक्रन्दन्त्यश्रुधाराक्लिन्नलोचना सदनान्निर्गता ।

(ख) ततः सोऽपि कमलापीडः सर्वं चोरचरितमेव मन्यमानः 'अयि हृदयवल्लभे, मा भव, मा भव भयाकुला । एष ते रक्षिता संनिहितः कमलापीडः' इति भणित्वा तदेव गृहवनं कृपाणपाणिः प्रविष्टः । अहमपि तावदेव शून्यधान्यकुम्भस्थितो लघु निर्गम्य देवपादसंनिधिमागतोऽस्मि ।

---

१. 'अतिर्नीतवती नितम्बवती' ख-ग. २. 'यथाभिमतं' ख. ३. 'कासौ येयम्' ख-ग. ४. 'पदापि याति' ख, 'पदानि याति' ग. ५. 'रत्नगुप्तस्य' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्ये सत्यपि जातु याति न बहिर्नाप्यन्यमालोकते
साध्वीरप्यनुकुर्वती[1] गुरुजनं श्वश्रूं च शुश्रूषते ।
विस्रम्भं कुरुते च पत्युरधिकं प्राप्ते निशीथे पुन-
र्निद्राणे निजभर्तृबन्धुनिवहे[2] निर्याति रन्तुं विटैः ॥ ४६ ॥

किं ब्रवीषि—

'एषैव योषितां धन्या शीलं च लभते सुखम् ।
दिवा पतिव्रता भूत्वा[3] नक्तं च कुलटायते ॥ ४७ ॥' इति ।

वयस्य, सम्यगुक्तम् । (परिक्रम्य विलोक्य च ।) वयस्य, पश्य पश्य । इयमिह

अङ्गुष्ठतर्जनीभ्यामधरं धृत्वा विलोकयत्यबला ।
कुचयुगमुद्धृतसिचयं[4] पश्यति भावयति परिमृशत्यपि च ॥ ४८ ॥

सखे, इतः पश्य ।

एकं विश्लथकेशपाशनहने व्यापारयन्त्याः करं
श्वासोत्कम्पिकुचस्थलीपरिचलच्चेलाञ्चले[5] चापरम् ।
अस्याः स्रंसिनि[6] लोलरत्नरशनालग्ने शनैरंशुके
मन्दं मन्दमिवाविरस्ति नयनानन्दाय नाभीसरः ॥ ४९ ॥' इति ।

(अन्यां निर्दिश्य ।)

आलग्नैश्चरमाङ्गके त्रिचतुरैः शय्याप्रसूनैरियं
शङ्के[7] रन्ध्रगवेषिणा निजशरैर्विद्धेति पञ्चेषुणा ।
मीलल्लोचनशोणकोणचपलप्रस्निग्धतारं मुखं
शीत्कारस्फुरिताधरं च सुतनोरस्या यदुत्ताम्यति ॥ ५० ॥

(क्षणमात्रं विचिन्त्य ।) किं ब्रवीषि—'सखे, किंचित्पृच्छामि यदि सत्यमेव

१. 'अनुकुर्वते' ख-ग. २. 'निखिले जने शशिमुखी निर्याति' ख-ग. ३. 'भूयो नक्तं च कुलटा यतः' ख-ग. ४. 'कुचकलशयुगलमुद्धृतसिचया पश्यति परामृशत्यपि च' ख. ५. 'परिगलत्' ख-ग. ६. 'स्रंसति' ख, 'स्रंसित' ग. ७. 'मन्ये' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथयसि, न वञ्चयासि' इति । वयस्य, किंचित्कदापि किं कथितपूर्वमसत्यम्, येनाधुनाप्यसत्यकथनेन[1] वञ्चयामि । किं ब्रवीषि—

'कार्श्यं दधाति गात्रं गमयति निद्रालयं च नेत्रान्तः ।
विरहदहनातिरेकं विवृणोति श्वसितमारुतोऽपि तव ॥ ९१ ॥

किमत्र कारणम्' इति । (स्वगतम् ।) कथं कृतावहित्थोऽप्यहमनेन विदितोऽस्मि । (प्रकाशम् ।) अस्ति कारणम् । (कर्णे ।) एवमिदम्[2] । किं ब्रवीषि—'अद्यैव पुरोहितपुत्रं वीतिहोत्रमाश्रयस्व' इति । किमद्याश्रयण-[3]मस्ति । स मे बालमित्रं पुरोहितपुत्रः । किं ब्रवीषि—'तर्हि स[4] भवतो विदितवृत्तान्तः कार्तान्तिकशिरोमणिः स्वयं कंचिदन्तरायं पिशुनयंस्तस्याः पतिगृहगमनं निवारयति' इति । वयस्य, साधु मन्त्रितम् । क्व पुनरद्य पुरोहितपुत्रः । (सविमर्शम् ।) किं ब्रवीषि—'तेन नियतमद्य देवतार्चनाय कुसुमान्यवचिन्वता पुरोद्याने स्थातव्यम्' इति । कलकण्ठ, किं ब्रवीषि—'चेडिआअच्चणायेत्ति भणिदव्वम्' (क) इति । आः दुर्मते, पूजार्हेष्वपि यत्किंचित्प्रलपसि । किं ब्रवीषि—'कहं पूआअरिहो सो, सन्दिहोमबलिकम्मएसु जं दक्खिणेत्ति दविणं गहिअदि तप्पणीकदुअ मत्थएण जो चेडिआणं चरणाइं वन्दइ' (ख) इति । वयस्य, त्वमपि किं ब्रवीषि—'सखे, एवमेतत् ।

विस्फूर्जत्तिमिरे कुटीरकुहरे दृङ्मीलितोन्मीलितै-
रायासेन पुरीपुरोहितसुतैस्तावन्निशा नीयते ।
सायं स्वीकृतदक्षिणावसुपणो[5] यावन्निजस्वामिनी-
प्रस्वापावधिकोपचारनिरतो नाभ्येति दासीजनः ॥ ९२ ॥' इति ।

(सोपहासम् ।) वयस्य, न जानासि ।

(क) चेटिकार्चनायेति भणितव्यम् ।

(ख) कथं पूजार्हः सः, शान्तिहोमबलिकर्मकेषु यद्दक्षिणेति द्रविणं गृह्यते तत्पणीकृत्य मस्तकेन यश्चेटिकानां चरणानि वन्दति ।

१. 'असत्यवचनेन' ख-ग. २. 'एवमिति' ख-ग. ३. 'आश्रयणीयं' ख-ग. ४. 'स एव' ख-ग. ५. 'हा' ख.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गणिकानिशान्तघटचेटिकाविटाः
कतिचित्परे पुनरयं तु मे सखा।
सफलीकरोति परयोषिदुन्नत-
स्तनकुम्भिकुम्भपरिरम्भणैरुरः ॥ ५३ ॥

तदहमुद्यानं गत्वा पुरोहितपुत्रमन्वेषयामि। क्व पुनरितो गच्छति वयस्यः। किं ब्रवीषि—'वेशवाटीम्' इति। सन्तु शुभास्ते पन्थानः। (कतिचित्पदान्यतिक्रम्य।) इयं खलु विशृङ्खलमदावष्टम्भविजृम्भमाणमदनधनुष्टंकारशङ्कावहमधुपझंकारमुखरशिखरा ललितरसालकिसलयास्वादसुहितपरभृतकुलबहुलकोलाहला मन्दमन्दस्यन्दमानमकरन्दबिन्दुसंदोहपरिपूरितकुसुमपरागपरम्परापरिकल्पितालवालरेखा विभाति वनरेखा। (वनप्रवेशं नाटयित्वा विलोक्य।) अत्र हि

परागपालीघनसैकतासु मन्दं मिलिन्दा मधुवाहिनीषु।
क्रीडन्ति मन्दानिलकर्णधारसंचार्यमाणप्रसवप्लवासु ॥ ५४ ॥

(अन्यतो विलोक्य।) आप्रभातमिहैव विहरन्ति पौरजारिण्यः।

एतान्यङ्गजकेलिभग्नवलयान्येषा परिष्कारभू-
रेतत्पल्लवतल्पमेष चिकुरस्रस्तःप्रसूनोच्चयः।
एषा विस्मृतहारयष्टिरिदमालिप्तं पदं लक्तकै-
रेताः कामुकलोकपादकमलन्यासैकधन्या भुवः ॥ ५५ ॥

(पदान्तरं गत्वा।) कथमियमुद्यानपालिका मरालिका। सखि मरालिके, किमत्र कुसुमावचयार्थमागतो वयस्या मे वीतिहोत्रः। किं ब्रवीषि—'अह इं। दाणिं एव्व कुसुमपुडिआहत्थो दक्खिणदो रुक्खवाडीं पविट्ठो' (क) इति।

---

(क) अथ किम्। इदानीमेव कुसुमपुटिकाहस्तो दक्षिणतो वृक्षवाटीं प्रविष्टः।

---

१. 'तथा सखा' ख. २. 'वेश्यावाटीम्' ख-ग. ३. 'सुखित' क. ४. 'हस्तकः' क. ५. 'कथमिहोद्यान' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमेव पन्थानं दर्शय। किं ब्रवीषि—'इदो' (क) इति । (पदान्तरं गत्वा ।) सखि, पश्य ।

यथा यथायं मकरन्दपूरैरापूरयत्याम्रतरुः प्रकामम् ।
तथा तथा मन्दमरुत्परागैरुद्भ्रमयत्युन्नतमालवालम् ॥ ९६ ॥

(निर्दिश्य ।)

कुसुमरसबिन्दुपूरे बम्भरगम्भीरधीरझंकारे ।
मञ्जुलरसालपुञ्जे सरसा विहरन्ति सरसमिह कुञ्जे ॥ ९७ ॥

किं ब्रवीषि—'णं आणामि ।' (ख) ('कुसुमरसबिन्दुपूरे' इत्यादि पठति । पुनरन्यतो विलोक्य सविषादमिव ।)

अस्मिन्निष्पतितोष्णबाष्पसलिलम्लानाङ्कुरे केवलं
क्लृप्ता वल्लभविप्रलब्धसुदृशा संकेतकुञ्जोदरे ।
कंदर्पासिनिकृत्तगात्रपतितस्त्यानामिषप्रोञ्छय-
श्रेणीवेयमशोकपल्लवमयी शय्या दरीदृश्यते ॥ ९८ ॥

किं ब्रवीषि—'इदो पेक्ख, इदो पेक्ख । इमो दे वअस्सो' (ग) इति । (दृष्ट्वा सहर्षम् ।) कथमग्रत एव वयस्यः ।

आलम्बिपुष्पपुटकेन करेण शाखा-
मालम्ब्य तत्क्षणसमुच्चलितालिजालाम् ।
उद्यम्य दक्षिणकराग्रमुदीक्षमाणः
पुष्पाण्यसाववचिनोति कुरण्टकस्य ॥ ९९ ॥

(उपसृत्य ।) वयस्य—(इत्यर्धोक्ते । ससंभ्रमं शाखामुत्सृज्य क्षणमवलोक्य च ।) किं ब्रवीषि—'सखे, संप्रति दुर्विज्ञानं तवाभिज्ञानम् । यतः ।

(क) इतः ।
(ख) ननु जानामि ।
(ग) इतः पश्य, इतः पश्य । अयं ते वयस्यः ।

१. 'इदो इदो इति' ख-ग. २. 'समसंस्कृतप्राकृतम्' इति ख-पुस्तके टिप्पणम्. ३. 'सुदृशः' ख-ग. ४. 'इदो' ख-ग-पुस्तकयोर्नास्ति. ५. 'तवाभिज्ञानम्' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामं कृशैरवयवैः परिपाण्डुरेण
गण्डस्थलेन च भृशालसया दृशा च ।
बिम्बाधरेण च मुहुर्मसृणीकृतेन
मन्ये भवन्तमधुना भवदन्यमेव ॥ ६० ॥

किंचान्यत् ।

आरक्तमर्धपरिमृष्टनवाश्रुपूरं
पक्ष्मावपातभरदुष्प्रसरावलोकम् ।
एतत्तवाक्षियुगलं विवृणोति कान्ता-
विश्लेषजं किमपि दुःखमसह्यवेगम् ॥ ६१ ॥

तत्किं प्रस्थिता मञ्जरी पतिभवनम्' इति । (स्वगतम् ।) कथमयं जानात्येव प्रथममकथितमपि रहस्यम् । अथवा दैवज्ञानां किमविज्ञातमस्ति । (प्रकाशम् ।) अपि नाम पश्यसि ज्योतिःशास्त्रेण चक्षुषा मे चरितम् ।

यन्न वेत्ति परः किंचिदेकां मुक्त्वा जटावतीम् ।
या निष्कुटवने तन्वीं मया तां समयोजयत् ॥ ६२ ॥

(विहस्य ।) किं ब्रवीषि—'किमेतत्परिज्ञानार्थमपि ज्योतिःशास्त्रं चक्षुरपेक्षितम् । यतः ।

क्रीडा परस्त्रीषु कियद्भिरेव दिनैर्निगूढापि न गूढिमेति ।
पङ्के निखातापि गभीरतोये पाथोजिनी किं न समुज्जिहीते ॥६३॥' इति ।

यद्येवं तर्हि किमिति न परिहरन्ति न परिवदन्ति च पद्ममुखीम् । किं ब्रवीषि—'मा मैवं वादीः ।

सुचरितमीदृशमखिलं सर्वे जानन्ति सर्वेषाम् ।
न तु परिवदन्ति निपुणाः स्फुटतरमेते परस्परत्रासात् ॥ ६४ ॥

तत्कतिपयैरेव दिवसैरियं स्वयं परिहरिष्यति सकलमपि बन्धुकुलम्' इति । (निःश्वस्य ।) वयस्य, अतः परमखिलमपि संभावयामि, यदि तावदिदानीं शार्दूलवदनबिलादवगलति सा हरिणाक्षी । किं वदसि—'सखे, नक्तमेवोक्तं

१. 'निरूढिमेति' ख-ग. २. 'वयस्य' ख-ग-पुस्तकयोर्नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वयि स्नेहवत्या जटावत्या । वत्स, तथा प्रयतितव्यं यथा मन्दारदुहिता मञ्जरी पतिमन्दिरकन्दरभाजनं न भवेत् । तत्प्रथममुपदेशो भगवत्या जटावत्याः । तदुपरि प्रियसुहृदो निदेश इत्युभयथाप्यवश्यं करणीयमेव मे मञ्जरीगमनभञ्जनम्, तव च मनोरञ्जनम्' इति । (स्वगतम् ।) अहो मयि भगवत्या जटावत्याः प्रसादातिशयः, यदेवमप्रार्थिताप्यननुयुक्ताप्यात्मनैव कृतप्रयत्ना ममैव हितमातनोति । (प्रकाशम् ।) इत्थं कृतनिश्चये त्वयि तावदस्माकं

सहजप्रेमसंरसे स्वभावचतुरे जने ।
किमर्पितात्मभाराणां वक्तव्यमवशिष्यते ॥ ६५ ॥

तदद्य सत्वरमेव त्वया गन्तव्यम् । किं ब्रवीषि—'अहं गच्छामि' इति । (विलोक्य ।) कथमतिक्रान्त एव प्रियमित्रेण प्रमदवनपर्यन्तः । मरालिके, किं ब्रवीषि—'इदो कमलमित्तेण मित्तेण अक्कन्दो पुव्वगिरिपज्जन्तो' (क) इति । (प्राचीमवलोक्य ।)

घटमानकोककुचमामृशन्करैर्विकसत्पयोजनयनावलोकितः ।
परिचुम्बतीदमरुणप्रभाधरं रविरद्य वारवनितामुखं मुहुः ॥ ६६ ॥

अथवा ।

भूयो निपीय लवणाम्बुधिमाप्रभातं
पुञ्जीभवन्नुदयते तपनच्छलेन ।
और्वाग्निरम्बरपयोनिधिमद्य पातुं
लीनोडुबुद्बुदकदम्बमिति प्रतीमः ॥ ६७ ॥

(वामतोऽवलोक्य ।)

उन्निद्रपद्मकोशादुद्गच्छन्ती शनैरविच्छिन्ना ।
इयमिह मधुपश्रेणी स्मरकरखड्गश्रियं वहति ॥ ६८ ॥

---

(क) इतः कमलमित्रेण मित्रेणाक्रान्तः पूर्वगिरिपर्यन्तः ।

---

१. 'रसिके' ख-ग. २. 'भयं' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रवीषि—'तक्खु पुव्वदिणविअसिअं सरसिअम्, जदो उग्गयहि महुअरश्शेणी' (क) इति। यद्येवमद्यैव विकसितं कमलाविलसितं दर्शय मे कमलम्। (निर्दिश्य।) किं ब्रवीषि—'एदं पेक्ख। जत्थ (ख)

इन्दिरावरविहारमन्दिरे मन्दमन्दमरविन्दकंदरे।
गन्धतुन्दिलमरन्दसुन्दरे बम्भरा इह चरन्ति बन्धुरे॥ ६९॥'

इति। (सशिरःकम्पं तदेव पठित्वा।) सखि, कथमपूर्वमेव कथयसि समसंस्कृतप्राकृतं हृद्यं पद्यम्।

कराग्रहादब्जिनि केवलं ते विभुर्विवस्वानिति लोकवादः।
आप्रातरासायमपास्तशङ्कं भुङ्क्ते रसं भूरि मिलिन्द एव॥ ७०॥

किं च।

जन्मारभ्य प्रतिकलमसावारजोदर्शनं ते
भ्राम्यन्भृङ्गः क्षणगणनया वासरानत्यनैषीत्।
त्वं तूद्भिन्ने रजसि मरुता दक्षिणेनासि भुक्ता
सोढव्यं तत्कमलिनि कथं तेन लोकेन वापि॥ ७१॥

(पुनर्विलोक्य।)

आलिप्ताः कुसुमपरागभस्मनामी
कापालव्रतमिव काममाचरन्तः।
गायन्तः किमपि मधूनि भिक्षमाणा
गाहन्ते कमलगृहाङ्गणानि भृङ्गाः॥ ७२॥

(पदान्तरं गत्वा।) अयि, पश्य तावत्। एष पौराणिको मुद्गलभट्ट इत एवाभिवर्तते। किं ब्रवीषि—'जाणामि णं गूढपाछ्रविअम्। अअं क्खु

(क) तत्खलु पूर्वदिनविकसितं सरसिजम्, यत उद्गच्छति मधुकरश्रेणी।

(ख) एतत्पश्य। यत्र।

१ 'विकसितकमल' क. २. 'बन्धुरे' ख-ग. ३. 'सुन्दरे' ख-ग. ४. 'कलयसि' क. ५. 'गृहान्तराणि' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तह तह पढइ पुराणं तह तह वक्खाइं अत्थेवि ।
तह तह पेक्खइ किद्वो जह जह रज्जन्दि बालविहवाओ ॥ ७३ ॥

एदं क्खु सुणिदं जं मुग्गलभट्टोत्ति । किंदु चिदम्बरभटोत्ति एव्व किल एदस्स णाम' (क) इति । सत्यं चिदम्बरभट्ट इति तातकृतं नाम । गुर्जरास्तु मुद्गलभट्ट इत्याह्वयन्ति। भवतु तावत्। एनमालापयामि । (उपसृत्य । एकं हस्तमुत्तंसयन्।) पौराणिक, प्रणम्यसे भुजंगशेखरेण । किं ब्रवीषि—'सकलरतिकलादेशिकेऽपि त्वयि कामाशिषमाशास्महे' इति । (सविनयम् । कथमलीकवचोभिरेव मयि गौरवमारोपयसि । किं ब्रवीषि—'अपि नाम ममापि वचनमलीकं संभावयसि । स्मरसि तावदिदानीं त्वमेव

उत्ताने शयने ललन्नुपहसन्नव्यक्तमालापय-
न्बाल्येऽपि व्रजसुभ्रुवां रतिकलाः किं कृष्ण नोपादिशः ।
या दोलावलनच्छलादुपरि ते व्यातेनुरुत्कण्ठया
यत्किंचित्क्रममुच्चलत्कुचकचश्रेणीकमेणीदृशः ॥ ७४ ॥' इति ।

भवतु । कस्य गृहमद्य पवित्रीकर्तुमुद्यमः। किं ब्रवीषि—'गुर्जरस्य निर्जरदासस्य गृहम्' इति । (स्वगतम् ।)

एष नक्तंदिवं तस्य मन्दिरं न विमुञ्चति ।
कलावत्यक्षियुगलमलोहनिगडं यतः ॥ ७५ ॥

(प्रकाशम् ।) तर्हि गृहिणीमिति वक्तव्यम् । किं भणसि—'सा खलु विश्रुतपुण्यचरिता शक्नोति जगदेव पवित्रीकर्तुम्' इति । (सकौतुकम् ।) कथय तस्याः पुण्यचरितम् । किं वदसि—

(क) जानाम्येनं गूढपाल्लविकम् । अयं खलु
तथा तथा पठति पुराणं तथा तथा वक्ष्यत्यर्थानपि ।
तथा तथा प्रेक्षते कितवो यथा यथा रज्यन्ते बालविधवाः ॥ ७६ ॥
एतत्खलु श्रुतं यन्मुद्गलभट्ट इति । किंतु चिदम्बरभट्ट इत्येव किलैतस्य नाम ।

१. 'रति' ख-ग-पुस्तकयोर्नास्ति. २. 'मम' ख-ग. ३. 'उत्तानं' ख-ग. ४. 'कस्य वा' ख-ग. ५. 'विश्वतः पुण्य' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'मध्यं विष्णुपदं कुचौ शिवपदं वक्त्रं विधातुः पदं
धम्मिल्लः सुमनःपदं प्रविलसत्काञ्ची नितम्बस्थली ।
वाणी चेन्मधुराधरोऽरुणधरः श्रीरङ्गभूमिर्वपु-
स्तस्याः किं कथयामि पुण्यचरितं मान्या सदा निर्जरैः ॥७६॥' इति ।

(सबहुमानम् ।) तत एव तत्रभवान्महीयते । भवतु । तत्रभवति कीदृशी तस्या मनोवृत्तिः । किं ब्रवीषि—'किमपूर्वमिव पृच्छसि ।

पुरुषोत्तमाय भवते देवायेदमिति मे समर्पयति ।
सायंतननीराजनसमये वीटीशतं वधूटी सा ॥ ७७ ॥' इति ।

सत्यं जानामि ।

धर्मोपदेशगुरुरित्यखिलान्प्रतार्य
बाह्योपचारशतमातनुते नतभ्रूः ।
अभ्यन्तरे तु रतिदेशिक इत्यनङ्ग-
तत्त्वं तदेव कुरुते गुरुदक्षिणां ते ॥ ७८ ॥

(अनादरमिव ।) किं ब्रवीषि—'सखे, किमेतावतैव मे साम्राज्यम् ।

कूर्पासगूढकुचपङ्कजकुड्मलानां
को नाम शंसति रतिं भुवि गुर्जरीणाम् ।
अज्ञातचोलदुरुपद्रवचोलनारी-
पीनस्तनस्तबकमण्डलदत्तहस्तः ॥ ७९ ॥' इति ।

(आत्मगतम् ।) सर्वोऽपि जनः सजातीयमेव प्रियं मन्यते ।

ये भुवि यज्जातीयास्तज्जातीयासु तेऽनुरज्यन्ते ।
शुकयोषित्पिकयूनोरुदयति किं प्रीतिरन्योन्यम् ॥ ८० ॥

(प्रकाशम् ।) अये, कस्ते चोलनारीषु पक्षपातः ।

चोलच्छन्ना यदि कुचतटी दुर्लभा गुर्जरीणां
कच्छाभावादलघुजघनं तर्हि शक्यावमर्शम् ।
तद्व्यत्यस्तं द्रविडसुदृशामन्ततः किं ततः स्या-
देकत्रैकं भवति सुलभं तद्वदन्यत्र चान्यत् ॥ ८१ ॥

१. 'सखे, किमपूर्वमेव' ख-ग. २. 'अरे' क. ३. 'चोलीषु' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परंतु नक्तंदिवमपि पतिपार्श्ववर्तिनी सा कथमनुवर्तनीया तत्रभवतेति तरलं भवति मे चेतः । किं ब्रवीषि—'यत्किंचिदेतत् । यतः ।

कथितसमये गत्वा गूढं मया लिखिता नखैः
स्वपिति शयने पत्यौ पार्श्वेऽप्यहो परिवृत्य सा ।
तमपि निपुणालिङ्ग्यैवालं भुजालतयैकया
चपलनयना मां च क्रोडीकरोति तदन्यया ॥ ८२ ॥' इति ।

(साश्चर्यम् ।) अहो श्रोत्रियस्य साहसम् । (मरालिकां प्रति ।)

विधत्तां संकेतं विशतु सदनं वा कथमपि
क्रमात्तस्यां गूढं किमपि कुरुतां वा मृगदृशी ।
प्रबुद्धे पत्यौ चेदयमपि भवेत्कीदृशदशो
वराकी वा सा तद्भुजवलयलग्ना सखि तदा ॥ ८३ ॥

पौराणिक, किं ब्रवीषि—'प्रबुद्धेन तेन वा किं कर्तव्यम् ।

गुर्जरीणां कुलाचारक्रमोऽयं यद्गृहे गृहे ।
पौराणिकः पुरोधा वा भृत्यो वा गूढवल्लभः ॥ ८४ ॥

तदलमतिप्रसङ्गेन । साधयामि' इति । साधय, साधय । अहमपि वेशवाटिकां गच्छामि । (मरालिकामालोक्य ।) सखि, पुरोहितपुत्रस्य वीतिहोत्रस्य प्रवृत्तिमचिरेण ज्ञातुमर्हसि । किं ब्रवीषि—'तस्स अ ताए तुह दइआए अ उत्तन्तं सम्मं ओलहिअ तुज्झ अज्ज एव णिवेदेमि' (क) इति । सखि, साधु । गन्तव्यम् । (परिक्रम्यावलोक्य च ।) एषा किल योषाकलभाषाजितरोषावृतकीरायुतकारायितमणिमञ्जुलरुचिपिञ्जरनवपञ्जरमालाशतलीलायुतप्रतिसदनप्रतिहारा पारावतवाराश्रितविटङ्का धारायन्त्रशतसंतानितजलबिन्दुकंकणा कुङ्कुमरसपङ्किलसदनाङ्गणा लङ्केव लक्ष्यमाणा-

(क) तस्य च तस्यास्तव दयितायाश्च वृत्तान्तं सम्यगुपलभ्य तवाद्यैव निवेदयामि ।

१. 'स्वपतिशयने' क. २. 'मग्ना' ख-ग. ३. 'जन' ख-ग. ४. 'रोषाधृत' क, 'रोषायित' ख. ५. 'जलबिन्दु' ख-ग-पुस्तकयोर्नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षविहारा, अयोध्येव रामानुवृत्तभरतप्रचारा, हरमूर्तिरिव भुजंगविभूषिता, सरसीव पद्मिनीप्रचुरा, वनभूमिरिव हस्तिनीकरनमितपुंनागा, कादम्बरीव प्रकटितहेमकूटविस्तारा, नारायणतनुरिव भोगिभोगानुपक्ता, विप्रसभेव श्रुतिमिलितविविधवाद्यारब्धकोलाहला हालामदतरलचेटिकाहस्तविस्रस्तपेटिकागलितवीटिकाकलनचटुलचाटिका वेशवाटिका । (प्रविशति नाटितकेन । किंचित्परिक्रम्य ।) इह हि

चरन्तीनां सौधे चपलनयनानां तनुरुचो
गवाक्षान्तर्वान्ताः कतिचन गृहीत्वा जलमुचः ।
क्षणं गोपायन्ति क्षणरुचिमिषेण क्षणमहो
विवृण्वन्ति स्वर्णं करगतमिवाकिंचनजनाः ॥ ८५ ॥

किं च ।

तारास्तामरसाञ्चलेषु कदलीकाण्डेषु भूमण्डला-
न्यावर्ता गगने शिरःसु फणिनां शैलास्तुषारत्विषाम् ।
बिम्बेष्वम्बुजपत्रचुम्बिषु तमस्तोमास्तदेतत्पुनः
सर्वं हेमलतासु ताः प्रतिगृहं चित्रं प्रतिप्राङ्गणम् ॥ ८६ ॥

(सर्वतोऽवलोक्य ।) अहो रमणीयता बालातपस्य ।

रञ्जयति लोकमखिलं ललितो बालातपप्रसरः ।
सरसयति सदनवापीसारससौरभ्यसंपदप्यभितः ॥ ८७ ॥

(आकाशे ।) किं ब्रूथ—

'इह क्रीडावल्गत्कुवलयदृशामेतदधर-
प्रभावीचीरोचिर्विलसति न बालातपरुचिः ।
असावप्येतासां वदनकमलामोदलहरी
न तु क्रीडावापीसरसिजवनीसौरभझरी ॥ ८८ ॥' इति ।

सत्यमीदृशः किलात्र मृगीदृशः । यतः ।

लब्ध्वाम्भोजे मुखशयपदा दृक्तरङ्गैः सभृङ्गे
दोर्वल्लीभ्यां बिसवति कचैराप्तशैवालजाले ।

---

१. 'वेश्यावाटिका' ख. २. 'गोपायन्तः' क. ३. 'आप्त' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वक्षोबद्धस्तनघनलसत्कुम्भतुम्बीफलाभ्यां
वारस्त्रैणं निजरुचिसरोमण्डले पोप्लवीति ॥ ८९ ॥

(कतिचित्पदानि गत्वा । निर्वर्ण्य ।) कथमत्रैव बालातपमनुभवति लीलावती । अस्याः

आमृश्य नीलकबरीमवसज्य कण्ठे
गाढोपगूढकठिनस्तनकुम्भभारः ।
नीवीमपि श्लथयितुं निभृतं कराग्रै
रागाद्रविः स्पृशति नाभिपदं नताङ्ग्याः ॥ ९० ॥

अपि च ।

बालातपमपमार्ष्टुं बाला पर्युषितकुङ्कुमभ्रान्त्या ।
स्तनतटमार्द्रनखाङ्कं कार्षं कार्षं करेण सीत्कुरुते ॥ ९१ ॥

(उपसृत्य ।) सखि, तव सीत्कारसुधारसाश्चिराय मे श्रवणयोरानन्दं कन्दलयति । साभिमानावहित्थं किं ब्रवीषि—'का तव पुरतः पुरा पुनरद्य वा कृतवती सीत्कारम्' इति । तर्हि विस्मृतम् । वयं तु न विस्मरामः । यतः ।

कान्ते द्यूतजिते तवाधरदले दष्टे सरागं मया
स्वैरस्त्रंसिदुकूलदृश्यजघना तत्रैव लोलेक्षणम् ।
मामुद्वीक्ष्य सरोषलज्जमसकृत्सीत्कारतारं वचो
यत्त्वं जल्पितवत्यलं तदधुनाप्यानन्दयत्येव नः ॥ ९२ ॥

सरोषं किं ब्रवीषि—'कथमेवमनृतभूषितं ते भाषितम् । अथवा ।

यस्या नखशिखमनृतालिङ्गितमङ्गं जनिष्वनेकासु ।
कथयसि कथमथ तत्त्वं स त्वं कृष्णानृतोज्झितो भूयः ॥ ९३ ॥' इति ।

(विहस्य ।) कुतोऽन्यत्राप्यनृतकथा ।

यत्किलात्र भुवनत्रयोदरे संकटेन समवस्थितं चिरात् ।
तत्समस्तमनृतं नताङ्गि ते कुक्षिलग्नमवलग्नकैतवात् ॥ ९४ ॥

किं ब्रवीषि—'गच्छ यथागतम् । किमनेन वाक्कलहेन' इति । तर्हि कायिकमेव कुरु कलहम् ।

---

१. 'एष' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बद्ध्वा दोर्भ्यामभिमतगृहे मामधस्तान्निपात्य
द्रागारुह्य स्तनगिरिहतोरस्कमास्कन्दयन्ती ।
तावत्कान्ते रचय सकलं साहसं हृद्गतं ते
श्रान्ता यावत्कनकसुमनोमालिकेवासि तान्ता ॥ ९५ ॥

किं ब्रवीषि—'अद्य दिनमुखे कस्य वा मुखमवलोकितमित्थमनेन विवदितुम्' इति । (सस्मितम् ।) अयि मानिनि, तदपि मे सुखावहं संभावयामि ।

शनैरुत्तिष्ठन्त्यास्तव करधृते हेमवसने
हठादाकृष्टे सत्यतिभृशनमद्गात्रलतिका ।
सरोषं सव्रीडं सुमुखि मुखमालोकितवती
प्रभाते यस्य त्वं स्मरसि कृतिनस्तस्य न कथम् ॥ ९६ ॥

किं ब्रवीषि—'कुतः स्वमानमविज्ञाय सीमानमतिक्रामसि' इति । (स्वगतम् ।) इयं सुलभकोपा सर्वथा परिहासवचोऽपि मे परमार्थं मन्यते । तदन्यतो नयामि । (प्रकाशम् ।) अयि प्रिये, मा कृथा मयि वृथा कोपाडम्बरम् । अम्बरमाभरणानि वा यदभिलषितं तदाशु वृणीष्व । वितरिष्यामि । साञ्जलिबन्धं किं ब्रवीषि—'अलं तावदतिवदान्यतया ।

याचामहे जातु न किंचन त्वां पुण्यप्रदानादधिकं तवेदम् ।
गोपाङ्गनाचारुदुकूलचोरो यत्कृष्ण मुष्णासि न विद्यमानम् ॥९७॥' इति ।

मुग्धे, न जानासि जाराणां चोरः खलु मुख्यः । सस्मितं किं ब्रवीषि—'भाव, सत्यं चोर एवासि । यदेवं मोचारसमुचा वाचा मे चेतश्चोरयासि । (सानन्दम् ।) सखि, यदि प्रसन्नमुखी जातासि, तर्हि शृणु ।

आलिङ्ग्य गाढममलाङ्गि तवाङ्गमङ्गे-
रापाटलं त्वदधरं मधुरं निपीय ।

---

१. 'आरुह्य' क. २. 'किमहं न जानामि' ख. ३. 'कृते' ख-ग. ४. 'अविज्ञाय सीमानम्' ख-ग-पुस्तकयोर्नास्ति. ५. 'यावदन्यतो' ख-ग. ६. 'मुधा' ख-ग. ७. 'अङ्गमङ्ग' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीवीमथ श्लथयितुं निभृतं करेण
नीलोत्पलाक्षि यतते नितरां मनो मे ॥ ९८ ॥

किं ब्रवीषि—'भवतु नाम[1] । याहि, सायमायाहि' इति[2] । तर्हि गच्छामि । (इत्यन्यतो गत्वा विलोक्य[3] ।) कथमत्रैव काञ्चनलतासंतानकौ । (निर्वर्ण्य ।) इयमिदानीं

विलोकयन्ती मुकुरे विलासान्मुखाम्बुजं मुग्धकुरङ्गनेत्रम् ।
कर्पूरपङ्केन करोति बाला बालेन्दुलेखातिलकं ललाटे[4] ॥ ९९ ॥

(उपसृत्य ।) सखि,

तप्त्वा तपो हरशिरस्तटिनीतटान्ते
मुक्त्वा कलङ्कमयि ते मुखभावलाभात्[5] ।
बालेन्दुचारुतिलकेन चिराय बाले
चन्द्रोऽन्वविन्ददिव नन्दनजन्मशर्म ॥ १०० ॥

सविनयं किं ब्रवीषि—'चिराय स्मरणसरणीमधिरोपितास्मि भावेन[6]' इति । सखि, मा मैवम् । अद्यापि

वल्गत्कुचानि वलनासहमध्यमानि
कण्ठोदयत्कलरुतानि गलत्कचानि ।
आस्वादिताधरदलान्यलसेक्षणानि
तान्येव तन्वि सुरतानि तव स्मरामि ॥ १०१ ॥

किं च ।

ध्वान्तप्रान्तपरीतशीतकिरणं निद्रालुनीलोत्पलं
मन्दोदञ्चिकपोतनादमधुरं शश्वद्गलत्तारकम् ।
चक्रद्वन्द्वविलासनाट्यचतुरं चञ्चत्तुषारोदयं
चेतो मे समयं तमेव सुदति प्राप्तुं पुनर्वाञ्छति ॥ १०२ ॥

---

१. 'नामाद्य' ख-ग. २. 'इति' क-पुस्तके नास्ति. ३. 'इत्यग्रतोऽवलोक्य' ख. ४ 'रेखातिलकं निटाले' ख. ५. 'लोभात्' क. ६. 'रोहितास्म्यसमद्भावेन' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रवीषि—'भाव, मुरलीवल्लभस्य कथं तव[1] मादृशीषु तरलीभावः[2] । तथाहि ।

संकेतानयनाय सारसदृशां सा कृष्ण ते दूतिका
क्रीडालापकलापगानचतुरा केलीवयस्या च सा ।
त्वद्बिम्बाधरचुम्बनादृतमुखी सैवान्ततः प्रेयसी
या ते पाणिपरिग्रहेण मुरली नानामुखं[3] जल्पति॥१०३॥' इति ।

(अपवार्य ।) वयस्य संतानक, सांप्रतं सफलतरुःसंतान इव लक्ष्यसे । यतः ।

वक्षस्ते दृढलग्नककर्कशकुचद्वन्द्वावभुग्नान्तरं
कण्ठः कंकणरत्नकोटिकलनासुव्यक्तमुद्राङ्कितः ।
व्यत्यासव्यतिषञ्जितश्च तिलकः फाले तवायं सखे
कस्याश्चित्प्रकटीकरोति सुरतप्रौढिं परां सुभ्रुवः ॥ १०४ ॥

वयस्य, किं ब्रवीषि—'अस्या एव[4] । अथ किं

विविधकरणकल्पनातिशिल्पं सपुलकचुम्बनडम्बराभिरामम् ।
कलरवकलकूजितात्तकण्ठं निधुवनकौशलमद्भुतं नताङ्ग्याः ॥१०५॥' इति ।

(सौत्सुक्यम् ।) का सा रसिका युवमनःकासारसारसिका[5] । किं ब्रवीषि—'इयमेव' इति । (सबहुमानम् ।)

कुसुमशरविधेयं कोमलं रूपधेयं[6]
तदनुगुणविकासस्त्वद्गुणानां विलासः ।
किमितरमिह[7] लोकानन्दहेतुस्त्वमेका
तव रतिसुखभाजः कामिनोऽपि द्युराजः ॥ १०६ ॥

(सप्रश्रयम् ।) किं ब्रवीषि—'भाव, किमेवमनुचितं निजेऽपि जने कथयितुमुचितम्' इति । सत्यमनुचितमेवेदं यत्त्वदनुभवरसिका द्युराज इति । यतः ।

जम्भारेरपि पाशपाद[8]तरुणीजाराज्जयन्तादपि
स्वैराश्लिष्टसुराङ्गनाकुचभराद्धन्यश्च मान्यश्च सः ।

---

१. 'तव' क-पुस्तके नास्ति. २. 'तरलभावः' ख-ग. ३. 'नानाविधं' ख-ग. ४. 'अस्या एव' ख-ग-पुस्तकयोर्नास्ति. ५. 'कमलकासार' ख-ग. ६. 'कामिनां नामधेयं' ख-ग. ७. 'इतरत्' ख-ग. ८. 'पश्यपाद' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रम्भाकेलिकुतूहलापहरतारम्भाधिकप्रौढया
पुंभावं गतया त्वया जगति यो रम्भोरु संभाव्यते ॥ १०७ ॥

सखि, किं ब्रवीषि—'भाव, केवलं सुरतरङ्गिणीरिङ्गद्भङ्गुरतरङ्गसंगतवचोभङ्गिभिरेव मामुत्तुङ्गयसि । न पुनरनङ्गविलासनटनरङ्गैरङ्गैः' इति । सखि, मा मैवं वादीः[1] । तर्हि सायमायास्यामि । (पदान्तरं गत्वा सदृष्टिक्षेपम् ।) कथमग्रत एव मुदमुदञ्चयति चन्द्रमुखी ।

क्रीडोत्क्षिप्तभुजामृणाललतिकापाशान्तराले बला-
द्बद्धेन्दुं विरचय्य वैरिणमिदं वक्षोजकोकद्वयम् ।
हर्षादुन्नमतीव वारिजदृशो वक्षःसरोमण्डला-
न्निद्राभङ्गनिरूढजृम्भणजुषो मुग्धाङ्गभङ्गोत्सवे ॥ १०८ ॥

(अन्यतो विलोक्य ।)

वक्षोजौ निबिडं निरुध्य सिचयेनाकुञ्च्य मध्यं शनैः
कृत्वा चम्पकतैलसेकमबला संपीड्य मन्दं शिरः ।
पाणिभ्यां[2] चलकंकणोद्यतझणत्कारोत्तराभ्यां करो-
त्यभ्यङ्गं परिपश्यतोऽस्य चपलं दोरन्तरं प्रेयसः ॥ १०९ ॥

(कतिचित्पदानि गत्वा । सानन्दम् ।) इयमिह

जानुभ्यामुपविश्य पार्ष्णिनिहितश्रोणीभरा प्रोन्नम-
द्दोर्वल्ली नमदुन्नमत्कुचतटी दीव्यन्नखाङ्कावलिः ।
पाणिभ्यां चलकंकणोद्यतझणत्कारावतारोत्तरं
बाला नह्यति किं निजालकभरं किंवा मदीयं मनः ॥ ११० ॥

मच्चेतसा सह भुजद्वयमुन्नमय्य
वैर्येण मे सममसाववधूय भूयः ।
बध्नाति कुन्तलभरं कुटिलान्तकेशी
साकं ममैव कथमद्य विलोचनाभ्याम् ॥ १११ ॥

(उपसृत्य ।)

कमलाक्षि विलम्ब्यतां क्षणं कमनीये कचभारबन्धने ।
दृढलग्नमिदं दृशोर्युगं शनकैरद्य समुद्धराम्यहम् ॥ ११२ ॥

१. 'वादीः' ख-ग-पुस्तकयोर्नास्ति. २. 'पाणिभ्यामवधूय कंकणझणत्कारावतारोत्तरं' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनादरमिव किं ब्रवीषि—'कात्र भवन्तमाकारितवती' इति। (सानुनयम्।) कल्याणि, कथमनालोक्यैव मामधिक्षिपसि। पुनः किं ब्रवीषि—'किं त्वामालोक्य भाग्यमुपगन्तव्यम्' इति। अयि, नास्ति किमपि किं मयि। किं ब्रवीषि—'नास्त्येव।

चौर्येणैव कृतं हि कुक्षिभरणं जन्मप्रभृत्यन्वहं
गोपीनां पणदानशून्यसुरतक्रीडाक्रणं चेत्पुनः।
दुर्वारं तव जन्मकोटिभिरपि त्वं कृष्ण तत्तादृशः
किं मे दास्यसि किं तवास्ति च वयं किं वा ग्रहीष्यामहे ११३' इति।

मुग्धे, न जानासि।

नित्यं श्रीरनपायिनी मम परं धामापि रत्नाकरः
शक्रादीनतिशेरते च विभवैर्भृत्यास्तदास्तामिदम्।

किं चान्यत्।

ऐश्वर्यं महदस्ति षड्गुणम्

किं ब्रवीषि—'क्व तद्दर्शय' इति।

इह प्रख्याप्यतां तत्कथं

पुनः किं ब्रवीषि—'किमिति न प्रख्यापनीयम्' इति।

प्रच्छन्नोऽद्य किलास्मि तन्वि समये सर्वं त्वमेवैष्यसि ॥११४॥

(विहस्य।) किं ब्रवीषि—'यां कांचिदेवं वञ्चय चञ्चलदृशम्। मम तु जातुचिदपि पुरो मैवं वादीः' इति। (स्मित्वा।) अद्य यद्यपि मद्वचनं न रोचते तदा त्वमेव पुनः स्मरिष्यसि। (इत्यन्यतो गत्वा सस्पृहमालोक्य।) कथमिहालंकरोति लवङ्गिका कनकाङ्गीम्। तथाहि।

निबिडानुषक्तकुचकोकदंपती मुखतारकापरिवृढेन शासितुम्।
अवतारितेव निजतारकावली हरिणीदृशः स्फुरति हारवल्लरी॥११५॥

(उपसृत्य।) अनया तावदिदानीम्

आत्मनैव विधृतापि मुग्धया हारयष्टिरधरांशुपाटला।
विद्रुमावलिधिया विलोलया दृश्यतेऽपि परिमृश्यते मुहुः॥११६॥

१. 'स्थित्वा' ख-ग. २. 'पुरः' ख-ग. ३. 'अग्रतो' ख-ग. ४. 'निबिडं निषक्त' ख-ग.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(लवङ्गिकामालोक्य ।) कथं कनकाङ्ग्या अप्यङ्गेषु भूषणान्यर्पयसि ।

जेतुं कल्पलताशिल्पमा कल्पं सखि कल्पताम् ।
अकल्पा कल्पकल्पे ते वपुष्याकल्पकल्पनाम् ॥ ११७ ॥

(साकूतम् ।) किं ब्रवीषि—'देव, अदो ज्जेव आहरणाइं अप्पयिस्सम् ।
अङ्गेसु लावण्णतरङ्गएसु णिसग्गसोहग्गसमग्गदेसे ।
देट्टूण लोअस्स अ लोअणाइं णं संकिदा भूसणमप्पइस्सम्(!)११८'(क) इति।
अयि, कुशलासि । यतस्त्वमस्याः

अङ्गकान्यपिदधासि नताङ्ग्या भूषणैर्जनदुरीक्षणभीत्या ।
चञ्चलाक्षि पथि चम्पकवल्ल्याः पल्लवैरिव परं कुसुमानि ॥ ११९ ॥

(क्षणमात्रं निर्वर्ण्य ।) अयि, विफलोऽयं तवायासः ।

अङ्गानामपिधानमाकलयसे मुग्धे मुधा भूषणै-
र्मज्जन्त्यत्र तु भूषणानि सुतनोरङ्गप्रभास्रोतसि ।
लीलासु श्रवणोत्पले नयनयोः स्मेरे च हारावली
लाक्षाश्रीः पदपाटलिम्नि तनुभा सीमासु हेमाम्बरम् ॥ १२० ॥

(पुनर्निर्वर्ण्य ।) अस्याः

कर्णान्ततान्तनयनान्तविलोकनश्री-
संछादितश्रवणपूरसितेतराब्जम् ।
मन्दस्मितद्युतितिरोहितचारुनासा-
मुक्ताफलं वितनुते वदनं मुदं नः ॥ १२१ ॥

(सानुरागं सपुलकोद्भेदं च विभाव्य ।) अयि प्रेयसि, किं करोमि ।

पद्मेन्दीवरकुन्दचम्पकजपाजातीषु जातस्पृहं
क्रीडाकाञ्चनशैलतुङ्गशिखरारोहावरोहालसम् ।

---

(क) देव, अत एवाभरणान्यर्पयिष्ये ।
अङ्गेषु लावण्यतरङ्गितेषु निसर्गसौभाग्यसमग्रदेशे ।
दृष्ट्वापि लोकस्य च लोचनानि ननु शङ्किता भूषणमर्पयिष्ये ॥

---

१. 'हारावलिः' ख.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्गे प्रस्खलितं क्रमेण विषमे मग्नं सरोमण्डले
पर्यन्ते पुलिनस्य कान्तकदलीमूले मनो मुह्यति ॥ १२२ ॥

लवङ्गिके, किं ब्रवीषि—'उइदं खु पिदुणो तणअस्स सअणाणुवत्तणम्' (क) इति । (स्वगतम् ।) कथमनया निर्लज्जयेवाभिहितम् । (प्रकाशम् । सरोषलज्जं क्रीडाकमलेन लवङ्गिकां ताडयन्ती ।) किं ब्रवीषि—'हञ्जे, कथमपास्तलज्जा त्रासादुरक्षराणि प्रलपसि' इति । लवङ्गिके, सधैर्यं किं ब्रवीषि—'सामिणि, पढमप्पलाविणं णं उज्झिअ कथं मयि जेव्व कुप्पसि' (ख) इति । (सस्मितम् ।) अयि, मय्यपि कुप्यतु नाम तव स्वामिनी । किमत्र परिहीयते ।

प्रत्यासीदति रोषतो यदि मुखामोदस्तदा लभ्यते
बाहाबाहिरणे तु कर्कशकुचाश्लेषः स्वयं सिध्यति ।
मामुत्तानमधो निपात्य मयि चेदारोहतीयं ततो-
ऽप्यन्यत्किं मम काङ्क्षितं तदधुनैवालं द्रुतं कुप्यतु ॥ १२३ ॥

(श्रवणमभिनीय ।) क एष कलकलः पौरबालकानाम् । (पुरस्तादवलोक्य । सोपहासम् ।) सखि, पश्य पश्य, अयं किल कपटपुण्याहशान्तिबलिहोमविधिविलिप्तविविधचन्दनविकृतललाटतटघटितहरिद्राक्षतो वञ्चितदासीजनदत्तपञ्चाङ्गुलनिकुञ्चितपुरातनपरिधानकल्पितोष्णीषपरिलम्बमानदशासहस्रपरिवेषदूषितवदनश्चञ्चलचेलाञ्चलकीलितमपि पञ्चाङ्गं पतनशङ्कया कुशतृणाञ्चितेन पाणिना पुनःपुनरामृशन्, सव्यांसगतपटच्चरभस्त्रिकाविवरगलितकतिपयमुद्गतिलतण्डुलग्रहणव्यग्राग्रकरः परिहासपरपौरबालकपरिवारमन्तरान्तरा दर्भमुष्टिना दण्डेन निवारयन्, चिन्तोपचितांश्चिरंतनानप्यात्मसदनव्यापारानात्मनैव प्रकाशमालपन्वेशवाटिकापुरोहितो गणदत्तमातुलो वराहभट्टश्चन्द्रिकागृहादायाति । (सहासम् ।) किं ब्रवीषि—'अहो, का-

---

(क) उचितं खलु पितुस्तनयस्य सदनानुवर्तनम् ।

(ख) स्वामिनि, प्रथमप्रलापिनमेनमुज्झित्वा कथं मय्येव कुप्यसि ।

---

१. 'क्रीडाकमलेन' क-पुस्तके नास्ति. २. 'रोषिता' ख. ३. 'पुरातनपटुदशासहस्र' ख. ४. 'गतपट्टिकाविवर' ख. ५. 'व्यग्रकरः' ख. ६. 'परिहासी' क.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लस्य वैचित्र्यम् । अयमिहैवैतावतो वासरांश्चेटीकुटीरकोटरकोण एव नक्तंदिवमप्यतिवाह्य पुनरद्य पलितपरिहृते शिरसि वैदिकपद्यामनुरुध्य प्रत्यहं प्रातरुदकोपस्पर्शनमिव नित्यकर्मविधानमिव किं[1]मपि कुर्वन्ननतिचिरादेव सद्वनीदेव इव संवृत्तो वराहभट्टः' इति । न केवलमयमेव । अस्य भार्यापि ।

प्रागतीतमिह किं विविच्यतां कामशासनबलेन कारितम् ।
यौवनापसरणादनन्तरं सर्वथा ननु पतिव्रतैव सा ॥ १२४ ॥

(पुनर्विलोक्य ।) कथमयं प्रत्यासन्नो भूत्वा पञ्चाङ्गं वाचयति । (श्रुत्वा सहासम् ।) सखि, पश्य ।

पञ्चाङ्गमञ्चितकुशेन करेण धृत्वा
पङ्क्तिं प्रमृज्य किल पत्त्ररसेन भूयः ।
आवर्तयन्नसकृदक्षरमेकमेकं
तारादि वाचयति तत्पुनरन्यदन्यत् ॥ १२५ ॥

त[2]देनमसंबद्धप्रलापिनमा[3]लापयन्ती तिष्ठ । साधयामि । (परिक्रम्य पुरोऽवलोक्य च ।) कथमत्र मयूरकः । (उपसृत्य ।) अपि कुशलं प्रियसखस्य । किं ब्रवीषि—'कुतः कुशलं भग्नभागधेयानाम्' इति । (सोद्वेगमात्मगतम् ।) कथमयं किमप्यरुंतुदं कथयिष्यति । अथवा परिहासशीलस्य वचोऽ[4]स्य न विश्वसनीयं भवति । (प्रकाशम् ।) कथमद्य तवाकुशलम् । किं ब्रवीषि—

'कुटिलचिकुरा कुन्दस्मेरा कुरङ्गविलोचना
कमलवदना कम्बुग्रीवा कठोरपयोधरा ।
कनकलतिकाकान्ता कान्ता कराङ्कगता' इति ।

(विहस्य ।) सत्यमिदमकुशलं यदतिचिरनिबद्धघोटकब्रह्मचारिणस्तव कामिनीरत्नं करतललग्नम्' इति । (सरोषविषादम् ।) किं ब्रवीषि—'कथमर्धोक्त एवाक्षिप्य परिदेवनावसरे परिहसति वयस्यः' इति । तर्हि कथय कथय ।

---

१. 'किमपि किमपि' क. २. 'तदेवमप्यसंबद्ध' ख. ३. 'आलपन्ती' ख. ४. 'अस्य' ख-पुस्तके नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रवीषि—कराङ्कगता गता' इति । (विमृश्य ।) तर्हि । कठिनहृदयः कामम् । किं ब्रवीषि—'वयस्य, किं त्वया वक्तव्यमिदम् । कठिनहृदय एवाहं योऽयं प्राणवल्लभाप्रयाणेऽपि[1] प्राणिमि' इति । (स्वगतम् ।) कथमयमन्यथा मन्यमानो मन्युमेव प्रविशति । (प्रकाशम् ।) सखे, किं त्वां कठिनहृदयं ब्रवीमि । किंतु ।

कठिनहृदयः कामं कामः कथं कुशलं तव ॥ १२६ ॥'

इति वक्तुं प्रवृत्तोऽस्मि । किं ब्रवीषि—'वयस्य, अहमप्येतदेव

कुटिलचिकुरा कुन्दस्मेरा कुरङ्गविलोचना
कमलवदना कम्बुग्रीवा कठोरपयोधरा ।
कनकलतिकाकान्ता कान्ता कराङ्कगता गता
कठिनहृदयः कामं कामः कथं कुशलं मम ॥ १२७ ॥

इति वक्तुं प्रवृत्तोऽस्मि' इति । (सचमत्कारम् ।) तदावयोरेकमेवान्ततो विवक्षितं संवृत्तम् । उक्तिप्रत्युक्तिकया त्वन्ततोऽप्यतर्कितं[2] संविधानवैचित्र्यं संपन्नं भवतु । कोऽत्र विरोधः ।

का सा कनकवर्णाङ्गी त्वत्कराङ्कगता गता ।

किं ब्रवीषि—

'सखे सौदामिनी नाम कान्ता कादम्बिनीस्नुषा॥ १२८॥' इति ।

जानामि सकलजननयनहारिणी खलु तदीयतनुरुचिर्धोरणी । कथं सा करतलगता । कथं च पुनर्गता । किं ब्रवीषि—'सखे, चिरादपि तत्संगमायान्विष्यन्त[3] एव तावदुपायाः । पुनरतीते निशीथे निबिडान्धकारमगारपरिसरमधितिष्ठता मया बहिरागता सौदामिनी सरभसं करेण गृहीता' इति । धीरोऽसि । तदा तया किं व्यवसितम् । किं ब्रवीषि—'न किमपि । क्षणमात्रमवस्थिता 'धिङ् मूर्ख, मुञ्च मुञ्च' इति मामवधूय पुनरगारं प्रविष्टा । अहमपि कुक्कुटकूजितावधि तदागमनाशयैव स्थित्वा तदनन्तर-

१. 'प्रहाणे' ख. २. 'तु कुतोऽपि' ख. ३. 'अन्विष्यतैवोपायान्' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मागतोऽस्मि' इति । भवतु । वयस्य, यदा कदापि किं तथा कथितपूर्वमङ्गीकारवचनम् । किं ब्रवीषि—'कथमपूर्वं कथ्यते । यतः ।

सल्लापे सिचयग्रहे कुचतटस्पर्शेऽधरास्वादने
नीवीविश्लथने च किं नु बहुना काले च तस्मिन्नपि ।
जल्पन्त्यप्रकटं निषेधवचनान्येवासकृत्कर्णयो-
रङ्गीकारवचः पराम्बुजदृशां केन श्रुतं कथ्यताम् ॥ १२९ ॥' इति ।

सखे, न जानासि ।

पराङ्गनानां सुरताभ्यनुज्ञा मन्दोदिता एव निषेधवाचः ।

किं ब्रवीषि—'किमिदमहं न जानामि ।

क्रीडानिषेधोक्तिमयी यदासां निषेधगाथाप्यतएव शास्त्रे ॥ १३० ॥

परंतु न तेषामपि निषेधवचसामवसरो लब्धपूर्वः' इति । कथमविदिताशयामनुवृत्तोऽसि । किं ब्रवीषि—'अस्ति किंचिदनुरागबीजम् । तथाहि ।

सव्याजं सदनं समेयुषि मयि श्वश्रूसमक्षं तया
व्रीडामीषदिवाभिनीय शनकैरुत्थाय यान्त्या बहिः ।
यत्किंचिद्व्यपदिश्य सामिवलितग्रीवं पुनर्वीक्षितं
तन्वङ्ग्या' इति ।

(सशिरःकम्पम् ।) । विश्वसनीयमिदमनुरागबीजं भवति । किं ब्रवीषि—

'तत एव तत्र सुदृशि स्निह्यामि मुह्यामि च १३१' इति ।

यद्येवमद्य श्वो वा भविष्यति युवयोरपि मन्दाकिनीमरालयोरिव विनैवायासं समागमः । किं ब्रवीषि—'कथमिव तयोर्व्यतिकरः संवृत्तः' इति । शृणु ।

अन्योन्यं ललितैरपाङ्गवलनैराविष्कृताकूतयो-
रौत्सुक्याकुलयोः कथं कथमिव प्राप्तक्षपामध्ययोः ।

---

१. 'पूर्वं' ख. २. 'तटी' ख. ३. 'किमिदमहं न जानामि' ख-पुस्तके नास्ति. ४. 'किंचन' ख. ५. 'चलितैः' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दैवादायतने क्वचिन्मिलितयोः साशङ्कमुत्ताम्यतो-
श्चेष्टाद्यैरभिजानतोरथ तयोरासीदनङ्गोत्सवः ॥ १३२ ॥

तत्किंचित्कालं सोढव्यो विरहवेगः । किं ब्रवीषि—'कथं सोढव्यो-ऽप्रतीकारोऽयं मदनशरसंतापः' इति । ननु प्रेयसीचिन्तयैव प्रतिक्रियताम् । किं ब्रवीषि—'सखे, प्रतिकलमपि चिन्तयामि ।

कथं कामेषुदलितमङ्गमङ्गाव्रणं भवेत् ।
प्रियागुणानुसंधानसंधानकरणी न चेत् ॥ १३३ ॥

तदपि संतापयत्येव संताप इति । वयस्य, अद्भुतमनङ्गहतकस्य चरितम् ।

निःसारं क्रमशो धनुः प्रतिपरुः किं मार्गणैः किं गुणै-
र्मन्दं स्यन्दति वा न वा तरुलतागुल्माहतः स्यन्दनः ।
लीनं पाथसि यस्य लक्ष्म च परं निर्दग्धमूर्तिः पुनः
सर्वाङ्गीणमहो तनोति स कथं संतापमद्य स्मरः ॥ १३४ ॥

(पदान्तरं गत्वा । अग्रतो दृष्ट्वा च ।) सखे, पश्य पश्य । किं ब्रवीषि—'मया सांप्रतमालोकनीयानामतिरमणीयानामाकृतीनां परं पारमालोकितमेनामा-लोकयता । मन्ये च तावदित्थम् । अस्याः

लावण्याम्बुनिधौ स्मरेण मथिते रोमावलीभोगिना
निक्षिप्य स्तनमन्दराद्रिशिखरद्वन्द्वं कुरङ्गीदृशः ।
जातं लोचनवीचिकासु गरलं बिम्बाधरे चामृतं
तेनाद्यं विदधाति तापमपरं तूज्जीवनं कामिनाम् ॥ १३५ ॥

किं च ।

अधरे पल्लवरागो विटपसमाश्लेषविभ्रमो बाह्वोः ।
अस्या भुजंगभोगप्रागल्भ्यं स्फुरति किं च रोमाल्याम् १३६' इति ।

(पुनर्विलोक्य ।)

स्तनाभोगो मध्यं तरलयति तावद्गुरुतया
पृथुश्रोणिभारश्लथनमपि रुन्धे चरणयोः ।

१. 'प्रियानुगुणसंधानसंजीव' ख. २. 'संप्रति मया सांप्रतं' क. ३. 'विभ्रमो' क. ४. 'पुनर्निर्वर्ण्य' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करालम्बं दातुं तदपि बत नासीदिति सखी
कथं कल्याणीयं मदभिमुखमुत्तिष्ठति हठात् ॥ १३७ ॥

किं ब्रवीषि—'कथमियं वयस्यमालोक्य चिरपरिचयसमुचितप्रणयेव सविनयमुत्तिष्ठति' इति । अथ किम् । इयमङ्गराजामात्यस्य कलानिधेः कलत्रं चन्द्रिका नाम । किं ब्रवीषि—'केन पुनरनवद्याङ्गी गणिकापद्यामवतारिता' इति । ननु भगवता भावजेनैव । किं ब्रवीषि—'युक्तमाह वयस्यः।

विसदृशघटनाकुटिलं पङ्कजयोनिं चिराय परिभूय ।
करुणाशाली कामः कान्तानां कान्तमनुगुणं कुरुते ॥ १३८ ॥

भवतु । तदियं वयस्येन गणिका सती परिगृहीता, किं वा कुलाङ्गना सत्येव' इति । (सावज्ञम् ।) किं गणिकाजनं गणयति साधारणो भुजंग इव तव प्रियसखो भुजंगशेखरः । किं ब्रवीषि—'एवमेतत् ।

क पैणावधिकं प्रेमनटनं पण्ययोषिताम् ।
पल्लवेषु परस्त्रीणां क च नैसर्गिको रसः ॥ १३९ ॥

किं च ।

शीलं नाद्रियते कुलं न मनुते नैवानुरुन्धे गुरू-
न्नारीणां कुलदेवता किल पतिस्तं चाप्यहो मुञ्चति ।
किं ब्रूमः परयोषितः पुनरसावन्योऽनुरागक्रमः
स्वप्राणानपि जातुचिन्न गणयत्येषा विटार्थे यतः ॥ १४० ॥' इति ।

वयस्य, पणाशयैव परिभूयते गणिकाजनगौरवम् । न चेदेवं तदा

अशङ्कितनखक्षतं पुनरलज्जमुक्ताम्बरं
प्रवृत्तकरणक्रमं प्रचुरचुम्बनाडम्बरम् ।
सशब्दकरताडनं सपरिहाससंभाषणं
न कस्य सुरतं मनो हरति वारवामभ्रुवाम् ॥ १४१ ॥

---

१. 'नासीदिति' क. २. 'भुजंगेश्वरः' क. ३. 'पणोपाधिक' ख. ४. 'मुक्ताम्बरप्रवृत्त' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(उपसृत्य। भुजं प्रसार्य।)

आस्यतामास्यतां तावदुपचारैरलं प्रिये ।
कासौ गुरुकुचाभोगः क्वेदमुत्थानसाहसम् ॥ १४२ ॥

(इति हस्ते गृहीत्वोपवेश्य।) सखि, चिराय रूपानुरूपमनुवृत्तं वारवनितावृत्तम्[1]। किं ब्रवीषि—'भाव, किमेतावता संवृत्तम् । विचारयतु भवानेव ।

वल्लरीषु मधुपेन वल्गता पद्मिनी न परिभुज्यते यदि ।
किं फलं कितव सौरभश्रियः कर्दमादपि कथंचिदुत्थितेः ॥१४३॥' इति ।

सखि, त्वदेकायत्तचित्तमपि मामन्यासक्तं संभावयसि । ननु नक्तंदिनमपि

यत्तावत्पतिबाहुपाशवलयं विश्लेष्य[2] निश्यागतं
यत्कर्णे कथितं रहस्यमितरावेद्यं च हृद्यं पुनः ।
यच्चाप्यस्खलदिन्द्रनीलवलयं गाढं त्वयालिङ्गितं
तन्मे तामरसायताक्षि नितरामावर्तते चेतसि ॥ १४४ ॥

किं चान्यदपि कथयामि । स्मरतु सखी ।

चिरं पत्या नक्तं मयि कृतकसल्लापिनि गृहे
बहिर्व्याजाद्गत्वा सुमुखि निवसन्त्यां त्वयि पुनः ।
मया निर्यातेन स्मितरुचिनिरस्ते तमसि य-
त्तदा वक्त्रं पीतं स्फुरति तदिदानीमिव[3] तव ॥ १४५ ॥

मयूरक, किं ब्रवीषि—'वयस्य, धन्यः खलु भवान्, यत एवमुदीरयन्ति पल्लवतल्लजाः ।

पतिं मुक्त्वा निद्राशिथिलभुजबन्धं चलितया
कपाटं निःशब्दं लघु विवृतवत्या मृगदृशा ।
क्वचित्कोणे लीनो घनतमसि सांकेतिकगिरा
समाहूतः स्वैरं विहरति तया कोऽपि सुकृती ॥ १४६ ॥' इति ।

---

१. 'वारवनितावृत्तम्' ख-पुस्तके नास्ति. २. 'विश्लेषयित्वा गतं' ख. ३. 'अपि' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सखि, सव्रीडविलक्षं किं ब्रवीषि—'अतएव भवता लघुतामानीतास्मि' इति । (स्वगतम् ।) कथमियमुपालम्भगर्भवचनसंदर्भेण मामधिक्षिपति । तदेनामन्यतो नयामि । (प्रकाशम् ।) सखि, कैा सा कन्दुकक्रीडाकलितकौतुकाक्रान्ता कान्ता । किं ब्रवीषि—'इयं ममैव मातृष्वस्त्रेयी मल्लिका नाम । मत्कृतस्नेहानुबन्धा बन्धुजनमतिसंधाय मामनुसंगता वर्तते' इति । (सानन्दम् ।) इदमपि ममैव भागधेयम्, यत्करगलितामिव काञ्चनोर्मिकामेकामेव त्वां विचिन्वता मौक्तिकमालिकेव पुनरियं मल्लिका मया त्वया समं समासादिता । तदधुना यदि न कुप्यसि, किंचित्पृच्छामि । किं ब्रवीषि—'पृच्छ' इति । (सानुरागम् ।)

उन्मीलत्पुलकं कपोलतलयोरुद्भ्रान्तमीषद्भ्रुवो-
रालोलं नयनान्तयोर्मयि पिबत्यास्यं प्रवालाधरम् ।
व्याधुतारुणपाणिकङ्कणरवव्यामृष्टमस्या वचो
मा मा मुञ्च विमुञ्च मामिति मनः श्रोतुं समुत्कण्ठते ॥१४७॥

(सस्मितम् ।) किं ब्रवीषि—'त्वमेव तावदीप्सितमिमां पृच्छ, स्वयमेव सा कथयति' इति । भवतु तावत् । इमामालापयामि । (मल्लिकामालोक्य ।) अयि,

पतन्नपि पयोजाक्षि पादमूले तवासकृत् ।
कन्दुकः करलग्नोऽयमिति संताड्यते कथम् ॥ १४८ ॥

किं ब्रवीषि—

'पतितमपि पादमूले पश्चादुत्पतनशीलमविलम्बम् ।
कन्दुकमपि कापुरुषं करतललग्नं न ताडयेत्का वा ॥ १४९ ॥' इति ।

अयि, किमेतावता हीयते ।

तरुणीपदपल्लवप्रहारं तरुणानां परमं वदन्ति भाग्यम् ।
परिपाटलतत्करप्रहारः परिभावः किमयं वरोरु तेषाम् ॥ १५० ॥

मयूरक, किं ब्रवीषि—'सखे, कथमस्याः कुलक्रमागतगणिकाक्रमाया इव

---

१. 'वैलक्ष्यं' ख. २. 'आनीताः स्म इति' ख. ३. 'कासौ' ख. ४. 'व्याख्यातं' ख. ५. 'अये' ख. ६. 'कन्तुकः' ख. ७. 'पुनः' ख. ८. 'कन्तुकं' ख. ९. 'तरुणा ये' क.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यग्रगणिकाया अपि न लज्जाकणिका' इति । सुतनु, किं ब्रवीषि—'भाव, कुञ्जरमारुह्य किमिति कुटिलद्वारपथेन गन्तव्यम्' इति । (सबहुमानम् ।) साधु मल्लिके, साधु । सखे, किं ब्रवीषि—'नैवं खलु वक्तव्यम् । किंतु कथं वराहमारुह्य पुरीषं निषेद्धव्यम्' इति । मल्लिके, त्वमपि किं ब्रवीषि—'अरे मयूरक, कुलत्थयूषार्थिनस्तव कुतो मन्दुरातुरगाधिकारः । गच्छ गच्छ । किं दाता किमदाता वा त्वम्' इति । सखे, किं ब्रवीषि—'कथमियं गणिकाया जननीव कथयति दुरक्षराणि । (अपवार्य ।) सखे, विरम विरम । कुटिलान्तरङ्गाः खलु कुरङ्गाक्ष्यः । किं ब्रवीषि—'कुटिलतरान्तरङ्गा इति वक्तव्यम् । किं च ।

किं ब्रूमहे कुटिलतीक्ष्णकठोरभावा
नाङ्गेषु[1] भान्ति सुदृशां किमुतान्तरङ्गे ।
यत्तावदाद्यमलकेषु दृशोर्द्वितीय-
मुज्जृम्भते तदितरत्कुचकुम्भयोश्च ॥ १९१ ॥

भवतु । चन्द्रिकामालोक्य सोढव्यम्' इति । चन्द्रिके, किं ब्रवीषि—मयूरक, त्वयि किंचित्प्रथममुदितमविनीतं[2] तदनु यौवनमददुर्ललितायामस्यामपि किंचिदुदञ्चितम् । किमेतावता । पश्यतु कन्दुकक्रीडाचातुर्यमस्याः पल्लवपाणेः । अयि मल्लिके, मुधा मा कृथाः कलहं परिहासकुतुके मयूरके । विहर तावत्कन्दुकेन' इति । (सहर्षमात्मगतम् ।) दिष्ट्या मल्लिकामयूरकौ समीकृतवती चन्द्रिका । (प्रकाशम् ।) सखे, पश्य पश्य ।

गुणिनमपि[3] सुवृत्तं कन्दुकमालोक्य ताडितं तन्व्या ।
परिनृत्यति कुचभारः

किं ब्रवीषि—

'कर्कशवृत्तस्य कुत्र कारुण्यम् १९२' इति ।

वयस्य, दीयतामितो दृष्टिः, यत्र शुकमालापयति शुकभाषिणी (इति विलोक्य सकौतुकम् ।)

1. 'श्वाङ्गेषु यान्ति' क. 2. 'उदीरितं विनीतम्' क. 3. छन्दोभङ्गदूषितोऽयमार्याप्रथमपादः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आलापयन्त्याः शुकमायताक्ष्या मूर्ता मुखस्थाक्षरपङ्क्तिरेव ।
विलोक्यतेऽस्या विमले कपोले ताटङ्कमुक्तामणिबिम्बदम्भात् ॥ १५३ ॥

(श्रवणमभिनीय ।) कोऽयं कलकलः पौराणाम् । किं ब्रवीषि—'वयस्य, गत्वा निरूपयावः' इति । सखि, सावधानं तिष्ठ । (इति कतिचित्पदानि गत्वा पुरोऽवलोक्य सकौतुकम् ।) सखे, पश्य पश्य । अयमिह

पौरानाकुलयत्यलं तत इतः पश्यन्पतत्यापणे
व्यग्रानापणिकान्विवृत्य वदनं वित्रासयन्गर्जति ।
पाणिभ्यां युगपन्मुखेन च मुहुर्गृह्णाति मुद्गान्यवा-
न्धावत्युत्पतति प्लवत्यपि कपिः प्रासादमारोहति ॥ १५४ ॥

(सहासम् ।) किं ब्रवीषि—'प्रतिक्षणविलक्षणं खलु प्लवंगचेष्टालक्षणम् । पश्य ।

लीलाचङ्क्रमणैर्विटङ्कशिखरश्रेणीषु लोलं चर-
न्नासीनः क्वचिदूर्ध्वजानु कलयञ्शेफःसमुज्जृम्भणम् ।
व्रीडाकारिविचेष्टितैर्विनमयन्वक्त्राणि वामभ्रुवां
पौराणां पुरतश्चरन्प्रहसनं प्रस्तौति शाखामृगः ॥ १५५ ॥

(श्रवणमभिनीय ।) अयमिदानीम्

नाडीभेदविभिन्नकालकलनाविज्ञानसंसिद्धये
दैवज्ञाभिहतादमन्दघटिकाघण्टामणेरुत्थितः ।
लोकानां श्रवणोत्सवं विरचयन्रुन्धन्क्रमाद्रोदसी
द्राघीयान्निनदः कदम्बमुकुलन्यायात्समुज्जृम्भते ॥ १५६ ॥

तदयं मध्याह्नसमयो वर्तते । (ऊर्ध्वमवलोक्य ।) सखे, पश्य पश्य ।

पादानुदग्रतरपर्वतमस्तकेषु
विन्यस्य सान्द्ररुचिरद्य सहस्रभानुः ।
अन्वेष्टुमन्धतमसं गहनेषु लीन-
मारोहतीति गगनाग्रमयं प्रतीमः ॥ १५७ ॥

---

१. 'उत्प्लवति' ख. २. 'कुतः' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रवीषि—'मम तु पुनरेवं प्रतिभाति ।

कान्तारलीनमिव सन्तमसं विचेतु-
माकाशपादपशिखामधिरुह्य भानुः ।
भूयोऽप्ययं पतनभीत इवाखिलाशा-
शाखावलिं निजकरैर्युगपद्बिभर्ति ॥ १५८ ॥' इति ।

(समन्तादवलोक्य ।) अहो स्थावराणामपि शरणागतपरित्राणपरायणता । पश्य पश्य । (अङ्गुल्या दिनकरमण्डलं निर्दिश्य ।)

रोषादेष करान्प्रसार्य कुरुते संनाहमह्नांपति-
श्छायां नाशयितुं निजातपभयत्राणोद्यतामद्यताम् ।

(पादपान्निर्दिश्य ।)

एते भूमिरुहास्तु पल्लवकरैः संरुध्य भास्वत्करा-
न्गोपायन्ति

किं ब्रवीषि—

न को नु वा परपरित्राणोद्यतं त्रायते ॥ १५९ ॥

परंतु छायापरिपालनं न पादपानां प्रशंसापदम् ।

ये पालयन्ति निरुपाधि फलादिभिः स्वैः
पान्थान्कुतोऽपि विषयात्क्वचन प्रयातान् ।
स्वाकारमेव दधतीं स्वशरीरजातां
छायां न पान्तु तरवः कथमातपात्ते ॥ १६० ॥' इति ।

(अन्यतो दृष्ट्वा ।)

कमलोदरमकरन्दं सपदि कदुष्णं विहाय सानन्दम् ।
मदशिशिरकरटपालीमिभकलभानामुपैति मधुपाली ॥ १६१ ॥

(कतिचित्पदानि गत्वा ।) इयमिह

सिक्तं स्वेदपयोभिः सक्तं करजव्रणेषु चार्द्रेषु ।
सीत्कृतिसंकुचदधरं कञ्चुकमबला शनैरुदञ्चयति ॥ १६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रवीषि—'एवमेतत् ।

उच्चैरुन्नमनाद्दुजालतिकयोरुन्नम्रितौ पार्श्वयो-
राद्रीनाद्रॆनखव्रणाङ्कवलयावादर्शयन्ती कुचौ ।
बिभ्राणा चुबुकाञ्चलेन सिचयं बिम्बाधरापाटलं
कान्ता मुञ्चति निःसहातपपरिश्रान्ता शनैः कञ्चुकीम्[१] ॥१६३॥' इति ।

(पुनर्विलोक्य ।) कथमग्रत एव समुदग्रकनकदण्डकाण्डकलितपाण्डुरातपत्रपुण्डरीकमण्डलच्छायान्तरितघनातपा कापि कमलमुखी सखीकरमवलम्ब्य सलीलमभिमुखीभवति । (निर्वर्ण्य ।)

करैर्हारं हारं मुखपरिमलं मोहनदृशो
रुचां नेता नेता कमलममलं बान्धवमिति ।
रुषा छत्रच्छद्मा तिरयति रविं शीतकिरणो
दुरालोकं लोके[२] रिपुविभवमालोकयति कः ॥ १६४ ॥

(सप्रत्यभिज्ञम् ।) कथमियमस्मदपहृतकौमारा नातिचिरादेव समग्रयौवनावतारा तारा[३] । यतः ।

उद्भेदं प्रतिपद्य पक्वबदरीभावं समेत्य क्रमा-
त्पुंनागाकृतिमाप्य पूगपदवीमारुह्य बिल्वश्रियम् ।
लब्ध्वा तालफलोपमां च ललितामासाद्य भूयोऽधुना
चञ्चत्काञ्चनकुम्भजृम्भणमिमावस्याः स्तनौ बिभ्रतः ॥ १६५ ॥

(आलिङ्ग्य । आत्मगतम् ।)

अलं क्रोडीकर्तुं यदपहृतमप्यङ्गमभव-
द्भुजेनैकेनापि प्रथमपरिरम्भे मृगदृशः ।
तदेवाद्य प्रेम्णा गतमपि मदेकैकरसतां
न माति प्रोत्तुङ्गस्तनभरतया बाहुयुगले ॥ १६६ ॥

(प्रकाशम् ।) अयि[४], अपि नाम यदा कदाचन[५] स्मरसि भुजंगशेखरम् ।

(सोपालम्भम् ।) किं ब्रवीषि—'किमिति स्मरामि कितवाचारं भवन्तम् ।

१. 'कंचुलीम्' क. २. 'लोको' क. ३. 'तारा' क-पुस्तके नास्ति. ४. 'अयि' ख-पुस्तके नास्ति. ५. 'कदा वा' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मायाविन्यतिकर्कशात्मनि दयादूरे मृषाभाषणे
मिथ्याबाह्यविडम्बनैकचतुरे श्रीकृष्ण किं मे त्वयि ।
आस्ते कोऽपि वियोगभीरुरनिशं कृष्णो ममान्तर्बहि-
र्यं पश्यामि च संलपामि च मुहुः श्लिष्यामि हृष्यामि च॥ १६७॥' इति।

(सहर्षमात्मगतम् ।) कथं वारयुवतिजातेरपि प्रेमभावबन्धुरं हृदयम् । (प्रकाशम् ।) सखि, जानामि ते साहजिकरागरमणीयं चेतः । भवतु । केयं पार्श्ववर्तिनी । यस्याः

किंचित्किंचिदुदञ्चतीव वलयाकारेण वक्षःस्थली
मन्दं मन्दमिवाधिरोहति वचोलीलाक्रमे वक्रिमा ।
स्तोकं स्तोकमिवाविरस्ति सरसव्रीडाविलासो दृशो-
र्वारं वारमवेक्षते च मदनो वस्तुं वराङ्ग्या वपुः ॥ १६८ ॥

किंच ।

पदमधरदले विधाय रागः प्रविशति संप्रति मानसं मृगाक्ष्याः ।
पतति कुटिलतापि कुन्तलेभ्यो विपुलविलोचनलोलवीचिकासु ॥ १६९॥

किं ब्रवीषि—'भाव, इयं ममैव कनीयसी शशिरेखा' इति । (सप्रत्यभिज्ञानाश्चर्यम् ।) कथमेतावतैवानेहसा तावदियमियतीमाकृतिसंपदमधिगता । मम त्विमामालोकयतः

अव्यक्तवर्णमपि कर्णरसायनं य-
त्प्रायः स्खलत्पदमपि प्रियदर्शनं यत् ।
आभाषणं च गमनं च तदेव साक्षा-
दद्यापि मे भवति शैशववृत्तमस्याः ॥ १७० ॥

तदस्या अपि कौमारमहमेवापहरिष्यामि । मयूरक, किं ब्रवीषि—'विदग्धः खलु भवान्मुग्धाङ्गनाजनमनोरञ्जनकलासु' इति । यद्येवमङ्गीकरोति प्रेयसी तारा, तर्हि सफलं मे वैदग्ध्यम् । सखि, किं ब्रवीषि—'यदुपभुक्तशेषं किल तयापि भोक्तव्यम् । गच्छ गच्छ । कठोरातपेन पादनखपङ्के

१. 'प्रेमबन्धुरं' ख. २. 'सहजानुराग' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पथि किं वृथालापेन' इति । तर्हि गच्छ । वयमपि पुरोद्यानवाटीं प्रविश्यातपमपनेष्यामः । सखे, पुरोद्यानपद्यां प्रदर्शय । किं ब्रवीषि—'इत इतः' इति । (परिक्रम्यावलोक्य च सकौतुकम् ।) कथमत्र सरसि मध्याह्निकस्नानमाचरन्ति महीसुराः । (विहस्य ।) किं ब्रवीषि—'अनवरतजडाशयपरिचयादेव नूनमेषां श्रोत्रियजडानां प्रतिदिनमतिशेते मतिजाड्यम् । किं च । सितासितसरित्प्रमुखमहातीर्थराशेरतिमहत्तरमिदं मरकतनामकं सरः पारलौकिकसुखसाधनमिति पौराणिककथामनुधावतामवनिसुराणामनिवारणीयमम्भोवगाहनव्रतम्' इति । ननु रहस्यविदामत्रैव सुखमस्ति । यतः ।

दरहासविलोकनापदेशान्मिलिते यत्र सितासिते तटिन्यौ ।
सुदृशां पुरतो विगाह्य तस्मिन्सुखमत्रैव भजन्ति केऽपि धन्याः ॥ १७१ ॥

अन्यच्च ।

भृङ्गोत्पलाम्बुरुहकम्बुमृणालकोक-
शैवालवीचिसलिलभ्रमसैकतानि ।
यत्रेभहस्तकमठस्फुरितानि भान्ति
क्रीडन्ति तत्र रसिकाः सततं सरस्याम् ॥ १७२ ॥

किं ब्रवीषि—'सखे, दीयतामितो दृष्टिः ।

अम्बुसिक्तविमलाम्बरान्तराद्बिम्ब्यमानजघनोरुमण्डलाः ।
उत्तरन्ति सरसोऽद्य बालिकाश्चित्तलोभकरसिद्धमूलिकाः ॥ १७३ ॥' इति ।

(दृष्ट्वा स्मरणमभिनीय । ) वयस्य,

विमलसलिलासिक्तासक्ताम्बरप्रतिबिम्बितां
मुहुरवयवश्रेणीमेणीदृशां मम पश्यतः ।
स्मरति तदलं चित्तं व्यक्तं यदारचयन्पुरा
मुषितवसने मन्दं कुञ्जं गते मयि गोपिकाः ॥ १७४ ॥

पुनः किं ब्रवीषि—'इतोऽपि विततनलिनदलच्छायायां विकचराजीवराजीविरचितावतंसा राजहंसावली' इति । (निर्वर्ण्य ।)

१. 'गच्छ गच्छ' क. २. 'श्रोत्रियजडानां' क-पुस्तके नास्ति. ३. 'गाथां' ख. ४. 'कमल' ख. ५. 'मन्दं' क. ६. 'अपि' क-पुस्तके नास्ति. ७. 'विरचितनिवासा' ख. ८. 'निर्वर्ण्य' क-पुस्तके नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छायामायतनालपत्रकपटच्छत्रोदितामाश्रिता
कुर्वाणा निजपक्षपाति भुवनं कोशोदयामोदिनी ।
सानन्दं कविभाषितानि कलयन्त्याबद्धपद्मासना
लक्ष्मीं विन्दति राजहंसपरिषन्नामानुरूपामियम् ॥ १७५ ॥

(पदान्तरं गत्वा ।) इदमिदानीमविरल[1]तरुनिकरनिवारितरविकरप्रवेशं रविकरप्रकाशचकितगुरुतिमिरशरणीकरणीयलतागृहप्रवेशं क्वचन समुच्छ्रसितशताङ्गमिव विकसदशोकशाखाभिः, क्वचिदुन्नतमातङ्गमिव निबिडतमतमालतरुभिः, क्वचिदुदारतुरंगमिव क्रीडाकुरङ्गैः, क्वचन वाचालबन्दिवृन्दमिव कलकलायमानकोकिलकुलैः, [2]क्वचन पुरोत्तम्भितपताकमिव राजरम्भाभिः, क्वचिदुद्भ्रान्तकुन्तमिव केतकीप्रसूनैः, क्वचिदुद्यतकरवालमिव चूतप्रवालैः, क्वचिदुद्धृतातपत्रमिव शतपत्रैः, क्वचिदुद्धूतचामरमिव चपलकलहंसैः, क्वचि[3]दुपनतगीतमिव मधुरमधुकरझंकारैः, क्वचिदुदञ्चितनटनचटुलवारनितम्बवतीनिकुरम्बमिव मलयानिलचलितललितलताभिः, क्वचिदुपराचितवितानमिव कायमानैः, क्वचिदुच्छ्रितपटमण्डपमिव कुसुमितलतानि[4]कुञ्जैः समन्ततश्च कुसुमशरनृपशिबिरमिव पुनरनेन सकलेनापि स्फुरति [5]पुरः पुरोद्यानम् । अपि च ।

मधुराप्सरोविलासा मधुरसकलनाकुलालिसहकारा ।
अक्षतरूपश्लाघ्या वनिताजनतेव भाति पुरवन्या ॥ १७६ ॥

किंच ।

अलिकलसदगरुतिलका चलदलकान्ता सुवर्णकृतमाला ।
तरुणवयोरमणीया तरुणीलीलां दधाति वनरेखा ॥ १७७ ॥

[6]अन्यच्च ।

मृदुलवलिललितमध्यं पृथुलकुचं चारुविपुलभूजघनम् ।
पुंनागस्पृहणीयं स्फुरति वनं यौवनं च नारीणाम् ॥ १७८ ॥

१. 'दल' ख. २. 'क्वचिदुत्तम्भित' ख. ३. 'उपवन' क. ४. 'निकुरंबैः' क. ५. 'पुनः' क. ६. 'अपि च' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(वनं प्रविश्य ।) सखे, पश्य पश्य ।

मन्दमन्दमुपगम्य मारुते मञ्जरीकुचकिशोरकस्पृशि ।
रागवत्यपि रसालवल्लरी पल्लवेन पिदधाति पाणिना ॥ १७९ ॥

(पुनर्विलोक्य ।) कोऽयमपरिशीलितसंनिवेश इव, आविष्ट[1] इव, मुक्तचैतन्य इव, मुषितेन्द्रिय इव, अनियतमितस्ततो विवशमेव कथंचन बलादात्मानं संचारयन्क्वचिदपि न विश्राम्यति । (निर्वर्ण्य ।) किं ब्रवीषि—'वयस्य, कलहंसको मदनविह्वलः परिभ्राम्यति' इति । (उपसृत्य ।) वयस्य, किमितस्ततो भ्राम्यसि । किं ब्रवीषि—'किं करोमि ।

अत्राकारितमत्र चुम्बितमिहाश्लिष्टं च हृष्टं पुन-
स्तन्वङ्ग्यात्र विसृष्टमत्र शयितं चात्रैव संभाषितम् ।
इत्थं कुञ्जगृहेषु तान्तसुमनस्तल्पेषु वापीतट-
क्रीडासैकतकेषु च प्रतिपदं भ्राम्यामि ताम्यामि च ॥ १८० ॥' इति ।

कया गणिकया मुषितचेतनो मुह्यसि । किं ब्रवीषि—'आः, किमुच्यते गणिकयेति । नहि[2] गणिकाजनकामुकस्तव[3] वयस्यः । किंतु प्रभाकर-कलत्रस्य कमलिन्यः[4] कैरपि विभ्रमैर्विभ्रान्तस्वान्ततया मनागपि[5] नात्मनः प्रभवामि' इति । सखे, साधु साधु ।

उपरिप्लवस्वभावाः प्रायो गणिकाश्च तार्णकणिकाश्च ।
कथय कथं गाहन्तां रसिकानां मनसि सरसि च स्वरसात् ॥ १८१ ॥

मयूरक, सशिरःकम्पं किं ब्रवीषि—'सदृश एव कमलिन्यां कलहंसस्य रागानुबन्धः । अपि च तादृशमेव तदीयं सौन्दर्यम् । यतः ।

वीथीमुपैति यदि नाम विलासिनी सा
देवोत्सवादिदिवसेषु यदाकदाचित् ।
व्याजात्कुतोऽपि विनिवृत्य पुरोजुषोऽपि
पश्चाल्लगन्ति परिफुल्लदृशो युवानः ॥ १८२ ॥' इति ।

---

१. 'भूताविष्टः' ख. २. 'कथं' ख. ३. 'ते' ख. ४. 'पद्मिन्याः कैरपि विलासैः' ख. ५. 'मनागपि' ख-पुस्तके नास्ति.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सखे कलहंसक, कथय कथमनया सममनायासमत्रैवोद्याने मिलितोऽसि । किं ब्रवीषि—'कथमनायासमासाद्यते परकलत्रम् । शृणु तावत् ।

वीक्षाविभ्रमचेष्टितैरपि मनो विज्ञातुमेवाक्षमं
ज्ञातेऽप्यालपितुं न शक्यमथवा संभाषितापि क्रमात् ।
नेतव्या स्ववशं कथं वशमथानीतापि कृच्छ्रात्कचि-
न्निर्विघ्नं पुनरन्ततः परवधूरासाद्यते वा न वा ॥ १८३ ॥' इति ।

(आत्मगतम् ।) एवमेतत् । अत्रायं सौदामिनीकामुको मयूरक एवोदाहरणम् । अथवा मय्येव तिष्ठति भग्नभागधेये किमन्यगवेषणया । (प्रकाशम् ।) एवमेतत् ।

किमालापः स्वैरं क्षणमपि किमेकत्र वसतिः
किमाश्लेषो गाढं किमु हृदयतृप्तिः[1] किमथवा ।
रतान्ते विश्रान्तिः किमिह परकीयासु घटते
तदप्याश्चर्यं नः परिपतति तास्वेव हृदयम् ॥ १८४ ॥

तत्कथमासादिता कमलिनी वयस्येन । किं ब्रवीषि—'तत्कृते मत्कृतायासो मासमेकं नक्तंदिनमपि कथ्यमानो न पार्यत एव । श्रुत्वा वा ततः किमस्ति प्रयोजनम् । फलितं तु कथयामि । सा खलु प्रथमावलोकनप्रभृति प्रकर्षेण वा प्राचीनपुण्यपरिपाकानाम्, अनुग्रहेण वा शुभग्रहाणाम्, आनुकूल्येन वा कुलदेवतानाम्, अनुरोधेन वा मधुमासवासराणाम्, दाक्षिण्येन वा दक्षिणानिलानाम्, गौरवेण वा कोकिलगुरूपदेशानाम्, महिमातिशयेन वा मधुमदचपलमधुव्रतविरुतमन्त्राक्षराणाम्, प्रभावेण वा प्रसवरजःसिद्ध[2]चूर्णानाम्, महत्तया वा मदनमहाराज[3]विभूतीनाम्, किं बहुना स्वकीयेनैव परतापासहिष्णुना स्वभावतरलेन रसिकसमाजहृदयरञ्जनेन परप्रार्थनाभङ्गभीरुणा निसर्गसरसेन[4] प्रकृतिविशेषेण वा क्रमेणास्य जनस्योपरि आहितरागानुबन्धा बन्धूनपि श्वश्रूमपि श्वशुरमपि पतिमपि परिजनमप्यतिसंधाय कृतसमयबन्धा यदा यदा स्वयमेव मामभिगन्तुमुद्यतवती[5], तदा तदा नि-

१. 'हृदयसाहित्यमथवा' ख. २. 'स्निग्ध' ख. ३. 'महाराजाज्ञा' ख. ४. 'सरसेन' ख. ५. 'उद्युक्तवती' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्कारणवैरिणा सदृशसंमायोगविघटनकुटिलेन परश्रेयोविघातकारिणा प्रकृतिदारुणेन करुणागन्धविधुरेण वात्सल्यकथानभिज्ञेन दुर्विदग्धेन विधिना बहूनपि वासरान्न केवलं विफलमनोरथा कमलिनी कृता, किंत्वेसावहमपि शोकमलिनीकृतः। ह्यस्तने तु पुनरहनि गभस्तिमालिनि शनैरस्तागिरिमस्तकादवतीर्णे चरमार्णवमुपरि परिलग्नमयूखमञ्जरीभिरिव रविपतनपरिक्षुभितजलधिजैलोत्पतितवाडवशिखाभिरिव विरहिजनहृदयतार्णगृहवितीर्णपरिशिष्टमदनविसृष्टदहनहेतिभिरिव संध्यारागरुचिभिरापाटलेषु पयोदपटलेषु, दुर्विषहतदुष्णवेगासहिष्णुतयेव तारतरविरावमुखरमुखमभीक्ष्णकृतपक्षपुटविधूननं शिशिरकुसुमरसपरागपिहितनिजहितकुलायमहीरुहं गतेषु विहंगमेषु, तदात्व एव तदालोकनभयादिव श्रिया घटितदलकवाटेषु कमलवाटेषु, तत्कृतदुरन्तसंतापादिव संजातविस्फोटेषु कुमुदमुक्तास्फोटेषु, समुत्तुङ्गतदङ्गारकणिकास्विव दर्शितावतारासु तारासु, गगनतलगाढलग्नाभिरतिबहुलतया पुनरवगलन्तीभिस्तदुज्ज्वलकज्जलधूलिभिरिव तिमिरपालिभिराक्रान्तेषु दिगन्तेषु, विस्फारतदीयविस्फुलिङ्गेष्विव विद्योतितविपिनाङ्गणेषु ज्योतिरिङ्गणेषु, किंच विफलजनचक्षुषि विस्फुरितसकलतारकारोचिषि प्रचीयमानकौशिकदृगायुषि दूरदृश्यानलार्चिषि दूयमानचक्रवाकहृदयभुषि चञ्चरीकपरिपीयमानकुवलयमकरन्दविप्रुषि उद्वेलचकोरिकातृषि उन्मिषदोषधिज्योतिषि उदग्रदीपिकात्विषि उद्बोधितकुसुमधनुषि शिशिरमरुदनुमीयमानसरसि प्रनष्टसंध्यारागतेजसि अपरिदृष्टचन्द्रमसि अप्रविष्टचन्द्रिकामहसि तस्मिन्ननेहसि, प्रबलतमःपटलपटकृतावगुण्ठनतया केनचिदप्यलक्ष्यमाणो निभृतपदक्रमं क्रमात्प्रभाकरगृहप्राङ्गणं प्रविश्य तस्मिन्नेव पूर्वकृतसंकेते स्नानगृहे न्यवसम्' इति । तर्हि संप्रदायज्ञोऽसि ।

१. 'संयोग' ख. २. 'सा विवाहमपि' क. ३. 'जठरोत्पतित' ख. ४. 'ग्रह' क. ५. 'पयोधर' ख. ६. 'तदुत्थ' ख. ७. 'गमेषु' क. ८. 'तदा तदाविलोकन' क. ९. 'विस्फोटासु कुमुदमुक्तास्फोटासु' क. १०. 'समुत्तरङ्गदुत्तुङ्ग' ख. ११. 'विप्रुषि' क. १२. 'स्नाननिकेतने' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नानालये वा ततनिष्कुटे वा गोष्ठेऽपि वा पुष्पकुटीरके वा।
पराङ्गनाभोगपरेण यूना वस्तव्यमालोक्य विलोकशून्ये॥ १८९॥

ततस्ततः। किं ब्रवीषि—'ततस्तस्या देवरस्तदेव गृहं गृहीतधूमवर्तिरङ्गारार्थी प्रविश्य समुपविश्य चुल्लीसमीपभुवि तत्रत्येनैव केनाचित्त्रुटावशिष्टेन काष्ठेन गाढावनमितमूर्धा किंचिदुल्मुकमुज्ज्वलयन्, उपरि बद्धभस्मपरागमुत्सारयन्, वदनमरुता यावदेव दरदृश्यमानाङ्गाररुचिभिरगारातिमिरनिकरं मदीयधैर्यसारेणैव साकमपसारयति स्म' इति। हन्त, अत्याहितमत्याहितम्। ततस्ततः। किं ब्रवीषि—'तावदेव मदुपकण्ठगते सलिलकलशे मयैव निपातिते तदम्बुपरिवाहविगाहनसमसमयमेव संफूत्कारमुत्थितेन कदुष्णेन भस्मना युगपदेव नासानयनवदनविवरपातिना कमपि विकारमापादितः। तत्कालमेव कलशपतनचकितपलायमानगृहबिडालकं कलशपतनकारणं मन्यमानो मन्युना शपन्, काष्ठेन क्षिपन्, पक्ष्मपुटनासिकाधरश्मश्रूणि कराञ्चलेन परिमार्जयन्, नष्टहुताशनतया निराशो निर्जगाम' इति। (सहर्षम्।) दिष्ट्या पुनरुज्जीवितोऽसि। ततस्ततः। किं ब्रवीषि—'गत्वा च पञ्चषाणि पदानि पुनरेव निवृत्य वामकरेण कवाटमाकृष्य बहिरायसकीलकेन बद्ध्वा निरगात्' इति। (सविषादम्।) कष्टं कष्टम्। ततस्ततः। किं ब्रवीषि—'अथ कथंचन कंचिदिव समयं समवस्थितो मन्दं मन्दं कवाटपुटं विघटयितुमनेकधात्मानमायास्य नीरन्ध्रकृतबन्धनतया बहुभिरप्युपायैरशक्यविघटनमवधारयन्नचिन्तयम्। तदा खल्विदं कवाटबन्धनमकिंचित्करं भवेत्, यदि नाम सा प्रसीदति प्रेयसी कमलिनी। यदि च केनचिदन्तरायेणोपहन्यमानया तया सदनान्निर्गन्तुमेव न पार्यते, तदा पुनरत्र गाढकवाटबन्धे घनेष्टकारचितभित्तौ अभेद्योपरिपरिच्छदे संप्रच्छन्नानि दारुपञ्जरे बुद्धिपूर्वमात्मनैव निपतितस्य मम प्रभाते गृहपतिकरपतनमवश्यमसंशयमेव भविष्यति। कोऽत्र प्रतीकारः। को वा निर्गमोपायः। का वा युक्तिः। किं वा

१. 'कुञ्ज' ख. २. 'आलोकविलोक' ख. ३. 'उल्ललयन्' ख. ४. 'परिबद्ध' ख. ५. 'सह निःसारयति' ख. ६. 'सचूत्कारं' ख. ७. 'आस्थितो' ख. ८. 'भवति' ख. ९. 'दृढेष्टका' ख. १०. 'सद्मनि दारुण' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शरणम् । कस्मै कथयामि । कथं गौरवं प्रतिपालयामि । कथं वा जनोपहासं परिहरामि । कथं वा बन्धुगृहेषु चरामि । कथमपनेतव्योऽपवादः । कथमवलोकनीया गुरवः । सर्वथा चोरं जारं वा व्यपदिशन्ति जनाः । किंच किमनुभूय महत्फलमेतावत्परिभवस्य भाजनतां नीतोऽस्मि, यदनुसंधाय सर्वमपि विस्मरामि । किं च ।

नालिङ्गितं घनपयोधरतुङ्गमङ्गं
नास्वादितं मधुरमप्यधरप्रवालम् ।
नाघ्रातमाननपयोरुहमप्यमुष्या
हन्ताधुनैव कथमापतितोऽन्तरायः ॥ १८६ ॥

इत्यादिकमामीलितलोचन[1]मेवाकलयन्कमपि पदशब्दमश्रौषम् । श्रुत्वा चोन्मीलितनयनो द्वारसंधिविवरप्रविष्टैरायामिभिरिन्दुकान्तमयकुन्तानुकारि[2]भिरर्धावमथितगेहान्धकारैरपरिस्फुटाकारविशेषमर्थजातमुपदर्शयद्भिरनतिबहुभिरिन्दुपादैरनुमितचन्द्रोदयसमयपरिमाणः साशं च साशङ्कं च कवाटविवरदत्तचक्षुरतिप्रौढचन्द्रातपतया निःशेषपरिस्फुटाकृतिं दरफुल्लमल्लिकादामवलितकेशकलापं शशिकिरणपाशपरिवेष्टितमिव तिमिरपटलं शिरसा धारयन्तीम्, सदनवनविहारचकोरकवलितचन्द्रिकातुच्छप्रदेशान[3]च्छकपोलकान्तिपूरैरापूरयन्तीम्, श्रुतिपथविलङ्घनजङ्घालविपुलविलोचनवसतिसीमाविभागहेतुना सेतुनेव नासावंशेनालंकृताम्, गृहदीर्घिकाविकासिकुमुदकुवलयावलेपसारमपसारयितुमिव तत इतो दिक्षु कटाक्षान्विक्षिपन्तीम्, जाम्बूनदाम्बरपरिपिहितावयवतया सहोदरीमोहमिलितयेव सौदामिनीलतया कृताश्लेषां विमलनखमणिप्रतिबिम्बदम्भकृतपादपतनं वदनकमलपराजितं चन्द्रमसं पदक्रमापदेशेन पदे पदे विधूयावधीरयन्तीम्, गुरुकुचकुसुममञ्जरीमञ्जुलतनुलतापरिमलतरलपटीरपवमानमन्तरान्तरा पर्यस्तपटाञ्चलोच्चलनकपटेन पाणिकमलेन परिहरन्तीम्, प्रावृषमिव घनपयोधराम्, शरदमिव प्रसन्नसरसाशयाम्, चन्द्ररेखामिव चारुसुधाधराम्, समुद्रसंपदमिव समकरस्फुरितकंकणा-

१. 'लोचनः' ख. २. 'इन्दुकान्तमयकान्तानु' ख. ३. 'चकोरकिशोरककवलितच्छन्नप्रदेशान्' ख.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिरामाम्, तारामिव सुग्रीवाधिरोपितहाराम्, सुयोधनसेनामिव कर्णावसक्तगाङ्गेयाभरणाम्, सुमेरुधरामिव सुवर्णमेखलाम्, सुरवनीमिव सुरतरुचिरोपगूढस्वान्ताम्, समग्रसकलावयवामपि दरदर्शितानङ्गविभ्रमाम्, सेनामप्यबलाम्, संजातसात्त्विकोदयामपि सान्द्रतमोविगाहनकुतूहलाम्, गुणानुरागिणीमपि दोषागमोत्सुकाम्, परलोकभीतामप्यङ्गीकृतस्वैरभावाम्, तामेव कान्तामपश्यम्' इति । सखे, खरकिरणसंतापितोऽपि शिशिरकरकलामालोकते न किं कुमुदाकरः । ततस्ततः । किं ब्रवीषि—'ततस्तदवलोकनसुधारसाप्यायितसकलावयवतया कमपि प्रमोद[1]भरमन्तरासाद्य सद्य एव तया विघटितकवाटबन्धे प्रागेव दरविवृतकवाटपुटनि[2]र्हितकरः पुरस्तात्प्रसार्य पूर्वकायं [3]कायजसाम्राज्यकलाम्, कमलिनीं करेण गृहीत्वा तमेव मज्जननिवेशं प्रावेशयम् । प्रविश्य ।

धम्मिल्लं मम मुञ्च मुञ्च किमिदं गृह्णासि चेलाञ्चलं
हारस्त्रुट्यति तिष्ठ तिष्ठ गुरवो निष्कारणाशङ्किनः ।
मन्दं जल्प गृहे पतिः स्वपिति मे धूर्तेति संलापिनी
मामालिङ्गितवत्यमुक्तवसना सा सत्वरं प्रेयसी ॥१८७॥' इति ।

सखे, [4]धन्योऽसि । यतः ।

[5]वेश्या किं तव [6]कञ्चुकीं श्लथयितुं वेणीग्रहं मा कृथा
राज्यं नेदमराजकं तव बलात्कारेऽधिकारः कुतः ।
नीवीं मा स्पृश ते स्पृशामि चरणावित्यालपन्ती हठाद्येनालं परिरभ्यते परवधूः सोऽयं हि धन्यो युवा ॥ १८८ ॥

किं ब्रवीषि—'[7]ततः

पादाग्रेण कथंचन स्थितवती बाहू निधायांसयो-
रुन्नम्योरसि मे गुरुस्तनभरेणोल्लेखनं कुर्वती ।
बाला चुम्बन[8]लम्पटेव चपलं स्पृष्ट्वा कपोलस्थली-
मासिञ्चन्मम कामपि श्रवणयोरालापरूपां सुधाम् ॥ १८९ ॥

१. 'भरमतिमात्रमासाद्य' ख. २. 'निर्गत' ख. ३. 'अकायसाम्राज्यकमलां' ख. ४. 'मान्यो' ख. ५. 'वेश्या' क. ६. 'कञ्चुलीं' क. ७. 'ततः' क-पुस्तके नास्ति. ८. 'लम्बितेव चपला' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा किल । अद्याहं शिरोवेदनापरिदूनेनार्यपुत्रेण श्वश्रूसमीप एव शयितुमादिष्टास्मि । श्वश्रूश्च मां प्रागेव शयनगृहं प्रस्थाप्य निद्रां प्रविश्य वर्तते । तदेहि तावत् । आवामशङ्कं पुरोद्याने विहराव' इति । सखे, साधु मन्त्रितं तया । श्वश्रूसमीपशायिनीं मन्यते पतिः । पतिसविधशायिनीं च श्वश्रूः । तदुभयतोऽपि न शङ्कनीयम् । ततस्ततः । किं ब्रवीषि—'ततश्च विततनालिकेरतरुशाखादलवलयकायमानान्तरितचन्द्रकरधोरण्या सरण्या तया तरुण्या तावदिदमेवोद्यानमानीतोऽस्मि । आनीय च सा

संलापकेलिकरताडनसोपहास-
ताम्बूलचुम्बनकचग्रहणैर्विलासैः ।
उद्बोधिताङ्गजतया स्वयमेवताव-
त्प्रावर्तत प्रथमतो रतये नतभ्रूः ॥ १९० ॥

किं च ।

कण्ठाश्लेषिणमुन्नतस्तनभरश्रोणीतटग्राहिणं
संसक्तोरुयुगं गृहीतजघनप्रावारमप्यन्ततः ।
[2]प्रागेव श्लथबन्धमिन्दुवदना गाढावमर्दासहं
विज्ञायात्यजदाशु काञ्चनपटं व्रीडाकुलापि क्षणम् ॥१९१॥' इति ।

मयूरक, सहासं किं ब्रवीषि—'काञ्चनपटमित्यभिधाय मामुज्जीवितवानसि । यैत आत्मानमेव तादृशमत्यजदिति कथयसीति भीतोऽस्मि' इति । (सस्मितम् ।) भवतु । ततस्ततः । किं ब्रवीषि—'वयस्य, ततः परम् ।

प्रागल्भ्यं पुरुषायिते मम पुरः पश्येति संनद्धया
तन्व्या ताम्यदुरोजयापि सुचिरं विक्रम्य रम्यं तया ।
श्रान्ता वक्षसि मे निपत्य च पुनः सापत्रपं सस्मितं
साकूतं च समीक्षितं मृगदृशा यत्तत्कथं कथ्यते ॥ १९२ ॥

एवमनेकविधविहारैरायामवतीमपि यामवतीं विरामवतीमाकलय्य यावदेव पुनरहमेकवारमालिङ्गितुमुद्यतोऽस्मि, तावदेव

१. 'परिदूयमानेन' ख. २. 'द्रागेव' क. ३. 'यतः किल' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करांभ्यामाकृष्य क्वणितवलयाभ्यां सरभसं
समासज्य स्वैरं कुचकलशयोरुत्पुलकयोः ।
गलत्काञ्चीदामन्यलघुनि समारोप्य जघने
तया बद्धो गाढं तदनु सुकृती

(इत्यर्धोक्ते ।) वयस्य, सत्यमेव सुकृती भवान् । यतः ।

परिरम्भकेलिपरिहासभाषणैर्भृशमादृतोऽपि न वशं समेति यः ।
स वधूजनोऽपि यतते यदि स्वयं ग्रहणाय तत्पुरुषपुण्यगौरवम् ॥१९४॥

(सनिःश्वासम् ।) किं ब्रवीषि—'क्व वामेतादृशं सुकृतम्' इति । कस्तर्हि । किं ब्रवीषि ।

'काञ्चनपटः ॥ १९३ ॥' इति ।

ततस्ततः । किं ब्रवीषि—'ततश्च

प्रभातप्रायेयं रजनिरजनि प्राग्गुरुजन-
प्रबोधाद्गन्तव्यं विसृज विसृजेति द्रुतगतिः ।
पटान्ते लग्नं मां परिहृतवती पद्मनयना
प्रयाता पश्यन्ती विवलितमुखेन्दुः प्रतिपदम् ॥ १९५ ॥

ततः प्रभृति

अत्राकारितमत्र चुम्बितमिहाश्लिष्टं च हृष्टं पुन-
स्तन्वङ्ग्यात्र विसृष्टमत्र शयितं चात्रैव संभाषितम् ।
इत्थं कुञ्जगृहेषु तान्तसुमनस्तल्पेषु वापीतट-
क्रीडासैकतकेषु च प्रतिपदं भ्राम्यामि हृष्यामि च ॥ १९६ ॥

मयूरक, किं ब्रवीषि—'सखे, नक्तंदिवमपि तया किं तवाङ्कमारूढया भवितव्यम् । प्रयाता चेन्नक्तमागमिष्यति किमेतावता' इति । एवमेतत् ।

अतनुतापमपास्य निशि प्रभाकरकलत्रमसौ मुकुलस्तनीम् ।
कमलिनीमचिरात्कलहंसको रमयतीति वयस्य किमद्भुतम् ॥ १९७ ॥

किं ब्रवीषि—'यदि तावदनेहसं प्रसूनमार्गणो मार्गणानुपसंहरिष्यति ततः

१. 'तथ्यं' ख. २. 'मम' ख. ३. 'भवति रजनी' ख. ४. 'तदा' ख. ५. 'किमु तावता' ख. ६. 'उपसंहरति' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुभोदर्कं भविष्यति न भविष्यति वा' इति । मयूरक, किं ब्रवीषि— 'सखे, प्रमदवनपालिकां मरालिकामाहूय कलहंसकस्य शिशिरोपचारं कारय' इति । (स्मरणमभिनीय स्वगतम् ।) प्रियाप्रस्थानवृत्तान्तावगमाय प्रेषिता किल मया वनपालिका मरालिका । भवतु । (प्रकाशम् ।) क्वेदानीं मरालिका । कलहंसक, किं ब्रवीषि—'वयस्य, मरालिकानामग्रहणेन स्मृत्वा कथयामि । सा खल्वितः पूर्वस्मिन्नेव मुहूर्ते वयस्यमेव सुचिरमितस्ततोऽन्विष्यान्विष्यानुपलभ्य क्वापि मत्संकाशमागत्य 'अये कलहंसक, तव प्रियसखो मुकुन्दश्चिरमन्विष्टोऽपि न दृष्टः । तदागते तस्मिन्निदं तस्य करे समर्पणीयम्' इति स्वकरकुसुमपुटिकान्तरादुद्धृत्य पत्रिकायुगलं मदुपकण्ठे[1] निधाय मया पुनरपि 'त्वमेव तदागमनपर्यन्तं स्थित्वा गच्छ' इति मुहुरुदीरितापि 'ननु तावदहं राजवल्लभेन मन्दारेण पुराद्बहिरद्य नक्तं कालिकाया बल्युत्सवं कारयता कुसुमानयनायादिष्टास्मि । तत्क्षणमपि विलम्बितुं बिभेमि' इत्युक्त्वा गतवती' इति । (सहर्षं स्वगतम् ।)

विजहाति वक्रिमाणं विधिरधुना तावदीषदिव ।
शुभसूचकान्यमूनि श्रूयन्ते कतिचिदक्षराणि यतः ॥ १९८ ॥
अद्योत्सवदिने नूनं कन्यकापत्यवत्सलः ।
प्रस्थापयति मन्दारो भर्तुर्गेहं न मञ्जरीम् ॥ १९९ ॥

ततस्तत्रैव मरालिका कालिकायतनोद्याने प्रियतमा पूरयिष्यति मे[2] मनोरथमिति तर्कयामि । (प्रकाशम् ।) सखे, एकां तावदुपनय पत्रिकाम् । किं ब्रवीषि—'इदं गृह्यताम्' इति । (गृहीत्वा विलोक्य ।) कथमिदं प्रियाकबरीभारपरिमिलितं केतकीदलमेव[3] । तदेव निर्दिश्य

प्रियावियोगविधुरं ममेवाकृतिनस्तव ।
परिम्लानमभूदङ्गं केतकच्छद तत्कथम् ॥ २०० ॥

अथवा ।

आनीय सस्मितमुखीभिरलं सखीभि-
र्नद्धोऽसि मुग्ध इव वेणिकया नताङ्ग्याः ।

१. 'समीपं' ख. २. 'मे' क-पुस्तके नास्ति. ३. 'कैतकदलं' ख.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हे केतकच्छद तयैव नखैर्लिखन्त्या[1]
भुक्तस्त्वमेव सुकृती पुनरेष नाहम् ॥ २०१ ॥

सखे, किं ब्रवीषि—'वाचय'[2] इति । (प्राकृतमाश्रित्य वाचयति ।) सत्थि महाभाअस्स । एसा गच्छम्हि मन्दभाइणी पइभवणम् (क) । (सास्रम् ।) वयस्य, अतःपरं न शक्नोमि वाचयितुम् ।

कम्पः पाणेः श्लथयति बलात्केतकीबर्हमेत-
च्चक्षुर्बाष्पं स्थगयति ततो नैव बध्नाति लक्ष्यम् ।
चेतो मोहप्रसरकलुषं बुध्यते नापि किंचि-
ज्जातं शून्यं शिव शिव जगत्प्रस्थितेति प्रिया मे ॥ २०२ ॥

तत्त्वमेव वाचय । (गृहीत्वा ।) किं वाचयसि ।

ओहरइत्ति पई मं पिअ मा पज्जाउलो तुमं होहि ।
सो हरइ ताव अङ्गं अत्ताणं हरइ तुइ कहं लग्गम् ॥ २०३ ॥

अण्णं अ ।

सीसम्मि कदुअ पाणी सदवारं णाह विण्णवेमि तुमम् ।
काऊण मइ सिणेहं मा णिअकाअम्मि णिद्दओ होहि ॥ २०४ ॥ (ख)

(सोच्छ्वासम् ।)

अतिसाहसमारूढमियतैव प्रिये त्वया ।
असाविदमपि शृण्वन्हन्त प्राणिमि कर्कशः ॥ २०५ ॥

वयस्यौ, किं ब्रूथः—'सखे, सर्वथा नास्मिन्दिवसे तस्या प्रस्थानं भवति[3] ।

---

(क) स्वस्ति महाभागस्य । एषा गच्छामि मन्दभाग्या पतिभवनम् ।

(ख) अपहरतीति पतिर्मां प्रिय मा पर्याकुलस्त्वं भव ।
स हरेत्तावदङ्गमात्मानं हरति त्वयि कथं लग्नम् ॥
अन्यच्च ।
शीर्षे कृत्वा पाणी शतवारं नाथ विज्ञापयामि त्वाम् ।
कृत्वा मयि स्नेहं मा निजकाये निर्दयो भव ॥

---

१. 'लिखित्वा' ख. २. 'वाचयेति' क-पुस्तके नास्ति. ३. 'संभवति' ख.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परंतु श्वशुरकुलमाकुलयितुं तस्याः पतिहतकेन केवलं विचेष्टमानेन भवितव्यम् । तथाहि ।

[1]मृष्टान्नेषु मृषारुचिः सुवसने दर्पादिवानादरः
 सान्त्वोक्तौ कुटिलोक्तयः किल सुहृद्भावेऽपि सासूयता ।
प्राप्तेपूत्सववासरेषु च पुनः सद्यः प्रयाणोद्यम-
 स्तज्जामातृपदाङ्कितो न कुरुते किंनाम दुश्चेष्टितम् ॥ २०६ ॥' इति ।

प्रकृतिरेवेयं मूर्खाणां यत्प्रस्तुतेषु प्रतीपाचरणम् । किं ब्रवीषि—'इमामपि पत्रिकां शृणोतु वयस्यः' इति । (साशङ्कम् ।) सखे, बिभेमि श्रोतुम् । (पुनः सधैर्यम् ।) किमितोऽधिकं दारुणं भविष्यति । वाचय वाचय । [2]किं वाचयसि—'स्वस्ति समस्तविलासिनीजनमस्तकमणिस्तोमनीराजितचरणनखमण्डलाय विटमण्डलाखण्डलाय युवतिहृदयानन्दकन्दाय मुकुन्दाय । सादरमिदमाकलनीयं वयस्येन वचनं [3]बालमित्रस्य वीतिहोत्रस्य ।

मा प्रस्थिता प्रियतमेति [4]कृथा विषादं
 प्रागेव सा पुनरुपैति गृहान्प्रदोषात् ।
मा भारती मम मृषेति च जातु शङ्का
 ज्योतिर्विदां व्यभिचरन्ति वचांसि [5]नार्थात् ॥ २०७ ॥

तत्कतिचिदेव कालं [6]सोढव्यः संतापः' इति । (विहस्य ।) साय[7]मागन्तुमेव किल महोत्सवमप्यनादृत्य पत्या तामादाय प्रातर्गतम् । किं ब्रवीषि—'वयस्य, मा मैवम् । न खलु दैवज्ञा मृषाभाषिणो भवन्ति । तदा प्रदोषं प्रतिपालनीयमेव' इति । किमेवमपि वक्तव्यम् । प्रतिपाल्यत एव [8]यावत्प्राणधारणम् । किं [9]ब्रवीषि—'किं नाम करणीयम् । अकारणवैरिणा दैवेन दारुणमस्मासु त्रिष्वपि प्रदर्शितम् । अत्र भवितव्यतैव भगवती प्रभवति' इति । भवतु । कश्चन कथाप्रसङ्गः प्रस्तूयतां वासरशेषमतिवाहयितुम् । (इतरेतरमवलोक्य ।) किं ब्रूथः—'किमप्रस्तुतेनान्यकथाप्रस्तावेन । यदेव तावदाकर्ण-

१. 'मिष्टान्नेषु' ख. २. 'किं वाचयसि' क-पुस्तके नास्ति. ३. 'बाल्य' ख. ४. 'वृथा' ख. ५. 'नार्थम्' ख. ६. 'सोढव्याः संतापाः' क. ७. 'मागतमेव' क. ८. 'तावत्' क. ९. 'ब्रूथः' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यितुमावयोरद्भुतजलनिधिमग्नमन्तःकरणम्, तदेव मञ्जरीसमागमसंविधानमानुपूर्व्येण कथयतु वयस्यः' इति । (किंचिन्मुखमवनम्य ।) किमनेन कथितेनाकथितेन वा विफलेन मनोरथेन । तथापि प्रियसहचरयोरनुयोगो न प्रत्यादेशमर्हतीति कथयामि तावत् । आकर्णयतं वयस्यौ । किं ब्रूथः—'इमाववहितौ स्वः' इति । अस्ति किल समस्तसुरमस्तकमणिस्तबकपालीदीपालीनीराजितचरणनखस्य चरणानतचतुर्मुखस्य भगवतो भागवतहृदयमन्दिराभरणस्य श्रीमदिन्दिरारमणस्य निरन्तरतरङ्गदभङ्गुरोत्सवनटनरङ्गं निखिलनगरोत्तमाङ्गं निशाकरपुष्करिणीपरिष्कृतोत्सङ्गं कवेरकन्यकाकृतपरिष्वङ्गं कनकगोपुरोत्तुङ्गं वन्दनमालिकावलदनेकभृङ्गं वन्दारुजनपापभङ्गं वैजयन्तिकाचुम्बितगगनगङ्गं गगनगङ्गाधौतसौधशृङ्गं शृङ्गाटकनटत्क्रीडाकुरङ्गं कुरङ्गलोचनापाङ्गतरङ्गितानङ्गमनङ्गमदचटुलवारकान्तावशीकृतभुजंगं जङ्गमगाङ्गेयगिरिगुरुशताङ्गं शताङ्गचरणकरपरिचरणपरिणतमत्तमातङ्गं मातङ्गमदजलासिक्तरथ्यानटत्तुरंगं तुरंगखुरदलितकुट्टिमसमुत्थितपरागपरम्परापिहितपतङ्गं पतङ्गमणिमण्डपमण्डनशुकसारिकाक्रियमाणहरिकथाप्रसङ्गं संगतनिगमहृदयान्तरङ्गं श्रीरङ्गम् । किं ब्रूथः—'अस्त्यसकृदवलोकितमध्यासितं च ।

सह्यक्ष्माधरतुङ्गशृङ्गघटितप्रालम्बमानोल्लस-
त्कावेरीपरिवाहरश्मियुगलीपर्यन्तपर्यङ्किका ।
मन्ये रङ्गपुरीति यत्र भगवान्वातूलतूलाञ्चिते
तल्पे कल्पितकौतुकः कमलया दोलासुखं ढौकते ॥ २०८ ॥

ततस्ततः' इति । कदाचन किल कमलाहृदयकमलभृङ्गराजस्य रङ्गराजस्य चैत्रोत्सवावलोकनप्रसङ्गाद्वसंतकसंतानकप्रमुखैः प्रियसखैः सह रङ्गनगरीं गतः । तत्र तैस्तैरुत्सवैरमन्दकन्दलितमानन्दमनुभवन्कतिचन दिनान्यनैषम् । एकदा तु कलकलायमानकोकिलकुलकण्ठगर्जिततर्जितपथिकजननयनबाष्पधारापूरपूरितसरणीषु मधुमदचपलमधुकरतरलबकुलमुकुलगलितमकरन्दधोरणीषु चन्दनमरुदान्दोलितलताकुसुमपरागपुलिनशबलितासु कुसुमावचयकुतुकपौराङ्गनाचरणचङ्क्रमणरणन्मणिमञ्जुमञ्जीरमञ्जुलरवाकृष्ट-

१. 'निमग्नं' ख. २. 'अवनमय्य' ख. ३. 'चरतू' ख. ४. 'पराङ्गना' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलहंसधवलितासु क्रीडाकुरङ्गकिशोरककवलितदूर्वाङ्कुरासु वनदेवताकरकलितबलिकुसुमकोरकितशशिकान्तमणिवेदिकासु कवेरजातटवनवीथिकासु कदाप्यदृष्टपूर्वतया निसर्गरमणीयतया च तस्य देशस्य चित्रीकृतहृदयस्तत्र तत्र संचरन्कंचन चञ्चलापुञ्जमिव जलदावतीर्णं पञ्चबाणकलितमिव काञ्चनलतालीलावनं कृतभूतलावतारमिव तारकानिकुरम्बं तरुणीकदम्बमालोकयम् । किं ब्रूथः—'ततस्ततः' इति ।

वदनपरिमलाशावल्गदिन्दिन्दिराली-
वलयशिखिशिखण्डच्छत्रशालिन्यधोधः[1] ।
युवतिजनकदम्बे मञ्जरी तत्र दृष्टा
नवकिसलयलेखामण्डले मञ्जरीव ॥ २०९ ॥

तया च ।

कालिन्दीपुलिनेषु मे विहरतश्चेतोदुकूले चिरं
चित्रं गोपवधूमयं विरचितं चेतोभुवा यत्पुरा ।
तन्वङ्ग्या मम दृक्पथेन रभसादन्तः प्रविश्य क्षणा-
त्तत्सर्वं निजकान्तिकुङ्कुमरसैः कोपादिव क्षालितम् ॥ २१० ॥

मयूरक, किं ब्रवीषि—'अपि नाम तादृशी रूपसंपत्तिः' इति । कलहंसक, किं ब्रवीषि—'कथमन्यथा हृदयमवगाहतां वयस्यस्य' इति । अथ किम् ।

अमृतमयपयोधिमज्जयोर्नौ हरिणकिशोरदृशो मुखापदेशात् ।
कलयति गलितो य एकबिन्दुर्जगति बभूव स एव नूनमिन्दुः ॥ २११ ॥

अपि च ।

कुन्ताः कुटिलदृगन्ता दन्ता नवकुन्द[2]कुसुमसामन्ताः ।

(निःश्वस्य ।)

चिन्ता मम तु दुरन्ता

तथापि संग्रहेण[3] कथयामि ।

वान्ता तडिदेव वारिदात्कान्ता ॥ २१२ ॥

१. 'जालान्यधोधः' ख. २. 'कुन्द' क-पुस्तके नास्ति. ३. 'संक्षेपेण' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रूथः—'ततस्ततः' इति। ततश्च तासु यथाभिलषितं तत्र तत्र लताकुञ्जेषु कुसुमावचयं कुर्वतीषु स्वयमेकैव सा मञ्जरी मदनमदकुञ्जरीव तत इतश्चरन्ती क्वचन माकन्दलतामन्दिरद्वारवेदिकामधिरुह्य वसति मयि किंचिदिव विवर्तितवदना मदनावेशतरङ्गितान्यपाङ्गानि व्यापारयति स्म। तथाहि।

स्वच्छन्दमेत्य मयि न प्रसृतानि कामं
स्वावास एव निभृतं न पुनःस्थितानि।
लक्ष्यान्तरेऽपि च न लब्धपदानि तस्याः
पारिप्लवानि पथि केवलमीक्षितानि ॥ २१३ ॥

किंच।

अन्यासु तासु कुसुमान्युपचिन्वतीषु
कुञ्जेषु मञ्जु मदकुञ्जरगामिनीषु।
सा मञ्जरी तु मम सामिविलोकितेन
चेतोमयं जलजमाहरदेकमेव ॥ २१४ ॥

किं बहुना।

पादाभ्यामुपरुद्धमूरुयुगलीयन्त्रेण निष्पीडितं
मध्येनानतमूर्तिना[1] मृगदृशो नाभौ बलान्मज्जितम्।
व्याकृष्य त्रिवलीषु रोमलतया[2] वक्षोजशैलाग्रयोः
क्षिप्तं वीक्षितसायकैर्मम मनो विद्धं च बद्धं कचैः ॥ २१५ ॥

किंच।

आयातं कचभारबन्धनगृहादास्यामृताम्भोनिधौ[3]
स्नातं दन्तपटीपटीपरिहितं नेत्रोत्पलालंकृतम्।
चेतो मे विनिवेश्य चित्तजनुषा वक्षोजसिंहासने
साम्राज्ये पुनरभ्यषेचि सुदृशः स्मेरापदेशामृतैः ॥ २१६ ॥

---

१. 'आनतमूर्तिना' ख. २. 'कोमलतया' ख. ३. 'अस्या मुखाम्भो' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ब्रूथः—'स्थाने खलु मनोजन्मनो जनकसमाराधनानुरोधः' इति । वयस्यौ, मा मैवम् । अनियतमनङ्गहतकस्य सौहार्दम्, यतस्तेनैव पुनः

अवचितकुसुमाभिस्ताभिरालीभिरेषा
कथमपि पुरमारात्प्रस्थिता यावदेव ।
शिव शिव मम तावच्चित्तजेनाशु चित्तं
प्रमथितमवदीर्णं चूर्णितं घूर्णितं च ॥ २१७ ॥

वयस्यौ, किं ब्रूथः—'अव्यवस्थितचित्तस्य प्रसादोऽपि भयंकरः इति सत्यमेव संवृत्तम् । ततस्ततः' इति । ततश्चान्तरान्तरा सव्याजविवलितमुखीं सुमुखीमारादिवानुसरंस्तदगारद्वारपर्यन्तं गतोऽस्मि ।

तदेन्द्रजालसंरम्भं समजृम्भयदङ्गजः ।
प्रविष्टामपि गेहं तां यन्मे प्रावेशयन्मनः ॥ २१८ ॥

अथ तावदशिथिलावयवसंधिबन्धमज्ञातकैतवकथागन्धं सिन्धुमिव जडाशयम्, जलदमिव पयोवाहम्, जलदकालमिव घनमषीमलिनाम्बरम्, प्रलयानलमिव दग्धकाष्ठावलिम्, हरमिवाग्निविकारलोचनम्, नारायणमिव भक्तानुकूलव्यापारम्, शेषमिवोदग्रदर्वीकरम्, गरुडमिवाधिगतमहानसम्, कृष्णमिव क्षालितकंसमालिन्यम्, राममिव मारीचमथनम्, भीमसेनमिव दलितज्वलितकीचकशतम्, शक्रमिव पाकशासनम्, मत्तमातङ्गमिव करपिष्टनागरम्, वैयाकरणमिव विदितस्वरसव्यंजनप्रक्रियम्, वैशेषिकमिव द्रव्यगुणक्रियाजातिविशेषतत्समवायक्रमाभिज्ञम्, मीमांसकमिवार्थभावनास्वरूपज्ञम्, सुकविमिव विज्ञातशिखरिणीभेदम्, पण्डितमिव परिचितसकलरसपरिपाकम्, कमपि कज्जलमेचकं पाचकमपश्यम् । स च वसन्तकमुखेन पृष्टः स्वभावसरलतया तस्याः सकलमपि नामकुलशीलादिकमकथयत् । तथा हि—यथा किल इयमस्मत्स्वामिनो मलयस्य स्नुषा माधवस्य कलत्रं मञ्जरी नाम्नी मन्दारस्य नन्दिनी । इयमद्य श्वो वा बन्धुकुलदिदृक्षया नवीननगरं गमिष्यति । यत्र पितुर्मन्दारस्य मन्दिरम्' इति ।

१. 'वयस्यौ' क-पुस्तके नास्ति. २. 'अपचित' क. ३. 'सकलावयव' ख. ४. 'प्रदग्ध' ख. ५. 'नागरङ्ग' ख. ६. 'विक्रियं' ख. ७. 'तथा हि' क-पुस्तके नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वयस्यौ, किं ब्रूथः—'अहो परमार्थवादिता याचकस्य। ततस्ततः' इति। ततः कतिपयदिनान्तर एव सा नवीननगरमिदमागता। पश्चादहमपि। अत्र च मयीव तस्यामप्यपक्षपातं दर्शितदर्पे कंदर्पे तत्र भगवत्या जटावत्या विदिततदभिप्रायया परमकारुणिकया स्वयमेव तीर्थयात्राप्रसङ्गेन कालिन्दीतीरवृन्दावने विज्ञातपूर्वं मामुपगम्य कृतप्रणाममाशीर्भिरभिनन्द्य 'वत्स मुकुन्द, कथं कंदर्पसुन्दरायां कन्दलति तव तनाविन्दाविव तानवम्। किमेतदध्वश्रमाद्भवेत्, आहोस्विदिष्टबन्धुविप्रयोगात्, किंवा मदनधनुश्चेष्टितादित्यसकृदनुबध्यानुयुक्तो मनस्येव किं मामुपहसितुम्, किमवधीरयितुम्, किं वा निग्रहीतुम्, किं वानुग्रहीतुं पृच्छति। किमस्यै संवरणीयं विवरणीयं वेति क्षणं विचिन्त्य पुनरेव कुतो महाभावानामनुग्रहादन्यत्राभिनिवेशो भवेदिति कृताध्यवसायः सानुपूर्व्यं भगवत्यै मदनवेदनां न्यरूपयम्। वयस्यौ, किं ब्रूथः—'वयस्य, सम्यगध्यवसितम्। ततस्ततः' इति। सा च तदाकर्ण्य 'वत्स, एवमेव वत्सयापि बाल्यात्प्रभृति मन्दकलालितया मञ्जर्याप्यभिधाय सप्रार्थनं वत्ससकाशं प्रहितास्मि। शृणु तस्याः समवस्थाम्।

सूते बालरसालपल्लवततिः श्वासाहता मर्मरं
पाणिस्पर्शनशोषिताः सुमनसो भ्रश्यन्ति वृन्तैः समम्।
म्लायन्ते नयनान्तवान्तसलिलैर्हा हन्त दूर्वाङ्कुरा-
दावस्पृष्टमिवाद्य निष्कुटवनं तन्व्या दरीदृश्यते॥ २१९॥

तद्भद्र, नोपेक्षणीया बलवदस्वस्था बाला' इत्यभिहितवतीं भगवतीम् 'अयमहं प्रियायाः साहजिकानङ्गतरङ्गितैरपाङ्गैरेव प्रथमं क्रयविक्रयार्हदशामासादितोऽस्मि। विशेषतश्चाद्य तत्रभवत्याः प्रसादेन। तद्यथाभिलषितं नियुज्यस्व' इत्यवोचम्। किं ब्रूथः—'सांप्रतं भगवत्यां न्यस्तभारोऽसि। ततस्ततः' इति। ततः सा भगवती दीर्घं निःश्वस्य।

रूपलावण्यसौन्दर्यसंपदा समयोर्द्वयोः।
प्रेम्णा च युवयोर्हन्त परिपन्थी वृथा विधिः॥ २२०॥

---

१. 'मदनदुश्चेष्टिता' ख. २. 'अन्यथा' ख. ३. 'सा तु' क. ४. 'विक्रयार्हा' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदमुना निष्कारणवैरिणा विहन्यमानो मत्प्रयत्नः कथं शुभोदर्को भविष्यति । अथवा त्रिलोकविजयिनो मन्मथस्य व्यवसितुं कथं नाम विघटयतु कुटिलधीरपि विधिः । भवतु । समयमन्विष्य योजयिष्यामीत्युक्त्वा तत्प्रभृति तया कृतो बहुविधोऽपि प्रयत्नो मदीयदुर्विधिपाकादेव प्रतिहतः । ह्यस्तु पुनर्मन्दारारामे सा मे भगवत्या जटावत्याः प्रसादात्प्रियतमा मञ्जरी करतलर्लमेव । किं ब्रूथः—'चिराय फलितं प्रियसखस्य मनोरथेन' इति । (सनिःश्वासम् ।) नहि नहि । किं तु फलोन्मुख एव भग्नः । वयस्यौ, किं ब्रूथः—'कथं कथम्' इति । (सविषादम् ।)

कुञ्जे कोमलशाद्वले पदमिह द्रागर्पितं वा न वा
किंचिच्चाटु चमत्कृतं च वचनं किं व्याहृतं वा न वा ।
साकूतप्रणयं च सामि नयनं व्यापारितं वा न वा
तन्व्या हन्त तदन्तरे विधिवशात्तस्याः प्रबुद्धः पतिः॥२२१॥

अद्यतनस्तु वृत्तान्तः प्रियवयस्ययोर्विदित एवास्ति । किं ब्रूथः—'भवतु । किमेतावता । अस्मिन्दिवसे फलिष्यत्येव ते मनोरथः' इति । (विहस्य ।) नूनमद्यैव फलिष्यति, यस्मात्प्रियतमा पत्या समं प्रस्थिता । किं ब्रूथः—'सखे, अपि नाम विस्मृतं वीतिहोत्रप्रेषितं पत्रम्' इति । (दिशो विलोक्य ।) विस्मृतप्रायमेव, यदयं प्रदोषसमयोऽप्युपनतः । तथा हि ।

द्रागैन्द्रीमनुचुम्ब्य सस्मितमुखीमामोदिनीं पद्मिनीं
कृत्वासौ परिरम्भसंभ्रमपरिश्रान्तां च वारश्रियम् ।
संरक्तोऽहिमभानुरद्य च समाश्लिष्यत्यहो रागिणीं
काश्मीरोपलसत्पयोधरभरां कान्तां दिशं वारुणीम् ॥२२२॥

किं च ।

पुराणरश्मिजालेषु स्रस्तेष्वस्तावलम्बनम् ।
बिम्बमम्बुरुहां नेतुरम्बरादवलम्बते ॥ २२३ ॥

---

१. 'निहन्यमानो' ख. २. 'अथवात्र' ख. ३. 'विपाकेनैव' ख. ४. 'लग्नैव' क. ५. 'भविष्यति' ख. ६. 'ब्रवीषि' क. ७. 'स्त्रियम्' क. ८. 'चरमां श्लिष्यत्यहो' क.

९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च।

जगदिव ' ढुलातपाभितप्तं जनयितुमद्य जलाभिषेकशीतम्।
परिधृतरविशातकुम्भकुम्भा प्रचलति पश्चिमवारिधिं दिनश्रीः ॥२२४॥

किं च।

पतति रविरपूर्ववारिराशौ हृदि पथिकस्य यथात्मभूर्हुताशः।
प्रसरति च तमां तमःप्ररोहः प्रतिपदमस्य यथा मनोविमोहः ॥२२५॥

किं ब्रूथः—

'अभिभूय सतामवस्थितिं जडजेषु प्रतिपाद्य च श्रियम्।
जगतीपरितापकृत्कथं जलधौ नावपतेदसौ रविः ॥ २२६ ॥' इति।

(अन्यतोऽवलोक्य सकरुणम्।) हन्त हन्त।

चरमाचलपरभागं चक्षुर्जगतामगाद्यावत्।
हा तावदेव कोकौ दूनावन्योन्यमगमतां दूरम् ॥ २२७ ॥

(पुनर्विलोक्य।) कथमित एवागच्छति भगवती जटावती। (सप्रश्रयम्।) भगवति, इत इतः। (किंचिदुत्थाय।) भगवति, प्रणम्यसे। किं ब्रवीषि—'वत्स, अचिरादेवाभिमतं लभस्व' इति। (सनिर्वेदम्।)। कथं ममाप्यभिमतलाभः। किं ब्रवीषि—'अद्यैवोपनतमित्यवधार्यताम्' इति। (सहर्षम्।) कथमिव। किं ब्रवीषि—'अर्धपथात्पुनरागता मञ्जरी' इति। वयस्यौ, किं ब्रूथः—'अहो सूनृतवादिता पुरोहितपुत्रस्य वीतिहोत्रस्य' इति। कथं नाम ज्योतिर्विदां वितथवादिता भवेत्। (सस्पृहं स्वगतम्।)

अन्तर्मनोजदहनोष्णशिखावलीढ-
श्वासोपरोधपरिपाण्डुलसत्कपोलम्।
मद्वीक्षणक्षणभवन्नवकान्तिपूरं
द्रक्ष्यामि तद्वदनवारिरुहं कदा नु ॥ २२८ ॥

किं ब्रूथः—'भगवति, किं पत्यैव पुनरानीता' इति। भगवति, किं वदसि नहि नहीति। (सप्रमोदं स्वगतम्।) तर्हि कथमागता प्रियतमा। किं ब्रवीषि—'शृणु। यावदेवैनामादाय क्रोशमात्रं गतो माधवस्तावदेव तत्पित्रा मलयेन

१. 'चरमां' क. २. 'अद्य' क. ३. 'शूनां' क. ४. 'वत्स वत्स' क. ५. 'कथमिव कथमिव' क. ६. 'वयस्यौ' क-पुस्तके नास्ति. ७. 'कदाहं' ख. ८. 'ब्रवीषि' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रेषितं पत्रमुपनतम्' इति । किमिति प्रेषितं पत्रम् । किं ब्रवीषि—'इदानीं राजोपप्लवाद्रङ्गनगरं विहाय मधुरां गताः स्मः । तद्वत्सा मञ्जरी कतिचन मासांस्तत्रैव मातृभवने स्थातुमर्हति । त्वं तावदेतत्पत्रिकावलोकनात्परं न क्षणमपि विलम्बितुमर्हसि' इति । वयस्यौ, किं ब्रूथः—'वयस्य, दिष्ट्या तव प्रसन्नाः कुलदेवताः' इति । (सौत्सुक्यम् ।) ततस्ततः । किं ब्रवीषि—'ततस्तां मञ्जरीं तत्सहोदरं स्वच्छगुच्छं च पुनर्निवर्त्य तेन पत्रिकानेत्रा सद्वितीयः प्रस्थितो माधवः' इति । (सविस्मयानन्दम् ।)

हन्त पत्यपदेशेन मृत्युना हरिणेक्षणा ।
कला चान्द्रीव तमसा वियुक्ता सहसा कथम् ॥ २२९ ॥

क्वेदानीं प्रेयसी । किं ब्रवीषि—'भद्र, भवद्विरहविह्वलामध्वपरिश्रमखिन्नां मन्यमानो मन्दारो मन्दिर एव मरालिकाद्वितीयां मञ्जरीमास्थाप्य सकलबन्धुकुलसमेतः कालिकामाराधयितुं बाह्योद्यानं गतः' इति । अन्यदप्यनुकूलं भगवत्याः प्रसादेन । क्षणमात्रं ध्यानारूढा भगवती कलहंसकमयूरकौ प्रति किं वदाति—'वत्सौ, युवयोरपि दिष्ट्या फलिष्यति मनोरथः । तदवश्यं व्याप्रियतामभिमतविषयेषु' इति । मयूरक, किं ब्रवीषि—'कलहंसकस्य कमलिनी करतलगतैव वर्तते । मम कथं मन्दभाग्यस्य प्रकृतिचपला सौदामिनी प्रसीदेत्' इति । (पुनरपि ध्यात्वा ।) किं ब्रवीति भगवती—'मयूरक, पूर्वेद्युर्जाग्रतो गुरुजनाद्भीता सौदामिनी प्रतिनिवृत्ता । न खल्वस्यामपि रजन्यां तथा करिष्यति' इति । वयस्यौ, किं ब्रूथः—'न खलु ज्ञायते किं वा भविष्यति' इति । आः, कथं भगवत्या वचनेऽपि विचिकित्सा । (श्रवणमभिनीय ।) कथं पदशब्द इव श्रूयते । (विलोक्य ।) कथं सत्वरं मरालिका समापतति । भगवति, किं ब्रवीषि—'भद्र, सांप्रतमसह्यवेदनया वत्सया प्रेषितेयं भविष्यति' इति । (पुनर्विलोक्य ।) कथं प्रत्यासन्नैव । किं ब्रवीषि—'कहं विलम्बीअदि ।

---

१. 'राजकार्यो' क. २. 'त्वं तावत्' इत्यादि, 'अर्हसि' इत्यन्तं क-पुस्तके नास्ति. ३. 'स्वच्छं च' क. ४. 'मरालकौ' ख. ५. 'प्रसीदतीति' ख. ६. 'विज्ञायते' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महुरसविसलि[1]त्तमग्गणेहिं कुसुमसरेण हेदाएँ[2] हा सहीए ।
णिवइअ मॅ[3]लआणिलो हदासो हर हर जीविदसंसअं करेदि॥२३०॥(क)
(संस्कृतमाश्रित्य ।) किंबहुना ।

सेचं सेचं तुहिनसलिलैर्लोचने वीक्षि[4]ता सा
स्वादं स्वादं हिमकरघटे[5] कां दशां ते वदामि ।
श्रोत्रे शश्वन्मलयजदलैः श्रूयतां वीजयित्वा
प्राणास्तन्व्यास्तव करतले तत्र देवः प्रमाणम् ॥२३१॥' इति ।

भगवति, किं ब्रवीषि—'त्वर्यताम्[6] । यावदेव नोदयशिखरिशिखरमधिरो[7]हति तुषारकरः' इति । एवमेतत् । तिमिरतिरोहित एव समये समुपसर्पणीयाः[8] स्वैरिण्यः । (सर्वतोऽवलोक्य ।)

आपूरितमिदं श्यामतमसंतमसैरलम् ।
ब्रह्माण्डमण्डलं भाति सकज्जलकरण्डवत् ॥ २३२ ॥

कलहंसक, किं ब्रवीषि—

'सर्वे ध्वान्तमिदं वदन्तु बहुधा सिद्धान्त एवं तु नः
स्वाधारेषु करेषु पुष्करमणेः स्वस्तेषु नूनं शनैः ।
अस्तालम्बतयाम्बरेण पतता ग्रस्ते समस्ते जग-
त्युन्मीलत्करकन्दलैरथ[9] विधोस्तत्तावदुत्तार्यते ॥२३३॥' इति ।

वयस्य, सम्यगुक्तम् । मरालिके, किं ब्रवीषि—

'कंदप्पचन्दणसमीरणकोइलाली-
कोलाहलाउलमणा मह दाव आली ।

---

(क) कथं विलम्ब्यते ।

मधुरसाविषलि[10]प्तमार्गणैः कुसुमशरेण हताया[11] हा सख्याः ।
नि[12]पत्य मलयानिलो हताशो हर हर जीवितसंशयं करोति ॥

---

१. 'सित्त' ख. २. 'हदाइ हा सही ई' क. ३. 'मअआणलो' क. ४. 'वीक्षते' ख. ५. 'हिमकरघटिः' ख. ६. 'त्वर्यतां त्वर्यताम्' ख. ७. 'आरोहति' ख. ८. 'समुपसर्पणीया स्वैरिणी' ख. ९. अपि' क. १०. 'सिक्त' ख. ११. 'हता हि हा सखी मे' क. १२. 'निपतति मदनानलो' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्दोदए जदि पदे घणचन्दिआ वि
[1]णूणं भवे अहह दावहदा लदे व्व ॥ २३४ ॥

ता तुवारिज्जदु' (क) इति । अये कलहंसक, मयूरक, युवाभ्यामपि भगवत्युपदेशक्रमेण व्याप्रियताम् । इयं भगवती मरालिका च मां त्वरयतः । किं ब्रूथः—'अथ किम् । वयस्य, साधय साधय' इति । मरालिके, मन्दारसदनमार्गं दर्शय । किं ब्रवीषि—'देव, इदो इदो' (ख) इति । ([2]कतिचित्पदान्यतिक्रम्य ।) कथं क्षणेन मन्दारोद्यानमागतोऽस्मि । (विलोक्य सविस्मयम् ।) कथमिहानुदितेऽपि चन्द्रमसि चन्द्रिकाप्रसरः । मरालिके, किं ब्रवीषि—'ण क्खु चन्दिआपसारो एसो ।

[3]देवं तुह दंसणादो तरुणीए हरिसणिब्भरङ्गीए ।
कन्दलइ मन्दहासो कन्दलिआणन्दकन्दलो व्व [4]मुहात् ॥ २३५ ॥

ता पेक्ख पेक्ख । इमाए

वाणी महुरसवेणी वेणी महुमत्तमहुअरीसेणी ।
खोणी विसालसोणी एणीणअणा वि मअणसरतूणी ॥२३६॥ (ग)

---

(क) कंदर्पचन्दनसमीरणकोकिलालि-
कोलाहलाकुल[5]मना मम तावदालिः ।
चन्द्रोदये यदि पतेद्घनचन्द्रिकापि
नूनं भवेदहह दावहता लतेव ॥

[6]तत्त्वर्यताम् ।

(ख) देव, इत इतः ।

(ग) न खलु चन्द्रिकाप्रसर एषः ।
देव तव दर्शनात्तरुण्या हर्षनिर्भराङ्ग्याः ।
कन्दलति मन्दहासः कन्दलितानन्दकन्दल इव मुखात् ॥

[7]तत्पश्य पश्य । एतस्याः
वाणी मधुरसवेणी वेणी मधुमत्तमधुकरीश्रेणी ।
क्षोणी विशालश्रोणी एणीनयनापि मदनशरतूणी ॥

---

१. 'पूणं' क. २. 'कतिचन' ख. ३. इयमार्या क-पुस्तके गद्यान्तः पातिता. ४. 'मुहादो' ख. ५. 'मला' क. ६. 'त्वर्यतां त्वर्यतां' क. ७. 'तत्प्रेक्ष्य प्रेक्ष्य अस्याः' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवति, किं ब्रवीषि—'एवमेतत् ।

अमुष्या लावण्यं मृदुलमृदुलानप्यवयवा-
न्मनोलौल्यं धातुः कैरकठिनतां मे विमृशति ।
पदं चित्ते धत्ते मतिरिति पुरा पङ्कजभुवा
ध्रुवं कल्याणीयं कलितसुकृतैरेव रचिता ॥ २३७ ॥

तदुपसर्पतु वैत्सः' इति । (उपसृत्य सचमत्कारम् ।)

प्रणये प्रैतार्यमाणे कृष्णभुजंगेन कोकदंपत्योः ।
चकित इव चित्रमेतत्पार्श्वे वर्तयति बैर्हिणं चन्द्रः ॥ २३८ ॥

किं च ।

कुचदुर्गराजधान्योर्मध्येमार्गे मृगीदृशो मदनः ।
किमकृत नाभीवापीमपि रोमालीतमालवनरेखाम् ॥ २३९ ॥

मरालिके, लज्जया किंचिदिव संभ्रान्तां मञ्जरीं प्रति किं ब्रवीषि—

'ओणेहि सुमुहि दूरं वीलां विस्सासघाइणीं झत्ति ।
जा संमुहे वि दइए कितवा विमुहीकरेदि तुमम् ॥ २४० ॥'(क)

प्रिये, किं ब्रवीषि—'सहि, इमो माआवी महाभाओ जदा मह दिट्ठिपहं गतो तदो ज्जेव दूरं पलाइदं वीलाए अणुपअं ज्जेव कुलवुत्तेण अ' (ख) इति । (सस्मितम् ।) मरालिके, किं ब्रवीषि—

'अणुवट्टिअ सेरगइं अम्बां अज्जं वि अणुसरिअ ।
सैरं चरमाणाए ण तुए लुत्तं सुवेणि कुलवुत्तम् ॥२४१॥' (ग) इति ।

---

(क) अपनय सुमुखि दूरं व्रीडां विश्वासघातिनीं झटिति ।
या संमुखेऽपि दयिते कितवा विमुखीकरोति त्वाम् ॥

(ख) सखि, अयं मायावी महाभागो यदा मम दृष्टिपथं गतस्तदैव दूरं पलायितं व्रीडयानुपदमेव कुलवृत्तेन च ।

(ग) अनुवर्त्य स्वैरगतिमम्बामार्यं चानुसृत्य ।
स्वैरं चरमाणाया न त्वया लुप्तं सुवेणि कुलवृत्तम् ॥

---

१. 'कठिनकरतां मे विमृशतः' ख. २. 'भवान्' ख. ३. 'प्रतीर्यमाणे' ख. ४. 'केकिनं' ख. ५. 'किं च' क-पुस्तके नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रिये, मरालिकां कर्णोत्पलेन ताडयन्ती सस्मितं किं ब्रवीषि—'हला मरालिए, कहं अम्बं वि परिससि' (क) इति । भगवति, किं ब्रवीषि—'आ शतसंवत्सरान्तमस्त्येव कुलवृत्तम् । अयं तु दुर्लभः स्वाभिमतविषयानुभवः' इति । प्रिये, अपि नाम श्रुतो भगवतीनिदेशः । प्रिये, सस्मितं किं ब्रवीषि—'ण केवलं सुणीअदि अनुट्ठीआदि अ' (ख) इति । कथं भगवत्युपदेशेनाकलङ्कहृदया प्रेयसी संवृत्ता । [1]भगवती किं ब्रवीति—

'निसर्गादेव युवयोर्निरूढप्रेमबन्धयोः ।
निशायितं मया जोषं कैरविण्यब्जयोरिव ॥ २४२ ॥' इति ।

प्रिये, किं ब्रवीषि—'पेक्ख पेक्ख । एदं कन्दलइ चन्दाबिम्बम्' (ग) इति । अयि,

इन्दुना मम किमब्धिबिन्दुना सिन्धुना च पुनरस्य बन्धुना ।
आनने जयति ते वरानने चञ्चले च कलिते दृगञ्चले ॥ २४३ ॥

(प्राचीमवलोक्य ।) कथमुदितमेव विरहिजनप्राणजगत्प्राणफणिना हराशिरोमणिना । तथा हि ।

कलितमम्बरमाकलयन्करैर्मृदितपङ्कजकोशपयोधरः ।
विकसदुत्पलनेत्रविलोकितः सखि निशां सरसीकुरुते विधुः ॥ २४४ ॥

किं च ।

आलोक्य चन्द्रमसमभ्युदितं समन्ता-
दुद्वेल्लदूर्मिवि[2]चलत्कलशाम्बुराशेः ।
विष्वग्विसारिपरमाणुपरम्परैव
ज्योत्स्नात्मना जगदिदं धवलीकरोति ॥ २४५ ॥

---

(क) सखि मरालिके, कथमम्बामपि स्पृशसि ।
(ख) न केवलं श्रूयतेऽनुष्ठीयते च ।
(ग) प्रेक्षस्व प्रेक्षस्व । इदं कन्दलयति चन्द्राबिम्बम् ।

---

१. 'भगवति, किं ब्रवीषि' ख. २. 'विलसत्' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवति, किं ब्रवीषि—'एवमेतत्।
भास्वत्कर्कशशाणचक्रकषणैराकाशकालायसा-
द्यच्चूर्णं निबिडं निपत्य तम इत्याख्यां जगत्यामगात्।
तच्चेन्दुच्छलसिद्धपारदमहाबिन्दोः समायोगतो
जातं रूप्यरजोमयं वयमिदं ज्योत्स्नां समाचक्ष्महे ॥२४६॥' इति।
अहमेवं तर्कयामि।
समयशबरो व्योमारण्ये सुधाशनमक्षिका-
नुविहितसुधाबिम्बक्षौद्रस्फुरत्पटलं प्रति।
कलयति कलङ्काख्यं धूमं निपीड्य [illegible] त-
त्किरति मधुरज्योत्स्नाक्षौद्रं महीतलभाजने ॥ २४७ ॥
अपि च।
दष्टे जगद्वपुषि कालभुजंगमेन
तत्रान्धकारमिषमाविरभूद्विषं यत्।
संजातलक्ष्मणि तदिन्दुमणौ निपात्य
ज्योत्स्नामये पयसि तं क्षिपति स्म धाता ॥ २४८ ॥
अथवा।
आयताग्रसितरश्मिनिबद्धं लाञ्छनच्छविमषीरसदिग्धम्।
चन्द्रकैतवमरुत्पटचक्रं क्रीडयोत्सृजति किं स्मरबालः ॥ २४९ ॥
किं च।
दिग्यन्त्रतस्तिमिरचूर्णविशेषपूर्णा-
दुद्गत्वरोडुमयरञ्जकविस्फुलिङ्गात्।
कालेन पूर्वगिरिदुर्गजुषा प्रयुक्तो
वृत्तोपलो विधुमिषात्पथिकान्हिनस्ति ॥ २५० ॥
अथवा नायं चन्द्रः।
शम्बरारिरमृतं विषगर्भं चन्द्रबिम्बकपटात्प्रयुनक्ति।
यद्बहिः सितमथासितमन्तः प्रोषितान्दहति दर्शनमात्रात् ॥ २५१ ॥

१. 'शोणकोणकषणैः' ख. २. 'यश्चेन्दोश्छल' क. ३. 'सुविहित' ख. ४. 'चन्द्रकाञ्चनमषी' ख. ५. 'यन्त्रं' ख. ६. 'मयरम्बुक' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रिये, किं ब्रवीषि—'सच्चं कहेइ महाभाओ । णिसग्गवैरी क्खु एसो विरहिजणस्स' (क) इति । मरालिके, किं ब्रवीषि—'कहं विअ सहावसीअलो संदावेइ चन्दमा' (ख) इति । सत्यम् ।

नेत्रमग्निमयमङ्गजशत्रोः संप्रतार्य सुचिराश्रयणेन ।
दाहशक्तिमपहृत्य तदीयां चन्द्रमा दहति नूनमयुक्तान् ॥ २९२ ॥

(सविमर्शम् ।) हन्त, चिरादप्यनेन हताः स्मः । तदद्य प्रियासाहाय्यादसंजातभीतिरेनमुपालभे । (चन्द्रं प्रति ।)

खण्डशस्तव निकृन्तति कालो मण्डलं यदमृतस्य हिमांशो ।
अर्जितस्य हननात्पथिकानां पातकस्य सदृशः स हि दण्डः ॥२९३॥

अथवा त्वच्चरितविलोकनेन दुर्मनायमानस्तवैव तातो नित्यमुपालभते । तथा हि ।

विप्रयोगिहननाय वृथा मे जातवानिति कथं जठरात्त्वम् ।
उद्यतोर्मिकरताडितवक्षाः क्रन्दति त्वदुदयेऽम्बुधिरिन्दो ॥ २९४ ॥

भगवति, किं ब्रवीषि—'मा मैवम् । लोकानुग्रहतत्पराः खलु चन्द्रमदनमलयानिलादयः[1] । अतो नोपालम्भमर्हन्ति । यतः ।

कामानलेन मलयानिलबोधितेन
कारुः[2] कलाद इव शीतकरः प्रताप्य ।
स्त्रीपुंसयोः प्रणयटङ्कणतो द्रवत्वं
नीत्वा मनःकनकमेकरसीकरोति ॥ २९५ ॥' इति ।

(सप्रश्रयम् ।) तर्हि प्रणमामि ।

स्फुरदिन्दीवरानन्दनाडिंधमकराङ्कुरम् ।
वृन्दारजीवजीवातुं वन्दे शिवशिरोमणिम् ॥ २९६ ॥

---

(क) सत्यं कथयति महाभागः । निसर्गवैरी खल्वेष विरहिजनस्य ।
(ख) कथमिव स्वभावशीतलः संतापयति चन्द्रमाः ।

---

१. 'मन्दानिला' ख. २. 'कामं' ख.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(श्रवणमभिनीय ।) चञ्चूपुटचञ्चच्चन्द्रिका मधुरविरावैश्चन्द्रादेशाच्चकोरिकाः किं वदन्ति—

'मुकुन्द मञ्जरीमेतां मुदा त्वं शरदां शतम् ।
आनन्दय यथानन्दमिन्दुरिन्दीवरश्रियम् ॥ २५७ ॥' इति ।

भगवति, किं ब्रवीषि—'तथास्तु' इति । (सविनयम् ।) अनुगृहीतोऽस्मि । पुनः किं ब्रवीषि—'किं ते भूयः प्रियमुपकरोमि' इति । (सविनयम् ।) किमितोऽपि प्रियमस्ति । तथापीदमस्तु भरतवाक्यम् ।

वर्षन्तु कामं भुवि वारिवाहा गोब्राह्मणेभ्यः कुशलानि सन्तु ।
हृष्यन्तु सन्तः सुकविप्रबन्धैस्तेषां च शाम्यन्तु खलोपसर्गाः ॥२५८॥

मुकुन्दानन्दनाम्ना मे भाणेनानेन तोषितः ।
कमलाकामुकः कामं कल्लोलयतु मङ्गलम् ॥ २५९ ॥

कृतिं लसदलंकृतिं रसविदो बुधा ये मम
प्रसन्नहृदया दयाजलधयो बहूकुर्वते ।
तदीयपदपद्मयोरयमयं प्रणामाञ्जलिः
सरोजमुकुलाकृतिः शिरसि संततं न्यस्यते ॥ २६० ॥

इति श्रीमत्काशीपतिकविराड्विरचितो मुकुन्दानन्दनामा भाणः संपूर्णः ।

---

१. 'चकोराः' ख. २. 'कमलैकमनाः' ख. ३. 'चार्पेते' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

KÂVYAMÂLÂ. 7.

# THE KARṆASUNDARÎ

OF

# BIHLANA.

EDITED BY

PAṆDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂṆDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1888.

*Price 8 Annas.*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(*Registered according to act XXV of 1867.*)

(*All rights reserved by the publisher.*)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काव्यमाला. ७.

महाकविश्रीबिह्लणविरचिता

# कर्णसुन्दरी ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधिता ।

सा च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता ।

१८८८

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं रूप्यकार्धम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# बिह्लणः ।

अस्ति कश्मीरेष्वनेकगुणगुम्फितं प्रवरपुरं[1] नाम नगरम्. वर्तते च ततः क्रोशत्रयान्तरे तक्षकनागाधिष्ठितविमलसलिलभरितकुण्डमण्डितस्य जयवनाख्यस्थलस्य समीपे द्राक्षा-कुङ्कुमक्षेत्रसमुल्लसितोभयभागः परमरमणीयः खोनमुख(ष)नामको ग्रामः. निवसन्ति स्म तत्र गोपादित्यमहीभुजा[3] मध्यदेशात्सादरमानीय समावासिताः श्रौतस्मार्तधर्मानुष्ठाननिष्ठितचेतसो ब्रह्मचिन्तनैकतानवृत्तयः कौशिकगोत्रोत्पन्नाः केचन भूसुरसत्तमाः. तेषु निखिलवेदवेदाङ्गवेत्ता मुक्तिकलशो नाम पण्डितरत्नमासीत्. तस्य वदान्यो विक्रान्तो विद्वांश्च राजकलशाभिधस्तनयो बभूव. तस्मान्महाभाष्यव्याख्याता ज्येष्ठकलशाख्यः सूनुरुदपद्यत, यो नागादेवीं नाम पतिव्रताग्रगण्यां भार्यामूढवान्. तयोर्विद्वन्मूर्धन्यो नानानरपतिपरिषत्सु लब्धसंमानः सत्कविरिष्टरामाख्यः, काञ्चनगौराङ्गो वेदवेदाङ्गसाहित्यादिनिखिलविद्याकुलगृहं जगल्ललामभूतो महाकविर्बिह्लणः, कवितानिवासस्थलमानन्दाख्यश्चेति पुत्रत्रयमुदपादि. तेषु बिह्लणो बाल्यमतिवाह्य यौवने नानादेशविलोकनकौतुकादनन्तदेवसूनु[4]कलशदेवराज्यसमये कश्मीरान्परित्यज्य मथुरा-वृन्दावन-कान्यकुब्ज(कनौज)-काशी-प्रयाग-अयोध्या-डाहल-धारानगर-गुर्जरदेश-सोमनाथपत्तन-सेतुबन्धादिस्थलेषु बम्भ्रम्यमाणस्तत्तद्देशीयविविधभूपालसभाजितः क्रमेण दक्षिणदिङ्मण्डनायमानां चालुक्यवंश्यनरेन्द्रराजधानीं कल्याणाभिधां नगरीमाससाद. लब्धवांश्च तत्रैव चालुक्यवंशभूषणेन कर्णाटदेशाधीशेन कुन्तलेन्दुना त्रैलोक्यमल्लापरनामधेयेनाहवमल्लेन तत्सूनुना विक्रमाङ्कदेवेन वा सादरमर्पितां विद्याधिपतिरितिपदवीपुरस्कृतां भूयसीं संपत्तिम्. प्रणिनाय च तत्रैव विक्रमाङ्कदेवचरिताभिधं महाकाव्यमिति विक्रमाङ्कदेवचरितादेवावगम्यते.

---

१. राजधानीनगरम्, अधुना यस्य श्रीनगरनाम्ना व्यवहारः. २. अधुना यस्य 'खुनमोह'नाम्ना प्रसिद्धिः. ३. ख्रिस्ताब्दप्रारम्भात्किंचिदूनचतुःशतवर्षपूर्वं गोपादित्यमहीपतिः कश्मीरेषु राज्यं कुर्वन्नासीत्. ४. 'कश्मीरेभ्यो विनिर्यान्तं राज्ये कलशभूपतेः । विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः ॥९३६॥ प्रसर्पतः करिटिभिः कर्णाटकटकान्तरे । राज्ञोऽग्रे ददृशे तुङ्गं यस्यैवातपवारणम् ॥ ९३७ ॥ त्यागिनं हर्षदेवं स श्रुत्वा सुकविबान्धवम् । बिह्लणो वञ्चनां मेने विभूतिं तावतीमपि ॥ ९३८ ॥ इति कह्लणराजतरङ्गिण्याः सप्तमे तरङ्गे समुपलभ्यते. ख्रिस्ताब्दीयैकादशशतकस्योत्तरार्धे कलशदेवराज्यसमयः. तदैव बिह्लणः कश्मीरान्परित्यक्तवान्. ५. विक्रमाङ्कदेवचरिते प्रतिसर्गसमाप्तौ 'त्रिभुवनमल्लदेवविद्यापति' इति बिह्लणविशेषणं वर्तते. एतेन आहवमल्लापरनाम्ना त्रैलोक्यमल्लेनैव बिह्लणाय विद्यापतिरिति पदवी वितीर्णा स्यादित्यनुमीयते.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बिह्लणचरिताभिधे[1] खण्डकाव्ये तु "गुर्जरदेशे अनहिलपत्तनाभिधे नगरे वैरिसिंहा[2]-भिधो नरपतिः, सुताराभिधा[3] अवन्तिभूपालदुहिता तन्महिषी चासीत् । तयोरेका शशिकलानाम्नी कन्या समुत्पन्ना । सा च क्रमेण यौवनारूढातिरूपलावण्यवती पित्रोः सुतरामानन्ददायिनी बभूव । तत्पिता तु नित्यं तदध्यापनचिन्ताकुलस्तस्थौ । अस्मिन्नवसरे काश्मीरको बिह्लणकविस्तत्र समायातः । नीतश्च राजपुरोहितेनातिकौतुकान्महीपतिसमीपम् । वैरिसिंहमहीपतिरपि निरुपमं तद्विद्याचमत्कारमतिमधुरां च तदीयकवितामाकर्ण्य बहुसंपत्तिसमर्पणपूर्वकं साभ्यर्थनं च नियोजितवान्स्वदुहितुः शशिकलायाः पाठने । सापि पितुराज्ञानुकूलं बाल्योचितां शुकशारिकादिक्रीडामपहाय निजगुरुं बिह्लणं शुश्रूषमाणा विद्याभ्यासं कुर्वती स्वल्पैरेव दिवसैः संस्कृतप्राकृतादि सर्वमधीतवती । एकदा चातिसुरभिगन्धसंचाररुचिरे पुष्पमालादिपरिष्कृते प्रासादे राजसुतां कामशास्त्रं पाठयन्कविरासीत् । तदा च रूपयौवनविद्याविनयादिगुणगणसंपन्ने तस्मिन्कविवरे बद्धभावा शशिलेखा नानाविधैर्हावैस्तस्य चित्तमात्मायत्तं चकार । दैवनोदितः काममोहितश्च कविरपि प्राग्जन्मजायायास्तस्या गूढं गान्धर्वविधिना पाणिं जग्राह । रञ्जयामास च मन्मथतन्त्रप्रतिपादिताभिर्बहुविधाभिः केलिभिर्विविधाभिश्च बन्धक्रियाभिर्नरेन्द्रपुत्रीम् । एवं सुखमनुभवतोस्तयोरतिक्रान्ते कियत्यप्यनेहसि रक्षापुरुषा राजसुतायास्तप्ततपनीयकान्तीन्यङ्गानि म्लायमानशिरीषकुसुमोपमानि संभोगचिह्नाङ्कितानि चालोक्य, विज्ञाय च कथमपि सर्वं गूढं चरितं राज्ञे निवेदयांचक्रुः । राजापि वज्रनिपातोपमं तद्वृत्तमाकर्ण्य रोषेण प्रज्वलन्नादिदेश बिह्लणस्य शूलारोपणम् । तदैव घातुकपुरुषैः शूलाधिरोपणस्थलं नीतो बिह्लणः, उक्तश्च—'भो वध्य, संनिहितस्तवाधुना मृत्युः । स्मर निजामाराध्यदेवताम्' इति । बिह्लणोऽपि राजसुतासक्तमना मृत्युभयमप्यगणयन् 'अद्यापि तां कनकचम्पकदामगौरीं' इत्यादि शशिलेखास्मरणरूपां पञ्चाशिकां समुदीरितवान् । अत्रान्तरे प्राणप्रियाया निजसुतायास्तस्मिन्गाढमनुरागं निजमहिषीमुखादाकर्ण्य किंचिच्छिथिलितकोपो बिह्लणगुणगणवशीकृतस्वान्तः पौरैः परिजनैर्मन्त्रिभिर्बोधितश्च ब्राह्मणवधभीरुर्नरेन्द्रः परमेश्वरेच्छामेव तादृशीं मन्यमानो निवारयामास कविं शूलारोपणात् । समर्पितवांश्च तदैव तस्मै शशिलेखाम्, बहुग्रामगजतुरगसुवर्णरत्नादिसमृद्धिं च । एवं मृत्युमुखान्मुक्तो बिह्लणकविर्नृपतिप्रसादमासाद्य शशिलेखया समं चिरं सुखमनुबभूव" इति कथा वर्तते. परमियं कथा नातिविश्वासार्हा, यतो बिह्लणः ख्रिस्ताब्दीयैकादशशतकोत्तरार्धे कश्मीरान्परित्यज्य समागतस्तदा अनहिलपत्तने चालुक्यवंशोद्भवो भीमदेवसूनुः कर्णराजो[4] महीपतिरासीत्, न तु वैरिसिंहः. चापोत्कट(चावडा)वंशोद्भवो वैरिसिंहस्तु ९२० मिते

---

१. बिह्लणचरितप्रणेतुर्नाम नोपलभ्यते. २. 'वीरसिंहः' इत्यपि नाम पुस्तके वर्तते. ३. पुस्तकान्तरे 'सुनारी' इति पाठोऽस्ति. ४. कर्णराजस्य राज्यसमयस्तु १०७२ मितात्ख्रिस्ताब्दादारभ्य १०९४ मितख्रिस्ताब्दपर्यन्तमासीत्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ख्रिस्ताब्द एव समाप्तोऽभूदिति ऑनरेबल् ए. के. फॉर्बस्प्रणीत'रासमाला'ख्यगुजरातदेशेतिहासग्रन्थे प्रसिद्धमेव.एकादशशतकोत्तरभागे गुर्जरदेशे बिह्लणः समागत इति त्वसंदिग्धम्. गुर्जरदेशे च बिह्लणेन कश्चन क्लेशोऽनुभूत इति 'कक्षाबन्धं विदधति न ये सर्वदैवाविशुद्धास्तद्धाषन्ते किमपि भजते यज्जुगुप्सास्पदत्वम् । तेषां मार्गे परिचयवशादर्जितं गुर्जराणां यः संतापं शिथिलमकरोत्सोमनाथं विलोक्य ॥' अस्माद्विक्रमाङ्कदेवचरितस्थ(१८।९७)पद्यात्प्रतीयते. एवं कल्याणनगरेऽपि कुन्तलाधीशतो भूयांसमैश्वर्यमधिगत्यापि कांचन विपत्तिं बिह्लणोऽनुभूतवानिति 'सर्वस्वं गृहवर्ति कुन्तलपतिर्गृह्णातु तन्मे पुनर्भाण्डागारमखण्डमेव हृदये जागर्ति सारस्वतम् । रे क्षुद्रास्त्यजत प्रमोदमचिराद्देष्यन्ति मन्मन्दिरं हेलान्दोलितकर्णतालकरटिस्कन्धाधिरूढाः श्रियः ॥', 'अयि किमनिशं राजद्वारे समुद्धुरकंधरे कुवलयदलस्निग्धे मुग्धे विमुञ्चसि लोचने । अमररमणीलीलावल्गद्विलोचनवागुराविषयपतितो न व्यावृत्तिं करिष्यति बिह्लणः ॥' अस्मात्कश्मीरदेशीयचौरीसुरतपञ्चाशिका(चौरपञ्चाशिका)पुस्तकप्रारम्भस्थश्लोकद्वयाज्ज्ञायत.

चौरपञ्चाशिका, विक्रमाङ्कदेवचरितम्, कर्णसुन्दरीनाटिका चेति ग्रन्थत्रयमद्यावधि बिह्लणप्रणीतं समुपलब्धमस्ति. तत्र चौरपञ्चाशिका तावत्सुप्रसिद्धैव. विक्रमाङ्कदेवचरितं च जैसलमेरनगरात् डॉक्टरबूलरेणासादितम्, प्रसिद्धिं च नीतम्. कर्णसुन्दरी तु नाद्यापि प्राकाश्यमाप्तवती. पूर्ववर्षे ग्वाह्लेरनगरनिवासिपण्डितगङ्गाधरजोशीसकाशादेकं कर्णसुन्दरीपुस्तकमस्मन्मित्रै राजगुरुपर्वणीकरोपाह्वनारायणभट्टैः प्राप्तमस्मभ्यं समर्पितं च. एतत्पुस्तकं प्रायः शुद्धं केनचित्संशोधकेन क्वचित्क्वचिदशुद्धतां नीतं शतत्रयवर्षप्राचीनमिवोपलक्ष्यमाणमस्ति. अस्मिन्पुस्तके पञ्चाशन्मितानि पत्राणि, प्रतिपृष्ठं षट्पङ्क्तयः, प्रतिपङ्क्ति च षड्विंशत्यक्षराणि सन्ति. पत्राणि च षडङ्गुलमितानि विस्तारे सार्धत्रयोदशाङ्गुलमितानि च दैर्घ्ये वर्तन्ते. पञ्चाशन्मितपत्रान्तिमपङ्क्तिसमाप्तौ 'समाप्ता चेयं कर्णसुंद–' इत्यस्ति. एतेनापरमप्येकं पत्रमासीत्, तस्मिन्पुस्तकलेखनकालोऽपि कदाचित्स्या'दिति भाति. अन्यदप्येकं पुस्तकमस्मन्मित्रपण्डितज्येष्ठाराममुकुन्दजीशर्मणां साहाय्येन मुम्बईनगरमण्डनसत्कविपण्डितवरगट्टूलालाजीशर्मणां पुस्तकसंग्रहादुपलब्धम्. किं त्वेतत्पुस्तकमत्यशुद्धं पत्रत्रयहीनं ग्वाह्लेरपुस्तकस्यैव प्रतिरूपकमिव प्रतीयमानमस्तीति नात्र तस्य कश्चिदुपयोगो जातः. केवलमेकस्माद् ग्वाह्लेरपुस्तकादेवैतन्मुद्रणमस्माभिर्विहितम्. कर्णसुन्दर्यां चास्यां पूर्वोक्तश्चालुक्यवंशोद्भवो भीमदेवात्मजः कर्णराज एव कथानायकः. अन्यद्वृत्तं तु प्रायः कविकल्पितमस्तीति भद्रम्.

---

१. डॉक्टरबूलरस्य 'कश्मीर रिपोर्ट'पुस्तकं द्रष्टव्यम्. २. विक्रमाङ्कदेवचरितादिष्वनुपलभ्यमानाः केचन श्लोकाः शार्ङ्गधरपद्धति-सूक्तिमुक्तावल्यादिषु बिह्लणनाम्ना समुद्धृताः समुपलभ्यन्त इत्यस्ति कश्चिदन्योऽपि ग्रन्थो बिह्लणप्रणीत इति प्रतीयते.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# काव्यमाला ।

## महाकविश्रीबिह्लणविरचिता

## कर्णसुन्दरी ।

प्रथमोऽङ्कः ।

अर्हन्नार्हसि मामुपेक्षितुमपि क्षामां त्वदर्थे तनुं
किं नालोकयसे भविष्यति कुतः स्त्रीघातिनस्ते सुखम् ।
अङ्गैः काञ्चनकान्तिभिः कुरु परिष्वङ्गं सुपर्वाङ्गना-
लोकैरित्थमुदीरितः क्षितिधरस्थायी जिनः पातु वः ॥ १ ॥

अपि च ।

संतापं शमयन्तु वस्त्रिविधमप्युन्मूलनानन्तरं
तिस्रस्ताः करतालिकाः पुररिपोर्निर्विघ्नसंध्यार्चनाः ।
देव्याः शैलभुवः क्षणं मदयता दृष्टिं यदाकर्णना-
त्कौमारेण शिखण्डिना निबिडितक्रीडारवं नृत्यते ॥ २ ॥

अपि च ।

वक्त्रेन्दोः सदृशी भविष्यति लिपिः कण्ठे नु कण्ठोचिता
लक्ष्मीः किं कुचमण्डले कुचभुवः संवादि मध्यं नु किम् ।
इत्यादि क्रमशः कुतूहलरसप्रेमालसा दृष्टयः
श्रीकान्तस्य जयन्ति दुग्धजलधेरभ्युल्लसत्यां श्रियि ॥ ३ ॥

(नान्द्यन्ते)

**सूत्रधारः**—कथं प्रभातसमयः ।

अपरशिखरिचूडाचुम्बि बिम्बं हिमांशो-
रिह हि विरहिणीनां याति शापैरिवास्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि कुपितचकोरीनेत्रसब्रह्मचारी
भजति ककुभमैन्द्रीं कोऽपि सांध्यो विलासः ॥ ४ ॥
दधति गृहचकोराश्चन्द्रिकाम्भःशिलोञ्छं
क्वचन कनकशालाजालकाभ्यन्तरेषु ।
अपि रतिभवनानि व्यञ्जयन्ति प्रियाणां
निधुवनसुखनिद्रां मूकपारावतानि ॥ ५ ॥
विडम्बयति दाडिमीकुसुममत्र सौत्रामणी
दरिद्रति वियद्द्रुमे मुकुलकान्तयस्तारकाः ।
वपुस्तुहिनदीधितेरपि चकास्ति कस्तूरिका-
कुरङ्गनयनारुणं वरुणलाञ्छितायां दिशि ॥ ६ ॥

(नेपथ्याभिमुखम् ।) आर्ये, अपि सुसंगतानि रङ्गमङ्गलानि । (विमृश्य ।) पराङ्मुखीवार्या । किं नु कारणं स्यात् । (स्मृतिमभिनीय ।)

आस्थानावसरे नरेन्द्रतरणेः सा दाक्षिणात्या नटी
नृत्यन्ती यददर्शि नूतनवयोविद्यानवद्या मया ।
तद्गोष्ठीरसनिर्भरेण किमपि स्वप्ने यदद्य स्थितं
मन्ये मन्युकषायितेन मनसा तेन स्थिता मे प्रिया ॥ ७ ॥

(सप्रत्ययम् ।) इतस्तावत् ।

(प्रविश्य)

**नटी**—इअह्मि । (क)

**सूत्रधारः**—अलमसंभाव्यसंभावनया ।

परिणयविधिरासीदावयोः पांसुलीला-
परिचयदृढरूढस्नेहयोर्बाल्य एव ।
स्मरसि किमपि तत्राप्यानुकूल्यात्परं य-
त्सपदि पुनरसौ मे पञ्चबाणः प्रमाणम् ॥ ८ ॥

**नटी**—न मे कावि आसङ्का। आणवीयदु किं अणुचिट्ठीयदु त्ति । (ख)

(क) इयमस्मि ।

(ख) न मे काप्याशङ्का । आज्ञापयतु किमनुष्ठीयतामिति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सूत्रधारः**—नन्वस्मिन्नणहिल्लपाटणकमुकुटमणौ श्रीशान्त्युत्सवदेवगृहे भगवतो नाभेयस्य महामात्यसंपत्करप्रवर्तिते यात्रामहोत्सवे समुत्सुकः सामन्तजनः प्रत्यग्रप्रयोगदर्शनाय ।

(नेपथ्ये गीयते ।)

णवमाहवीएँ दाविय सरसविलासाइँ परवसाइन्तो ।
मन्दीकअकुन्दलआचुम्बणतह्णो भमइ भमरो ॥ ९ ॥ (क)

**सूत्रधारः**—(सहर्षम् ।) कथमुपक्षिप्तैव नटैर्नाटिका कर्णसुन्दरी । अहो सुकृतानि सामाजिकजनस्य ।

हंहो भाग्यमहानिधिर्दयितया देवस्य दग्भुः पुरां
पात्रं पुत्र इव स्वयं विरचितः सारस्वतीनां गिराम् ।
साहित्योपनिषन्निषण्णहृदयः श्रीबिह्लणोऽस्यां कविः
किं चैतत्किल भीमदेवतनयः साक्षात्कथानायकः ॥ १० ॥

स च कविरेवमुक्तवान्—

औचित्यावहमेतदत्र तु रसः काष्ठामनेनार्हति
व्युत्पत्तेरिदमास्पदं पदमिदं काव्यस्य जीवातवे ।
एवं यः कवितुः श्रमः सहृदयस्तं पुस्तकेभ्यः पठ-
न्सूक्तीरुत्पुलकः प्रमार्ष्टि निबिडैरानन्दबाष्पोद्गमैः ॥ ११ ॥

अपि च ।

न विश्वासस्थानं प्रियमभिदधानोऽपि पिशुनो
विषं प्राणान्हर्तुं धुरि मधुरमेव प्रभवति ।
परं शक्तः कर्तुं किमु मम वराकः कतिपये
यदद्यापि ज्ञप्तौ सुकविवचसां केऽपि सुजनाः ॥ १२ ॥

(कर्णं दत्त्वा ।) किमात्थ । कोऽत्र कथासंबन्ध इति । श्रूयताम् ।

विद्याधरेन्द्रतनयां नयनाभिरामां
लावण्यविभ्रमगुणां परिणीय देवः ।

(क) नवमाधव्या दृष्ट्वा सरसविलासान्परवशायितः ।
मन्दीकृतकुन्दलताचुम्बनतृष्णो भ्रमति भ्रमरः ॥

For Private and Personal Use Only

चालुक्यपार्थिवकुलार्णवपूर्णचन्द्रः
साम्राज्यमत्र भुवनत्रयगीतमेति ॥ १३ ॥

(पुरोऽवलोक्य ।) कथमयमस्मद्भ्राता महामात्यप्रणिधिभूमिकामाश्रित एव । तदेहि । अनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशति प्रणिधिः ।)

**प्रणिधिः**—अहो किमपि यौगन्धरायणप्रभृतिमहामात्यविजयिनोऽभ्यर्हिता मतिरमात्यसंपत्करस्य । तथा हि ।

वात्सल्यं न वहत्यपत्यविषये व्याक्षिप्यते न क्षणं
दाक्षिण्येन समीहिते नववधूवर्गेऽपि धीराशयः ।
निष्णातः कुटिले नयाध्वनि चरन्नाचारपूतः प्रभो-
र्दुःसाध्यानपि साधयत्यभिमतानर्थान्सुसाधानिव ॥ १४ ॥

अपि च ।

अस्याश्चर्यमयस्य मन्त्रगतयः स्वैरन्तरङ्गैरपि
ज्ञायन्ते न विधेरिवातिकुटिला वैदग्ध्यसीमाभुवः ।
श्रूयन्ते प्रतिभूभृतां वसतयस्त्वङ्गत्तुरंगावली-
विश्वोत्खेलखुराग्रखण्डितमणिक्षोणीतलाः केवलम् ॥ १५ ॥

किं च ।

शेषे प्रज्ञाविशेषः स्फुरति यदि किमु च्छद्मना पद्मनाभः
संरम्भात्तेन तेन स्वयमसुरवधव्यग्रभावं दधार ।
वाचामीशोऽपि सत्यं यदि विपुलमतिः श्रूयते वज्रिणः किं
दैत्यावस्कन्दबन्दिग्रहणपरिभवश्यामला शक्रलक्ष्मीः ॥ १६ ॥

संप्रति प्रेषिताश्च प्रतिदिशं सेनापतय इति । (कर्णं दत्त्वा । आकाशमवलोक्य ।)

अमरसरिदुपान्तभ्रान्तचक्राह्वचक्र-
भ्रममुरसिजभारैः काश्चन व्यञ्जयन्त्यः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किमु विततनितम्बाभोगसंवाह[1]वेग-
स्खलनमुखरचञ्चत्काञ्चयः संचरन्ति ॥ १७ ॥

(अग्रतो विलोक्य । सविस्मयम् ।)

तुलाकोटिक्काणप्रणयिभिरवाप्तैरिव गते-
विलासे शिष्यत्वं भवनकलहंसैरनुगता ।
सुधामुग्धैरङ्गैः शशिन इव गर्भाद्विगलिता
कुरङ्गाक्षी केयं तिलकयति लीलावनभुवम् ॥ १८ ॥

(पुनरवलोक्य ।)

उच्चञ्चुपञ्जरचकोरकचर्व्यमाण-
पूर्णेन्दुसुन्दरताराननचन्द्रिकेयम् ।
देव्याः कथं परिजनप्रमदाजनेन
नीतैव मन्दिरममन्दकुतूहलायाः ॥ १९ ॥

(विचिन्त्य ।)

एताः काश्चन निश्चलालकलताश्चिन्तातिरेकश्रम-
स्विद्यद्भालतटा यदम्बरतले भ्राम्यन्ति वामभ्रुवः ।
श्रीचालुक्यकुलोद्वहे कलयति त्र्यक्षोपचर्यामिह
त्रस्ता काचन लिङ्गलङ्घनवशात्तद्वेद्मि विद्याधरी ॥ २० ॥

(सचमत्कारम् ।) सत्यस्वप्नः सांप्रतममात्यः । तेनैवंविधेन व्यतिकरेण मां प्रति भर्तुश्चक्रवर्तित्वमभिहितमासीत् । तत्परिजनमुखेन

जानीते निपुणा कथंचन मनाग्देवी न सीता यथा
वारंवारमसौ तथा नरपतेः संदर्शनीया मया ।
अन्योन्यं हृदये तयोः स्पृहयतोर्भावेऽतिभूमिं गते
पर्याप्तः कुसुमायुधः स भगवान्पारावताराय नः ॥ २१ ॥

तद्भवतु । सांप्रतमेव

लीलोद्याने भवनवलभौ रत्नवातायनेषु
क्रीडासौधे तदनु मदनोद्यानशालासु बालाम् ।

---

१. आदर्शपुस्तके 'संवाह-' इत्यस्य 'संबाध-' इति शोधनं कृतमस्ति.

२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्दोर्गर्भे चिरमिव धृतैरङ्ककैस्तामनङ्ग-
स्याज्ञावाप्तौ पुनरिव नवां सिद्धिमालेखयामि ॥ २२ ॥

(नेपथ्ये।)

जयति विश्रामावसरो देवस्य। संप्रति

अन्योन्यं लज्जयेव प्रतिफलनमिषात्कुट्टिमान्तर्विशन्तः
पातालं भूमिपालाः किसलयितशिखाः पाणिबन्धैः प्रणम्य।
गच्छन्ति च्छत्रखण्डस्तबकितककुभश्चित्रवादित्रजैत्र-
ध्वानाकृष्टप्रहृष्टप्रचुरपुरवधूवीक्ष्यमाणा गृहाणि ॥ २३ ॥

अपि च।

पञ्चास्त्रस्य त्रिलोकीहठविजयमहारम्भसंभारदीक्षा-
माचक्षाणा इवोच्चैर्जघनझणझणन्मेखलाचक्रवालैः।
ध्वस्ताम्भोजैः सुभिक्षं दिशि दिशि विशदैर्दर्शयन्त्यश्च वक्त्रै-
श्चन्द्राणां सान्द्रलीलातिलकितगतयो निर्गता वाररामाः ॥ २४ ॥

किं च।

विश्रान्तो मुरजध्वनिर्जलधरध्वानानुकारी गताः
संगीताङ्गणतस्तरङ्गितमुखज्योत्स्नारसा लासिकाः।
चण्डः केलिशिखण्डिनां न विरमत्यद्यापि नृत्योत्सव-
श्चञ्चच्चञ्चव एव किं च विचरन्त्यन्तश्चकोराङ्गनाः ॥ २५ ॥

**प्रणिधिः**—यत्पुनर्देवो विश्राममण्डपमलंकृतवांस्तन्नूनमेतद्दर्शनजन्मा मन्मथावेग एव विविक्तस्थानस्थितिमुपदिशति। तद्गत्वा यथोचितं विरचयामि। (इति निष्क्रान्तः।)

**शुद्धविष्कम्भकः।**

(ततः प्रविशति राजा विदूषकश्च।)

**राजा**—(सौत्सुक्यम्।)

धातुस्तन्मुखवर्तनाफलहकः श्यामावधूवल्लभ-
स्तल्लेखोद्यततूलिकाग्रगलितास्ताराः सुधाविप्रुषः।

१. 'किशलयितशिखापाणि—' इत्यादर्शपाठः. २. 'छत्रपंड—' इत्यादर्शपाठः. ३. 'ज्झणज्झण—' इत्यादर्शपुस्तकपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तल्लावण्यरसस्य शेषममला सा शारदी कौमुदी
तद्भूनिर्मितिमानसूत्रमपि तच्चापं मनोजन्मनः ॥ २६ ॥

[1]अपि च ।

मज्जन्तीव दृशः कुरङ्गकदृशो लीलाविलासोर्मिषु
भ्रूलेखा सृजतीव विभ्रमशतैः कामाय दामावलिम् ।
लावण्यामृतनिर्झरः स्नपयतीवाङ्गानि किं चाधर-
स्तारां सिञ्चति पद्मरागकिरणोत्सेकैरिवैकावलीम् ॥ २७ ॥

अपि च ।

त्रिवलिवलितलीलालोलवेणीकलापं
किमपि रसविभूतेस्तिर्यगाकेकराक्षम् ।
कलितकुटिलकण्ठं दर्शनोत्कण्ठयास्या
लिखितमिव ममान्तस्तन्मुखं मन्मथेन ॥ २८ ॥

**विदूषकः**—भो, किं वि पुच्छामि । (क)

**राजा**—(तदवधीरणेन ।)

विधत्ते निःसेकं सहजरमणीयस्तरुणिमा
वपुर्वल्लीं चित्रैः कवचयति लीलाकिसलयैः ।
विलासव्यापारः किमपि कमलस्थो नयनयो-
रनङ्गं तन्व्यङ्ग्यास्त्रिभुवनजिगीषुं रचयति ॥ २९ ॥

**विदूषकः**—भो, का एसा लीलावणप्पवेसे पिअवअस्सेण दिट्ठा ।(ख)

**राजा**—

ध्यानान्ते विधिना प्रणम्य चरणौ चन्द्रार्धमौलेरहं
कैश्चिज्जप्यपदैः प्रदक्षिणयितुं यावत्समभ्युद्यतः ।

---

(क) भोः, किमपि पृच्छामि ।

(ख) भोः, कैषा लीलावनप्रवेशे प्रियवयस्येन दृष्टा ।

---

१ 'अपि च' इत्यादर्शे नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावत्काचिदनङ्गजङ्गमपुरीवाग्रे मनोग्राहिणी
रम्भास्तम्भमनोहरोरुयुगला बालाभवच्चक्षुषोः ॥ ३० ॥
स्वप्नोऽसौ किमुतेन्द्रजालमपरं किं वा किमप्यद्भुतं
यत्सा कान्तितरङ्गिताङ्गलतिका दृष्टा कुरङ्गेक्षणा ।
उल्लेखः स नवीन एव सुमतेः कस्यापि रूपे विधेः
संवादोऽपि न यस्य पङ्कजशशिज्योत्स्नामृणालादिभिः ॥३१॥

**विदूषकः**—भो, एदस्स उज्जाणप्पदेसस्स किं करीअदु जत्थ अणत्थो एरिसो समावडिदो । (क)

**राजा**—मूर्ख,

तदेकं देवस्य स्पृशतु मदनस्यास्पदपदं
लतास्तास्तत्रत्याः स्तबकयतु चैत्रः प्रतिदिनम् ।
असौ दृष्टा यत्र क्षणममललावण्यसरसी
जगन्नेत्राचम्यं किमपि दधती कान्तिसलिलम् ॥ ३२ ॥

**विदूषकः**—भट्टिणो संदावदाअणं ति भणामि । (ख)

**राजा**—सखे,

चान्द्री वर्तिर्नयनयुगले जीवलोकस्य सैका
सा साम्राज्ये कुसुमधनुषः कीर्तिहेतुः पताका ।
तत्प्राप्त्याशाविवशमनसा केनचित्तप्यते चे-
न्निःसंबन्धं कथयतु भवान्कस्तदीयोऽपराधः ॥ ३३ ॥

**विदूषकः**—(छोटिकां दत्त्वा ।) जइ एव्वं अत्थि विवेओ ता कीस ण विरज्जीअदि । (ग)

**राजा**—अनभिज्ञोऽसि । कथ्यते । पश्य ।

रागः कस्यचिदेति चेतसि पदं यः काकतालीयतः
कस्यांचिन्न विवेकवारिविसरैर्धौतोऽपि निर्यात्यसौ ।

(क) भोः, एतस्योद्यानप्रदेशस्य किं क्रियते यत्रानर्थ ईदृशः समापतितः ।
(ख) भर्तुः संतापदायकमिति भणामि ।
(ग) यद्येवमस्ति विवेकस्तत्कुतो न विरज्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माञ्जिष्ठादपि सोऽन्य एव किमपि स्थैर्यास्पदं मन्मथे-
नावर्त्यैव निजेन बाणशिखिना चित्तैक्यमापादितः ॥ ३४ ॥

**विदूषकः**—अध किं ति देवी दुम्मणायन्ति व्व मये लक्खिदा । (क)

**राजा**—शृणु निवेदयामि ।

अद्योद्याने मरकतमयीं वापिकामुत्तरेण
स्वप्ने दृष्टा प्रकृतिमधुरा माधवीमण्डपान्तः ।
काप्येणाक्षी रतिरिव मया विप्रयुक्ता स्मरेण
स्मारं स्मारं किमपि दधती दुःसहां मोहनिद्राम् ॥ ३५ ॥

**विदूषकः**—तदो । (ख)

**राजा**—

अम्ब त्र्यम्बकपक्ष्मलाक्षि भगवन्विश्वैकवीर स्मर
स्मर्तव्या जननान्तरेऽपि युवयोः कारुण्यलेशादहम् ।
अस्मिञ्जन्मनि तावदुन्मदसुरस्तम्बेरमाकृत्रिम-
क्रीडामन्दगतिः स सुन्दरवपुर्नो नेत्रमैत्रीं गतः ॥ ३६ ॥

एवं पुनः पुनरुदीर्य विदीर्यमाणं
वज्राग्रभिन्नमिव सा हृदयं दधाना ।
मोहं गता कुचतटे नयनाम्बुलेशै-
रासूत्रितत्रिचतुरापरहारलेखा ॥ ३७ ॥

**विदूषकः**—हद्धी हद्धी पमादो । संकडे पडिदा महाणुभावा । तदो । (ग)

**राजा**—

अथ कथमपि संज्ञां प्राप्य दीर्घं श्वसन्ती
कुचपरिसरनृत्यत्तारहारावलीका ।

---

(क) अथ किमिति देवी दुर्मनायमानेव मया लक्षिता ।

(ख) ततः ।

(ग) हा धिक् हा धिक् प्रमादः । संकटे पतिता महानुभावा । ततः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विचकिलवनगुल्मे नूतनीभूतवल्ली-
वलयनिगलिता सा पाशबन्धे प्रवृत्ता ॥ ३८ ॥

**विदूषकः**—(हस्तमुद्यम्य ।) अब्बह्मण्णं अब्बह्मण्णम् । (क)

**राजा**—वैधेय, स्वप्नविधिरयम् ।

**विदूषकः**—तदो । (ख)

**राजा**—

विरम रमणि प्राणत्यागे धृता किमिति स्पृहा
ननु भगवतः कंदर्पस्य त्वमुच्छ्वसितान्तरम् ।
इति शशिमुखीमुक्त्वा यावद्बिभर्मि पटाञ्चले
चटुलरशना[1] तूर्णं तावद्गता क्वचिदेव सा ॥ ३९ ॥

अनन्तरमिदं जातम् । अस्ति च स्वप्नदृष्टजनस्य संवादः । तन्न[2] जाने किं भविष्यति ।

**विदूषकः**—कल्लाणपिसुणं एदं मव्वं भवदित्ति किं अण्णम् । अवि ण्णादं देवीए । (ग)

**राजा**—अथ किम् ।

**विदूषकः**—परुखक्खरं[3] आलविअ ण किं पि अण्णं आआरिदम् । (घ)

**राजा**—

नो किंचित्परुषाक्षरं निगदितं नो दर्शितः संभ्रमः
कासावित्युपहासगर्भितरुषा प्रश्नोऽपि नाविष्कृतः ।
निःश्वासः परिवृत्त्य किं तु शनकैः श्यामीकृतप्रज्वल-
न्नानारत्नमयप्रदीपकिरणश्रेणिर्विमुक्तस्तया ॥ ४० ॥

(क) अब्रह्मण्यमब्रह्मण्यम् ।

(ख) ततः ।

(ग) कल्याणपिशुनमेतत्सर्वं भवतीति किमन्यत् । अपि ज्ञातं देव्या ।

(घ) परुषाक्षरमालप्य न किमप्यन्यदाचरितम् ।

१. 'रसना' इत्यादर्शपाठः. २. 'तं न' इत्यादर्शपाठः. ३. 'परुखस्खरं' इत्यादर्शपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—एस ज्जेव्व कराला गरलगण्ठी । अहवा तुज्झ किं जादम् । तुअं लुलुल्लरेहिं बोलेहिं पाअपडणेहिं पुणो पि अप्पवसं करेसि। अहं जेव्व एक्को णिब्भच्छिआमि । एदस्स दुट्ठबह्मणस्स एदं खु सव्वं विलसिदं त्ति । (क)

**राजा**—कथं न जातम् ।

न यस्मिन्दाक्षिण्यं परिणतमियत्त्वस्य विषये
विकल्पाधिष्ठानं तदपि विहितं प्रेम सुदृशः ।
इतः शून्यं चेतः स्मरकितवसंचारचकितं
न जानीमो धातुः किमधिकरणः सूत्रणविधिः ॥ ४१ ॥

(नेपथ्ये ।)

सुखाय कुसुमसमयसमारम्भो देवस्य । संप्रति हि

रक्ताशोकद्रुमाणां लसति किसलयश्रेणिराद्रीपराध-
श्रेयः शौण्डीर्यपीतद्रविडवरवधूचारुबिम्बाधरश्रीः ।
उन्मेषश्चम्पकानामजरठमरठीगण्डपालीविलासः
कर्णाटीहास्यलेशान्विचकिलमुकुलस्फूर्तयो वार्तयन्ति ॥ ४२ ॥

कान्ते नूतनचूतमञ्जरिधनुर्दण्डेऽधुना संदध-
त्कंदर्पः कलकण्ठपञ्चमरवब्रह्मास्त्रमव्याहतम् ।
दोर्युग्मं वलयीकरोति युगपत्कर्तुं त्रिलोकोपरि
स्वामाज्ञां रतिवक्त्रपत्त्रशबलं मौर्वीकिणाङ्काङ्कितम् ॥ ४३ ॥

**विदूषकः**[१]—(अन्यतः)

कावेरीणालिएरीतरलणनिउणा णम्मदाणम्मआरा
कञ्चीए चुम्बणद्दा तुमुलिदमुरलालोलकल्लोलमाला ।

(क) एषैव कराला गरलग्रन्थिः । अथवा तव किं जातम् । त्वं मधुरैर्वचनैः पादपतनैः पुनरप्यात्मवशां करिष्यसि । अहमेवैको निर्भर्त्स्ये । एतस्य दुष्टब्राह्मणस्यैतत्खलु सर्वं विलसितमिति ।

१. 'विदूषकः' इत्यादर्शपुस्तके नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एदे गोदावरीए लहरिपरिचिदा दिण्णसिप्पाकडप्पा
कंदप्पोद्दीवणेच्छागहिदविहरणा दाहिणा एन्ति वाआ ॥४४॥(क)

**राजा**—

क्वचिदविषये सा सारङ्गीतरङ्गितलोचना
हृदि कवचितः पञ्चेषुर्मे विकुञ्चितकार्मुकः ।
अयमपि बत प्राप्तश्चूताङ्कुराकुलकोकिला-
कलरवजयोद्घोषः कालः किमत्र समीहितम् ॥ ४५ ॥

(सनिर्वेदोत्कण्ठम् ।)

आवासः किलकिञ्चितस्य दयिता पार्श्वे विलासालसा
कर्णे कोकिलकामिनीकलरवः स्मेरो लतामण्डपः ।
गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सुधांशोः कराः
केषांचित्सुखयन्ति चात्र हृदयं चैत्रे विचित्रोत्सवे ॥ ४६ ॥

संप्रति—

कुर्वन्ति कोकिलकलोपहतिं लतासु
रुन्धन्ति वासभवनेषु समीरमार्गान् ।
किं तन्न यद्विरहिणीनिवहस्य सख्यः
सावज्ञमाकुलतया कलयन्त्यजस्रम् ॥ ४७ ॥

(विचिन्त्य ।) तत्कायमात्मा विनोदयितव्यः ।

**विदूषकः**—भो वअस्स, अहिणवमहुरसतरङ्गिदललिदलदालिङ्गिद-कुसुमहसिदतरुणतरुमण्डलं कुण्डलिदकोदण्डचण्डप्पहारपडुमअणसुहडप-

---

(क) कावेरीनालिकेरीतरलननिपुणा नर्मदानर्मकाराः
काञ्च्याश्चुम्बनाद्रीस्तुमुलितमुरलालोलकल्लोलमालाः ।
एते गोदावर्या लहरिपरिचिता दत्तसिप्राकटप्राः
कंदर्पोद्दीपनेच्छागृहीतविहरणा दक्षिणा आगच्छन्ति वाताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्लिज्जन्तसहआरङ्कुरसिलीमुहं रज्जन्तकण्ठकलअण्ठचारुपञ्चमस्सरमहुरिज्जन्तं मअणुज्जाणं पेक्खन्तो णिव्वुइं उव्वाहिस्सदि भवं । (क)

**राजा**—सहृदयो मे वयस्यः ।

यत्कोकिलाकलरवं कलयत्यनङ्ग-
श्चूताङ्कुरं धनुषि यद्विजयास्त्रहेतोः ।
यच्च स्मितं सुमनसां स समित्प्रपञ्चो
जीवातवे विरहपावकडम्बरस्य ॥ ४८ ॥

**विदूषकः**—भो, एत्थ कहिं पि भविस्सदि देव्ववसेण दंसणगोअरे सा तेल्लोक्कसुन्दरीति भणामि । (ख)

**राजा**—एवमस्तु । उपदिश पन्थानम् ।

**विदूषकः**—इदो सेवागदणरिन्दसहस्ससंकिण्णं विलाससंचिअतेल्लोकसुन्दरजणं अत्थाणङ्गणं परिहरिअ चउक्किआए खिडिक्किआदो रअणदुआरिआए णीसरीअ कहिं पि एदु भवं । (ग)

(इति परिक्रामतः ।)

**विदूषकः**—इदं तं कोइलपढिज्जन्तचारुपञ्चमाभिहाणमअणमन्तसंमोहनमढं संततट्ठाणं वसन्तसुहडस्स । ता पविसदु पिअवअस्सो । (घ)

(इति तथा कुरुतः ।)

---

(क) भो वयस्य, अभिनवमधुरसतरङ्गितललितलतालिङ्गितकुसुमहसिततरुणतरुमण्डलं कुण्डलितकोदण्डचण्डप्रहारपटुमदनसुभटतीक्ष्णीक्रियमाणसहकाराङ्कुरशिलीमुखं रज्यत्कण्ठकलकण्ठचारुपञ्चमस्वरमुखरीक्रियमाणं मदनोद्यानं पश्यन्निर्वृतिमुद्वक्ष्यति भवान् ।

(ख) भोः, अत्र कुत्रापि भविष्यति दैववशेन दर्शनगोचरे सा त्रैलोक्यसुन्दरीति भणामि ।

(ग) इतः सेवागतनरेन्द्रसहस्रसंकीर्णं विलाससंचितत्रैलोक्यसुन्दरजनमास्थानाङ्गणं परिहृत्य चतुष्किकायाः गवाक्षाद्रत्नद्वारिकाया निःसृत्य कुत्राप्येतु भवान् ।

(घ) इदं तत्कोकिलपठ्यमानचारुपञ्चमाभिधानमदनमन्त्रसंमोहनमठं(?) संततास्थानं वसन्तसुभटस्य । तत्प्रविशतु प्रियवयस्यः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—पिअवअस्स, पेक्ख।

लाडीतण्डवकेलिखिन्नचलणच्छाआलवं पल्लवं
कङ्केली पअडेदि पाडलितरू जादो पसूणञ्चिदो।
एदं कुङ्कुमसिक्ककीररमणीगण्डप्पहं चम्पकं
कम्पावेइ विओइणीओँ बउलो फुल्लेहिँ सल्लेहिँ व ॥४९॥ (क)

(इति संस्कृतमाश्रित्य।)

कुर्वाणाः प्राणनाथे प्रणयकलिरुषं जर्जरां गुर्जरीणां
भिन्दानाः सान्द्रमानग्रहपटिममदं मेदपाटाङ्गनानाम्।
उन्मीलन्मालवस्त्रीवदनपरिमलग्राहिणो हूणरामा-
कामारम्भश्रमाम्भःकणहरणरसोल्लासिनो वान्ति वाताः ॥ ५० ॥

**राजा**—(सोपहासम्।) अहो वर्णनाक्रमः। (इति निःश्वस्य समन्तादवलोक्य च।)

लीलोद्याने चलकिसलयाः शाखिनः खेललोला-
श्लिष्यद्भृङ्गावलिवलयिता भान्ति यावन्त एते।
कोपावेशाद्वलयितधनुर्बद्धगोधाङ्गुलित्र-
स्तावद्भ्योऽपि त्रिभुवनजयी धावतीवासमास्त्रः ॥ ५१ ॥

एहि। तस्यास्तरङ्गशालाया अभ्यन्तरे क्षणमुपविशावः।

(तथा कुरुतः।)

---

(क) प्रियवयस्य, पश्य।

लाटीताण्डवकेलिखिन्नचरणच्छायालवं पल्लवं
कङ्केलिः प्रकटयति पाटलितरुर्जातः प्रसूनाञ्चितः।
एतत्कुङ्कुमसिक्तकीररमणीगण्डप्रभं चम्पकं
कम्पयति वियोगिनीर्बकुलः पुष्पैः शल्यैरिव ॥

---

१. आदर्शपुस्तकेऽस्मिन्मन्दाक्रान्तावृत्ते 'श्लिष्यद्भृङ्गावलीभिर्वलयितलतिका भान्ति यावन्त एते' इति द्वितीयः पादः स्रग्धरानिबद्धः शोधकेन स्थापितः. आदर्शपाठस्तु न ज्ञातु शक्यते.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—(भित्तिमवलोक्य सचमत्कारम् ।) अए, का एसा पच्चाएसो उव्वसीपमुहाणं अच्छराणं सव्वङ्गलडहा आलिहिदा । (क)

**राजा**—(अवलोक्योत्थाय च ।)

एतत्तदेव सितदेवतरुप्रसून-
सौभाग्यमङ्कमनङ्गविलासवेश्म ।
जैत्रः स एव च विलोचनयोर्विलासः
सैवेन्दुसुन्दरमुखी लिखितेयमास्ते ॥ ९२ ॥

अपि च ।

सैवोन्मज्जत्कनककलशप्रेक्षणीयस्तनश्री-
मूर्तिर्लोकत्रयविजयिनी राजधानी स्मरस्य ।
एतच्चक्षुस्तदपि विदलत्केतकीपत्रमित्रं
छाया सेयं नियतमधरे विद्रुमोत्सेकमुद्रा ॥ ९३ ॥

**विदूषकः**—भो, एसा चित्ते केण विलिहिदा । (ख)

**राजा**—मम तावन्मकरकेतुना । इह तु न जाने ।

**विदूषकः**—भो, भणामि किं पि जइ मे वअणं करेसि । (ग)

**राजा**—किं न कथयसि ।

**विदूषकः**—ओसरीयदु इमादो तरङ्गसालादो तुरिदम् । कदापि देवी एत्थ आअच्छेदि । (घ)

**राजा**—कुपिता कथमागच्छति सौभाग्याभिमानखण्डनानुप्रवेशात् ।

---

(क) अये, कैषा प्रत्यादेश उर्वशीप्रमुखाणामप्सरसां सर्वाङ्गलटभा-लिखिता ।

(ख) भोः, एषा चित्रे केन विलिखिता ।

(ग) भोः, भणामि किमपि यदि मे वचनं करोषि ।

(घ) अपास्रियतामस्यास्तरङ्गशालायास्त्वरितम् । कदापि देव्यत्रागच्छति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति हारलतया सह देवी ।)

**देवी**—हारलदे, ता कआपराधं पेक्खिअ एह्णिं सअं अणुसरन्ती अज्जउत्तेण केरिसी भणिआमि । (क)

**हारलता**—भट्टिणि, महानुभाव त्ति किं अण्णम् । (ख)

**देवी**—जदि दिट्ठिआ परुसत्तणमुव्वहामि, अज्जउत्तो आअसीअदि । अणुचिदकारिणी भवामि । (ग)

**हारलता**—देवीए विणा अण्णो को एदं मन्तेदि । विणा मअङ्कलेहं कुदो जोह्लाए बिसरो । (घ)

**देवी**—अवि जाणासि किं उद्दिसिअ अज्जउत्तेण सिविणए पलविदम् । (ङ)

**हारलता**—तुज्झवसेक्कजीविदस्स णत्थि अण्णा वाणी । एवंविधा जेव्व सिविणआ [अ] विप्पलम्भका होन्ति । ण किं पि आसङ्कणिज्जम् । (च)

(इति परिक्रामतः ।)

**देवी**—कण्णसुन्दरी अज्जउत्तस्स दंसणगोअरं गदा । (छ)

**हारलता**—रविकिरणाणं वि अगम्मे त्ति कधं एदम् । (पुरोऽवलोक्य ।) एसो तरङ्गसालाए भट्टा वट्टदि । ता उपसप्पीअदि । (ज)

---

(क) हारलते, तत्कृतापराधं प्रेक्ष्याधुना स्वयमनुसरन्त्यार्यपुत्रेण कीदृशी भण्ये ।

(ख) भट्टिनि, महानुभावेति किमन्यत् ।

(ग) यदि दिष्ट्या परुषत्वमुद्वहामि, आर्यपुत्र आयास्यते । अनुचितकारिणी भवामि ।

(घ) देव्या विनान्यः क एतन्मन्त्रयते । विना मृगाङ्कलेखां कुतो ज्योत्स्नाया विसरः ।

(ङ) अपि जानासि किमुद्दिश्यार्यपुत्रेण स्वप्ने प्रलपितम् ।

(च) त्वद्वशैकजीवितस्य नास्त्यन्या वाणी । एवंविधा एव स्वप्ना [च] विप्रलम्भका भवन्ति । न किमप्याशङ्कनीयम् ।

(छ) कर्णसुन्दर्यार्यपुत्रस्य दर्शनगोचरं गता ।

(ज) रविकिरणानामप्यगम्येति कथमेतत् । एष तरङ्गशालायां भर्ता वर्तते । तदुपसर्प्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—किं पि सुणन्तीओ उपसप्पह्म । (क)

**राजा**—(बद्धाञ्जलिः ।)

आयासः किमयं वृथैव धनुषो देव स्मर स्वीकृत-
स्त्वत्पत्रिव्ययपात्रमत्र कतमः कात्यायनीकामुकः ।
एतां लोकविलक्षणेन विधिना केनापि येनासिषी(?)
यायां(?) चित्रगतामपि प्रियतमां संजीव्य संप्रापय ॥ १४ ॥

**देवी**—कस्स कदे अज्जउत्तो एवं मन्तेदि । (ख)

**हारलता**—कस्स अण्णस्स । भोदिं जेव्व कुविदं जाणिअ चित्तपडिबिम्बेण अप्पाणं विणोदेदि भट्टा । ता उपसप्पीअदु । (ग)

(तथा विधत्तः ।)

**देवी**—जेदु अज्जउत्तो । (घ)

**हारलता**—जेदु जेदु भट्टा । (ङ)

**देवी**—(सविनयम् ।) मए एव्व तदा किं पि खलिदं ति अज्जउत्तेण ण अण्णधा भणिदव्वम् । (च)

**राजा**—

त्रिजगति भवती परं ममैका दिशति मुदं कुमुदस्य कौमुदीव ।
प्रभुरसि कुरुषे रुषं कदाचिद्व्रजसि कदापि यथारुचि प्रसादम् ॥१५॥

**विदूषकः**—महाणुभावा देवी जा एव्वं पतिच्छत्तणं धारेदि । (छ)

---

(क) किमपि शृण्वत्य उपसर्पावः ।

(ख) कस्य कृते आर्यपुत्र एवं मन्त्रयते ।

(ग) कस्यान्यस्य । भवतीमेव कुपितां ज्ञात्वा चित्रप्रतिबिम्बेनात्मानं विनोदयति भर्ता । तदुपसर्प्यताम् ।

(घ) जयतु आर्यपुत्रः ।

(ङ) जयतु जयतु भर्ता ।

(च) मयैव तदा किमपि स्खलितमित्यार्यपुत्रेण नान्यथा भणितव्यम् ।

(छ) महानुभावा देवी यैवं पत्यनुकूलत्वं धारयति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—(चित्रमवलोक्यापवार्य च।) हारलदे, पेक्ख । कण्णसुन्दरिं जेव्व आलिहिअ अप्पाणअं विणोदेदि । तुमं तु मम ण पत्तिजासि । अहं जेव्व अविमिस्सकारिणित्ति किं भणीअदि । (क)

**हारलता**—तथैव ।

**देवी**—(प्रकाशम् ।) अज्जउत्त, इदं णअणविणोदणं मए आगदुअ विनिवट्टिदं जेव्व । संपदं पेक्खिदव्वम् । (इति सावेगमुत्तिष्ठति ।) (ख)

**राजा**—अलमन्यथा संभावितेन । (इति वारयति ।)

(देव्याक्षिप्य हारलतया सह निष्क्रान्ता ।)

**राजा**—एहि तावत् । देवीप्रसादनाय प्रयतावहे ।

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

---

## द्वितीयोऽङ्कः ।

(ततः प्रविशति सुप्तोत्थितो विदूषकः ।)

**विदूषकः**—(अङ्गुलीभ्यामक्षिणी मृजन् ।) अज्ज पिअवअस्सेण दिग्घरोसं देविं पसादिअ मे किं पि समादिट्ठम् । तदादिट्ठत्थदूणो मञ्जिट्ठारुणेण अरुणसारहिमण्डलेण सान्दअन्तेण रअणिं जगाविओह्मि । ण सक्कणोमि सअणिज्जादो णिद्दाए बलामोडिमीलिज्जन्तादिट्ठी उट्ठिदुम् । पिअवअस्सचलणवडणसंतुट्ठदेवीपसादलद्धेहिं मोदएहिं पुट्ठभुइट्ठं चिट्ठादि मे उअरम् । णिहुअं अववरअअन्तरे सुवामि । (स्मृतिमभिनीय ।) अहवा कहं सुवीअदि । जं पिअवअस्सेण तीए विज्जाहरकण्णआए पउत्ति जाणिदुं किं सा वि वअस्ससाणुराआ ण वेत्ति आणत्तह्मि । ता जाव गदुअ काए वि अन्तेउरविलासिणीए सआसादो अण्णापदेसेण जाणिस्सम् । कहं उवलतरङ्गा तरङ्गवदित्तिणामहेआ इदो जेव्व आअच्छादि । भोदु । एदाए

---

(क) हारलते, पश्य । कर्णसुन्दरीमेवालिख्यात्मानं विनोदयति । त्वं तु मम न प्रत्ययसे । अहमेवाविमृश्यकारिणीति किं भण्यते ।

(ख) आर्यपुत्र, एतन्नयनविनोदनं मयागत्य विनिवर्तितमेव । सांप्रतं प्रेक्षितव्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जेव्व मुहादो जाणिस्सम् । (पुनरवलोक्य ।) मं पेक्खिअ एदाए किं पि अपच्छादिदम् । (निरूप्य सशिरःकम्पम् ।) अत्थि एत्थ वडे जक्खो । भोदु । संभाविअ जाणामि[1] । (इति तथा करोति ।) (क)

(ततः प्रविशति तरङ्गवती ।)

**तरङ्गवती**—(अग्रतोऽवलोक्य ।) एस दुट्ठवडू पेक्खिस्सादि एदं सिसिरोवआरम् । ता अण्णदो गच्छामि । (इति तथा गच्छति ।) (ख)

**विदूषकः**—(सत्वरमुपसृत्य ।) भोदि, कीस अण्णदो गच्छीअदि । अहं तुह ससिलेहाए विअ मग्गं पलोएमि । तुमं राहुं व मं पलिहलसि । किं ण्णेदम् । (ग)

**तरङ्गवती**—अज्ज, कज्जन्तरपज्जाउलहिअअत्तेण ण लक्खिदोसि । पसीददु भवं । (घ)

---

(क) अद्य प्रियवयस्येन दीर्घरोषां देवीं प्रसाद्य मे किमपि समादिष्टम् । तदादिष्टार्थदूनो मञ्जिष्ठारुणेनारुणसारथिमण्डलेन सान्द्रायमाणेन रजनिं जागरितोऽस्मि । न शक्नोमि शयनीयान्निद्रया हठान्मीलद्दृष्टिरुत्थातुम् । प्रियवयस्यचरणपतनसंतुष्टदेवीप्रसादलब्धैर्मोदकैः पुष्टभूयिष्ठं तिष्ठति मे उदरम् । निभृतमपवरकान्तरे स्वपिमि । अथवा कथं सुप्यते । यत्प्रियवयस्येन तस्या विद्याधरकन्यकायाः प्रवृत्तिं ज्ञातुं किं सापि वयस्यसानुरागा न वेत्याज्ञप्तोऽस्मि । तद्यावद्गत्वा कस्या अप्यन्तःपुरविलासिन्याः सकाशादन्यापदेशेन ज्ञास्यामि । कथमुत्पलतरङ्गा तरङ्गवतीतिनामधेया इत एवागच्छति । भवतु । अस्या एव मुखाज्ज्ञास्यामि । मां प्रेक्ष्यैतया किमप्यपच्छादितम् । अस्त्यत्र वटे यक्षः । भवतु । संभाव्य जानामि ।

(ख) एष दुष्टबटुः प्रेक्षिष्यत एतच्छिशिरोपचारम् । तदन्यतो गच्छामि ।

(ग) भवति, कुतोऽन्यतो गम्यते । अहं तव शशिलेखाया इव मार्गं प्रलोकयामि । त्वं राहुमिव मां परिहरसि । किं न्वेतत् ।

(घ) आर्य, कार्यान्तरपर्याकुलहृदयत्वेन न लक्षितोऽसि । प्रसीदतु भवान् ।

---

१. एतावत्पर्यन्तमस्मिन्विदूषकवाक्येऽप्यत्यस्फुटं प्राकृतमस्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—अह केण वावारेण तत्तभोदी कण्णसुन्दरी वट्टदि । (क)

**तरङ्गवती**—णिअवावारे व्व सा पिअसही । (ख)

**विदूषकः**—को उण णिअवावारो । (ग)

**तरङ्गवती**—देवीए सआसे सिक्खदि लक्खणाणामणुसीलिणानि, अमअणाओ बहुविहाओ लीलाओ वि । (घ)

**विदूषकः**—(विहस्य ।) अवरो को वि वावारो त्ति सुणीअदि । (ङ)

**तरङ्गवती**—(साशङ्कम् ।) क इत्ति णिवेदेदु भवं । (च)

**विदूषकः**—जत्थ एदाणं विणिओओ । (इत्यस्या अंशुकान्तरात्कदलीपत्राणि मृणालिकाश्च लीलया गृह्णाति ।) (छ)

**तरङ्गिका**—अज्ज, ण किं पि सङ्किदव्वम् । एदेहिं मम किं पि कज्जं अत्थि । (ज)

**विदूषकः**—अविस्सासिणि, अलं अवलावेण । णणु पिअवअस्सेण पउत्तिं जाणिदुं पेसिदोह्मि । ता उज्जुअं कहेसु । (झ)

**तरङ्गवती**—अज्ज, रक्खिदव्वं रहस्सम् । (ञ)

---

(क) अथ केन व्यापारेण तत्रभवती कर्णसुन्दरी वर्तते ।

(ख) निजव्यापारेव सा प्रियसखी ।

(ग) कः पुनर्निजव्यापारः ।

(घ) देव्याः सकाशे शिक्षते लक्षणानामनुशीलनानि, अमदना बहुविधा लीला अपि ।

(ङ) अपरः कोऽपि व्यापार इति श्रूयते ।

(च) क इति निवेदयतु भवान् ।

(छ) यत्रैतेषां विनियोगः ।

(ज) आर्य, न किमपि शङ्कितव्यम् । एतैर्मम किमपि कार्यमस्ति ।

(झ) अविश्वासिनि, अलमपलापेन । ननु प्रियवयस्येन प्रवृत्तिं ज्ञातुं प्रेषितोऽस्मि । तदृजुकं कथय ।

(ञ) आर्य, रक्षितव्यं रहस्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(इति संस्कृतमाश्रित्य ।)

यत्तारारमणोऽपि निर्वृतिपदं नास्याश्चलच्चक्षुषो-
यद्गात्रं शतपत्रपत्रशयनेऽप्युत्फालमुद्वेल्लति ।
शीतं यच्च कुचस्थलीमलयजं धूलीकदम्बायते
किं वान्यत्तदनङ्गमङ्गलमयी भङ्गी कुरङ्गीदृशः ॥ १ ॥

(इत्युक्त्वापसरति ।)

**विदूषकः**—(सपरितोषम् ।) भोदि, सणिओअं असुण्णं करेसु । अहं पि पिअवअस्सं वड्ढेमि । (क)

(इति निष्क्रान्तौ ।)

प्रवेशकः ।

(ततः प्रविशति सोत्कण्ठो राजा विदूषकश्च ।)

**राजा**—

धूमश्यामलितेव तापनवशाच्चामीकरस्य च्छवि-
श्चन्द्रो मुक्त इव श्रिया किसलया निर्धौतरागा इव ।
निःसारेव धनुर्लता रतिपतेः सुप्तेव विश्वप्रभा
तस्याः किं च पुरो विभान्ति कदलीस्तम्भाः सदम्भा इव ॥ २ ॥

अपि च ।

मुग्धाक्ष्याः कति नेन्दवः समुदिता वक्त्रे स्फुरत्कान्तयो
विश्रान्तिः कियतां न लोचनयुगे नीलाम्बुजानां श्रियः ।
निष्पन्नः कियता न विद्रुमरुचां सारेण बिम्बाधरः
पीताश्चारुभिरङ्कैश्च कति न स्निग्धा मधूकत्विषः ॥ ३ ॥

(अनुसंधाय ।)

स्फुरल्लीलामालं किमपि रसयोगान्मृगदृशः
क्षणं दीर्घापाङ्गप्रणयि यदभून्नेत्रयुगलम् ।
अहो हृज्जन्मान्तः स्फुरति बत मे शल्यमिव त-
द्यदावेगे मोहः परमयमविश्रामविषयः ॥ ४ ॥

(क) भवति, स्वानियोगमशून्यं कुरु । अहमपि प्रियवयस्यं वर्धयामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो, किमपि कमनीये वयसि वर्तते सुमध्यमा । तथा हि ।

आभोगः कृत एव किं तु न गतिस्त्यक्ता कुचाभ्यां द्वयी
भ्रूलास्यैरवकीर्णमेव मिलितं नो किं तु सम्यग्दृशोः ।
लीलाभिः परिरब्धमेव गमनं तन्व्या नितम्बोद्गम-
प्राग्भारेण न किं तु मन्थरपदन्यासस्तदा सूत्रितः ॥ ५ ॥

सखे, अपि सत्यं तरङ्गवत्या वचः ।

**विदूषकः**—एदे क्खु मअणमअतिह्णाविप्पलद्धा कामिणो उम्मत्ता मह पडिहान्ति । जं पच्चक्खे वि विप्पदिवत्तिं कुणन्ति । जदि सव्वधा ण पत्तिज्जसि ता अकरणिज्जं पि करोमि । बह्मणीए चलणेहिं सवामि । (क)

**राजा**—हृदय, दिष्ट्या वर्धसे ।

यस्यां रक्तं किल कलयसि क्रान्तिमत्यर्थमेवं
नूनं वृन्तादिव सरसिजं मज्जदन्तर्हिमाम्भः ।
कृत्वा सद्यः श्रवणयुगलं लोलताटङ्करिक्तं
सापि स्वैरं विशिखखुरली कल्पिता मन्मथेन ॥ ६ ॥

('स्फुरल्लीला–' इत्यादि पठति ।)

**विदूषकः**—(विहस्य ।) भो, किं पि पुच्छामि । (ख)

**राजा**—किं न पृच्छसि ।

**विदूषकः**—सिणिद्धमुद्धपहाउड्डणमणुल्लसणमणोहरं हरसुप्फुल्लकवोलमण्डलं संमुहपलोइदं अवगणिअ कण्णन्तिकगामिणिं वङ्कं जेव्व दिट्ठिं कुविदाणं विअ कामिणीणं कामिणो कीस पसंसन्ति । (ग)

---

(क) एते खलु मदनमृगतृष्णाविप्रलब्धाः कामिन उन्मत्ता मम प्रतिभान्ति । यत्प्रत्यक्षेऽपि विप्रतिपत्तिं कुर्वन्ति । यदि सर्वथा न प्रत्ययसे तदकरणीयमपि करोमि । ब्राह्मण्याश्चरणाभ्यां शपामि ।

(ख) भोः, किमपि पृच्छामि ।

(ग) स्निग्धमुग्ध..........मनोहरं हर्षोत्फुल्लकपोलमण्डलं संमुखप्रलोकितमवगणय्य कर्णान्तिकगामिनीं वक्रामेव दृष्टिं कुपितानामिव कामिनीनां कामिनः कुतः प्रशंसन्ति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—अविदग्धोऽसि । पश्य ।

दीर्घापाङ्गतरङ्गितेन विगलन्नीरं विलोलेक्षणा
यत्पश्यन्त्यवतंसनालनलिनच्छायामुषा चक्षुषा ।
तुल्यं वाधिकमन्यदेव मदनस्यास्त्रं त्रिलोकीजयि-
व्यापारोऽस्य न यत्र तत्र किमपि प्रेम्णो हि तल्लक्षणम् ॥७॥

**विदूषकः**—भो, अण्णं भणामि । जाए कारणादो महन्तेण दुःखेण सअलं जेव्व जामिणिं देवी अब्भत्थिदा सा किं त्ति पुणो वि अणुसंधीअदि । जदि तीए कज्जं ता किं त्ति देवी पीडन्ती अणुणीअदि । अह देवीए कज्जं ता किं त्ति सा अणुसंधीअदि त्ति । (क)

**राजा**—अयि सखे, शृणु ।

जनिमुपगता विश्वप्रख्यातनाम्नि कुले पुनः
प्रणयविशदा देवी मोक्तुं मया नहि पार्यते ।
कथमवितथश्लाघ्यैरङ्गैरसावपि मुच्यतां
रचितकवचः पक्षे यस्याः स्थितः कुसुमायुधः ॥ ८ ॥

तत्कथमयं विरहदाहो मया गमयितव्यः ।

**विदूषकः**—सव्वधा पिअवअस्सो असुहिदो त्ति करुणं उप्पाइअ सत्थिवाअणपुव्वअं अणुणीअ सा समप्पीअदु त्ति देविं पुच्छेमि । (ख)

**राजा**—मूर्ख,

नैवं कथंचन कृतानुनयापि देवी
मन्येत मन्युकलुषा मयि केवलं स्यात् ।

---

(क) भोः, अन्यद्भणामि । यस्याः कारणान्महता दुःखेन सकलामेव यामिनीं देव्यभ्यर्थिता सा किमिति पुनरप्यनुसंधीयते । यदि तया कार्यं तत्किमिति देवी पीड्यमानानुनीयते । अथ देव्या कार्यं तत्किमिति सानुसंधीयत इति ।

(ख) सर्वथा प्रियवयस्योऽसुखित इति करुणामुत्पाद्य स्वस्तिवायनपूर्वकमनुनीय सा समर्प्यतामिति देवीं पृच्छामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थातुं सुशक्यमनले पतितुं कृपाण-
धारासु वा न तु जनं दयितं विमोक्तुम् ॥ ९ ॥

तत्कायमात्मा विनोदयितव्यः।

**विदूषकः**—भो, तत्थ ज्जेव्व उज्जाणे गच्छीअदु। तत्थ तरङ्गसालब्भन्तरे चित्तगदं पलोअन्तो सुहं पाविहिसि। (क)

**राजा**—सखे, युक्तमुक्तम्। तदुपदिश पन्थानम्।

**विदूषकः**—इदो इदो। (इति परिक्रामति।) एसा तरङ्गसाला अलंकरीअदु। (ख)

(उभौ तथा कुरुतः।)

**विदूषकः**—(सर्वतोऽवलोक्य।) भो, कहिं सा सामलङ्गी अणङ्गदेवदा आलिहिदा। अह वा अहं चम्मचक्खू ण पेक्खामि। (ग)

**राजा**—(निःश्वस्य।) कथमुत्प्रोञ्छितं तदनङ्गशस्त्रम्। अहो निर्दया देवी।

सिद्धक्षेत्रमिवाङ्गनाकुलगुरोर्लावण्यसारोच्चय-
श्रीसंकेत इव त्रिलोकनयनप्रीतेरिवैको निधिः।
धातुश्चन्द्रसहस्रसंग्रह इव द्रष्टुं तदेणीदृशो
वक्त्रं चित्रनिविष्टमप्यसुलभं कोऽयं विरुद्धो विधिः ॥ १० ॥

(विचिन्त्य।)

विद्वांस्ततो लिखितुमिन्दुमुखीं विदग्धः
कोऽन्यो विना कुसुमचापमनल्पशिल्पः।
नूनं तदा तदनुबन्धिभिरिन्द्रजाल-
मुन्मीलितं किमपि मे पुरतो विकल्पैः ॥ ११ ॥

(इति शोकं नाटयति।)

---

(क) भोः, तत्रैवोद्याने गम्यताम्। तत्र तरङ्गशालाभ्यन्तरे चित्रगतां प्रलोकयन्सुखं प्राप्स्यसि।

(ख) इत इतः। एषा तरङ्गशालालंक्रियताम्।

(ग) भोः, कुत्र सा श्यामलाङ्ग्यनङ्गदेवतालिखिता। अथ वाहं चर्मचक्षुर्न पश्यामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—भो, किं एत्थ सुण्णदेउले । एहि । लीलावणब्भन्तरे परिब्भमामो । कदा वि कथं वि कुसुमाओ उच्चिणन्ती लदाओ सिञ्चन्ती वा सरसीजलम्मि ह्राणविधिं करन्ती वा सा हुविस्सदि । (क)

**राजा**—कुत एवंविधा भाग्यसंपदः । तथापि पश्चात्तापव्यपनयनाय तदपि विधीयताम् ।

(इति तथा कुरुतः ।)

**विदूषकः**—(अग्रतो विलोक्य ।) पेक्ख केलिकमलिणीसणुम्मि ।

विच्छोडन्तो णिअमुहगदं चक्कवाआण चक्कं
देन्तो णिद्दारसमसमये सव्वदो पङ्कआणम् ।

(अग्रतोऽवलोक्य ।)

तारं तीरप्फुरिदकिरणो लोअणानन्दवल्ली-
कन्दो चन्दो रचअदि जले मज्जणुम्मज्जणाइं ॥ १२ ॥ (ख)

**राजा**—(विलोक्य ।)

परं मैत्रीपात्रं त्रिभुवनजिगीषोः स्मृतिभुवः
स एवायं यूनामविनयकथोन्मुद्रणगुरुः ।

(विचिन्त्य ।)

गतः किं वा दैवाद्धत बत कलङ्कोऽस्य नियतं
सुधामुग्धैर्धौतः कमलसरसीवीचिनिचयैः ॥ १३ ॥

(सोत्प्रेक्षम् ।)

तस्याः कुरङ्गकदृशो युगपन्मुखेन
दोषाकरश्च कमलानि च निर्जितानि ।

---

(क) भोः, किमत्र शून्यदेवकुले । एहि । लीलावनाभ्यन्तरे परिभ्रमावः । कदापि कथमपि कुसुमान्युच्चिन्वती लताः सिञ्चन्ती वा सरसीजले स्नानविधिं कुर्वती वा सा भविष्यति ।

(ख) पश्य केलिकमलिनी········ ।

वियोजयन्निजमुखगतं चक्रवाकाणां चक्रं
ददन्निद्रारसमसमये सर्वतः पङ्कजानाम् ।
तारं तीरस्फुरितकिरणो लोचनानन्दवल्ली-
कन्दश्चन्द्रो रचयति जले मज्जनोन्मज्जनानि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतानि शाश्वतिकमप्यपहाय वैरं
स्वैरं तदत्र रचयन्ति विधेयचिन्ताम् ॥ १४ ॥

**विदूषकः**—

रोहिणिवअणालिङ्गणाणिब्भरसंकन्तपरिमलुग्गारम् ।
ण मुअन्ति कुमुअबन्धवबिम्बं परिलम्बिआ भमरा ॥ १५ ॥ (क)

**राजा**—(निपुणं निरूप्य । सहर्षम् ।)

सखे नायं खेलंस्तिलकयति चन्द्रः कुमुदिनी-
मदः कंदर्पाज्ञास्फुरणगुरुवक्रं मृगदृशः ।
कुलं रोलम्बानामिदमपि न लग्नं परिमला-
दयं वेणीदण्डः शिखिन इव बर्हस्तरलितः ॥ १६ ॥

अपि च ।

आभात्यमर्त्यतरुपत्रसगोत्रपाणिः
सेयं मृगाङ्कवदना मदनास्त्रमत्र ।
हेतोः कुतोऽपि कमला कमलान्तराला-
न्निर्गत्य संयमवती पयसि स्थितेव ॥ १७ ॥

**विदूषकः**—(सकौतुकम् ।)

ण वरकबरी गोरङ्गीए तरङ्गिदविब्भमा
भमरणिवहो आमोदाणं ससिम्मि ण संगदो ।
अवि कमलिनीसंकन्तेणं विलासहरेण सा
कणअकमलुक्किण्णा जादा मुहेण जलन्तरे ॥ १८ ॥ (ख)

---

(क) रोहिणीवदनालिङ्गननिर्भरसंक्रान्तपरिमलोद्गारम् ।
न मुञ्चन्ति कुमुदबान्धवबिम्बं परिलम्बिता भ्रमराः ॥

(ख) न वरकबरी गौराङ्ग्यास्तरङ्गितविभ्रमा
भ्रमरनिवह आमोदेन शशिनि न संगतः ।
अपि कमलिनीसंक्रान्तेन विलासधरेण सा
कनककमलोत्कीर्णा जाता मुखेन जलान्तरे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा—**

पुष्पेषोरभिषेकयोग्यमथ वा भर्गाग्निमग्नात्मनः
प्रत्युज्जीवनमेतदम्बुजसरः कम्बुप्रसन्नच्छवि ।
यत्त्वाम्रेडितशीतरश्मिकिरणस्यन्दोपमेनामुना
लावण्यामृतनिर्झरेण सुतनोर्यत्पात्रतां नीयते ॥ १९ ॥

अपि च ।

आश्चर्यं फलितं सरोरुहवने स्थित्वा चिरेण श्रियः
कान्तिः कान्तिसुधाद्रवेण सुतनोर्याता यदत्राधुना ।
सान्द्रप्रेमवशीकृतस्य नियतं कौमोदकीलक्ष्मणः
साप्यङ्कं गिरिजेव मन्मथरिपोः कायास्त्रमुत्स्रक्ष्यति ॥ २० ॥

**विदूषकः—**वणाणिलवेल्लिदविद्दुमकिसलअसरिच्छपप्फुरिदाहरोट्ठी अङ्गुलिविवत्तणमणोहरकरपल्लवा णासग्गलग्गअविसट्ठकन्दोट्टसलोणलोअणा जादा । (क)

**राजा—**

स्फुरति यदयं दन्तज्योत्स्नाविलासधरोऽधरः
करकिसलियौ मुद्रायोगाद्यदुच्चलिताङ्गुली ।
मुकुलनविधिर्यन्नीलाब्जद्विषोरपि चक्षुषो-
स्तदियमबला ध्यायत्यन्तः किमप्यधिदैवतम् ॥ २१ ॥

**विदूषकः—**(सकौतुकम् ।) भो, कीस एसा सुण्णं पुणो पुणो पाणिं णीरमज्झादो आअड्ढदि । (ख)

**राजा—**(दृष्ट्वा ।)

सुतनुरनवलोकयन्त्युपान्ते स्थितमपि काञ्चनकुम्भमम्बुपूर्णम् ।
क्वचिदपि गतमानसा करेण स्पृशति कुचप्रतिबिम्बमम्बुमध्ये ॥ २२ ॥

---

(क) वनानिलवेल्लितविद्रुमकिसलयसदृक्षप्रस्फुरिताधरोष्ठी अङ्गुलिविवर्तनमनोहरकरपल्लवा नासाग्रलग्नाविस्पष्टनीलोत्पलसलावण्यलोचना जाता ।

(ख) भोः, कस्मादेषा शून्यं पुनः पुनः पाणिं नीरमध्यादाकर्षति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(सस्पृहम् ।)

ताम्बूलावरणोज्झिते विकसितं रागेण बिम्बाधरे
मज्जत्कज्जलकालिकेन कलिता कापि च्छविश्चक्षुषा ।
श्रीरन्यैव निरङ्गरागसुभगेऽप्यङ्गे कुरङ्गीदृशो
विश्राम्यत्वधुना धनुर्विजयते कं नाम नैव स्मरः ॥ २३ ॥

**विदूषकः**—(विलोक्य ।) कहं एसा णिव्वत्तिदपव्वदीचरणसुस्सूसा इमादो कमलसरादो णिग्गदा रहसि सहीए सह लदागुम्मन्तरे पविट्ठा।(क)

**राजा**—

धूपांशुकेन शनकैः परिमृज्यमान-
वेणीगुणा प्रणयपूर्वमुपेत्य सख्या ।
मध्ये मधुद्रुमवनं वनदेवतेव
तन्वी विवक्षुरिव किंचिदिहोपविष्टा ॥ २४ ॥

(सहर्षम् ।) सखे, सुव्यक्तानि विरहचिह्नानि । तथा हि ।

दग्धासन्नलतावलीकिसलयः श्वासानिलानां चयो
बाष्पाम्भःस्रुतिरालवालकलनायोग्या तरूणामधः ।
तापो निर्मृदिताब्जिनीदलचयः कोऽप्यङ्गकानां गुरु-
र्दूर्वाकाण्डविडम्बिपाण्डिमधरं किं चाननं सुभ्रुवः ॥ २५ ॥

**विदूषकः**—सुलक्खिदं पिअवअस्सेण ।

[1]णीसासाहिणवप्पहारवलिदा कामस्स णूणं सरा
............................................ । (ख)

---

(क) कथमेषा निर्वर्तितपार्वतीचरणशुश्रूषास्मात्कमलसरसो निर्गता रहसि सख्या सह लतागुल्मान्तरे प्रविष्टा ।

(ख) सुलक्षितं प्रियवयस्येन ।

निःश्वासाभिनवप्रहारवलिता कामस्य नूनं सरा
............................................ ।

---

१. आदर्शपुस्तकेऽस्य श्लोकस्य पादमात्रमेवास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



.............................................................

..............................................................॥ २६ ॥

**राजा**—सखे, अस्यैव लतागहनस्य पश्चात्स्थित्वा शृणुवस्तावदस्या विश्रम्भभाषितानि ।

(इति तथा कुरुतः ।)

(ततः प्रविशति यथानिर्दिष्टा नायिका सखी च ।)

**सखी**—किं एव्वं रोदीअदि । एसा भअवदी भवाणी पणदजणवच्छला णिच्चिअं तुह इच्छं पूरइस्सदि । (क)

**नायिका**—

को जाणादि कदा हुविस्सादि फलं चन्दद्धचूडामणि-
प्पाणेसाचलणप्पसादतरुणो भत्तीअ सित्तस्स वि[1] ।
मुज्झन्ती मअणाणलेन बहलं साहं हदासा पुणो
दाणिं जेव्व तहिं चरामि परमं जं जं अवत्थन्तरम् ॥ २७ ॥

अवि अ ।

आसण्णो मअलञ्छणो ण वअणो दुद्धेण धोएव्व सा
दिट्ठी सामलगोरमुद्धलडहं तं तस्स रूवं पडु ।
झाणे झत्ति जधा परिप्फुरादि मे कच्चाइणीणो तधा
णो जाणे जादि जीवइस्सदि उमा कण्णा विपण्णेत्ति माम् ॥२८॥(ख)

---

(क) किमेवं रुद्यते । एषा भगवती भवानी प्रणतजनवत्सला निश्चितं तवेच्छां पूरयिष्यति ।

(ख) को जानाति कदा भविष्यति फलं चन्द्रार्धचूडामणि-
प्राणेशाचरणप्रसादतरोर्भक्त्या सिक्तस्यापि ।
मुह्यन्ती मदनानलेन बहुलं साहं हताशा पुन-
रिदानीमेव तत्र चरामि परमं यद्यदवस्थान्तरम् ॥

अपि च ।

आसन्नो मृगलाञ्छनो न वदनं दुग्धेन धौतेव सा
दृष्टिः श्यामलगौरमुग्धलटभं तत्तस्य रूपं पटु ।

---

१. 'वा' इत्यादर्शपुस्तकपाठः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सखी**—णं तस्सिं पि संणद्धो मअरद्धओ त्ति किं त्ति उत्तमीअदि । (क)

**नायिका**—सहि, अलं आसासणसीलदाए । (ख)

**सखी**—णं जो सो तस्स महाभाअस्स कदे पच्छावइदुमाढत्तो सिलोओ ण किं विरइअदि । (ग)

**नायिका**—तुमं जेव्व सक्का सिलोअजुअलं करेसु । मह मम्महरससंकप्पविकप्पेहिं अन्तरिज्जदि पणिधाणदिट्ठी । (घ)

**सखी**—(नातिचिरात्स्थित्वा ।) सहि, अवधारेसु । (संस्कृतमाश्रित्य ।)(ङ)

नीरागा मृगलाञ्छने मुखमपि स्वं नेक्षते दर्पणे
खिन्ना कोकिलकूजितादपि गिरं नोन्मुद्रयत्यात्मनः ।
चित्रं दुःसहदाहदायिनि धृतद्वेषापि पुष्पायुधे
मुग्धाक्षी सुभग त्वयि प्रतिपदं प्रेमाधिकं पुष्यति ॥ २९ ॥

अपि च ।

प्रोतेति प्रतिबिम्बितेति घटितेत्यास्थानशालामणि-
स्तम्भन्यस्तभरामपि प्रियसखीवर्गो न जानाति ताम् ।
अङ्गेनोत्पुलकेन किं तु सुचिरं गीतं कुरङ्गीव सा
तन्वङ्गी तव शृण्वती नयनजैरम्भोभिरुन्नीयते ॥ ३० ॥

---

ध्याने झटिति यथा परिस्फुरति मे कात्यायन्यास्तथा
नो जाने यदि जीवयिष्यत्युमा कन्या विपन्नेति माम् ॥

(क) ननु तस्मिन्नपि संनद्धो मकरध्वज इति किमित्युत्ताम्यते ।

(ख) सखि, अलमाश्वासनशीलतया ।

(ग) ननु यः स तस्य महाभागस्य कृते प्रस्तावयितुमारब्धः श्लोको न किं विरच्यते ।

(घ) त्वमेव शक्ता श्लोकयुगलं कुरुष्व । मम मन्मथरससंकल्पविकल्पैरन्तर्यते प्रणिधानदृष्टिः ।

(ङ) सखि, अवधारय ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नायिका**—सखि, साहु विरइदम् । सरसकइत्तणेण परभूमिमारोविदो विप्पलम्भो । (क)

**राजा**—प्रिये, अन्तरङ्गासि काव्योपनिषदाम् ।

**नायिका**—सहि, मए वि विरइदो संदेसो । (ख)

**सखी**—कीरिसो । गण्डूसेहि सवणाइं रसदाणेण । (ग)

**नायिका**—

कि चन्दो तह चन्दणव्व सिसिरो किं वल्लईपञ्चमो
कण्णे वल्लहसंगमो मणसिजो किं वा सपक्खट्ठिदो ।
दिट्ठी किं कमलेसु रज्जदि मणं किं णाम मे दक्खिणो
सो वा दक्खिणमारुदो जइ तुए मज्झत्थमालम्बिदम् ॥ ३१ ॥(घ)

**विदूषकः**—भो, एह्णि पत्तिज्जसि । (ङ)

(राजा मोदते ।)

**सखी**—सहि, णिअदसाणिवेदणगब्भणिब्भरं दढं उपलद्धो भट्टा । (च)

**नायिका**—एवं सुणीअ किं पडिपज्जदि । (छ)

---

(क) सखि, साधु विरचितम् । सरसकवित्वेन परभूमिमारोपितो विप्रलम्भः।

(ख) सखि, मयापि विरचितः संदेशः ।

(ग) कीदृशः । गण्डूषय श्रवणे रसदानेन ।

(घ) किं चन्द्रस्तथा चन्दन इव शिशिरः किं वल्लकीपञ्चमः
कर्णे वल्लभसंगमो मनसिजः किं वा सपक्षस्थितः ।
दृष्टिः किं कमलेषु रज्यति मनाक्किं नाम मे दक्षिणः
स वा दक्षिणमारुतो यदि त्वया माध्यस्थ्यमालम्बितम् ॥

(ङ) भोः, अधुना प्रत्याय्यसे ।

(च) सखि, निजदशानिवेदनगर्भनिर्भरं दृढमुपालब्धो भर्ता ।

(छ) एवं श्रुत्वा किं प्रतिपद्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सखी**—किं अण्णम्।

जं जलरासिसुताए नवरसतण्हाउलेण कण्हेण।
ससिहण्डमण्डणेण वि पडिवण्णं जं च गोरीए॥ ३२॥ (क)

**नायिका**—अवि ण कहिं पि अवहीरस्सादि सखी। (ख)

**सखी**—(विहस्य।)

तुह्मारिसीओँ परिहवविसअम्मि कहं व वज्जन्ति।
किज्जउ कहं विअ फुडं णिअडाहिँ सुहाइदं दूरे॥ ३३॥ (ग)

**नायिका**—(सोत्कलिकं संस्कृतमाश्रित्य।)

जाने सखि स्मरशिखिज्वलिता जनस्य
तस्य व्रजामि निकटं परिभूय लज्जाम्।
पश्चाद्यथाभिरुचितं विदधातु देवी
किं दुःसहं विरहपावकतोऽपि वा स्यात्॥ ३४॥

**विदूषकः**—भो, ण जुत्तं दाणिं पडिबालणम्। उपसरीअदु। (घ)

**राजा**—मूर्ख, किं तरलोऽसि।

**सखी**—सहि, किं उत्तावलासि। तारिसाइं जेव्व तुह लक्खणाइं जेहिं किं ण संभावीअदि। (ङ)

**नायिका**—ईरिसाइं मह भाअधेआइं जेण मिच्चुसंभावणा। (इति संस्कृतमाश्रित्य।) (च)

---

(क) किमन्यत्।

यज्जलराशिसुताया नवरसतृष्णाकुलेन कृष्णेन।
शशिखण्डमण्डनेनापि प्रतिपन्नं यच्च गौर्या॥

(ख) अपि न कुत्राप्यवधीरयिष्यति(?) सखी।

(ग) युष्मादृश्यः परिभवविषये कथमिव व्रजन्ति।
क्रियतां कथमिव स्फुटं निगडैः सुखायितं दूरे॥

(घ) भोः, न युक्तमिदानीं प्रतिपालनम्। उपसृयताम्।

(ङ) सखि, किमाकुलासि। तादृशान्येव तव लक्षणानि यैः किं न संभाव्यते।

(च) ईदृशानि मम भागधेयानि यैर्मृत्युसंभावना।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुर्वीं धुरं दुरभियोगनिधिर्मनोभू-
राख्ढवानविषये मनसोऽनुबन्धः ।
बन्धुर्न कश्चिदपि निघ्नतया स्थितिश्च
हा निश्चितं मरणमेव ममेह जातम् ॥ ३५ ॥

(इति मोहमुपगच्छति ।)

**विदूषकः**—भो, पमादो पमादो । मए पढमं जेव्व आअक्खिदं उ-पसप्पीअदु त्ति । (क)

(राजा ससंभ्रममुपसर्पति ।)

**सखी**—विजयताम् ।

**विदूषकः**—अब्बह्मण्णं अब्बह्मण्णम् । (ख)

**सखी**—महाराअ, हत्थेण फंसीअदु जेण चेअणं पावेदि । (ग)

**राजा**—(तथा कुर्वन् ।)

विलोलत्वं चक्षुः स्पृशति मुकुलावस्थमपि य-
द्दुरस्विद्यन्मध्यं कुचकलशयोरुच्छ्वसिति यत् ।
प्रसीदत्युद्दामा यदपि वदनश्रीः सपुलकं
तदेतस्याः संज्ञा ध्रुवमभिमुखी पक्ष्मलदृशः ॥ ३६ ॥

(पुनरवलोक्य ।) अहो सर्वावस्थाभिरव्यवधीयमानं रामणीयकमस्याः । तथा हि ।

भ्रूलेखा विनिवृत्तनृत्तरचना मुक्ताञ्चनोदञ्चन-
व्यापारा कुसुमास्त्रकार्मुकलतामुष्याः सगोत्रीकृता ।
मीलल्लीलमुपैति लोचनयुगं निद्रालुनीलोत्पल-
स्पर्धा श्वासकदर्थितोऽपि भजते बिम्बाधरः स्वां धुरम् ॥ ३७ ॥

**विदूषकः**—भोदी मम पिअवअस्सहत्थेण फंसिज्जन्ती कहं ण चे-अणं पडिवज्जदि । (घ)

---

(क) भोः, प्रमादः प्रमादः । मया प्रथममेवाख्यातमुपसृप्यतामिति ।

(ख) अब्रह्मण्यमब्रह्मण्यम् ।

(ग) महाराज, हस्तेन स्पृश्यतां येन चेतनां प्राप्नोति ।

(घ) भवती मम प्रियवयस्यहस्तेन स्पृश्यमाना कथं न चेतनां प्रतिपद्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(सानन्दमात्मगतम् ।)

मग्नं मृगाङ्कसरसीव सुधानिधाने
गर्भे निषण्णमिव पङ्कजकैरवाणाम् ।
अप्यत्र यन्त्रविनिपीडितपारिजात-
निःस्यन्दधौतमिव निर्वृतिमेति चेतः ॥ ३८ ॥

**सखी**—सहि, एदेण हत्थफंसेण ण उच्छसासि त्ति अहो दे कठिणत्तणम् । (क)

**नायिका**—(किंचित्समाश्वस्य ।) अम्मो, किंत्ति रसाअणसित्तेव्व णिव्वुदिं उव्वहामि । एसो जिआअणो कङ्क्षिदो जणो । (इति किंचिद्दृष्ट्वा सलज्जमास्ते ।) (ख)

**राजा**—

वद सुवदने किं व्यामोहः समाश्वसिहि द्रुतं
प्रणयिनि जने किं प्रत्याशाविरोधि विचेष्टितम् ।
नय नयनयोरातिथ्यं मां मनोभववागुरा
परिचरतु मां नीलाम्भोजस्रजः कलयान्विता ॥ ३९ ॥

**विदूषकः**— भोदि, किं ण अलिअणिद्दा विद्दावीअदि । पिअवअस्सो एव्वं दीणत्तणं दंसेदि । (ग)

**सखी**— (सहासम् ।) किंत्ति पडिपत्तिमूढदा अङ्गीकदेत्ति । (एनां बलादानीय राजान्तिकमुपवेशयति ।) (घ)

---

(क) सखि, एतेन हस्तस्पर्शेन नोच्छ्वसिसीत्यहो ते काठिनत्वम् ।

(ख) अहो, किमिति रसायनसिक्तेव निर्वृतिमुद्वहामि । एष जीवनः काङ्क्षितो जनः ।

(ग) भवति, किं नालीकनिद्रा विद्राव्यते । प्रियवयस्य एवं दीनत्वं दर्शयति ।

(घ) किमिति प्रतिपत्तिमूढता अङ्गीकृतेति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नायिका**— (सकृतककोपम्।) अवेहि पडिहासशीले। (इति सासूयमवलोकयति।) (क)

**राजा**—

इयं यदालोकयति त्रपानता दृशा नवेन्दीवरदामदीर्घया।
तदन्यदेवाभ्यधिकं रसायनादवैमि पुष्पायुधदेहदोहदम्॥ ४०॥

(इति पटाञ्चले मृशन्।)

नायं जनः किमु परिच्छदमध्यमास्ते
यल्लज्जया ननु तनूदरि मुद्रितासि।
आलिङ्ग मां परिचितानि चिराद्भवन्तु
देहे हरिन्ति हरिचन्दनपल्लवानि॥ ४१॥

(इत्यालिङ्गितुमिच्छति।)

**नायिका**—(स्वगतम्।) हिअअ, मणोरहाणं वि उपरि वट्टसि। (ख)

**सखी**—दिज्जउ एदाणं वीसम्भगोट्ठी। (इति शनकैः किंचिदपसरति।) (ग)

**विदूषकः**—भोदि, एसा देवी आगदा। (घ)

(सखी ससंभ्रमं निवर्तते। नायिका सभयमुत्तिष्ठति।)

**राजा**—(सशङ्कं दिशोऽवलोक्य।) मूर्ख, क्वासौ।

**विदूषकः**—भो, तत्तभोदिं कण्णसुन्दरिं उद्दिसिअ देवी उज्जाणमलंकरेदित्ति भणिदं। (ङ)

**राजा**—(अग्रतोऽवलोक्य।) कथं सत्यमेवागता देवी। अहो ब्रह्मबन्धोरमुष्य फलितममङ्गलेन।

---

(क) अपेहि परिहासशीले।

(ख) हृदय, मनोरथानामप्युपरि वर्तसे।

(ग) दीयतामेतयोर्विस्रम्भगोष्ठी।

(घ) भवति, एषा देव्यागता।

(ङ) भोः, तत्रभवतीं कर्णसुन्दरीमुद्दिश्य देव्युद्यानमलंकरोतीति भणितम्।

---

१. 'सास्रमवलोकयति' इत्यादर्शपुस्तकपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नायिका**—(विलोक्य । आत्मगतम् ।) अणब्भए इदं वज्जपडणं पेक्खिदम् । (क)

**सखी**—महाराअ, सुमरिदव्वो अअं जणो । संपदं अण्णदो गच्छह्म । (ख)

**विदूषकः**—अह्मे वि एव्वं जेव्व करेह्म । (ग)

(नायिका सख्या सह निष्क्रान्ता ।)

**राजा**—(निःश्वस्य ।)

कथमपि दिवः पुञ्जीभूय च्युतामिव कौमुदीं
कुमुदसुहृदः प्राप्य प्राणाधिकां विधिकारणात् ।
अहरहरहो प्राप्तं लीलारसोर्मिषु मज्जता
क्षणमपि मया न स्वातन्त्र्यं किमत्र विधीयताम् ॥ ४२ ॥

(ततः प्रविशति देवी हारलता च ।)

**हारलता**[1]—कहं भट्टावि इह जेव । (घ)

**देवी**—राअकज्जविरहे इमस्सिं काले इह जेव्व दिणं णिव्विण्णो विणोदइ अज्जउत्तो अत्ताणअंत्ति । (ङ)

**राजा**—अपि विज्ञातोऽहं देव्या ।

**विदूषकः**—तधा कुविआ वअस्सेण अणुणीदा कधं विप्पदीवं पसज्जिअ अणुसरिस्सदि । (च)

---

(क) अनभ्रे इदं वज्रपतनं प्रेक्षितम् ।

(ख) महाराज, स्मर्तव्योऽयं जनः । सांप्रतमन्यतो गच्छावः ।

(ग) आवामप्येवमेव कुर्वः ।

(घ) कथं भर्तापीहैव ।

(ङ) राजकार्यविरहेऽस्मिन्काले इहैव दिनं निर्विण्णो विनोदयत्यार्यपुत्र आत्मानमिति ।

(च) तथा कुपिता वयस्येनानुनीता कथं विप्रतीपं प्रसज्ज्यानुसरिष्यति ।

---

१. आदर्शपुस्तकसंशोधकेन हारलतास्थाने देवी, देवीस्थाने च हारलता इति पदं शोधितमस्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—तदितोऽभ्यन्तरमेव व्रजावः ।

(इति निष्क्रान्ताः सर्वे ।)

द्वितीयोऽङ्कः ।

---

तृतीयोऽङ्कः ।

(ततः प्रविशतश्चेट्यौ ।)

**एका**—सहि बउलावलि, सो ण हु बन्धवो भणीअदि जस्सिं हिअअम्मि विअ णीसङ्कदाए ण रहस्सं संचारीअदि । ता कहेसु कीस तुअं देवीए वासे मन्तअन्ती आसि । (क)

**बकुलावली**—सहि मन्दोअरि, ण अत्थि मम वीसासो । तुअं चावलभावेण विसुमरिअ कस्स पि पुरदो कहिस्ससि त्ति ण आवेदेमि । जदि कुप्पसि ता एवं णिवेदीअदि । परं मन्तभेदो रक्खिदव्वो । (ख)

**मन्दोदरी**—अविस्सासिणि, कहेसु । (ग)

**बकुलावली**—सहि, भट्टा विज्जाहरकण्णाए अणुरत्तचित्तो, परं देवीकारणेण किं पि कादुं ण सक्कुणोदित्ति सव्वगदो पवादो । किं तु भट्टदारिआए कलहाअन्तो अवलावं करेदि । अज्ज क्खु पिअन्तअकेण अज्जबादराअणेण अन्तेउरसालाए पच्छादो णिहुअं हुविअ अज्ज पओसे परिकलिअमअणुज्जाणए संकेदो गहिदो अवअं मन्तिदं ण वेत्ति विरहलेहो अ णिअकरे कदो । देवीए सव्वं पि सुणिअ अहं भणिदा अज्ज मए कण्णसुन्दरीरूएण तुए तीअ सहीरूएण गदुअ अज्जउत्तो वञ्चिदव्वो । ता एदाए वत्ताए रक्खणं कदुअ उअअरणं सज्जीकरेसुत्ति । (घ)

---

(क) सखि बकुलावलि, स न खलु बान्धवो भण्यते यस्मिन्हृदय इव निःशङ्कतया न रहस्यं संचार्यते। तत्कथय कस्मात्त्वं देव्या वासे मन्त्रयन्ती आसीः।

(ख) सखि मन्दोदरि, नास्ति मम विश्वासः । त्वं चापलभावेन विस्मृत्य कस्यापि पुरतः कथयिष्यसीति नावेदयामि । यदि कुप्यसि तदेवं निवेद्यते । परं मन्त्रभेदो रक्षितव्यः ।

(ग) अविश्वासिनि, कथय ।

(घ) सखि, भर्ता विद्याधरकन्यायामनुरक्तचित्तः, परं देवीकारणेन कि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्दोदरी**—अहो, संकडे पडिदो महाराओ। (इत्यग्रतोऽवलोक्य।) एसो भट्टा लच्छीसणाहो णूणं एत्थ रमणपगीवएतंव जेव पडिपालअन्तो चिट्ठदि। ता एहि गच्छामो। जाव अह्मे पेक्खिअ ण किं पि उप्पिस्सदि। (क)

(इति निष्क्रान्ते।)

प्रवेशकः।

---

(ततः प्रविशति यथानिर्दिष्टो राजा।)

**राजा**—

न स्वेच्छागतयोऽपि साचिवलनावैचित्र्यशून्या दृशो
नाधौताधरकान्ति संस्तुतजनालापेऽपि लीलास्मितम्।
वाचां विस्मरणेऽपि न व्यवहिता विच्छित्तिसंक्रान्तय-
स्तात्पर्यं मदनेन दर्शितमहो वैदग्ध्यदीक्षाविधौ॥ १॥

अपि च।

तद्वक्त्रेण विलुप्तकान्तिमहिमा वर्णोज्झितः शार्वरी-
मब्रह्मण्यमिव प्रसारितकरः कृत्स्नां विधत्ते विधुः।
अप्याविष्कृतपत्रमुत्पलवनं तल्लोचनेन्दीवर-
च्छायारिक्थमिव द्विरेफपटलीवाचालमाकाङ्क्षते॥ २॥

---

मपि कर्तुं न शक्नोतीति सर्वगतः प्रवादः। किं तु भर्तृदारिकया कलहायमानोऽपलापं करोति। अद्य खलु प्रिय············आर्यबादरायणेनान्तःपुरशालायाः पश्चान्निभृतं भूत्वाद्य प्रदोषे परिकलितमदनोद्यानके संकेतो गृहीतः········मन्त्रितं न वेति विरहलेखश्च निजकरे कृतः। देव्या सर्वमपि श्रुत्वाहं भणिता अद्य मया कर्णसुन्दरीरूपेण त्वया तस्याः सखीरूपेण गत्वार्यपुत्रो वञ्चयितव्यः। तदस्या वार्ताया रक्षणं कृत्वोपकरणं सज्जीकुरुष्वेति।

(क) अहो, संकटे पतितो महाराजः। एष भर्ता लक्ष्मीसनाथो नूनमत्र रमण············एव प्रतिपालयंस्तिष्ठति। तदेहि गच्छावः। यावदावां प्रेक्ष्य न किमपि··········।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(इति साङ्गभङ्गम् ।)

तत्पादद्वितयस्य दास्यमपि न प्राप्नोति पङ्केरुहं
तद्भ्रूभङ्गविनिर्जितं स्मरधनुर्नम्रं सदा तिष्ठति ।
इन्दुः किं दुरतिक्रमस्य कुरुतां धातुः सुधासूतिर-
प्यङ्कं तन्मुखकिंकरत्वपिशुनं धत्ते सहोत्थं यतः ॥ ३ ॥

(स्मरणमभिनीय ।)

प्रायो दास्यति नो पयोधरतटी गन्तुं पुरस्तादिति
ध्यानेनेव चकास्ति साचिगमने शिक्षारसश्चक्षुषोः ।
अन्तः स्थानमिव स्मरैकसुहृदः कस्यापि दातुं बहि-
र्निर्गन्तुं हृदयादपि स्तनयुगं विस्तारि संनह्यति ॥ ४ ॥

अपि च ।

कान्तिः कापि कपोलयोः परिणमत्तालीदल[1]स्पर्धिनी
वर्धन्ते मधुपावलीवलयिनः श्वासानिलाः संततम् ।
कार्श्यस्यावरणं तरङ्गितगतेर्[2]लावण्यमेवाङ्गके
सारङ्गायतचक्षुषः किमथवा सर्वं नवीनायते ॥ ५ ॥

अपि च ।

कंदर्पदैवतनिकेतनवैजयन्ती
यान्ती विलासरसमन्थरमुत्पलाक्षी ।
दृष्टिं निवेदितवती मयि कालकूट-
लेशान्धकारितसुधालहरीविचित्राम् ॥ ६ ॥

(सनिःश्वासम् ।) तत्किमद्यापि चिरयति वयस्यः ।

विज्ञातेङ्गितया तरङ्गितघनक्रोधानुषङ्गं धृतः
किं देव्या प्रतिपालयन्परिजनं तस्याः क्वचित्सुभ्रुवः ।
खेदं सैव सखेलवारणगतिर्न प्रापिता चेति मे
चेतः सान्द्रसमुल्लसन्नवनवोल्लेखं मुहुस्ताम्यति ॥ ७ ॥

(प्रविश्य ।)

**विदूषकः**—दिट्ठिआ वड्ढसि कज्जसिद्धीए । (क)

---

(क) दिष्ट्या वर्धसे कार्यसिद्ध्या ।

---

१. 'वनस्पर्धिनी' इत्यादर्शपुस्तकपाठः. २. 'गतैर्' इत्यादर्शे पाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(सहर्षमालिङ्ग्य ।) कथमिव ।

**विदूषकः**—(कर्णे ।) एव्वमेवं । (क)

**राजा**—(सानन्दम् ।)

भूयोऽपि तावदिदमेव निवेदय त्वं
चन्द्रांशुभिः कवलिता इव सूक्तयस्ते ।
अन्तर्बहिश्च हृदयेन किमप्यमन्द-
निःस्यन्दमिन्दुमणिनेव विलीयते मे ॥ ८ ॥

(इति सोत्साहम् । आकाशे ।)

भव भव शतयामा यामिनि स्वामिनि त्वं
छुरय रजनिनाथ ज्योत्स्नया दिङ्मुखानि ।
अयि विरमय काम क्रेङ्कितं क्रूरबाण-
व्ययपरिचयचञ्चत्कर्मणः कार्मुकस्य ॥ ९ ॥

(गगनमवलोक्य ।) सखे, समासन्नप्रायस्तत्र गमनसमयः । तथा हि ।

व्योमभ्रान्तिपरिश्रमेण तृषितैराकृष्यमाणो हयैः
प्रस्वेदश्लथमानसारथिकरप्रभ्रष्टवल्गैरिव ।
अम्भोधेरधिकूलकच्छगहनं क्षीणच्छवि क्ष्माभृतः
स्थित्वा मूर्धनि पश्चिमस्य विशति स्वैरं ग्रहग्रामणीः ॥ १० ॥

अपि च ।

दूरं भानुरुदञ्चितारुणकरः पाथोनिधौ पद्मिनी-
स्पर्शासक्तरजोङ्गरागविगमत्रासादिवामज्जति ।
अन्तः कान्तिमिव प्रियस्य विरहोत्कण्ठाविनोदार्थिनी
रोद्धुं मुद्रयति स्वपङ्कजवनीकोषं च पाथोजिनी ॥ ११ ॥

**विदूषकः**—भो पिअवअस्स, अअं अ तीए अवत्थाणिवेदओ विरहलेहो वाचीअदु । (ख)

---

(क) एवमेवम् ।

(ख) भोः प्रियवयस्य, अयं च तस्या अवस्थानिवेदको विरहलेखो वाच्यताम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(राजा वाचयति ।)

एतां गृहाण सखि रत्नगृहप्रविष्टां
ज्योत्स्नां पिधाय सहसैव गवाक्षमार्गान् ।
नीलीरसेन सह वर्तय पट्टके च
चन्द्रः समेतु कियतापि परिक्षयेण ॥ १२ ॥

ज्योत्स्नानिर्गममार्गमुद्रणविधिं धत्तोरुकुम्भे मुहु-
स्ताराः कारयतान्यतो [१]बत मुहुः संमार्जनीनां चयैः ।
पञ्चेषोर्भजताभिचार[२]चरुतां विस्मार्यतां पञ्चमः
किं चायं पिकमण्डलस्य मयि चेत्सख्यः सुखं वाञ्छथ ॥१३॥

अपि च ।

कलयत दलबन्धं संधिषु न्यस्य सान्द्रं
ननु जतुरसपङ्कं पङ्कजेन्दीवराणाम् ।
इह विरहवतीनां जीवितं येन नायं
हरति परिमलश्रीबान्धवो गन्धवाहः ॥ १४ ॥

नयनयुगलवल्गन्नीरसंक्षाल्यमान-
स्तनमलयजलेपा सावलेपा कथासु ।
इति सुभग समग्रामेव रात्रिं विधत्ते
निरुजसुलभवस्तुप्रार्थनाभिः सखीनाम् ॥ १५ ॥

अपि च ।

धूर्तोऽयं सखि बध्यतामिति वि[३]धुं रश्मिव्रजैः कर्षति
ज्योत्स्नाम्भः परतः प्रयात्विति रिपुं राहुं मुहुर्याचते ।
अप्याकाङ्क्षति सेवितुं सुवदना देवं पुरद्वेषिणं
भूयो निग्रहवाञ्छया भगवतः शृङ्गारचूडामणेः ॥ १६ ॥

**विदूषकः**—एह्निं किं मण्णसि । (क)

---

(क) अधुना किं मन्यसे ।

---

१. 'वरमुहुः' इत्यादर्शपाठः. २. 'चतुरा' इत्यादर्शपाठः. ३. 'विध्र' इत्यादर्शपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(लेखं[1] बहुलं प्रसार्य ।) कथमत्राप्यक्षराणि । (वाचयति ।)

पश्यागच्छ कुतूहलादपि गृहानस्माकमाकर्णय
त्वं देवि च्छलिता न केनचिदिति प्रोक्तं शुकानामपि ।
सा नः कापि सखीषु नास्ति सुभग प्राप्तस्तदीयाङ्क-
स्पर्शोष्मग्लपितो न कामपि रुजं यस्याः किणाङ्कः करः ॥ १७ ॥
कथमपि हृदि कृत्वा त्वद्वियोगातिभारं
सुभग निबिडलज्जामज्जदारम्भमास्ते ।
पिशुनयति कृशाङ्ग्याः केवलं मन्मथाग्नि
श्वसित[2]पवनधूमश्यामला चित्रशाला ॥ १८ ॥

**विदूषकः**—(पुरतोऽवलोक्य ) भो, तुह्माणं दुहुं पि तारिसो सिणेहो जारिसो इमस्स चक्कवाअजुअलस्स । (क)

**राजा**—( सस्पृहमवलोकयन्[3] ।)

रक्ताम्भोरुहचारुचञ्चुपुटकेनोद्धर्तुमिच्छन्निव
भ्रश्यत्पश्यति बिम्बमम्बरमणेश्चक्राह्वयो विह्वलः ।
साश्रुर्मुञ्चति चक्षुषी प्रतिदिशं कान्तास्य दीनानना
मा भैषीस्त्वमिति स्वकालविरहत्राणार्थिनीवानिशम् ॥ १९ ॥

**विदूषकः**—भो, निरन्तरगोधनसहस्ससमुद्धूतधूलीसमुच्छाहिदतरुणतरतिमिररिञ्छोलीलञ्छणे समए अणुसरीअदु संकेदट्ठाणम् । (ख)

**राजा**—(ऊर्ध्वमवलोक्य ।)

संधत्ते धूपधूमच्छविमबहु तमः प्राप्यते तारकाभिः
पुष्पस्रग्दामशोभा नभसि नवनिशाकामिनीतल्पकल्पे ।

---

(क) भोः, युवयोर्द्वयोरपि तादृशः स्नेहो यादृशोऽस्य चक्रवाकयुगलस्य ।

(ख) भोः, निरन्तरगोधनसहस्रसमुद्धूतधूलीसमुत्साहिततरुणतरतिमिरपङ्क्तिलाञ्छने समयेऽनुस्त्रियतां संकेतस्थानम् ।

---

१. 'लेखनं' इत्यादर्शपाठः. २. 'श्वसिति' इत्यादर्शपाठः. ३. 'अवलोकयति' इत्यादर्शपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मध्ये कस्तूरिकाङ्कं दधदिव हरिणं किं च संध्यानुबन्धा-
दिन्दुः सिन्दूरभिन्नस्फटिकमणिशिलाब्धभलीलां तनोति ॥२०॥

तदादेशय तमुद्देशं यावन्नालम्बते जरठतां रजनीपरिवृढः ।

**विदूषकः**—इदो पिअवअस्सो । (क)

(इति परिक्रामतः ।)

**विदूषकः**—(अग्रतो दृष्ट्वा ।) एदं तं। पविसदु भवं। उपविसदु पिअवअस्सो । (ख)

(तथा कुरुतः ।)

**राजा**—अहो रम्यः समयः ।

बध्यन्ते कुसुमगृहाणि धूपधूमै-
स्तान्येव स्मरदयितानि संस्क्रियन्ते ।
धन्यानामपि च सुलोचनासमीपे
रोचन्ते सपदि मनोलसद्विलासाः ॥ २१ ॥

**विदूषकः**—भो वअस्स,

कीराणं पञ्जराणं सुरतकलरुओग्घुट्ठवादानुवाद-
त्तासेणं किज्जमाणा मणिमयवलहीवाहिराइं वडन्ति ।
सेज्जाठाणे कआणं फुरइ कलरवो केलिपारावआणं
धण्णाणं हुन्ति कीलाजलकणहरणा संपदं चन्दपाआ ॥२२॥(ग)

**राजा**—(निःश्वस्य ।)

उरसि सुरतनिद्रालीनकान्ते न मग्नं
धवलगृहगवाक्षस्पन्दिभिश्चन्द्रपादैः ।

---

(क) इतः प्रियवयस्यः ।

(ख) एतत्तत् । प्रविशतु भवान् । उपविशतु प्रियवयस्यः ।

(ग) भो वयस्य,

कीराणां पञ्जराणां सुरतकलरुतोद्घुष्टवादानुवाद-
त्रासेन क्रियमाणा मणिमयवलभीबहिर्भागेण पतन्ति ।
शय्यास्थाने·······स्फुरति कलरवः केलिपारावतानां
धन्यानां भवन्ति क्रीडाजलकणहरणाः सांप्रतं चन्द्रपादाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुतमपि भुजशाखापञ्जरे चारुलीला-
मधुरमधरपीडाकूजितं नायताक्ष्याः ॥ २३ ॥

(इति सौत्सुक्यम्।)

सान्द्रश्रीखण्डपाण्डुस्तनकलशभरात्तारहारप्रकाण्ड-
ज्योत्स्नापुञ्जाभिषेकद्विगुणपरिणमत्कौमुदीमग्नवक्त्रा।
उत्कण्ठाकृष्यमाणा प्रगुणमनसिजादिश्यमानेन काचि-
न्मार्गेण प्राणनाथप्रणयरभसतः सान्द्रलीलां तनोति ॥ २४ ॥

यस्यै कुप्यति नूतनस्तरुणिमा लावण्यलक्ष्मीरियं
यत्रापत्रपते न संवदति या प्रेमानुबन्धस्य न।
श्रुत्वैतां च ततां गिरं चिरमसावेतत्किमित्याकुलो
वैक्लव्यं च कुतूहलं च वदनं स्मेरं च धत्ते स्मरः ॥ २५ ॥

(ततः प्रविशति कर्णसुन्दरीवेषा देवी, बकुलावलिवेषा हारलता च।)

**देवी**—सहि हारलदे, अह्मे किं पि सुणन्तिओ चिट्ठह्म। (क)

**राजा**—अये, कथं प्राप्तैव प्राणेश्वरी। (मुखमवलोक्य।) अहह।

जानामि विस्मृतिममन्यत पद्मयोनि-
र्लावण्यसारमभिलिख्य मृगाङ्कबिम्बम्।
तेनात्र काकपदकं हरिणच्छलेन
दत्त्वा लिलेख मुखमायतलोचनं ते ॥ २६ ॥

**विदूषकः**—अहं पि दाव वण्णेमि।

रइकलहविरोहे रोहिणीकज्जलंसु-
प्पसरपरिगदोव्व ज्झामलो लञ्छणेण।
निजवअणसवण्णं जामिणीडिम्भमेणं
वहइ रअणिणाहो लालयन्तो व्व अङ्के ॥ २७ ॥ (ख)

---

(क) सखि हारलते, आवां किमपि शृण्वत्यौ तिष्ठावः।

(ख) अहमपि तावद्वर्णयामि।

रतिकलहविरोधे रोहिणीकज्जलाश्रु-
प्रसरपरिगत इव श्यामलो लाञ्छनेन।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवी—(आत्मगतम्।) हदास, तुज्झ एसो सव्वो एव्व परिफन्दो। (क)

राजा—सखि बकुलावलि, किमियं वामता भवत्सख्याः, यदेवमालोकनेनापि न कृतार्थयति।

हारलता—णेहो एत्थ अवरज्झदि, णो उण वामदा। (ख)

राजा—

झटिति कुवलयानि व्रीडया पीडितत्वा-
दधतु कृतकनिद्रां चन्द्रिकासंगमेऽपि।
अपि तरलय लीलामज्जदुन्मज्जदन्तः-
स्फुरितकुसुमचापं चक्षुराकेकराक्षि ॥ २८ ॥

अपि च।

सुतनु विसृज लज्जां वल्गु वल्गन्तु वाचः
कवचयतु विपञ्चीपञ्चमः श्रोत्रयुग्मम्।
अपि कुरु परिरम्भं चारु रम्भोरु गात्रे
परिणमति कठोरः कैरवेशप्रकाशः ॥ २९ ॥

(इति समन्तादवलोक्य। आत्मगतम्।) अहो निःसीमं रामणीयकम्।

जयति धनुरधिज्यं भ्रूविलासः स्मरस्य
स्पृशति किमपि जैत्रं तैक्ष्ण्यमक्ष्णोः प्रचारः।
अपि च चिबुकचुम्बी श्यामलाङ्ग्यास्तनोति
स्तनकलशनिवेशः पेशलश्रीः पृथुत्वम् ॥ ३० ॥

(इत्यालिङ्गति।)

देवी—(प्रकटीभूय।) साअदं अज्जउत्तस्स। (इति क्षिपति।) (ग)

---

निजवदनसवर्णं यामिनीडिम्भमेनं
वहति रजनिनाथो लालयन्निवाङ्के ॥

(क) हताश, तवैष सर्व एव परिस्पन्दः।

(ख) स्नेहोऽत्रापराध्यति, न पुनर्वामता।

(ग) स्वागतमार्यपुत्राय।

---

१. 'पेशलश्रीपृथुत्वम्' इत्यादर्शपाठः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(सवैलक्ष्यम्।)

स्वयं कृतेऽपराधे तु ज्ञाते धीर्यस्य जायते।
अपत्रपायां महती तद्वैलक्ष्यं वयं स्तुमः॥ ३१॥

(विदूषको राज्ञः पक्षश्चाधोमुखस्तिष्ठति।)

**राजा**—

त्वां प्रत्येव मयापि नर्म कृतमित्युक्ते कुतो मन्यसे
निर्दोषोऽहमिति ब्रवीमि सहसा दृष्टव्यलीकः कथम्।
क्षन्तव्यं मयि सर्वमित्यपि भवेदङ्गीकृतोऽयं विधिः
किं वक्तुं मम युक्तमित्यनुगुणं देवि त्वमेवादिश॥ ३२॥

(इति पादयोः पतितुमिच्छति।)

(देवी साक्षेपं हारलतया सह निष्क्रान्ता।)

**विदूषकः**—भो, किं अरण्णरोदणेण। देवी एव्व अणुसरीअदु। (क)

**राजा**—एवमिति।

(इति निष्क्रान्ताः सर्वे।)

तृतीयोऽङ्कः।

चतुर्थोऽङ्कः।

(नेपथ्ये।)

अवन्ध्या भवतु प्रभातसंध्या देवस्य। संप्रति

रवितुरगखुराग्रक्षुण्णपूर्वाद्रिधातु-
क्षितिरज इव धत्ते धाम पौरंदरी दिक्।
अपरजलधिवेलोद्भूतडिण्डीरपिण्ड-
भ्रममममृतमरीचिः किं च दत्ते प्रतीच्याम्॥ १॥

अपि च।

चन्द्रालोकनरागजागरणतः श्रान्तेव कृत्स्नां निशां
प्रालेयानिलसौहृदात्कुमुदिनी निद्रावृता घूर्णते।
अप्येते विदितप्रबोधसमयाः प्रत्यूषभोगावली-
र्गायन्तीव कलस्वरा मधुलिहः पद्माकराणामितः॥ २॥

---

(क) भोः, किमरण्यरोदनेन। देव्येवानुस्रियताम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च।

उन्मृष्टा शयनेषु चित्रसुरतक्रीडाविधेः साक्षिणी
लाक्षारागमयी लिपिः श्रमवशाः पारावताः शेरते।
सर्वं साधकमत्र तु प्रतिविधिं कुर्युः कुरङ्गीदृश-
स्तादृश्यः प्रसरन्ति यद्गुरुजनस्याग्रे शुकानां गिरः॥ ३॥

(ततः प्रविशति विदूषकः।)

**विदूषकः**—(सपरितोषम्।) साहु अमच्च, साहु। देवीए भाइणेयं कुमारं कण्णसुन्दरीए समाणवअस्सं अप्पणो सआसे से वेसधारिणं आणअन्तेण तस्स व्व णिवासे कण्णसुन्दरीं मुअन्तेण सव्वं साहिदम्। ता पिअवअस्सस्स चक्कवट्टिभावः सव्वधा अहिमुहो संवुत्तो। अवरं देवीए परिहासादो रक्खिदो अज्ज क्खु महाभावो अ। मए मन्दभाअधेआए वामत्तणेण अज्जउत्तो किलिम्मिदोत्ति कण्णसुन्दरीपदिकिदिगब्भरूअं भाइणेअं परिणाइउं पिअवअस्सो पउत्तो। संपदं देवी एव्व विलक्खा हुविस्सादि। ता दुस्सअसंगदनिवाहस्स तस्स परिवासवट्टी होमि। (इति निष्क्रान्तः।) (क)

(ततः प्रविशति राजा विदूषकश्च।)

**राजा**—

निद्रां लम्भयता चिरं भगवता भालस्थलीलोचन-
ज्वालापल्लवसंस्तरे पुरजिता पुष्पायुधं मन्मथम्।

---

(क) साधु अमात्य, साधु। देव्या भागिनेयं कुमारं कर्णसुन्दर्याः समानवयस्कमात्मनः सकाशे तस्या वेषधारिणमानयता तस्यैव निवासे कर्णसुन्दरीं मुञ्चता सर्वं साधितम्। तत्प्रियवयस्यस्य चक्रवर्तिभावः सर्वथाभिमुखः संवृत्तः। अपरं देव्याः परिहासाद्रक्षितोऽद्य खलु महाभावश्च। मया मन्दभागधेयया वामत्वेनार्यपुत्रः क्लामित इति कर्णसुन्दरीप्रतिकृतिगर्भरूपं भागिनेयं परिणाययितुं प्रियवयस्यः प्रवृत्तः। सांप्रतं देव्येव विलक्षा भविष्यति। तद्दुःसहसंगतनिवासस्य(?) तस्य परिपार्श्ववर्ती भवामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हा हानिर्महती कृता विरहिणां यद्वज्रसारान्स्मरः
कोऽप्यन्यः क्षिपति प्रतिक्षणमयं मर्माविधः सायकान् ॥ ४ ॥

[1]अपि च।

न प्राप्तः प्रणयापराधसमये बाष्पाम्बुधौतोऽधर-
श्चित्रं नात्र विपर्ययेण सुतनोर्दृष्टं भ्रुवोस्ताण्डवम्।
निद्रामुद्रितचक्षुषः श्रुतमपि क्रीडावसाने मया
न प्रत्युत्तरमुत्कटाक्षरमहो वामः प्रकामं विधिः ॥ ५ ॥

**विदूषकः**—अहो, अज्ज वि किंति उत्तम्मसि। जं मसिविलित्तं कदुअ पिसुणाणं वअणं संपण्णकप्पो जादो मणोरहो। (क)

**राजा**—

युक्त्या यद्यपि मुद्रितो विधिरयं चेतस्तथापि स्थिरा-
माशामेति कुरङ्गशावकदृशः प्राप्तौ न तस्याः क्षणम्।
अङ्कस्थेऽपि जने मनोहृति किमप्युत्प्रेक्षते तत्क्षणा-
ज्ज्ञेयं कापि सुलोचना पुनरसावायाति दूरे दृशोः ॥ ६ ॥

(नेपथ्ये।)

सुखाय ग्रीष्मसमयो महाराजस्य। संप्रति

सत्पानीयमिति श्रुतेः स्वभवने पूर्वं परीक्षाविधौ
त्वद्वैरिक्षितिपालपक्ष्मलदृशस्तृष्णातुराः कानने।
बाष्पाम्भःकणचक्रवालरचनाचञ्चत्कपोलान्तरं
मुक्तादाम विलोकयन्ति गमनव्यग्राः कुचाग्रस्थितम् ॥ ७ ॥

**राजा**—(सोत्कण्ठम्।)

सपदि दिवसमध्ये पुण्यभाजः सुजन्मा
वितरति रतिलीलोल्लासिना मानसेन।

---

(क) अहो, अद्यापि किमित्युत्ताम्यसि। यन्मषीविलिप्तं कृत्वा पिशुनानां वदनं संपन्नकल्पो जातो मनोरथः।

---

१. 'अपि च' इत्यादर्शे नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वरयुवतिरमन्दं चन्दनस्यन्दसान्द्र-
प्रसृतलवणिमाम्भःपङ्किलामङ्गपालीम् ॥ ८ ॥

(सोत्सुक्यम् ।)

रम्भास्तम्भमनोभिरामसहजस्पर्शा यदूरुस्फिजः
संपन्नागुरुधूपवासविधयो यन्मज्जनार्द्राः कचाः ।
यच्चाकैतवशीतलाः कुचभुवः सा कान्तिरेणीदृशः
पुष्पेषोस्तदहो निदाघसमयम्लानस्य जीवातवे ॥ ९ ॥

अपि च ।

ताम्बूलद्रवमुद्रणेन विधुरच्छायो न बिम्बाधर-
श्चक्षुः क्षालितकज्जलं जलभरैः पुष्यत्यभिख्यां निजाम् ।
कोऽप्यन्यः कबरीभरस्य विगलद्बिन्दोरमन्दो रसः
स्नानान्ते सपदि स्मरास्त्रमनघं किं वा न वामभ्रुवाम् ॥ १० ॥

तत्किमद्यापि चिरयति देवीसमाह्वानम् ।

**विदूषकः**—भो, मा उत्तम । देवीए एसो पडिहासो त्ति महन्तो अहिणिवेसो । (क)

(प्रविश्य ।)

**चेटी**—जेदु जेदु भट्टा । एदाइं आहरणाइं देवीए पेसिदाइं विवाह-जोग्गाइं परिहाइअ विवाहभूमी तुरिदं अलंकरीअदु । (इत्याभरणानि समर्पयति ।) (ख)

**राजा**—एतत्त्वं गृहाणापरम् । मां समागतं देव्यै निवेदय । (इति कण्ठादवतार्य मुक्तादाम समर्पयति ।)

(चेटी गृहीत्वा निष्क्रान्ता ।)

---

(क) भोः, मा उत्ताम्य । देव्या एष परिहास इति महानभिनिवेशः ।

(ख) जयतु जयतु भर्ता । एतान्याभरणानि देव्या प्रेषितानि विवाहयोग्यानि परिधाय विवाहभूमिस्त्वरितमलंक्रियताम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(आत्मीयानलंकारान्विदूषकाय दत्त्वा नाट्येनात्मानमलंकरोति। निःश्वस्य।)

तद्वैवाहिकहोमधूमकलनामीलत्कपोलं मुखं
किं लज्जारसमज्जनादवनमज्जायेत दृग्गोचरम्।
यत्पारिप्लवलोचनाञ्चलमिलद्दूर्वाङ्कमङ्के रतेः
सुप्तस्यापि मनोभुवस्त्रिजगतां साम्राज्यदानक्षमम्॥ ११॥

**विदूषकः**—किं तुहं विवाहविहीए अग्गिपज्जालणेण वा करेसि। जधा तं समप्पइ देवी तथा सव्वधा गिह्णसु। (क)

(नेपथ्ये।)

गीयन्तां मङ्गलानि स्फुरतु चतुरता ताण्डवे लासिकानां
सिच्यन्तां बाह्यकक्षाः क्षितिपतिभिरपि क्षिप्यतां पुष्पवृष्टिः।
संघैः स्वःकन्यकानां परिणयविधये मण्डपोद्देशमेति
प्रेयश्चित्तानुवृत्तिव्रतनिहितमतिः सस्मिता येन देवी॥ १२॥

**विदूषकः**—भो, णीसंदेहं जाणसु वञ्चिदा देवी। ता एहि। तुरिदं गच्छम्ह। इदो इदो। (ख)

(इति परिक्रामतः।)

(ततः प्रविशति देवी चेटी च, विभवतश्च परिवारः।)

**देवी**—सहि हारलदे, पज्जत्तं विप्पलम्भेण अज्जउत्तस्स। (इति पुरोऽवलोक्य।) एसो संपत्तो भट्टा समं बम्भणविडेण। (ग)

(इति सावरणं तिष्ठतः।)

**विदूषकः**—एसा देवी। उपसप्पदु भवं। (घ)

(इति तथा कुरुतः।)

---

(क) किं त्वं विवाहविधयेऽग्निप्रज्वालनेन वा करोषि। यथा तां समर्पयति देवी तथा सर्वथा गृहाण।

(ख) भोः, निःसंदेहं जानीहि वञ्चिता देवी। तदेहि। त्वरितं गच्छावः। इत इतः।

(ग) सखि हारलते, पर्याप्तं विप्रलम्भेनार्यपुत्रस्य। एष संप्राप्तो भर्ता समं ब्राह्मणविटेन।

(घ) एषा देवी। उपसर्पतु भवान्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—(उत्थाय।) जेदु जेदु अज्जउत्तो। (क)

(सर्वे यथोचितमुपविशन्ति।)

**देवी**—(अञ्जलिं बद्ध्वा।) जं मए किं पि विरुद्धं आअरिदं तस्स दण्डं कण्णसुन्दरीं समप्पेमि। (ख)

**राजा**—महानुभावप्रकृतिरसि। यदभिरुचितं तदाचर।

(प्रविश्य।)

**प्रतीहारी**—अमच्चो दुआरे चिट्ठदि। (ग)

**राजा**—तूर्णं प्रवेशय।

(इति प्रतीहारी निष्क्रान्ता।)

(ततः प्रविशत्यमात्यः प्रतीहारी च।)

**प्रतीहारी**—इदो इदो अमच्चो। (घ)

(इति परिक्रामतः।)

**प्रतीहारी**—एसो भट्टा। उपसप्पदु अमच्चो। (ङ)

(अमात्यो यथोचितमुपसर्पति।)

**राजा**—आसनमासनम्।

(प्रतीहारी आसनं दत्वा निष्क्रान्ता।)

**देवी**—सहि, आणेसु कण्णसुन्दरिं जेण अमच्चस्स पुरदो समप्पिअ णिरवराहा होमि। (च)

**चेटी**—णववहुत्ति जेव्व जवणिअन्तरे धरिदा सा। (इति निष्क्रम्य तां गृहीत्वा प्रविश्य च।) देवि, पडिच्छसु एणम्। (छ)

---

(क) जयतु जयत्वार्यपुत्रः।

(ख) यन्मया किमपि विरुद्धमाचरितं तस्य दण्डं कर्णसुन्दरीं समर्पयामि।

(ग) अमात्यो द्वारे तिष्ठति।

(घ) इत इतोऽमात्यः।

(ङ) एष भर्ता। उपसर्पत्वमात्यः।

(च) सखि, आनय कर्णसुन्दरीं येनामात्यस्य पुरतः समर्प्य निरपराधा भवामि।

(छ) नववधूरित्येव जवनिकान्तरे धृता सा। देवि, प्रतीच्छैनाम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—(सलज्जां[1] नायिकामन्तिके निवेश्य स्वगतम् ।) अच्चरिअम् । पच्चक्खं सेव्व एसा । अहो माहप्पं कवडनाडअस्स। (क)

**राजा**—

माञ्जिष्ठी लिपिरोष्ठयोः कवचितं चन्द्रस्य कान्त्या मुखं
भ्रूयुग्मं मकरध्वजस्य धनुषा सर्वाङ्गमालिङ्गितम् ।
लावण्यं कुचयोः सुवर्णकलशीमानेन नूनं कृतं
नो जाने कियतीं पपौ कुवलयच्छायां कटाक्षच्छविः ॥ १३ ॥

(विहस्य ।)

देवी निसर्गतरला तरलायताक्षी
संवादमिच्छति मदीक्षणवञ्चनाय ।
प्रत्यन्तरेक्षणमपि क्षणमेतदीय-
सादृश्यनिर्मितिविधौ विधिरप्यशक्तः ॥ १४ ॥

**देवी**—एसा मए तुज्झ समप्पिदा। भजसु णं चउसमुद्दपुहवीए रत्तम्। (इति हस्ते नायिकां समर्पयति ।) (ख)

**राजा**—(गृहीत्वा ।) प्रसन्नं देव्या ।

**देवी**—अमच्च, जुत्तं कदम् । (ग)

**अमात्यः**—किमुच्यते ।

वंशे तस्मिन्नजनि भवती मौक्तिकोत्सिक्तकान्तिः
कीर्तिर्यस्य च्छुरयति सुरक्ष्माधरेन्द्रस्य वक्षः ।
चालुक्यानां वसुमति गृहे किं च तेषां वधूस्त्वं
यैर्निश्चिन्तः कलयति हरिः सागरे नाम शय्याम् ॥ १५ ॥

---

(क) आश्चर्यम् । प्रत्यक्षं सैवैषा । अहो माहात्म्यं कपटनाटकस्य ।

(ख) एषा मया तुभ्यं समर्पिता । भजैतच्चतुःसमुद्रपृथिव्या रत्नम् ।

(ग) अमात्य, युक्तं कृतम् ।

---

1. 'नायिकां सलज्जामन्तिके निवेशयति । स्वगतम्' इत्यादर्शपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—संवुत्तो विवाहो । ता सोत्थिवाअणस्स अवसरो । (क)

**देवी**—(स्वगतम् ।) हदास, पिक्खिस्ससि विआहम् । (ख)

**राजा**—(स्वगतम् ।)

मदन कनकपुङ्खाः सन्त्वसंख्याः पृषत्काः
स्फुरतु विजयलक्ष्मीकर्मठं कार्मुकं ते ।
अपि च सहचराणां कापि संपञ्चकास्तु
प्रियजनविरहाधिरेप जातो यदन्तः ॥ १६ ॥

**अमात्यः**—(आत्मगतम् ।) अवसरः प्रकाशनस्य । (प्रकाशम् ।) कः कोऽत्र ।

(प्रविश्य ।)

**प्रतीहारी**—आणवेदु अमच्चो । (ग)

**अमात्यः**—देवीभागिनेयः कुमारः कौतुकेनानीत आसीन्मया स्वमन्दिरे । बन्धुसंगतो न वेति जानीहि ।

**प्रतीहारी**—संपदं जेव्व मए हिण्डन्तो दिट्ठो । (इति निष्क्रान्ता।) (घ)

**देवी**—(आत्मगतम् ।) हा, हदम्हि मन्दभाइणी । मए कधिदं जेव्व कैदवं त्ति पच्चक्खं सेव्व एसा त्ति । ता वञ्चिदम्हि । किं कीरदि । (इति धैर्यमवलम्बते ।) (ङ)

(प्रविश्य ।)

**प्रतीहारी**—गज्जणणअरं जेदुं गअस्स रुच्चिकस्स सआसादो पहाणो वीरसिङ्घो आअच्छदि । (च)

---

(क) संवृत्तो विवाहः । तत्स्वस्तिवायनस्यावसरः ।

(ख) हताश, प्रेक्षिष्यसे विवाहम् ।

(ग) आज्ञापयत्वमात्यः ।

(घ) सांप्रतमेव मया हिण्डन्दृष्टः ।

(ङ) हा, हतास्मि मन्दभागिनी । मया कथितमेव कैतवमिति प्रत्यक्षं सैव एषेति । तद्वञ्चितास्मि । किं क्रियते ।

(च) गर्जननगरं जेतुं गतस्य रुच्चिकस्य सकाशात्प्रधानो वीरसिंह आगच्छति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अमात्यः**—अविलम्बितं प्रवेशय ।

(प्रतीहारी निष्क्रम्य वीरसिंहेन सह प्रविशति ।)

**वीरसिंहः**—जयति देवः साम्राज्येन ।

**अमात्यः**—आसनम् ।

(प्रतीहारी आसनं दत्त्वा निष्क्रान्ता ।)

**राजा**—वीरसिंह, निवेदय वृत्तान्तम् ।

**वीरसिंहः**—यथा तावदितो निर्गत्य गर्जनाधिपतिबलस्यास्मद्बलं सिन्धो रोधसि मिलितम्, तथा देवाय निवेदितमेव । अनन्तरं महति समरसंमर्दे

पांसूनां सूचिभेद्यैः सकलमपि कुलक्ष्माभृतां छादनेच्छा-
बद्धोत्साहैः प्रवाहैरसुषिरमभवद्व्योमसीमान्तरालम् ।
द्वारश्रेणीनिवेशश्रियमथ धरणीमण्डलं वीर्ययाता
जातोर्वी तेऽनुवीर(?) विरचितविवरास्तत्र चाहो मुहूर्तम् ॥ १७ ॥

ततश्च ।

किं दोर्वीर्येण मौर्वी विरचय धनुषि त्वामहं न प्रहर्ता
निःशङ्कस्त्वं रथस्थः प्रहर ननु यतः प्राक्प्रहारप्रियोऽहम् ।
वीराणामित्युदाराः सुचिरमुदचरन्नाककान्तानिकायैः
स्निह्यत्कर्णा विमानप्रणिहितवदनैर्भाविताास्तत्र वाचः ॥ १८ ॥

**राजा**—ततः ।

**वीरसेनः**—क्रमेण.

नीरन्ध्रं रुन्धते स्म त्रुटितमिव तडिज्ज्योतिषा व्योमरन्ध्रं
शस्त्राणि त्रासताम्यद्दिनकरतुरगश्रेणिदूरेक्षितानि ।
तीक्ष्णासिच्छिन्नमुह्यद्भटवरवरणारम्भसंभारभाजां
येन स्वःस्वैरिणीनामवतरणविधावप्यभून्नावकाशः ॥ १९ ॥

(देवी स्मयते ।)

**विदूषकः**—उक्काम्पिदोम्हि । (क)

---

(क) उत्काम्पितोऽस्मि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—ततः ।

**वीरसेनः**—

कबन्धस्कन्धेषु स्रवदतिघनस्त्यानरुधिर-
स्थिरारम्भं गुह्यावनिधरशिरः[1] श्रेणिमभितः ।
पुरो दृष्ट्वा दृष्ट्वा सुरयुवतयः किंनरकुल-
क्षयाशङ्कातङ्कात्क्षुभितमनसः क्षिप्रमभवन् ॥ २० ॥

अपि च ।

गायन्तीषु सुराङ्गनासु मधुरं सौगन्ध्यवत्तन्मुख-
श्वासोल्लासिनि षट्पदावलिरवे वेणुध्वनिस्पर्धिनि ।
धीरं वैरिकबन्धताण्डवविधौ सङ्ग्रामरङ्गे लस-
त्सेनानां गजगर्जितेन मुरजध्वानानुकारो धृतः ॥ २१ ॥

**राजा**—ततश्च ।

**वीरसेनः**—तत्कृतं कर्म रुच्चिकेन येन विस्मिताः सुराः ।

**राजा**—ततश्च ।

**वीरसेनः**—

त्रातारं जगतां विलोलवलयश्रेणीकृतैकारवं
सोन्मादामरसुन्दरीभुजलतासंसक्तकण्ठग्रहम् ।
कृत्वा गर्जनकाधिराजमधुना त्वं भूरिरत्नाङ्कुर-
च्छायाविच्छुरिताम्बुराशिरशनादाम्नः पृथिव्या पतिः ॥ २२ ॥

(सर्वे मोदन्ते । विदूषको नृत्यति ।)

**अमात्यः**—किं ते भूयः प्रियमुपकरोमि ।

**राजा**—

दृष्टं देव्या किमपि भुवनाश्चर्यतत्त्वं महत्त्वं
लब्धा लक्ष्मीरिव मनसिजक्ष्माभुवः पक्ष्मलाक्षी ।
एकच्छत्रं समजनि महीमण्डलं तत्प्रियं मे
किं स्यादस्मात्परमपि वरं यत्तु याचे भवत्तः ॥ २३ ॥

1. 'वरश्रेणि' इत्यादर्शपाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापीदमस्तु—

हेलाभ्यस्तसमस्तशास्त्रगहनः साहित्यपाथोनिधि-
क्रीडालोडनपण्डितः प्रियतमः शृङ्गारिणीनां गिराम् ।
एकैकेन दिनेन निर्मितमहाकाव्यादिरव्याहत-
प्रागल्भ्यस्थितिविश्रुतः स्थिरमतिः पार्श्वे विदग्धः कविः ॥ २४ ॥

(इति निष्क्रान्ताः सर्वे ।)

चतुर्थोऽङ्कः ।

भट्टश्रीबिह्लणोऽस्याः कविरकलुषधीः सिद्धयः साहसानां
स्रष्टुः शिष्टोपकारव्रतपरमगुरोः संमुखा यस्य तास्ताः ।
अर्धे चन्द्रार्धमौलेर्विरचितवसतिर्देवता सापि यस्मै
शब्दब्रह्माभ्यनुज्ञां सममुपनिषदा बाल्य एवादिदेश ॥ १ ॥
यन्मूलं करुणानिधिः स भगवान्वल्मीकजन्मा मुनि-
र्यस्यैके कवयः पराशरसुतप्रायाः प्रतिष्ठां दधुः ।
सद्यो यः पथि कालिदासवचसां श्रीबिह्लणः सोऽधुना
निर्व्याजं फलितः सहैव कुसुमोत्तंसेन कल्पद्रुमः ॥ २ ॥
बिन्दुद्वन्द्वतरङ्गिताग्रसरणिः कर्ता शिरोबिन्दुकं
कर्मेति क्रमशिक्षितान्वयकथा ये केऽपि तेभ्यो नमः ।
ये तु ग्रन्थसहस्रशाणकषणत्रुय्यत्कलङ्कैर्गिरा-
मुल्लेखैः कवयन्ति बिह्लणकविस्तेष्वेव संनह्यति ॥ ३ ॥
सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः ।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः ॥ ४ ॥

**समाप्तेयं कर्णसुन्दरी नाम नाटिका ।**

१. 'सान्द्रैर्वेदध्वनिभिरनभिव्यक्तमञ्जीरनादा मौञ्जीबन्धात्प्रभृति वदने यस्य वाग्देवतासीत्' इति विक्रमाङ्कदेवचरितेऽपि (१८।८१) बिह्लणकविरात्मानं वर्णयति स्म. २. विक्रमाङ्कदेवचरितस्य प्रथमसर्गेऽप्ययं श्लोकः समुपलभ्यते. ३. आदर्शपुस्तके 'समाप्ता चेयं कर्णसुंद' इत्येतावदेवास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

KÂVYAMÂLÂ. 4.

# THE KARPÛRAMANJARÎ

## ( With the Commentary of Vâsudeva )

AND

# THE BÂLABHÂRATA

OF

## RÂJAS'EKHARA.

EDITED BY

PANḌITA DURGÂPRASÂDA

AND

KÂS'ÎNÂTHA PÂṆḌURANGA PARABA

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRṆAYA-SÂGARA" PRESS.

BOMBAY.

1887.

*Price 1 Rupee.*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

*( Registered according to act XXV of 1867. )*

(All rights reserved by the publisher.)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काव्यमाला. ४.

श्रीराजशेखरविरचिता

# कर्पूरमञ्जरी

वासुदेवकृतया टीकया समेता ।

बालभारतं च ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

तच्च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८८७

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यमेको रूप्यकः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# काव्यमाला।

## महाकविश्रीराजशेखरकृता
## कर्पूरमञ्जरी।

वासुदेवकृतया टीकया समेता।

प्रथमं जवनिकान्तरम्।

भद्दं भोदु सरस्सईअ कइणो णन्दन्तु वासाइणो
अण्णाणं वि परं पअट्टदु वरा वाणी छइल्लप्पिआ।
वच्छोमी तह माअही फुरदु णो सा किं च पंचालिआ
रीदीयो विलिहन्तु कव्वकुसला जोह्णं चओरा विअ॥ १॥

दशास्योद्यदास्यच्छिदं जानकीशं कुलोपास्यमानस्य साष्टाङ्गपातम्।
गणेशं च गण्डोल्लसद्भृङ्गसङ्गं हरोत्थाङ्गसङ्गांश्च गङ्गातरङ्गान्॥
तातं प्रभाकरं नत्वा मातरं गोमतीमपि।
कर्पूरमञ्जरीटीका वासुदेवेन तन्यते॥

कर्पूरमञ्जर्याख्यसाटकारम्भे[1] सूत्रधार आशीरूपां नान्दीं पठति—

**भद्दमिति।**

भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्ततां वरा वाणी विदग्धप्रिया।
वैदर्भी तथा मागधी स्फुरतु नः सा किं च पाञ्चालिका
रीतिका विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव॥

अत्र च व्यासादय इत्यादौ सरस्वत्या इत्येतत्प्रभृति षष्ठ्यन्तत्वोपक्रमभङ्गाभासेऽपि भवत्वित्यादिप्रधानक्रियापदानां लोडन्तत्वप्रक्रमः सर्वत्राविहत इति न प्रक्रमभङ्गः शङ्क्यः। तेन रीतिर्नाम शब्दगुणः। यथोक्तं सरस्वतीकण्ठाभरणे—'उपक्रमस्य निर्वाहो रीतिरित्यभिधीयते' इति। सरस्वत्याः सततं भद्रभाजनत्वादप्राप्तप्रार्थनारूपाशीरसंभवो यद्यपि, तथापि स्वसंबन्धिन्या वा तस्या मङ्गलाशंसनं संभवत्येव। अत एवान्येषामपीत्यत्र आशंसनम्। 'भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम्' इत्युक्तत्वाज्ज्योत्स्नामित्युपमाने भिन्नवचनतादोषो न शङ्क्यः। 'यद्भिन्नलिङ्गमित्युक्तं तद्भिन्नवचनं भवेत्। उपमादूषणं तन्न यत्रोद्वेगो न धीमताम्॥' इति वृद्धैः, 'न लिङ्गवचने भिन्ने न हीनाधिक-

1. साहित्यदर्पणादिषु सट्टकमिति नाम दृश्यते.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तापि वा । उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥' इति दण्डिना चोक्तत्वात्, अत्र चाल्पीयस्या अपि ज्योत्स्नाया अतितृप्तिजनकत्वेन लोकोत्तरत्वस्य. 'पदैकदेशरचनावर्णेष्वपि रसादयः' इति काव्यप्रकाशकृदुक्तेरेकवचनेन व्यञ्जनादुद्वेगाभावो वेदितव्यः । विदग्धप्रियेति विविधगुणालंकारगुम्फितत्वं व्यङ्ग्यम्'। रीतीनां प्रतिनामग्रहणेन तिस्रोऽप्यत्र ताः सन्तीति ध्वनितम् । तदिदं वस्तुना वस्तु व्यज्यते । काव्यकुशला इति तादृशानामेव सभ्यत्वमत्र सूचितम् । तल्लक्षणं भरते—'सभ्यास्तु विबुधैर्ज्ञेया ये दिदृक्षान्विता जनाः । मध्यस्थाः सावधानाश्च वाग्मिनो न्यायवेदिनः ॥ त्रुटितात्रुटिताभिज्ञा विनयानम्रकंधराः । अगर्वा रससारज्ञास्तौर्यत्रितयकोविदाः ॥ असद्वादनिषेद्धारश्चतुरा मत्सरच्छिदः । अमन्दरसनिष्यन्दिहृदया भूषणोज्ज्वलाः ॥ सुवेषा भोगिनो नानाभाषाचारविशारदाः । स्वस्वोचितस्थाननिष्ठास्तत्प्रशंसापरायणाः ॥' इति । चकोरोपमानेन विवेचनकर्तृत्वप्रार्थना व्यङ्ग्या । सोऽयमलंकारेण वस्तुध्वनिः । विदग्धप्रियेति षष्ठीतत्पुरुषं कृत्वा वाण्या विशेषणम् । यद्वा वैदर्भ्यादीनाम् । अस्मिन्पक्षे कर्मधारयमाश्रित्य वैदर्भ्यादीनां कामिनीरूपत्वं व्यङ्ग्यम् । सोऽयं वस्तुनालंकारध्वनिः । वैदर्भ्याद्या रीतयः शब्दालंकाराः । तल्लक्षणं कण्ठाभरणे—'तत्रासमासा निःशेषसमग्रगुणगुम्फिता । विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥ पूर्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी । समस्तपञ्चषपदामोजःकान्तिविवर्जिताम् । मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥' इति । रीतिसामान्यलक्षणं च तत्रैव—'वैदर्भ्यादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः । रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरिष्यते ॥' इति । गौडी लाटीनामेतत्संकरजत्वात्तिसृणामेवोपादानम् । चकोरा इवेत्युपमालंकारः । सा यथा—'साधर्म्यमुपमा भेदे' इति काव्यप्रकाशे । वामनेनाप्युक्तम्—'उपमानोपमेययोर्गुणलेशतः साम्यमुपमा' इति । दण्डिनाप्युक्तम्—'यथाकथंचित्सादृश्यं यत्रोद्भूतं प्रतीयते । उपमा नाम सा तस्याः प्रपञ्चोऽयं निदर्श्यते ॥' इति । भद्दं भोदु इत्यादौ छेकानुप्रासः । कइणो इत्यादौ वृत्त्यनुप्रासः । स यथा तत्रैव—'वर्णवृत्तिरनुप्रासश्छेकवृत्तिगतो द्विधा । सोऽनेकस्य सकृत्पूर्व एकस्याप्यसकृत्परः ॥' इति । इयं च वैदर्भी रीतिः । ओजःप्रसादश्लेषसमाधिमाधुर्यसौकुमार्यौदार्यार्थव्यक्तिप्रभृतिबन्धगुणानामर्थगुणानां च विद्यमानत्वात् । एतेषां विवरणं न कृतम्, ग्रन्थगौरवभयात् । एवमन्येऽपि कैशिक्यादयः शब्दालंकारा ज्ञेयाः । 'ध्वनिमत्ता तु गाम्भीर्यम्' इत्युक्तत्वाद्गाम्भीर्यादयो गुणाश्च । केचित्तु रीत्यादीनामपि गुणत्वं मन्यन्ते । अत्र च 'रतिर्देवादिविषया' इत्युक्तत्वात्सरस्वत्यादिविषया रतिरुक्ता । विदग्धप्रियेत्येतेन विदर्भदेशोत्पन्ननायिकाबोधकेन वैदर्भ्यादिशब्देन च समासोक्त्या रीतेर्नायिकात्वारोपात्, काव्यकुशलपदेन च तेषां नायकत्वारोपात्, शृङ्गारो ध्वन्यते । स्थाय्यादि स्वयमूह्यम् । इदं च शार्दूलविक्रीडितम्—'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति । 'वर्णविन्यासयोगः। पद्यादौ वाद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम्' इत्युक्तेर्गणादिविचारः क्रियते—तत्र 'मो भूमिस्त्रिगुरुः श्रियं दिशति' इत्युक्तत्वाद्गणशुद्धिरत्रास्ति । 'सुखभयमरणक्लेशदुःखान्यवर्गः' इत्युक्तेर्वर्णशुद्धिः । 'देवतावाचकाः शब्दा ये च भद्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ।

अकलिअपरिरंभविब्भमाइँ अजणिअचुंबणडंबराइँ दूरम्।
अघडिअघणताडणाइँ णिच्चं णमह अणंगरईणमोहणाइँ॥ २॥

दिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि च॥' इत्यभिधानात्। 'भगणनगणदुइमित्त होइ भगणयगणहोइ भिच्च। उदासीण जत दुअगणअ अवसिद्वदुइ अरिणिच्च॥' 'मित्रान्मित्रादयः स्युर्यदि धनमुदयं शून्यकं बन्धुपीडाम्' इत्यरिसंज्ञकस्य सगणस्य मित्रसंज्ञान्मगणादुत्तरपठितस्य बन्धुपीडाप्रदत्वं न मन्तव्यम्। नान्दीलक्षणे 'शब्दतो वार्थतो वापि मनाक्काव्यार्थसूचनम्' इत्युक्तेस्तदप्युच्यते—सरस्वत्याः स्त्रीरत्नस्य कर्पूरमञ्जर्याः। 'सरस्वती स्यात्स्त्रीरत्ने नद्यां नद्यन्तरे गवि' इत्यजयः। विविधं वस्त्वभिनवमा समन्तादस्यति क्षिपति दर्शयितुमिति व्यासो भैरवानन्दः। तदीयोयोगिनः कवयो विद्वांसः कलाकुशलाः। वरा उत्कृष्टा वाणी यस्यां सा कर्पूरमञ्जरीसदृशी कान्ता। विदर्भमगधपञ्चालदेशीयरीतिषु कं सुखं यासां ता नानाविलासिन्यः काव्याभिज्ञा रसिका इति। 'हरोत्तमाङ्गस्थितवस्तुवर्णनैः' इत्युक्तेर्ज्योत्स्नापदेन शिवशिरःस्थितचन्द्रकलास्मारणम्। भद्दमिति भद्रशब्दे 'सर्वत्र लवराम्' इति सूत्रेण रलोपे 'शेषादेशयोर्द्वित्वमनादौ' इति दस्य द्वित्वे 'अत ओ सोः' इति सोरोकारादेशे प्राप्ते 'नपुंसके सोर्बिन्दुः' इत्यनुस्वारः। एवमग्रेऽपि प्राकृतप्रक्रिया ज्ञेया। क्वचिद्विशेषं वक्ष्यामः। छइल्लवच्छोमीशब्दौ 'दाढादयो बहुलम्' इति विदग्धवैदर्भीशब्दयोः साधू। जोह्णामिति ज्योत्स्नाशब्दे 'अधो मनयाम्' इति नलोपे प्राप्ते 'ह्नस्नष्टग्क्ष्णश्नह्नः' इति स्नस्य ह्णादेशेः 'उपरि लोपः' इति तलोपे 'अधामनयाम्' इति यलोपः॥

अवि एति।

अपि च।

अकलितपरिरम्भविभ्रमाण्यजनितचुम्बनडम्बराणि दूरम्।
अगणितघनताडनानि नित्यं नमतानङ्गरत्योर्मोहनानि॥

दूरमत्यर्थं ताडनानि चन्द्रकलोद्बोधनार्थानि 'अङ्गुष्ठे चरणे च गुल्फनिलये' इत्यादिना पञ्चसायकाद्युक्तानि। ताडनपदेन नखक्षतादीन्यप्युक्तानि। मोहनानि सुरतानि। अत्र संभोगश्रृङ्गार उक्तः। चुम्बनताडनपदाभ्यां तज्ज्ञानं लक्ष्यते। तेषां क्रियमाणत्वादेव। परिरम्भादिभेदास्त्वनतिप्रयोजनत्वान्न लिखिताः। अनङ्गरत्योरिति काव्यलिङ्गेन नमतेति पदयोरयं सभ्यानामतिरसिकत्वं व्यङ्ग्यम्। सुरतानामतिशयितत्वं च मोहनानीति बहुवचनेनोत्तानकरणादयः सर्वे सुरतबन्धाः सूचिताः। सत्स्वपि परिरम्भादिषु तज्ज्ञानानुत्पत्तेर्विशेषोक्तिः। सा यथा काव्यप्रकाशे—'विशेषोक्तिरखण्डेषु कारणेषु फलावचः' इति। काव्यार्थसूचनेऽनङ्गरतिरूपयोश्चन्द्रपालकर्पूरमञ्जर्योर्नायकयोर्मोहनानीति ज्ञेयम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ ।

ससिहण्डमंडणाणं समोहणासाणँ सुरअणपिआणम् ।
गिरिसगिरिंदसुआणं संघाडी वो सुहं देउ ॥ ३ ॥

अवि अ ।

ईसारोसप्पसादप्पणादिसु बहुसो सग्गगंगाजलेहिं
आ मूलं पूरिदाए तुहिणअरअलारुप्पसिप्पीअ रुद्दो ।
जोह्णामुत्ताहलिद्धं णदमउलिणिहित्तग्गहत्थेहिँ दोहिँ
अग्घं सिग्घं व देंतो जअइ गिरिसुआपाअपंकेरुहाणं ॥ ४ ॥

---

**अवि अ । सर्मीति ।**

शशिखण्डमण्डनयोः समोहनाशयोः सुरगणप्रिययोः ।
गिरिशगिरीन्द्रसुतयोः संघटना वः सुखं ददातु ॥

मोहने सुरते आशया सहितयोः । मोहस्य नाशेन सहितयोर्वा । जगन्मोहयतीति मोहनोऽनङ्गस्तस्याशेन व्याप्त्या सहितयोर्वा । 'अशूङ् व्याप्तौ' एतस्माद्धत्र् । मोहनस्यासेन क्षेपेण सहितयोर्वा । शिवेन तस्य जितत्वात् । 'शषोः सः' इति सादेशे सर्वत्र सकार एव। अनेन सदा स्त्रीसंगमेऽपि कामजयित्वादन्येभ्योऽतिशयित्वाद्व्यतिरेकालंकारो व्यङ्ग्यः। 'महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा' इत्यादौ देव्याश्चन्द्रचूडत्वं प्रसिद्धम् । मण्डनपदेन विरुद्धवेषस्याप्यलंकारकारित्वसूचनाद्व्यतिरेकालंकार एव व्यङ्ग्यः ॥

**अवि एति ।**

ईर्ष्यारोषप्रसादप्रणतिषु बहुशः स्वर्गगङ्गाजलै-
रा मूलं पूरितया तुहिनकरकलारूप्यशुक्त्या रुद्रः ।
ज्योत्स्नामुक्ताफलाढ्यं नतमौलिनिहिताभ्यामग्रहस्ताभ्यां द्वाभ्या-
मर्घ्यं शीघ्रमिव ददज्जयति गिरिसुतापादपङ्केरुहयोः ॥

बहुश ईर्ष्यारोषयोः सतोः प्रसादार्थे क्रियमाणासु प्रणतिषु नतमौलिर्निःक्षिप्ताग्रहस्ताभ्यां द्वाभ्यां गिरिसुतापादकमलयोश्चन्द्रकलारूप्यशुक्त्या शीघ्रमर्घमिव ददद्रुद्रो जयतीत्यन्वयः । चन्द्रकलायाः शुक्तित्वम् । अन्योऽपि भक्तो जलपूरितया रूप्यशुक्त्या मुक्तायुक्तं प्रणामपूर्वं हस्ताभ्यामर्घं ददातीत्यर्थश्लेषः । बहुश इति तस्या मानिनीत्वं व्यङ्ग्यम् । स्वर्गगङ्गेति भावित्वमभिप्रत्युक्तम् । शीघ्रमिति मानवृद्धिभयं व्यङ्ग्यम् । देवीपादयोश्चन्द्रकलासंबन्धकरणं कदाचिदस्याश्चन्द्रस्योद्दीपकत्वान्मदनावेशेन मानभङ्ग इति शङ्कया । अत्र रूपकम् । 'उपमैव तिरोभूतभेदा रूपकमिष्यते' इति तल्लक्षणात् । अर्घ्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नान्द्यन्ते)

**सूत्रधारः**—(परिक्रम्य नेपथ्याभिमुखमवलोक्य।) किं उण णट्टपअट्टो विअ दीसदि अह्माणं कुसीलवाणं परिजणो। जदो एक्का पत्तोच्चिआइं सिअ-

---

मिवेत्युत्प्रेक्षा। 'अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते यत्तु तामुत्प्रेक्षां विदुर्बुधाः ॥' इत्युक्तत्वात्। परोत्कर्षाक्षमेर्ष्या स्याद्दौर्जन्यान्मन्युतोऽपि वा' इति रसकलिकायामुक्तत्वान्मन्दाकिनीरूपसपत्न्यामीर्ष्या ज्ञेया गौर्याः। इयं च स्वाधीनभर्तृका। सा यथा तत्रैव—'स्वाधीनपतिका सा तु यां न मुञ्चति वल्लभः' इति। अन्योऽप्यवान्तरनायिकाभेदोऽस्या योजनीयः। 'दाढादयो बहुलम्' इति शुक्तिशब्दस्य सिप्पीत्यादेशः। तदुक्तम्—'अधोवैदूर्यशुक्तीनां वधूभ्रमितशब्दयोः। हेट्ठवेरिल्लअंसिप्पी' इति। हलिल्लेति 'आल्विल्लोल्लालवन्तेन्ता मतुपः' इति मतुप इल्लः। 'सेवादिषु वा' इति निहितेत्यत्र वा द्वित्वम् ॥

नान्द्यन्ते सूत्रधार इति कविवचनम्। एवमग्रेऽपि मध्ये मध्ये कविवचनं संस्कृतं ज्ञेयम्। नान्दीलक्षणं तु 'आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः। नान्दीति कथ्यते' इत्यादि भरते। नाट्यप्रदीपेऽपि 'नन्दन्ति काव्यानि कवीन्द्रवर्याः कुशीलवाः पारिषदाश्च सन्तः। यस्मादलं सज्जनसिन्धुहंसी तस्मादलं सा कथितेह नान्दी ॥' इयं च मङ्गलार्था। 'यन्नाट्यवस्तुनः पूर्वरङ्गं विघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ उत्थापकाः प्रकुर्वन्ति सन्ति भूयांसि यद्यपि। तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥' इत्युक्तत्वात्। सा चेहाष्टपदी कृता। 'नाट्यपूर्वकृता नान्दी त्वाशीर्वचनसंयुता। अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसंमिता। नान्दी पदैर्द्वादशभिरष्टभिर्वाप्यलंकृता ॥' इति भरतोक्तेः। पदानि चात्र श्लोकचरणरूपाणि। 'श्लोकपादं पदं केचित्सुप्तिङन्तमथापरे। परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे ॥' इति नाट्यप्रदीपेऽभिहितत्वात्। अवान्तरवाक्यपक्षे षट्पदेयं द्रष्टव्या। सा चेयं सूत्रधारप्रयोज्या। 'सूत्रधारः पठेन्नान्दीं मध्यमं तालमाश्रितः।' इति भरतोक्तेः। ईदृशीं नान्दीं पठित्वा सूत्रधारे गते पश्चात्सूत्रधारः स्थापकाख्योऽपरः प्रविशतीति शेषः। उक्तं च दशरूपके—'पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते। प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥' इति। भावप्रकाशेऽपि—'इत्थं रङ्गं विधायादौ सूत्रधारे विनिर्गते। तद्वन्नटः प्रविश्यान्यः सूत्रधारगुणाकृतिः ॥' इति। पूर्वरङ्गशब्दार्थस्तूक्तो वृद्धैः—'पूर्वं रज्यत इति पूर्वरङ्गो नाट्यशाला। तात्स्थ्यात्प्रथमप्रयोग इति।' अन्यत्राप्युक्तः—'सभापतिः सभा सभ्या गायका वाचका अपि। अतो रङ्ग इति ज्ञेयः पूर्वंतत्परिकल्प्यते। तस्मादयं पूर्वरङ्ग इति विद्वद्भिरुच्यते ॥' इति। सूत्रधारव्युत्पत्तिः संगीतसर्वस्वे—'नर्तनीयकथासूत्रं प्रथमं येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥' इति। लक्षणं चास्य मातृगुप्ताचार्यैरुक्तम्—चतुरातोद्यनिष्णातोऽनेकभूषासमावृतः। नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् ॥ वेश्योपचारचतुरः पौरुषेयविचक्षणः। तत्तद्गीतानुगानेककलातालावधारणः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आइं उच्चिणेदि । इअरा कुसुमावलीओ गुंफेदि । अण्णा पडिसीसआइं पडिसारेदि । कावि क्खु वण्णिआओ पट्टए वट्टेदि । एस वंसे ठाविदो द्धाणो । इअं वीणा पडिसारीअदि । इमे तिण्णि मिअंगा सज्जीअंति । एस कांसतालाणं पक्खालणुज्जलाणं हल्लवोलो । एदं धुआगीदमालवीअदि । ता किंवि कुडुंबं हक्कारिअ पुच्छिस्सं । (नेपथ्याभिमुखमवलोक्य संज्ञापयति ।)

अवधार्य प्रयोक्ता च योक्तृणामुपदेशकः । एवं गुणगणोपेतः सूत्रधारः स उच्यते ॥' इति । द्वितीयस्य स्थापकसंज्ञा दर्शिता भरते—'स्थापकः प्रविशेत्तत्र सूत्रधारगुणाकृतिः ।' इति । सूत्रधार इत्यस्याग्रे क्वचिद्द्व्यङ्कोऽस्ति । सूत्रधारपदं पुनरप्युच्चारणीयमिति तस्यार्थः । तेन सूत्रधारो वदतीति द्वितीयपदस्यार्थः । एवमग्रेऽपि ज्ञेयम् । **नेपथ्याभिमुखमिति** । 'नेपथ्यं स्याज्जवनिका रङ्गभूमिप्रसाधनम् ।' इत्यजयः ।

**किं उणेति** ।

किं पुनर्नृत्यप्रवृत्त इव दृश्यतेऽस्माकं कुशीलवानां परिजनः ।

**जदो इति** ।

यत एका पात्रोचितानि सिचयान्युच्चिनोति । इतरा कुसुमावलीर्गुम्फति । अन्या प्रतिशीर्षकाणि प्रसारयति ।

प्रतिशीर्षकाणि नाट्यलोचने 'अमात्यकञ्चुकिश्रेष्ठिविदूषकपुरोधसाम् । वेष्टनाबद्धपट्टानि प्रतिशीर्षाणि कारयेत् ॥' इति ।

कापि खलु वर्णिकाः पट्टे वर्तयति ।

चित्रफलकानि चित्रयतीत्यर्थः ।

एष वंशे स्थापितो ध्वानः ।

वंशो वेणुवाद्यम् ।

इयं वीणा प्रतिसार्यते । इमे त्रयो मृदङ्गाः सृज्यन्ते ।

त्रैविध्यं च भरते—'मायूरी अर्धमायूरी कूर्मरथी चेति त्रिधा' इति ।

एष कांस्यतालानां प्रक्षालनोज्ज्वलानां हलहलः ।

'हल्लवोल' इति देशी ।

एतद्ध्रुवागीतमालप्यते ।

उक्तं च भरते—'प्रावेशिकी आक्षेपिणी क्रामिकी उत्थापिनी प्रासादिकी इति पञ्च ध्रुवाः ।' इति ।

तत्किमपि कुटुम्बमाकार्य पृच्छामि ।

**नेपथ्येति** । संज्ञापनमाह्वानसंकेतकरणम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति पारिपार्श्वकः ।)

**पारिपार्श्वकः**—आणवेदु भावो ।

**सूत्रधारः**—(विचिन्त्य ।) किं उण णट्टपअट्टा विअ दीसध ।

**पारिपार्श्वकः**—भाव, सट्टअं णच्चिदव्वं ।

**सूत्रधारः**—को उण तस्स कई ।

**पारिपार्श्वकः**—

भाव कहिज्जदु एदं को भणई रअणिवल्लहसिहंडो ।
रहुउलचूडामणिणो महेंदपालस्स को अ गुरु ॥ ९ ॥

**सूत्रधारः**—(विचिन्त्य ।) पह्लोत्तरं क्खु एदं । (प्रकाशम् ।) राअसेहरो ।

---

**तत इति** । पारिपार्श्वकलक्षणं च 'तस्यानुचरः पारिपार्श्वकः' इति साहित्यदर्पणे ।

**आणवेदु इति** ।

आज्ञापयतु भावः ।

'भाव इत्युच्यते विद्वान्' इति भावलक्षणम् ।

**सूत्रधारः**—

किं पुनर्नृत्यप्रवृत्ता इव दृश्यध्वे ।

**पारिपार्श्वकः**—

भाव, साटकं नर्तितव्यम् ।

**सट्टकमिति** । तल्लक्षणं च भावप्रकाशे—'सैव प्रवेशकेनापि विष्कम्भेण विना कृता । अङ्कस्थानीयविन्यस्तचतुर्जवनिकान्तरा ॥ प्रकृष्टप्राकृतमयी सट्टकं नामतो भवेत् ।'

**सूत्रधारः**—

कः पुनस्तस्य कविः ।

**पारिपार्श्वकः**—

भाव कथ्यतामेतत्को भण्यते रजनीवल्लभशिखण्डः ।
रघुकुलचूडामणेर्महेन्द्रपालस्य कश्च गुरुः ॥

राजशेखरकविनाम्नः पर्यायो रजनीत्यादिः ।

**सूत्रधारः**—विचिन्तनं स्वगतपर्यायः । 'अश्राव्यं स्वगतं मतम्' इति तल्लक्षणम् ।

**पह्लेति** ।

प्रश्नोत्तरं खल्वेतत् ।

मया पृष्टेऽनेनेदृशमुक्तं चेदत्रोत्तरमस्तीत्यर्थः ।

३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पारिपार्श्वकः**—सो एदस्स कई ।

**सूत्रधारः**—किं सट्टअं ।

**पारिपार्श्वकः**—(स्मृत्वा ।) कधिदं जेव्व छइल्लेहिं ।

सो सट्टओ त्ति भणई दूरं जो णाडिआइँ अणुहरइ ।
किं उण एत्थ पवेअसविक्कंभाई ण केवलं होंति ॥ ६ ॥

**सूत्रधारः**—(विचिन्त्य ।) ता किं त्ति सक्कअं परिहरिअ पाउअबंधे पअट्टो कई ।

**पारिपार्श्वकः**—सव्वभासाचउरेण तेण भणिदं जेव्व । जधा

अत्थणिएसा ते च्चिअ सद्दा ते च्चेअ परिणमंताइं ।
उत्तिविसेसो कव्वो भासा जा होइ सा होदु ॥ ७ ॥

---

**प्रकाशमिति** । 'सर्वश्राव्यं प्रकाशं स्यात्' इति तल्लक्षणम् ।

**राएति** ।

राजशेखरः ।

काक्का वदति—

स एतस्य कविः ।

'गोत्रं नाम च बध्नीयात्' इत्युक्तेः कविनामोक्तिः ।

किं साटकम् ।

**कधिदमिति** ।

कथितमेव विदग्धैः ।

तत्साटकमिति भण्यते दूरं यो नाटिका अनुहरति ।
किं पुनरत्र प्रवेशकविष्कम्भकौ न केवलं भवतः ॥

दूरमत्यर्थम् । तल्लक्षणं सुधाकरे—'यन्नीचैः केवलं पात्रैर्भाविभूतार्थसूचनम् । अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशकः ॥' इति । 'तत्र विष्कम्भको भूतभाविवस्त्वंशसूचकः । अमुख्यपात्ररचितः संक्षेपैकप्रयोजनः ॥' तद्भेदा अपि तत्रैव—'द्विधा स शुद्धो मिश्रश्च मिश्रः स्यान्नीचमध्यमैः । शुद्धः केवलमध्योऽयमेकानेककृतो द्विधा ॥'

**ता किमिति** ।

तत्किमिति संस्कृतं परिहृत्य प्राकृतबन्धे प्रवृत्तः कविः ।

**पारिपार्श्वकः**—

सर्वभाषाचतुरेण तेन भणितमेव । यथा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ ।

परुसा सक्कअबंधा पाउअबंधो वि होइ सुउमारो ।
पुरुसमहिलाणँ जेत्तिअमिहंतरं तेत्तिअमिमाणं ॥ ८ ॥

**सूत्रधारः**—ता अप्पा किं ण वण्णिदो तेण ।

**पारिपार्श्वकः**—सुणु । वण्णिदो ज्जेव्व तक्कालकइणं मज्झम्मि मिअंकलेहाकहाआरेण अवराइएण । जधा

बालकई कइराओ णिब्भअराअस्स तह उवज्झाओ ।
इअ जस्स परंपरए अप्पा माहप्पमारूढो ॥ ९ ॥

---

अर्थनिवेशास्त एव शब्दास्त एव परिणमन्तोऽपि ।
उक्तिविशेषः काव्यं भाषा या भवति सा भवतु ॥

परिणमन्तोऽपीत्यनेन प्राकृतस्य संस्कृतयोनित्वमुक्तम्। तदुक्तं प्राकृतसंजीविन्याम्—'प्राकृतस्य तु सर्वमेव संस्कृतं योनिः' इति । दण्डिना चोक्तम्—'तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ।' इति । उक्तिविशेष इति 'तददोषौ शब्दार्थौ' इत्यादिना काव्यप्रकाशे नानाभेदभिन्नं काव्यमुपक्षिप्तम् । भाषाविशेषानादरश्चोक्तः । कण्ठाभरणे—'संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः ।' इत्यादिना 'सर्वाभिरपि कश्चन' इत्यन्तेन ।

**अविएत्ति ।**

अपि च ।

परुषाः संस्कृतगुम्फाः प्राकृतगुम्फोऽपि भवति सुकुमारः ।
पुरुषमहिलानां यावदिहान्तरं तेषु तावत् ॥

महिलाः कामिन्यः ।

**सूत्रधारः**—

तदात्मा किं न वर्णितस्तेन ।

**पारिपार्श्वकः**—

शृणु । वर्णित एव तत्कालकवीनां मध्ये मृगाङ्कलेखाकथाकारेणापराजितेन । यथा

बालकविः कविराजो निर्भयराजस्य तथोपाध्यायः ।
इत्येतस्य परम्परया आत्मा माहात्म्यमारूढः ॥

यदा तु 'इति यस्य जयैः परम्परामाहात्म्यमारूढम्' इति पाठस्तदा जयैरुत्कर्षैः । आरूढमिति भावे क्तः । इयं च कारणमाला । सा यथा—'यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सो अस्स कई सिरिराअसेहरो तिहुअणं पि धवलेंति ।
हरिणंकपालिसिद्धिए णिक्कलंका गुणा जस्स ॥ १० ॥

**सूत्रधारः**—ता केण समादिट्ठा पउंजध ।

**पारिपार्श्वकः**—

चाउहाणकुलमौलिमालिआ राअसेहरकइंदगेहिणी ।
भत्तुणो किदिमवंतिसुंदरी सा पउंजइदुमेदमिच्छदि ॥ ११ ॥

किं च ।

चंदपालधरणीहरिणंको चक्कवट्टिपअलाहणिमित्तं ।
एत्थ सट्टअवरे रससोत्ते कुंतलाहिवसुदं परिणेदि ॥ १२ ॥

---

हेतुता । तदा कारणमाला स्यात्' इति । परिकरोऽप्यत्र । स यथा—'विशेषणैर्यत्साकूतैरुक्तः परिकरस्तु सः' इति । द्वितीयपाठे आरोहणस्य चेतनधर्मस्य जयेष्वारोपणादुत्तरोत्तरप्रसारित्वलक्षणया परमकाष्ठापन्नत्वं व्यङ्ग्यम् ।

**सो इति** ।

स एतस्य कविः श्रीराजशेखरस्त्रिभुवनमपि धवलयन्ति ।
हरिणाङ्कप्रति(पङ्क्ति)सिद्ध्या निष्कलङ्का गुणा यस्य ॥

प्रतिकूलतया सिद्धिस्तत्कार्यकारित्वम् । त्रिभुवनमिति निष्कलङ्का इति च व्यतिरेकः । 'उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।' इति काव्यप्रकाशे । अन्यस्य व्यतिरेको विशेषेणातिरेक आधिक्यं व्यतिरेक इत्यर्थः । 'विस्तरादुत संक्षेपाद्विदधीत प्ररोचनाम्' इत्युक्तत्वात् 'प्रशंसा तु द्विधा ज्ञेया चेतनाचेतनाश्रया । चेतनास्तु कथानायकविसभ्यनटाः स्मृताः ॥ अचेतनौ देशकालौ कालो मधुशरन्मुखः ।' इत्युक्तेश्च कविप्रशंसा कृता । नटप्रशंसा किं पुनरित्यादिना सूचिता ।

**सूत्रधारः**—

तत्केन समादिष्टाः प्रयुङ्ग्ध्वम् ।

**पारिपार्श्वकः**—

चाहुवानकुलमौलिमालिका राजशेखरकवीन्द्रगेहिनी ।
भर्तुः कृतिमवन्तिसुन्दरी सा प्रयोजयितुमेतदिच्छति ॥

कवेर्भार्या प्रयोजिका ।

**किं चेति** ।

चण्डपालधरिणीहरिणाङ्कश्चक्रवर्तिपदलाभनिमित्तम् ।
अत्र साटकवरे रसस्रोतसि कुन्तलाधिपसुतां परिणयति ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ता भाव, एहि। अणंतरकरणिज्जं संपादेह्म। जदो महाराअदेईणं भूमिअं घेत्तूण अज्जो अज्जघडिणिआ अ जवणिअंतरे वट्टदि।

(इति परिक्रम्य निष्क्रान्तौ।)

प्रस्तावना।

(ततः प्रविशति राजा देवी विदूषको विभवतश्च परिवारः। सर्वे परिक्रम्य यथोचितमुपविशन्ति।)

**राजा**—देवि दक्खिणावहणरिंदणंदिणि, वड्ढावीअसि इमिणा वसंतारंभेण। जदो

बिंबोट्ठे बहलं ण देंति मअणं णो गंधतेल्लाविला
वेणीओ विरअंति देंति ण तहा अंगम्मि कुप्पासअं।
जं बाला मुहकुंकुमम्मि वि घणे वट्टंति ढिल्लाअरा
तं मण्णे सिसिरं विणिज्जिअ बला पत्तो वसंतूसओ॥ १२॥

रसाः शृङ्गारादयो जलं च। स्रोतः प्रवाहः। साटकलक्षणं त्वभ्यधायि। अत्र रूपकश्लेषानुप्रासाः। अनेन कथानायकप्रशंसा साटकस्वरूपप्रशंसा च कृता। उक्तं हि—'वाद्याकलापः प्रथमं कलाविधिरनन्तरः। वाद्याशून्या न दृश्यन्ते व्यवहाराः कथंचन॥ वाद्याकलापस्तु कवेरभीष्टार्थप्रकाशनम्।' इति।

**ता इति।**

तद्भाव, एहि। अनन्तरकरणीयं संपादयावः। यतो महाराजदेव्योर्भूमिकां गृहीत्वा आर्य आर्यभार्या च जवनिकान्तरे वर्तेते।

**तत इति।** 'एषामन्यतमेनार्थं पात्रावाक्षिप्य सूत्रधृक्। प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत्॥' इति दशरूपके उक्तत्वात्। 'गूढमन्त्रः शुचिर्वाग्मी भक्तो नर्मविचक्षणः। स्यान्नर्मसचिवस्तस्य कुपितस्त्रीप्रसादकः॥' इत्युक्त्वा 'पीठमर्दो विटश्चैव विदूषक इति त्रिधा।' इति तद्भेदांश्चोक्त्वा 'क्रीडाप्रायो विदूषकः। स्ववपुर्वेषभाषाभिर्हास्यकारी स्वकर्मकृत्।' इति विदूषकलक्षणमभिहितं शृङ्गारतिलके।

**राजेति।**

देवि दक्षिणापथनरेन्द्रनन्दिनि, वर्धसेऽनेन वसन्तारम्भेण।

**जदो इति।**

यतः।

बिम्बोष्ठे बहलं न ददति मदनं नो गन्धतैलाविला
वेणीर्विरचयन्ति ददति न तथाङ्गेऽपि कूर्पासकम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—देव, अहं वि तुज्झ पडिवड्ढाविआ भविस्सं। जधा

छोल्लंति दंतरअणाइँ गदे तुसारे
ईसीसि चंदनरसम्मि मणः कुणन्ति।
एह्णिं सुवंति घरमज्झमसालिआसु
पाअंतपुञ्जिअपडं मिहुणाइँ पेच्छ॥ १४॥

---

यद्बाला मुखकुङ्कुमेऽपि घने वर्तन्ते शिथिलादरा-
स्तन्मन्ये शिशिरं विनिर्जित्य बलात्प्राप्तो वसन्तोत्सवः॥

कूर्पासकं चोलिका। 'बाला स्यात्षोडशाब्दा' इति बालालक्षणम्। अनेन तासां विलासवत्त्वं व्यङ्ग्यम्। बाला इत्यस्यावृत्तेरर्थदीपकम्। 'अनेकशब्दोपादानात्क्रियैवैकात्र दीप्यते।' इति दण्डिनोक्तम्। अत्र च देंति देंति इति कथितपदत्वं काव्यदोषो न शङ्कनीयः। विरअंतीत्येतेन च्छेकानुप्रासनिर्वाहकत्वेन गुणत्वात्। तल्लक्षणं च 'सोऽनेकस्य सकृत्पूर्वः' इति काव्यप्रकाशे। अस्यार्थः—अनेकस्य व्यञ्जनस्य सकृदेकवारं साम्यं पूर्वं यस्य स च्छेकानुप्रास इति। न चाव्यवधानेन पूर्वतायामेव स इति वाच्यम्। 'ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी। दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥' इत्यादावप्यकारमकाराकाराकारपकाराकारव्यवधानेन तदनुदाहरणत्वापातात्। यद्वैकस्य देंतिपदस्य दानविशेषार्थान्तरसंक्रामितवाच्यत्वाददोष इति युक्तमुत्पश्यामः।

**देवी**—

देव, अहमपि तव प्रतिवर्धिका भविष्यामि।

प्रतिवर्धयतीति प्रतिवर्धिका। वसन्तवर्णिकेत्यर्थः।

**जधेति**।

यथा

स्फुरन्ति दन्तरत्नानि गते तुषारे
ईषदीषच्चन्दनरसे मनः कुर्वन्ति।
इदानीं स्वपन्ति गृहमध्यमशालिकासु
पादान्तपुञ्जितपटं मिथुनानि प्रेक्षस्व॥

मध्यमशालिकास्वित्यनेनान्तर्गृहस्वापस्त्यक्त इत्युक्तम्। पादान्तेत्यादिना पटानपेक्षोक्ता। स्फुरन्तीत्यनेनोष्ठानां हाससहत्वमुक्तम्। यथा शृङ्गारतिलके—'किंचिद्विकसितैर्गण्डैः किंचिद्विस्फुरितेक्षणैः। किंचिल्लक्ष्यद्विजैः सोऽयमुत्तमानां भवेद्यथा॥' इति। मिथुनानीति विरहासहत्वं व्यङ्ग्यम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नेपथ्ये।)

**वैतालिकः**—जअ पुव्वदिअंगणाभुअंग चंपाचंपककण्णऊर लीलाणिज्जिअराढादेस विक्कमक्कंतकामरूअ हरिकेलीकेलिआरअ अवमाणिअजच्चसुवण्णवण्ण सव्वंगसुंदरत्तणरमणिज्ज, सुहाअ दे होदु सुरहिसमारंभो। इह हि

पंडीणं गंडवालीपुलअणचवला कंचिबालावलीणं
माणं दो हंडअंता रइरहसकला लोलचोलप्पिआणं।
कण्णाडीणं कुणंता चिउरतरलणं कुंतलीणं पिएसुं
गुंफंता णेहगंठिं मलअसिहरिणो सीअला वान्ति वाआ॥ १९॥

जयेति।

जय पूर्वदिगङ्गनाभुजंग चम्पाचम्पककर्णपूर लीलानिर्जितराढादेश विक्रमाक्रान्तकामरूप हरिकेलीकेलिकारक अपमानितजात्यसुवर्णवर्ण सर्वाङ्गसुन्दरत्वरमणीय, सुखाय ते भवतु सुरभिसमारम्भः।

भुजंगः कामुकः। 'राढागाढत्व' 'चङ्गत्व' इति वा पाठः। 'अवमानितकर्णसुवर्णदान' इति वा पाठः। राज्ञः सर्वाः संबुद्धयः। चम्पाराढाकामरूपहरिकेल्याख्या देशाः। कामस्य रूपमिति न व्याख्या। प्रक्रमभङ्गापत्तेः। चङ्गत्वं नानाकलाकौशलत्वम्। आद्योः संबुद्धो रूपकम्। हरिकेली कामिनीवेत्यर्थश्लेषः। सुरभिर्वसन्तः।

इह हि

पाण्डीनां गण्डपालीपुलकनचपलाः काञ्चीबालावलीनां
मानं द्विः खण्डयन्तो रतिरभसकरा लोलचोलाङ्गनानाम्।
कार्णाटीनां कुर्वन्तो कुन्तलतरलनं कुन्तलीनां प्रियेषु
गुम्फन्तः स्नेहग्रन्थिं मलयशिखरिणः शीतला वान्ति वाताः॥

पाण्ड्यादयस्तत्तद्देशोद्भवाः स्त्रियः। पुलकनं पुलककरणम्। तरलनं तरलत्वकरणम्। एतेन कामोद्दीपकत्वमुक्तं दाक्षिणात्यवायूनाम्। एतेन तत्तद्देशाधिपत्यं राज्ञो व्यङ्ग्यम्। अन्यथा विपक्षदेशवर्णनं रोषावहत्वादनौचितीमेव व्रजेत्। णेहेति 'स्नेहेति वा' इत्यनेन विप्रकर्षाभावपक्षे 'उपरि लोपः' इत्यनेन सलोपः। लक्ष्यवशाल्लक्षणप्रवृत्तेरङ्गीकारात्, परमपि 'अधोमनयाम्' इति प्राप्तं नलोपं बाधित्वा 'ह्नस्नक्ष्णक्ष्णां ण्हः' इति ण्हादेशः। 'द्वेर्दो' इति द्विशब्दस्य दोआदेशः। अत्र कारकहेत्वलंकारः। 'हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्। कारकज्ञापकौ हेतू तौ चानेकविधौ यथा॥' इति दण्डिनोक्तत्वात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(अत्रैव ।)

**द्वितीयः**—

जादं कुंकुमपंकलीढमरठीगंडप्पहं चंपअं
थोआवट्टिअदुद्धमुद्धकलिआ पप्फुल्लिआ मल्लिआ ।
मूले सामलमग्गलग्गभसलं लक्खिज्जए किंसुअं
पिज्जन्तं भसलेहिँ दोहिँ वि दिसाभाएसु लग्गेहिँ व ॥ १६ ॥

**राजा**—पिए विब्भमलेहए, एक्को अहं वड्ढावओ तुज्झ, एक्का तुमं वड्ढाविआ मज्झ । किं उण दुवे वि अह्मे वड्ढाविआ कंचणचंडरअणचंडेहिं बंदीहिं । ता विब्भममरट्टपअट्टाविअं तरुणीणं, णट्टावअं मलअमारुदंदोलिदलदाणच्चणीणं, चारुपवंचितपंचमं कलअंठिकंठकंदलेसु, कंदलिअकंदप्पकोअंडदंडखंडिदचंडिमं, सिणिद्धबंधुं वसुंधरापुरंधीए । विसारिअ पसइप्पमाणे अच्छिणी महुच्छवं जहिच्छं पेच्छदु देवी ।

---

**जादमिति** ।

जातं कुङ्कुमपङ्कलीढमहाराष्ट्रीगण्डप्रभं चम्पकं
स्तोकावर्तितदुग्धमुग्धकलिका प्रोत्फुल्ला मल्लिका ।
मूले श्यामलमग्रलग्नभ्रमरं लक्ष्यते किंशुकं
पीयमानं मधुपाभ्यां द्वाभ्यामपि दिशाभागेषु लग्नाभ्यामिव ॥

मरठीति दंष्ट्रादिः । थो इति 'स्तस्य थः' इति थः । स्तोकपदमत्यन्तसादृश्यार्थम् । मुग्धा सुन्दरी । 'मुग्धः सुन्दरमूढयोः' इत्यभिधानात् । महाराष्ट्रीपदं गौरत्वातिशयकथनार्थम् । स्वभावतस्तद्गण्डानां गौरत्वात् । भसलो भ्रमरः । अत्र रूपकस्वभावोक्त्युत्प्रेक्षाः । स्वभावोक्तिर्दण्डिनोक्ता—'नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती । स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा ॥' इति ।

**राजा**—

प्रिये विभ्रमलेखे, एकोऽहं वर्धापकस्तव, एका त्वं वर्धापिका मम । किं पुनर्द्वावप्यावां वर्धापितौ काञ्चनचण्डरत्नचण्डाभ्यां बन्दिभ्याम् । तद्विभ्रमगर्वप्रवर्तकं तरुणीनाम्, नर्तकं मलयमारुतान्दोलितलतानर्तकीनाम्, चारुप्रपञ्चितपञ्चमं कलकण्ठीकण्ठकन्दलेषु, कन्दलितकंदर्पकोदण्डदण्डखण्डितचण्डिमानम्, स्निग्धबान्धवं वसुंधरापुरंध्र्याः । विस्तार्य प्रसृतिप्रमाणे अक्षिणी मधूत्सवं यथेच्छं प्रेक्षतां देवी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—जधा किल णिवेदिदं बंदीहिं। पअट्टा ज्जेव्व मलआणिला। तथाहि।

लंकातोरणमालिआतरलिणो कुंभुब्भवस्सासमे
मंदंदोलिदचंदणद्दुमलदाकप्पूरसंपक्किणो।
कंकोलीकुलकंपिणो फणिलदाणिप्पट्टणट्टावआ
चण्डं चुंबिअतंबवण्णिसलिला वाअन्ति चित्ताणिला॥ १७॥

---

वर्धापनं वर्णनम्। विभ्रमेत्यादि मधूत्सवविशेषणानि। तरट्टीति दंष्ट्रादित्वात्। णट्टावअमिति वयोऽनुसारेण। तारुण्यं हि विभ्रमनिदानम्। अथवा यथायं कामिनीनां विभ्रमजनकस्तथा वसन्तोत्सवोऽपि। कामुकान्हि विलोक्य कामिन्यो विभ्रमसमुद्रमग्ना भवन्ति। अर्थत उपमानम्। तेन विभक्तित्वं न दोषः। एतेन स्वस्य कामुकता व्यङ्ग्या। 'क्रोधः स्मितं च कुसुमाभरणादियाच्ञा तद्वर्जनं च सहसैव विमण्डनं च। आक्षिप्य कान्तवचनं लपनं सखीभिर्निष्कारणस्थितगतेन स विभ्रमः स्यात्॥' इति विभ्रमलक्षणम्। 'तल्लास्यं ताण्डवं चैव छलितं शम्बया सह। हल्लीसकं च रासं च षट्प्रकारं प्रचक्षते॥' इति षड्भेदमपि नृत्यं गृह्यते। पञ्चमः स्वरः। कलकण्ठी कोकिला। चार्वित्यादौ विशेषणद्वयं बहुव्रीहिः। विस्तार्येत्यादिना विस्तारिताख्यो दृग्विकार उक्तः। तदुक्तम्—'आयतं विस्फुरत्तारं विस्फारितमुदाहृतम्।' इति। एतेनादरातिशयो व्यङ्ग्यः। अत्र हेतुरूपके। नर्तकमित्यादौ समाधिः। 'अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना। सम्यगाधीयते यत्र स समाधिः स्मृतो यथा॥' इति दण्डी।

**देवी**—

यथा किल निवेदितं बन्दिभ्याम्।

सत्यमेवोक्तमित्यर्थः।

प्रवृत्ता एव मलयानिलाः। तथाहि।

लङ्कातोरणमालिकातरलिनः कुम्भोद्भवस्याश्रमे
मन्दान्दोलितचन्दनद्रुमलताकर्पूरसंपर्किणः।
कङ्कोलीकुलकम्पिनः फणिलतानिष्पष्टनर्तका-
श्चण्डं चुम्बितताम्रपर्णीसलिला वान्ति चैत्रानिलाः॥

कङ्कोली वृक्षविशेषः। फणिलताः फणिरूपालताः। लताविशेषा (ताम्बूलवल्ल्यः) वा। निष्पष्टं निःशेषं नितरां वा। महाराष्ट्रभाषायाम् 'निप्पट' इति प्रसिद्धम्। एतेन मान्द्यादिकमुक्तं वायोः। अत्र प्रसादमाधुर्यसौकुमार्यार्थव्यक्तय ऊह्याः। ते यथा कण्ठाभरणे—'प्रसिद्धार्थपदत्वं यत्स प्रसादोऽभिधीयते। या पृथक्पदता वाक्ये तन्माधुर्यमिति स्मृतम्॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ ।

माणं मुञ्चध देह वल्लहजणे दिट्ठिं तरंगुत्तरं
तारुण्णं दिअहाइँ पंच दह वा पीणत्थणत्थंभणं ।
इत्थं कोइलमंजुसिंजणमिसादेअस्स पंचेसुणो
दिण्णा चित्तमहूसवेण भुअणे आण्ण व्व सव्वंकसा ॥ १८ ॥

**विदूषकः**—भो तुह्माणं सव्वाणं मज्झे अहमेक्को कालक्खरिओ । जस्स मे ससुरस्स ससुरो पंडिअघरे पुत्थिआइं वहंतो आसी ।

**चेटी**—(विहस्य ।) तदो आगदं दे अण्णएण पंडित्तणं ।

**विदूषकः**—(सक्रोधम् ।) आः दासीए धीए भविस्सकुट्टणि णिल्लक्खणे अविअक्खणे, ईरिसोऽहं मुक्खो जो तुए वि उअहसिज्जामि ।

---

अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम् । यत्र संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम् ॥' इति । एवमग्रेऽपि गुणा द्रष्टव्याः । अत्रानुप्राससमाध्यर्थश्लेषाः ।

अपि च ।

मानं मुञ्चत ददत वल्लभजने दृष्टिं तरङ्गोत्तरां
तारुण्यं दिवसानि पञ्च दश वा पीनस्तनस्तम्भनम् ।
इत्थं कोकिलमञ्जुशिञ्जनमिषादेवस्य पञ्चेषो-
र्दत्ता चैत्रमहोत्सवेन भुवने आज्ञेव सर्वंकषा ॥

मानलक्षणं शृङ्गारतिलके—'स मानो नायिका यस्मिन्नीर्ष्यया नायकं प्रति । धत्ते विकारमन्यस्त्रीसङ्गदोषवशाद्यथा ॥' इति । तरङ्गितेति तदाख्यो दृग्विकार उक्तः । 'कल्लोला इव यत्कान्तिविच्छर्दस्तत्तरङ्गितम् ।' इति तल्लक्षणम् । चैत्रे मधूत्सवश्चैत्रमधूत्सवः । सर्वंकषेति तत्र कामुकरहितत्वं व्यङ्ग्यम् । अत्र विप्रलम्भशृङ्गारः । कोकिलरवादयो विभावाः । दृग्विकारादयोऽनुभावा द्रष्टव्याः । निर्वेदादयो व्यभिचारिणश्च ।

**विदूषकः**—

भो युष्माकं सर्वेषां मध्येऽहमेकः कालाक्षरिकः । यस्य मे श्वशुरस्य श्वशुरः पण्डितगृहे पुस्तकानि वहन्नासीत् ।

कालाक्षराणि वेत्तीति कालाक्षरिकः पण्डितः ।

**चेटी**—

तत आगतं ते अन्वयेन पाण्डित्यम् ।

वंशक्रमागतमित्यर्थः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अण्णं च हे परपुत्तविट्टालिणि रच्छालोट्टणि भ्रमरटेंटे टेंटाकराले कोसस-हापहारिणि दुट्ठसंघडिदे, अहवा हत्थकंकणं किं दप्पणेण पेक्खीअदि ।

**विचक्षणा**—(विभाव्य ।) एव्वं णेदं । तुरंगस्स सिग्धत्तणे किं सा-क्खिणो पुच्छीअंति । ता वण्णअ वसंतअं ।

**विदूषकः**—तुमं उण पंजरगदा सारिअव्व कुरुकुराअन्ती चिट्ठसि, ण किं पि जाणेसि । ता पिअवअस्सस्स देवीए अ पुरदो पढिस्सं । जदो ण कत्थूरिआ कुग्गामे वणे वा विक्किणीअदि, ण सुवण्णं कसवट्टिअं विणा सिलापट्टए कसीअदि ।

**राजा**—पिअवअस्स, ता पढ । सुणीअदु ।

---

**विदूषकः**—

आः दास्याः पुत्रि भविष्यत्कुट्टनि निर्लक्षणे अविचक्षणे, ईदृशोऽहं मूर्खो यस्त्वयाप्युपहस्ये ।

प्राकृत आत्मनेपदपरस्मैपदव्यत्ययः । धीए इति दंष्ट्रादिः ।

अन्यच्च हे परपुत्रविट्टालिनि रथ्यालुण्ठिनि भ्रमरटेण्टे टेण्टाकराले कोष-शतापहारिणि दुष्टसंघटिते, अथवा हस्तकङ्कणं किं दर्पणेन दृश्यते ।

इदानीमेव मया कवित्वं कर्तव्यमित्यर्थः । विट्टालिनी भ्रंशिका । परपुरुषलम्पट-त्यर्थः । भ्रमरटेण्टा कुचेष्टावती । टेण्टाकराला व्यर्थप्रलापिनी । एते देशीशब्दाः । कोषाः शपथास्तेषां शतेन वर्तनशीला । मिथ्याशपथकारिणीत्यर्थः ।

**विचक्षणा**—

एवमेतत् । तुरंगस्य शीघ्रत्वे किं साक्षिणः पृच्छयन्ते । तद्वर्णय वसन्तम् ।

**विदूषकः**—

त्वं पुनः पञ्जरगता शारिकेव कुरुकुरायमाणा तिष्ठसि, न किमपि जा-नासि । तत्प्रियवयस्यस्य देव्याश्च पुरतः पठिष्यामि । यतो न कस्तूरिका कु-ग्रामे वने वा विक्रीयते, न सुवर्णं कषपट्टिकां विना शिलापट्टके कष्यते ।

ईदृशकवित्वाश्रयणायोग्यायाः अज्ञायास्तव सविधे न पठिष्यामीति भावः ।

**राजा**—

प्रियवयस्य, तत्पठ । श्रूयताम् ।

अस्माभिरिति शेषः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(विदूषकः पठति ।)

फुल्लुक्करं कलमकूरसमं वहंति
जे सिंदुवारविडवा मह वल्लहा दे ।
जे गालिअस्स महिसीदहिणो सरिच्छा
ते किं च मुद्धविअइल्लपसूणपुंजा ॥ १९ ॥

**विचक्षणा**—णिअकंतारंजणजोग्गं दे वअणं ।

**विदूषकः**—ता उआरवअणे, तुमं पढ ।

**देवी**—(किंचित्स्मित्वा ।) सहि विअक्खणे, अह्माणं पुरदो तुमं गाढं कइत्तणेण उत्ताणा होसि। ता पढ संपदं अज्जउत्तस्स पुरदो सअं कदं किंपि कव्वं। जदो तं कव्वं जं सहाए पढीअदि, तं सुवण्णं जं कसवट्टए णिवट्टेदि, सा घरिणी जा पिअं रंजेदि, सो पुत्तो जो कुलं उज्जलेदि ।

---

**फुल्लेति ।**

पुष्पोत्करं कलमकूरसमं वहन्ति
ये सिन्दुवारविटपा मम वल्लभास्ते ।
ये गालितस्य महिषीदध्नः सदृक्षा-
स्ते किं च मुग्धविचकिलप्रसूनपुञ्जाः ॥

कूर ओदनः । विचकिलास्तरुभेदाः । मम वल्लभा इत्यनेन स्वस्य कामकलाकुशलत्वं व्यङ्ग्यम् ।

**विचक्षणा**—

निजकान्तारञ्जनयोग्यं ते वचनम् ।

स्वबुद्धिमेव केवलमाश्रित्य रञ्जयसीति भावः ।

**विदूषकः**—

तदुदारवचने, त्वं पठ ।

**देवी**—

सखि विचक्षणे, अस्माकं पुरतस्त्वं गाढं कवित्वेनोत्ताना भवसि ।

अतिगर्वीयस इति भावः ।

तत्पठ सांप्रतमार्यपुत्रस्य पुरतः स्वयं कृतं किमपि काव्यम् । यतस्तत्काव्यं यत्सभायां पठ्यते, तत्सुवर्णं यत्कषपट्टिकायां निवर्तते, सा गृहिणी या पतिं रञ्जयति स पुत्रो यः कुलमुज्ज्वलयति ।

'सर्वस्त्रीभिः पतिर्वाच्य आर्यपुत्रेति यौवने' इत्युक्तेरार्यपुत्रस्येत्युक्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा**—जं देवी आणवेदि। (पठति।)

जे लंकागिरिमेहलाहिँ खलिदा संभोअखिण्णोरई-
फारप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तणं।
ते एह्णि मलआणिला विरहिणीणीसाससंपक्किणो
जादा झत्ति सिसुत्तणे वि वहला तारुण्णपुण्णा विअ॥ २०॥

**राजा**—सच्चं विअक्खणा विअक्खणा चदुरत्तणेण उत्तिणं। ता किमण्णं कइणं वि कई।

**देवी**—(विहस्य।) कइचूडामणित्तणेण ट्ठिदा एसा।

**विदूषकः**—(सक्रोधम्।) ता उज्जुअं ज्जेव्व किं ण भणीअदि देवीए, अच्चुत्तमा विअक्खणा कव्वम्मि, अच्चहमो कविंजलबह्मणो त्ति।

---

**विचक्षणा**—

यद्देव्याज्ञापयति।

**जे इति।**

ये लङ्कागिरिमेखलायां स्खलिताः संभोगखिन्नोरगी-
स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम्।
त इदानीं मलयानिला विरहिणीनिःश्वाससंपर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव॥

अयं श्लोकः कविनिबद्धवक्तृप्रौढोक्तिनिर्मिते ध्वनौ निःश्वाससंपर्कित्वेन वस्तुना प्राप्तैश्वर्याः किं किं न कुर्वत इति वस्तु व्यज्यत इत्युदाहरणविषयत्वेनोदाहृतः काव्यप्रकाशे [चतुर्थोल्लासे]। सत्या अप्युत्प्रेक्षाया व्यञ्जनेऽकिंचित्करत्वान्नालंकारव्यञ्जनोदाहरणम्। अत्र हेतूत्प्रेक्षासमाधिविभावनाः। विभावना दण्डिनोक्ता—'प्रसिद्धहेतुव्यावृत्त्या यत्किंचित्कारणान्तरम्। यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना॥' इति।

**राजा**—

सत्यं विचक्षणा विचक्षणा चतुरत्वेनोक्तीनाम्। तत्किमन्यत्कवीनामपि कविः।

**देवी**—

कविचूडामणित्वेन स्थितैषा।

**विदूषकः**—

तदृज्वेव किं न भण्यते देव्या, अत्युत्तमा विचक्षणा काव्ये, अत्यधमः कपिञ्जलब्राह्मण इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा**—अज्ज, मा कुप्प। कव्वं जेव्व कइत्तणं पिसुणोद। जदो णिअकंतारंजणजोग्गं णिजोदरभरित्तणं। णिंदणिज्जे वि अत्थे सुउमारा दे वाणी, लंबत्थणीए विअ एक्कावळी, तुंदिलाए विअ कंचुलिआ, ठेराए विअ कडक्खविक्खेवो, कट्टिदकेसाए विअ मालदीकुसुममाला, काणाए विअ कज्जलसलाआ, ण सुट्ठुदरं भादि रमणिज्जा।

**विदूषकः**—तुज्झ उण रमणिज्जेऽवि अत्थे ण सुंदरा सद्दावळी। कणअकडिसुत्तए विअ लोहकिंकिणीमाला, पडिवट्टे विअ टसरविरअणा, गोरंगीए विअ चंदणचच्चा, ण चारुत्तणमवलंबेदि। तहा वि तुमं वणीअसि।

**विचक्षणा**—अज्ज, मा कुप्प। का तुझेहिं सह पडिसद्धा। जदो तुमं णाराओ विअ णिरक्खरो वि रअणतुलाए णिउंजीअसि। अहं उण तुले व्व लद्धक्खरा वि ण सुवण्णलवे विणिउंजीआमि।

---

**विचक्षणा**—

आर्य, मा कुप्य। काव्यमेव कवित्वं पिशुनयति। यतो निजकान्तारञ्जनयोग्यं निजोदरंभरित्वम्। निन्दनीयेऽप्यर्थे सुकुमारा ते वाणी, लम्बस्तन्या इवैकावली, तुन्दिलाया इव कञ्चुलिका, स्थविराया इव कटाक्षविक्षेपः, कर्तितकेशाया इव मालतीकुसुममाला, काणाया इव कज्जलशलाका, न सुष्ठुतरं भाति रमणीया।

ते वाणी न भातीत्यर्थः।

**विदूषकः**—

तव पुना रमणीयेऽप्यर्थे न सुन्दरा शब्दावली। कनककटिसूत्र इव लोहकिंकिणीमाला, प्रतिपट्ट इव त्रसरविरचना, गौराङ्ग्या इव चन्दनचर्चा, न चारुत्वमवलम्बते। तथापि त्वं वर्ण्यसे।

प्रतिपट्टः पट्टसूत्रम्। चन्दनचर्चायाः स्वतः सुन्दरत्वेऽपि गौरेऽङ्गे परभागालाभादसौन्दर्यम्। अर्थासुन्दरत्वेऽपि काव्यकौशलादहं सुकविः, त्वं त्वर्थसौन्दर्येऽप्यसुन्दरकवित्वे वर्ण्यसे च सर्वैरिति महदाश्चर्यमिति भावः।

**विचक्षणा**—

आर्य, मा कुप्य। का युष्माभिः सह प्रतिस्पर्धा। यतस्त्वं नाराच इव निरक्षरोऽपि रत्नतुलायां नियुज्यसे। अहं पुनस्तुलेव लब्धाक्षरापि न सुवर्णभाण्डे(लवे) विनियुज्ये।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—एव्वं मह भणन्तीए तुह वामं दक्खिणं अ जुहिट्ठिरजेट्ठभाअरणामहेअं अंगजुअलं उप्पाडइस्सं।

**विचक्षणा**—अहं वि उत्तरफग्गुणीपुरस्सरणक्खत्तणामहेअं अंगं तुह झत्ति खंडिस्सं।

**राजा**—वअस्स, मा एव्वं भण। कइत्तणे ट्ठिदा एसा।

**विदूषकः**—(सक्रोधम्।) उज्जुअं ता किं ण भणइ, अह्माणं चेडिआ हरिअंदणंदिअंदकोट्टिसहालप्पहुदीणं पि पुरदो सुकइ त्ति।

**राजा**—एव्वं णेदं।

(विदूषकः सक्रोधं परिक्रामति।)

**विचक्षणा**—तहिं गच्छ जहिं मे पढमा साडिआ गदा।

---

नाराचो लोहशलाका। नाराचस्य हि रत्नतुलावेधनमुपयोगः। तुलायास्तु सुवर्णभाण्डे न कोऽपीति निरक्षरलब्धाक्षरपदयोस्तात्पर्यम्।

**विदूषकः**—

एवं मम भणन्त्यास्तव वामं दक्षिणं च युधिष्ठिरज्येष्ठभ्रातृनामधेयमङ्गयुगलमुत्पाटयिष्यामि।

कर्णरूपमित्यर्थः। भाअरेति 'अते आरः सुपि' इत्यारादेशं बाधित्वा 'पितृभ्रातृयातृणामरः' इत्यरः।

**विचक्षणा**—

अहमप्युत्तराफाल्गुनीपुरःसरनक्षत्रनामधेयमङ्गं तव झटिति खण्डयिष्यामि।

हस्ताभिधमित्यर्थः।

**राजा**—

वयस्य, मैवं भण। कवितमत्वे स्थितैषा।

**विदूषकः**—

ऋज्वेव तत्किं न भण्यते, अस्माकं चेटिका हरिचन्द्रनन्दिचन्द्रकोटिशहालप्रभृतीनामपि पुरतः सुकविरिति।

परातिगन्तु(?)मिति शेषः।

**राजा**—

एवमेतत्।

**विचक्षणा**—

तत्र गच्छ यत्र मे प्रथमा शाटिका गता।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—(वलितग्रीवम् ।) तुअं उण तहिं गच्छ जहिं मे मादाए पढमा दंतीवली गदा । ईदिसस्स राअउलस्स भद्दं भोदु, जहिं चेडिआ बंभणेण समं समसीसिआए दीसदि । मइरा पंचगव्वं च एकस्सिं भंडए कीरदि, कच्चं माणिक्कं च समं आहरणे पउंजीअदि ।

**चेटी**—इह राअउले तं ते भोदु कंठट्ठिदं जं भअवं तिलोअणो सीसे समुव्वहदि । तेण च ते मुहं चूरीअदु जेण असोअतरू दोहदं लहदि ।

**विदूषकः**—आः दासीए पुत्ति टेंटाकराले कोससअवट्टणि रच्छा-लोट्टणि, एव्वं मं भणसि । ता मह महब्बह्मणस्स भणिदेण तं तुमं लहसु जं फग्गुणसमए सोहंजणो जणादो लहदि । जं पामराहिंतो बइल्लो लहदि ।

---

**विदूषकः**—

त्वं पुनस्तत्र गच्छ यत्र मे मातुः प्रथमा दन्तावली गता ।

कर्णवीटिकेत्यर्थः ।

**ईदिसस्सेति ।**

ईदृशस्य राजकुलस्य भद्रं भवतु, यत्र चेटिका ब्राह्मणेन समं समशीर्षिकया दृश्यते ।

समशीर्षिका प्रतिस्पर्धा ।

**मइरेति ।**

मदिरा पञ्चगव्यं चैकस्मिन्भाण्डे क्रियते, काचं माणिक्यं च सममाभरणे प्रयुज्यते ।

**विचक्षणा**—

इह राजकुले तत्ते भवतु कण्ठस्थितं यद्भगवांस्त्रिलोचनः शीर्षे समुद्वहति ।

अर्धचन्द्र इत्यर्थः ।

तेन च ते मुखं चूर्ण्यतां येनाशोकतरुर्दोहदं लभते ।

पादप्रहारेणेत्यर्थः । 'पादाहतः प्रमदया विकसत्यशोकः' इति प्रसिद्धिः ।

**विदूषकः**—

'आः दासीए' इत्यादि व्याख्यातम् (१७ पृष्ठे) ।

**एव्वमिति ।**

एवं मां भणसि । तन्मम महाब्राह्मणस्य भणितेन तत्त्वं लभस्व यत्फाल्गुनसमये शोभाञ्जनो जनाल्लभते । यत्पामरेभ्यो बलीवर्दो लभते ।

फाल्गुनसमय इति धूलीप्रक्षेपादिकम् । बलीवर्द इति नासाछेदमित्यर्थः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा**—अहं उण तुह एव्वं भणंतस्स णेउरस्स विअ पाअलग्गस्स पाएण मुहं चूरइस्सं। अण्णं च, उत्तरासाढापुरस्सरणक्खत्तणामहेअं अंगजुअलं उप्पाडिअ घाल्लिस्सं।

**विदूषकः**—(सक्रोधं परिक्रामन्, जवनिकान्तरे किंचिदुच्चैः।) ईरिसं राअउलं दूरे वंदीअदि जहिं दासी बह्मणेण समं पडिसिद्धिं करेदि। ता अज्जप्पहुदि णिअगेहणीए वसुंधराणामहेआए बह्मणीए चलणसुस्सूअओ भविअ गेहे जेव्व चिट्ठिस्सं।

(सर्वे हसन्ति।)

**देवी**—अज्जउत्त, कीदिसी कविंजलेण विणा गोट्ठी, कीदिसी णअणंजणेण विणा पसाहणलच्छी।

(आकाशे।)

ण हु ण हु आगमिस्सं। अण्णो को वि पिअवअस्सो अण्णेसीअदु। अहवा एसा दुट्ठदासी लंबकुचा टप्परकण्णी पडिसीसअं देइअ मह ट्ठाणे

---

**विचक्षणा**—

अहं पुनस्तवैवं भणतो नूपुरस्येव पादलग्नस्य पादेन मुखं चूर्णयिष्यामि। नूपुरदृष्टान्तेन व्यर्थप्रलापित्वमस्योक्तम्।

**अण्णं चेति**।

अन्यच्च, उत्तराषाढापुरःसरनक्षत्रनामधेयमङ्गयुगलमुत्पाट्य क्षेप्स्यामि। श्रवणसंज्ञकमित्यर्थः। घाल्लिस्सं इति देशी। 'अन्यच्च ते पवननिष्क्रमणोत्क्रमणविवरस्थानमङ्गं खण्डयित्वा क्षेप्स्यामि' इति काचित्कः पाठः।

**जवनिकान्तर इति**। 'अपटी काण्डपटीका प्रतिसीरा जवनिका तिरस्करिणी' इति तल्लक्षणम्।

**इरिसमिति**।

ईदृशं राजकुलं दूरे वन्द्यतां यत्र दासी ब्राह्मणेन समं प्रतिस्पर्धां करोति। तदद्यप्रभृति निजगेहिन्या वसुंधरानामधेयाया ब्राह्मण्याश्चरणशुश्रूषुर्भूत्वा गेह एव स्थास्यामि।

**देवी**—

आर्यपुत्र, कीदृशी कपिञ्जलेन विना गोष्ठी, कीदृशी नयनाञ्जनेन विना प्रसाधनलक्ष्मीः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उवहसणत्थं करीअदु। अहमेक्को मुदो तुझाणं सव्वाणं मज्झे, तुह्मे उण वरससअं जीअध।

**विचक्षणा**—मा अणुबंधेहि। अणुणअकक्कसो क्खु कविंजलबह्मणो सलिलसित्तो विअ सणगुणगंठी चिरं गाढअरो भोदि। णं दंसणीअं दीसदु।

**राजा**—(समन्तादवलोक्य।)

गाअंतगोवअबहूपदपेंखिआसु
दोलासु बिब्भमवदीसु णिसण्णदिट्ठी।
जं जादि खंजिदतुरंगरहो दिणेसो
तेणेब्व होंति दिअहा अइदीहदीहाः॥ २१॥

णेति।

न खलु न खल्वागमिष्यामि। अन्यः कोऽपि प्रियवयस्योऽन्विष्यताम्। अथैषा दुष्टदासी लम्बकुचा टप्परकर्णा प्रतिशीर्षकं दत्त्वा मम स्थान उपहसनार्थं क्रियताम्। अहमेको मृतो युष्माकं सर्वेषां मध्ये, यूयं पुनर्वर्षशतं जीवत।

टप्परो वंशपात्रम्। 'टोपला' इति भाषायाम्। तद्वत्कर्णौ यस्याः। प्रतिशीर्षकलक्षणमुक्तम्। मम स्थान इति मदीयो वेषोऽन्यस्मै दातव्य इत्यर्थः।

**विचक्षणा**—

मानुबध्नीत। अनुनयकर्कशः खलु कपिञ्जलब्राह्मणः सलिलसिक्त इव शणगुणग्रन्थिश्चिरं गाढतरो भवति। ननु दर्शनीयं दृश्यताम्।

**राजा**—

गायद्गोपवधूपदप्रेङ्खितासु
दोलासु विभ्रमवतीषु निषण्णदृष्टिः।
यद्याति खञ्जिततुरङ्गरथो दिनेश-
स्तेनैव भवन्ति दिवसा अतिदीर्घदीर्घाः॥

पदैश्चरणैः। प्रेङ्खितास्वान्दोलितासु। गोष्ठीभिर्विनातिदीर्घा दिवसा आलस्यमावहन्तीत्यानीयतां कपिञ्जलब्राह्मण इति ध्वन्यते, तेन प्रकृतसंगतिः। अत्र हेत्वतिशयोक्तिपर्यायोक्त्युत्प्रेक्षाः। अतिशयोक्तिपर्यायोक्ती दण्डिनोक्ते—'विवक्षायां विशेषस्य लोकसीमातिवर्तिनी। असावतिशयोक्तिः स्यादलंकारोत्तमा यथा॥' इति। 'अर्थमिष्टमनाख्याय साक्षात्तस्यैव सिद्धये। यत्प्रकारान्तराख्यानं पर्यायोक्तिस्तदिष्यते॥' इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(प्रविश्यापटीक्षेपेण)

**विदूषकः**—आसणमासणं ।

**राजा**—किं तेण ।

**विदूषकः**—भैरवाणंदो आअच्छदि ।

**देवी**—किं सो, जो जणवअणादो अच्चब्भुदासिद्धी सुणीअदि ।

**विदूषकः**—अध इं ।

**राजा**—पवेसअ ।

(विदूषको निष्क्रम्य तेनैव सह प्रविशति ।)

**भैरवानन्दः**—(किंचिन्मदमभिनीय पठति ।)

मंतो ण तंतो ण अ किं पि जाणं झाणं च णो किं पि गुरुप्पसादा ।
मज्जं पिआमो महिलं रमामो मोक्खं च जामो कुलमग्गलग्गा ॥ २२ ॥

**प्रविश्येति** । अपटी जवनिका ।

**विदूषकः**—

आसनमासनम् ।

दीयतामिति शेषः ।

**राजा**—

किं तेन ।

प्रयोजनमिति शेषः ।

**विदूषकः**—

भैरवानन्द आगच्छति ।

**देवी**—

किं सः, यो जनवचनादत्यद्भुतासिद्धिः श्रूयते ।

**विदूषकः**—

अथ किम् ।

**राजा**—

प्रवेशय ।

**मंतो इति** ।

मन्त्रो न तन्त्रं न च किमपि ध्यानं ज्ञानं च नो किमपि गुरुप्रसादात् ।
मद्यं पिबामो महिलां रमयामो मोक्षं च यामः कुलमार्गलग्नाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ।

रंडा चंडा दिक्खिदा धम्मदारा
मज्जं मंसं पिज्जए खज्जए अ।
भिक्खा भोज्जं चम्मखंडं च सेज्जा
कोलो धम्मो कस्स णो भादि रम्मो ॥ २३ ॥

किं च।

मुत्तिं भणंति हरिबह्ममुहाहिदेआ
झाणेण वेअपठणेण कदुक्किआए।
एक्केण केवलमुमादइएण दिट्ठो
मोक्खो समं सुरअकेलिसुरारसेहिं ॥ २४ ॥

**राजा**—एदं आसणं। उपविसदु भैरवाणंदो।

---

मन्त्रादिलक्षणान्यनतिप्रयोजनतया न लिख्यन्ते। अत्र विरोधाभासः। स यथा दण्डिना प्रोक्तः—'विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम्। विशेषदर्शनायैव स विरोधः स्मृतो यथा॥' इति।

**अवि एति**।

अपि च।

रण्डा चण्डा दीक्षिता धर्मदारा
मद्यं मांसं पीयते खाद्यते च।
भिक्षा भोज्यं चर्मखण्डं च शय्या
कौलो धर्मः कस्य नो भाति रम्यः॥

**किं चेति**।

मुक्तिं भणन्ति हरिब्रह्ममुखादिदेवा
ध्यानेन वेदपठनेन क्रतुक्रियाभिः।
एकेन केवलमुमादयितेन दृष्टो
मोक्षः समं सुरतकेलिसुरारसैः॥

हरिब्रह्ममुखाश्च ते आदिदेवाश्चेति विग्रहः। अत्र व्यतिरेकः।

**राजा**—

इदमासनम्। उपविशतु भैरवानन्दः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भैरवानन्दः**—(उपविश्य।) किं कादव्वं।

**राजा**—कहिं वि विसए अच्चरिअं दट्ठुमिच्छामि।

**भैरवानन्दः**—

दंसेमि तं पि ससिणं वसुहावतिण्णं
थंभेमि तस्स वि रविस्स रहं णहद्धे।
आणेमि जक्खसुरसिद्धगणंगणाओ
तं णत्थि भूमिवलए मह जं ण सज्जं ॥ २९ ॥

ता भण किं करीअदु।

**राजा**—वअस्स, तुए कहिं पि अपुव्वं दिट्ठं महिलारअणं।

---

**भैरवानन्दः**—

किं कर्तव्यम्।

किमीप्सितं ते मया कर्तव्यमित्यर्थः।

**राजा**—

कस्मिन्नपि विषये आश्चर्यं द्रष्टुमिच्छामि।

अनेन कारणाख्यमङ्गमुक्तम्। 'प्रकृतार्थस्य चारम्भः कारणं नाम तद्भवेत्।' इत्युक्तत्वात्।

**भैरवानन्दः**—

दर्शयामि तमपि शशिनं वसुधावतीर्णं
स्तम्भामि तस्यापि रवे रथं नभोऽर्धे।
आनयामि यक्ष सुरसिद्धगणाङ्गना-
स्तन्नास्ति भूमिवलये मम यन्न साध्यम् ॥

एतेनावमर्शसंध्यङ्गो व्यवसाय उक्तः। तत्रावमर्शलक्षणं दशरूपके—'क्रोधेनावमृशे-यत्र व्यसनाद्वापि लोभनात्। गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः॥' इति। व्यवसायलक्षणमपि तत्रैव—'व्यवसायः स्वशक्त्युक्तिः' इति।

**ता इति**।

तद्भण किं क्रियताम्।

**राजा**—

वयस्य, त्वया कुत्राप्यपूर्वं दृष्टं महिलारत्नम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—दिट्ठं दाव।

**राजा**—कहेहि।

**विदूषकः**—अत्थि एत्थ दक्खिणावहे वच्छोमं णाम णअरं। तहिं मए एक्कं कण्णारअणं दिट्ठं। तमिहाणीअदु।

**भैरवानन्दः**—आणीअदि।

**राजा**—ओदारीअदु पुण्णिमाहरिणंको धरणीअले।

(भैरवानन्दो ध्यानं नाटयति।)

(ततः प्रविशति पटाक्षेपेण नायिका। सर्वे आलोकयन्ति।)

**राजा**—अहह अच्चरिअं अच्चरिअं।

जं धोअंजणसोणलोअणजुअं लग्गालअग्गं मुहं
हत्थालम्बिदकेसपल्लवचए दोल्लन्ति जं बिन्दुणो।

---

**विदूषकः**—

दृष्टं तावत्।

**राजा**—

कथय।

**विदूषकः**—

अस्त्यत्र दक्षिणापथे वैदर्भं नाम नगरम्। तत्र मयैकं कन्यारत्नं दृष्टम्। तदिहानीयताम्।

कन्यारत्नमुत्कृष्टा कन्या। 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इत्युक्तत्वात्।

**भैरवानन्दः**—

आनीयते।

**राजा**—

अवतार्यतां पूर्णिमाहरिणाङ्को धरणितले।

पूर्णिमाचन्द्रवदाह्लादकारि स्त्रीरत्नमानीयतामित्यर्थः। दृष्टान्तालंकारः। नायिका कर्पूरमञ्जरी।

**राजा**—

अहह आश्चर्यमाश्चर्यम्।

यद्धौताञ्जनशोणलोचनयुगं लग्नालकाग्रं मुखं
हस्तालम्बितकेशपल्लवचये दोलायन्ते यद्बिन्दवः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जं एक्कं सिचअंचलं णिवसिदा तं ह्लाणकेलिट्ठिदा
आणीदा इअमब्भुदेक्कजणणी जोईसरेणामुणा ॥ २६ ॥

अवि अ।

एक्केण पाणिणलिणेण णिवेसअंती
वत्थंचलं घणथणत्थलसंसमाणं।
चित्ते लिहिज्जादि ण कस्स वि संजमंती
अण्णेण चंकमणदो चलिदं कडिल्लं ॥ २७ ॥

**विदूषकः—**

ह्लाणावमुक्काहरणोच्चआए तरंगभंगक्खदमंडणाए।
उल्लंसुउल्लासिथणूलआए सुंदेरसब्बस्समिमीअ दिट्ठी ॥ २८ ॥

---

यदेकं सिचयाञ्चलं निवसितं तत्स्नानकेलिस्थिता
आनीतेयमद्भुतैकजननी योगीश्वरेणामुना ॥

धौताञ्जनमत एव शोणमित्यर्थः। सिचयस्य वस्त्रस्याञ्चलं पल्लवं तन्निवसितं पृथग्भूतम्। स्रवज्जलमित्यर्थः। अत्र स्वभावोक्तिः।

**अवि एति।**

अपि च।

एकेन पाणिनलिनेन निवेशयन्ती
वस्त्राञ्चलं घनस्तनस्थलस्रंसमानम्।
चित्रे लिख्यते न कस्यापि संयच्छन्ती
अन्येन चंक्रमणतश्चलितं कटिवस्त्रम् ॥

कडिल्लमिति देशी। अथ 'तस्येदम्' इत्यस्मिन्नर्थे 'उल्ल इल्लस्तु तद्भवे' इतील्लः। अपिशब्दश्चार्थे, अन्येनेत्यनन्तरं पठितव्यः। चित्रलिखितेव कामुकमनसि लगतीत्यर्थः। अत्र प्रलयाख्यः सात्त्विको भावः। स यथा रसकलिकायाम्—'प्रलयो रागदुःखादेरिन्द्रियास्तमयो मतः।' इति। स एव चानुभावः। चिन्तादयो व्यभिचारिणः। यौवनादय आलम्बनगुणा विभावाः। अभिलाषाख्या शृङ्गारावस्था।

**विदूषकः—**

स्नानावमुक्ताभरणोच्चयायास्तरङ्गभङ्गक्षतमण्डनायाः।
आर्द्रांशुकोल्लासितनुलतायाः सौन्दर्यसर्वस्वमस्या दृष्टिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नायिका**—(सर्वानवलोक्य। स्वगतम्।) एसो महाराओ को वि इमिणा गंभीरमहुरेण सोहासमुदाएण जाणिज्जदि । एसा एदस्स महादेवी तक्कीअदि । अद्धणारीसरस्स विअ अकहिआ वि गोरी। एसो को वि जोईसरो। एस उण परिअणो । (विचिन्त्य।) ता किं ति एदस्स महिलासहिदस्स दिट्ठी मं बहु मण्णेदि । (इति त्रस्तं वीक्षते।)

**राजा**—(विदूषकमपवार्य।) एदाए

जं मुक्का सवणंतरेण तरला तिक्खा कडक्खच्छडा
सिंगाधिट्ठिअकेअअग्गिमदलद्दोणीसरिच्छच्छई।

---

दृष्टिरत्र तटस्थः। अन्यत्पूर्ववत्। अत्र रूपमुक्तम्। तद्यथा सुधाकरे—'अङ्गान्यभूषितान्येव प्रक्षेपाद्यैर्विभूषणैः। येन भूषितवद्भान्ति तद्रूपमिह कथ्यते ॥' इति । मृदवं नामाङ्गमप्युक्तम्—'दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्।' इति तल्लक्षणम्। 'सुश्लिष्टसंधिबन्धो यस्तत्सौन्दर्यमितीर्यते' इति सौन्दर्यलक्षणम्।

**नायिका—एसो इति।**

एष महाराजः कोऽप्यनेन गम्भीरमधुरेण शोभासमुदायेन ज्ञायते । एषाप्यस्य महादेवी तर्क्यते । अर्धनारीश्वरस्येवाकथितापि गौरी । एष कोऽपि योगीश्वरः । एष पुनः परिजनः । तत्किमित्येतस्य महिलासहितस्यापि दृष्टिर्मां बहु मन्यते ।

त्रस्तमिति क्रियाविशेषणम्। अनेन कातराख्यं दर्शनमुक्तम् । 'सभयान्वेषणपरं यत्तत्कातरमुच्यते।' इति तल्लक्षणम्।

**राजा—अपवार्येति**। अपवारणेन जनान्तिकमुच्यते। अत एवोक्तं दशरूपके—'त्रिपताककरेणान्यानपवार्यान्तरा कथाम्। अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ॥' इति । त्रिपताका तु संगीतरत्नाकरे—'तर्जनीमूलसंलग्नकुञ्चिताङ्गुष्ठको भवेत्। पताकः संहताकारः प्रसारितकराङ्गुलिः॥ स एव त्रिपताकः स्याद्वक्रितानामिकाङ्गुलिः।' इति।

**एदाए इति।**

एतस्याः

यन्मुक्ता श्रवणान्तरेण तरला तीक्ष्णा कटाक्षच्छटा
शृङ्गाधिष्ठितकेतकाग्रिमदलद्रोणीसदृक्षच्छविः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं कप्पूररसेण णं धवलिदो ज्योह्नाअ णं ह्नाविदो
मुत्ताणं घणरेणुण व्व छुरिदो जादो ह्मि एत्थंतरे ॥ २९ ॥

**विदूषकः**—अहो से रूअरेहा ।

मण्णे मज्झं तिवलिवलिअं डिम्भमुट्ठीअ गेज्झं
णो बाहूहिं रमणफलअं वेट्ठिदुं जादि दोहिं ।
णेत्तच्छेत्तं तरुणिपसईदिज्जमाणोवमाणं
ता पच्चक्खं मह विलिहिदुं जादि एसा ण चित्ते ॥ ३० ॥

---

तत्कर्पूररसेन ननु धवलितो ज्योत्स्नया ननु स्नापितो
मुक्तानां घनरेणुनेव च्छुरितो जातोऽस्म्यत्रान्तरे ॥

द्रोणीपदं नेत्रयोरत्यन्तविपुलताकथनार्थम् । अत्र हेत्वतिशयोत्प्रेक्षाविरोधाभासाः । तीक्ष्णकटाक्षनाटनेऽत्यन्तनिर्वृतेर्विरोधः । सितकृष्णौ कटाक्षावुक्तौ । तरलेति तरलिताख्यो दृग्विकार उक्तः । 'तरलं तदिति प्राहुर्लोलतारकनीनिकम् ।' इति । श्रवणान्तर इति 'त्र्यस्रं तिर्यगुदञ्चितम्' इति त्र्यस्राख्यः । एतेषु वेद्येषु केषुचिद्रसाभासो ज्ञेयः । नायिकाया असर्पिरसोदयाभावात् । 'एकस्यैवानुरागश्चेदथवा तिर्यगाश्रितः । पोषितो बहुभक्तिश्चेद्रसाभासस्त्रिधा मतः ॥' इत्युक्तत्वात् । अत्र संप्रयोगः । रत्याख्यः स्थायिभावः । सर्वत्रालम्बनं नायिका नायकश्च । यौवनादिरालम्बनगुणः । विलासादिका चेष्टा । अलंकृतिर्वस्त्राद्या । वसन्तस्तटस्थः । एते आलम्बनोद्दीपनविभावाः । पूर्वोक्ता दृग्विकारा अनुभावाः । रोमाञ्चादयः सात्त्विका ज्ञेयाः । हर्षादयो व्यभिचारिणः । चक्षुःप्रीत्यादयस्तटस्थाः । भरतस्तु—'तात्कालिको विकारः स्याद्दयितालोकनादिषु । आदरादीक्षणं चैव चक्षुःप्रीतिरुदीर्यते ॥' इति । रसादिलक्षणानि त्वनतिप्रयोजनत्वाद्गौरवाच्च नोच्यन्ते । एवं विभावादयः सर्वत्र ज्ञेयाः ॥

**विदूषकः**—

अहो अस्या रूपरेखा ।

मन्ये मध्यं त्रिवलिवलितं डिम्भमुष्ट्या ग्राह्यं
नो बाहुभ्यां रमणफलकं वेष्टितुं याति द्वाभ्याम् ।
नेत्रक्षेत्रं तरुणीप्रसृतिदीयमानोपमानं
तत्प्रत्यक्षं मया विलिखितुं यात्येषा न चित्ते ॥

रमणफलकं जघनपरिसरः । नेत्रक्षेत्रं चक्षुःपरिसरः । चित्ते विलिखितुं धारयितुं न शक्नोमीत्यर्थः । डिम्भो बालः । क्षेत्रशब्देन नानादृग्विकारास्पदत्वं व्यङ्ग्यम् । अत्र रूपलावण्यसौन्दर्याण्युक्तानि । लावण्यं तु 'मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कधं ह्णाणधोविदविलेवणा समुत्तारितविहूसणा वि रमणिज्जा । अहवा ।

जे रूअमुक्का वि विहूसयंति ताणं अलंकारवसेण सोहा ।
णिसग्गचंगस्स वि माणुसस्स सोहा समुम्मीलदि भूसणेहिं ॥ ३१ ॥

राजा—एदाए दाव एदं ।

लावण्णं णवजच्चकंचणणिहं णेत्ताण दीहत्तणं
कण्णेहिं खडिदं कओलफलआ दोखण्डचंदोवमा ।
एसा पंचसरेण सज्जिदधणूदंडेण रक्खिज्जए
जेणं सोसणमोहणप्पहुदिणो विज्झंति मं मग्गणा ॥ ३२ ॥

---

प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते ॥' इति । उपमालंकारः । शृङ्गारस्य दीप्तत्वात् 'कान्तिर्दीप्तरसत्वं स्यात्' इति कान्तिर्वाक्यार्थगुण उक्तः । गाम्भीर्यं च । विभावादिकं तु पूर्ववदेव ॥

कथं स्नानधौतविलेपना समुत्तारितविभूषणापि रमणीया । अथवा ।

या रूपमुक्ता अपि विभूषयन्ति तासामलंकारवशेन शोभा ।
निसर्गचङ्गस्यापि मानुषस्य शोभा समुन्मीलति भूषणैः ॥

यासां सौन्दर्यं नास्ति तासामलंकारेण शोभा । यस्य तु मनुष्यस्य नैसर्गिकं सौन्दर्यं तस्यालंकारैः कान्तिरुन्मीलति । न त्वसत्येव जायत इत्यर्थः । अत्र समाधिः । यथा काव्यप्रकाशे—'समाधिः सुकरं कार्यं कारणान्तरयोगतः' ॥

राजा—

एतस्यास्तावदेवम् ।

वर्तत इति शेषः ।

लावण्यं नवजात्यकाञ्चननिभं नेत्रयोर्दीर्घत्वं
कर्णाभ्यां स्खलितं कपोलफलकौ द्विखण्डचन्द्रोपमौ ।
एषा पञ्चशरेण सज्जितधनुर्दण्डेन रक्ष्यते
येन शोषणमोहनप्रभृतयो विध्यन्ति मां मार्गणाः ॥

द्विधाभूतचन्द्रशकलद्वयनिभाविति द्विखण्डेत्यस्यार्थः । यथोद्यानवाटिकारक्षकस्तत्पुष्पफलादिजिघृक्षया तद्द्रष्टारं हन्ति तथेति वस्तुनोपमा व्यज्यते । शोषणेनान्ये गात्रजा मोहनेनान्या मानसाश्च विकारा उपलक्षिताः । मोहस्तु रसकलिकायाम्—'मोहस्तु मूर्छनं भीतिर्दुःखवेगानुचिन्तनैः । तत्राज्ञानभ्रमापातघूर्णनादर्शनादयः ॥' इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—(विहस्य ।) जाणे रत्थाए लोट्टदि से सोहारअणं ।

**राजा**—(विहस्य ।) पिअवअस्स, कधेमि दे ।

अंगं चंगं णिअगुणगणालंकिदं कामिणीणं
पच्छाअंती उण तणुसिरिं भादि णेवच्छलच्छी ।
इत्थं जाणं अवअवगदा कावि सुंदेरमुद्दा
मण्णे ताणं वलइदधणू णिच्चभिच्चो अणंगो ॥ ३३ ॥

अवि अ । एदाए

तहा रमणवित्थरो जह ण ठाइ कंचीलदा
तहा अ थणतुंगिमा जह ण एइ णाहिं मुहं ।
तहा णअणबंहिमा जह ण किंपि कण्णुप्पलं
तहा अ मुहमुज्जलं दुससिणी जहा पुण्णिमा ॥ ३४ ॥

---

**विदूषकः**—

जाने रथ्यायां लुठत्यस्याः शोभारत्नम् ।

रथ्यामध्यस्थितरत्नवदखिलजनरञ्जकमित्यर्थः ।

**राजा**—

प्रियवयस्य, कथयामि ते ।

अङ्गं चङ्गं निजगुणगणालंकृतं कामिनीनां
प्रच्छादयन्ती पुनस्तनुश्रियं भाति नेपथ्यलक्ष्मीः ।
इत्थं यासामवयवगता कापि सौन्दर्यमुद्रा
मन्ये तासां वलयितधनुर्नित्यभृत्योऽनङ्गः ॥

अवयवगतेति सर्वाङ्गव्यापि सौन्दर्यमुक्तम् । नित्यभृत्य इति । भृत्यो यथा भर्त्राज्ञामन्तरेणापि तदाशयमेव विज्ञाय कार्यं कुरुते तथा कामिनीकटाक्षमात्रेणैव कामिनो वशीकरोति काम इत्युत्प्रेक्षयोपमा ध्वन्यते । अत्र सारः । स यथा काव्यप्रकाशे—'उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ।' इति ॥

आपि च । एतस्याः

तथा रमणविस्तरो यथा न तिष्ठति काञ्चीलता
तथा च स्तनतुङ्गिमा यथा नैति नाभिं मुखम् ।
तथा नयनबंहिमा यथा न किमपि कर्णोत्पलं
तथा च मुखमुज्ज्वलं द्विशशिनी यथा पूर्णिमा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—अज्ज कविंजल, पुच्छिअ जाण का एसा त्ति।

**विदूषकः**—(तां प्रति।) एहि मुद्धमुहि, उअविसिअ णिवेदेहि का तुमं त्ति।

**राजा**—आसणमिमीए।

**विदूषकः**—एदं मे उत्तरीअं आसणं।

(विदूषकनायिके वस्त्रदानोपवेशने नाटयतः।)

**विदूषकः**—भोदि, संपदं कहिज्जदु।

**नायिका**—अत्थि एत्थ वच्छोमं णाम णअरं कुंतलेसु। तहिं सअलजणवल्लहो वल्लहराओ णाम राआ।

**देवी**—(स्वगतम्।) जो मह माउसिआए पई होई।

---

न किमपीति न शोभावहमित्यर्थः। क्वचित् 'बुड्डिमा' इति पाठः। क्वचिच्च 'वड्डिमा' इति। तदुभयमप्यप्रमाणम्। 'वृद्धवृत्तशब्दाभ्याम्' इति वृः क्वचिददृष्टत्वात्। द्विशशिनीति 'नद्यृतश्च' इति न कप्। अनित्यत्वात्। अद्भुतोपमया वपुषः परमाह्लादकत्वं ध्वन्यते। चरणत्रयेऽतिशयोक्तिहेतू। चतुर्थे तूपमायाः कृतत्वात्प्रक्रमभङ्गः 'तहा अ मुहमुज्जलं जह ण उज्जलं कंचणं' इति पठित्वा समाधेयः॥

**देवी**—

आर्य कपिञ्जल, पृष्ट्वा जानीहि कैषेति।

**विदूषकः**—

एहि मुग्धमुखि, उपविश्य निवेदय का त्वमिति।

तां नायिकाम्। मुग्धं सुन्दरम्।

**राजा**—

आसनमस्यै।

**विदूषकः**—

एतन्म उत्तरीयमासनम्।

**विदूषकः**—

भवति, सांप्रतं कथ्यताम्।

**नायिका**—

अस्त्यत्र विदर्भ नाम नगरं कुन्तलेषु। तत्र सकलजनवल्लभो वल्लभराजो नाम राजा।

**देवी**—

यो मम मातृष्वसुः पतिर्भवति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नायिका**—तस्स घरिणी ससिप्पहा णाम ।

**देवी**—(स्वगतम् ।) सा वि मे माउस्सिआ ।

**नायिका**—तेहिं अहं उप्पण्णेत्ति ।

**देवी**—(स्वगतम् ।) ण हु ससिप्पहागब्भुप्पत्तिमंतरेण ईदिसी रूअरेहा होदि । ण हु वेडुलिअभूमिगब्भुप्पत्तिमंतरेण वेडुलिअमणिसलाआ णिप्पज्जइ । (प्रकाशम् ।) णं तुमं कप्पूरमंजरी ।

(नायिका सलज्जमधोमुखी तिष्ठति ।)

**देवी**—एहि बहिणिए, आलिंगेसु मं । (इति परिष्वजते ।)

**कर्पूरमञ्जरी**—अज्जे, कप्पूरमंजरीए एसो पढमो पणामो ।

**देवी**—अज्ज भैरवाणंद, तुह प्पसादेण अपुव्वं संविहाणअं अणुहविदं कप्पूरमंजरीदंसणेण । ता चिट्ठदु दाव एसा पंचदसदिअहाइं । पच्छा झाणविमाणेण णइस्सध ।

---

**नायिका**—

तस्य गृहिणी शशिप्रभा नाम ।

**देवी**—

सापि मे मातृष्वसा ।

**नायिका**—

ताभ्यामहमुत्पन्नेति ।

**देवी**—

न खलु शशिप्रभागर्भोत्पत्तिमन्तरेणेदृशी रूपरेखा भवति । न खलु वैदूर्यभूमिगर्भोत्पत्तिमन्तरेण वैदूर्यमणिशलाका निष्पद्यते । ननु त्वं कर्पूरमञ्जरी ।

**देवी**—

एहि भगिनिके, आलिङ्गय माम् ।

**कर्पूरमञ्जरी**—

आर्ये, कर्पूरमञ्जर्या एष प्रथमः प्रणामः ।

प्रथम इत्येतावन्तं कालमदृष्टत्वात्प्रणामस्य प्राथम्यमुक्तम् ।

**देवी**—

आर्य भैरवानन्द, तव प्रसादेनापूर्वं संविधानकमनुभूतं कर्पूरमञ्जरीदर्शनेन । तत्तिष्ठतु तावदेषा पञ्चदशदिवसानि । पश्चाद्ध्यानविमानेन नेष्यथ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भैरवानन्दः**—जं भणादि देई।

**विदूषकः**—(राजानमुद्दिश्य।) भो वअस्स, अह्मे परं दुए वि बाहिरा एत्थ। जदो एदाणं मिलिदं कुटुम्बं बट्टदि। जदो इमीए दुओ वि बहिणिआओ। भैरवाणंदो उण एदाणं संजोअअरो अच्चिदो मण्णिदो अ। एसा वि महीअलसरस्सई अ कुट्टणी देहंतरेण देवी जेव्व।

**देवी**—विअक्खणे, णिअजेट्ठबहिणिअं सुलक्खणं भणिअ भैरवाणंदस्स हिअअट्ठिआ सपज्जा कादव्वा।

**विचक्षणा**—जं देवी आणवेदि।

**देवी**—(राजानं प्रति।) अज्जउत्त, पेसिहि मं, जेण अहं बहिणाए एदावत्थाए णेवच्छलच्छीलीलाणिमित्तं अंतेउरं गमिस्सं।

---

संविधानकमुपचारः। ध्यानलब्धं विमानं ध्यानविमानम्। नेष्यथेति पूजायां बहुवचनम्।

**भैरवानन्दः**—

यद्भणति देवी।

**विदूषकः**—

भो वयस्य, आवां परं द्वावपि बाह्यावत्र। यत एतासां मिलितं कुटुम्बकं वर्तते। यत इमे द्वे अपि भगिन्यौ। भैरवानन्दः पुनरेतयोः संयोगकरोऽर्चितो मानितश्च। एषापि महीतलसरस्वती च कुट्टनी देहान्तरेण देव्येव।

यथा राज्ञी पूजिता तथेयमपीति सोल्लुण्ठम्।

**देवी**—

विचक्षणे, निजज्येष्ठभगिनिकां सुलक्षणां भणित्वा भैरवानन्दस्य हृदयेप्सिता सपर्या कर्तव्या।

हृदयस्थितेति वार्थः। तदा यथाभिलषितमित्यर्थः।

**विचक्षणा**—

यद्देवी आज्ञापयति।

**देवी**—

आर्यपुत्र, प्रेषय माम्, येनाहं भगिन्या एतदवस्थाया नेपथ्यलक्ष्मीलीलानिमित्तमन्तःपुरं गमिष्यामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—जुज्जादि चंपअलदाए कत्थूरिआकप्पूरेहिं आलवालपरिपूरणं।

(नेपथ्ये)

**वैतालिकयोरेकः**—सुहाअ संझा भोदु देवस्स।

एदं वासरजीवपिंडसरिसं चंडंसुणो मंडलं
को जाणादि कहिं पि संपदि गदं एतम्मि कालंतरे।
जादा किं च इअं पि दीहविरहा सोएण णाहे गदे
मुच्छामुद्दिदलोअणे व्व णालिणी मीलंतपंकेरुहा॥ ३५॥

**द्वितीयः**—

उग्घाडीअंति लीलामणिमअवलहीचित्तभित्तीणिवेसा
पल्लंका किंकरीहिं रिदुसमअसुहा वित्थरिज्जंति झंति।
सेरंधीलोलहत्थंगुलिचलणवसा पट्टनादो पउट्टो
हुंकारो मंडपेसुं विलसदि महुरो रुट्ठतुट्ठंगणाणं॥ ३६॥

---

**राजा**—

युज्यते चम्पकलतायाः कस्तूरीकर्पूरैरालवालपरिपूरणम्।

अवश्यमस्या नेपथ्यं कर्तव्यमित्यर्थः। समासोक्तिरत्र। सा यथा काव्यप्रकाशे—'परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः' इति।

**वैतालिकः**—

सुखाय संध्या भवतु देवस्य।

एतद्वासरजीवपिण्डसदृशं चण्डांशोर्मण्डलं
को जानाति क्वापि संप्रति गतमेतस्मिन्कालान्तरे।
जाता किं चेयमपि दीर्घविरहा शोकेन नाथे गते
मूर्छामुद्रितलोचनेव नलिनी मीलत्पङ्केरुहा॥

दिवसस्य प्राणतुल्यमिति वासरेत्याद्यर्थः। कालान्तरे सायंसमये। अत्रोत्प्रेक्षा। भवद्दर्शनात्संजातमदना कर्पूरमञ्जरीति समासोक्तिश्च। नायिकाधर्माणां नलिन्यामारोपितत्वात्समाधिरपि॥

**द्वितीयः**—

उद्घाट्यन्ते लीलामणिमयवलभीचित्रभित्तिनिवेशाः
पर्यङ्काः किंकरीभिः ऋतुसमयसुखा विस्तार्यन्ते झटिति।
सैरन्ध्रीलोलहस्ताङ्गुलिचलनवशात्पट्टनादः प्रवृत्तो
हुंकारो मण्डपेषु विलसति मधुरो रुष्टतुष्टाङ्गनानाम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—अह्मे वि संझं वंदिदुं गमिस्सामो ।

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमं जवनिकान्तरम् ।

---

लीलार्थं मणिमय्यो वलभ्यश्च चित्रभित्तिनिवेशाश्चेति विग्रहः । चित्रभित्तिनिवेशाश्चित्रगृहाः । ते उद्घाट्यन्ते । अभिसारिकाद्यभिसारणार्थम् । किंकरीभिर्दासीभिः । ऋतुः प्रस्तुतो वसन्तः । सैरन्ध्री प्रसाधिका । पट्टो मृदङ्गः । हस्तेत्येतावतैव सिद्धेऽर्थेऽङ्गुलिपदं तासां वाद्यवादनकौशलसूचनाय । [आद्यपदेनाभिसारिकाद्या उपक्षिप्ता नायिकाः ।] रुष्टतुष्टेत्यनेन कलहान्तरितास्ता इति ध्वनितम् ॥

**राजा**—

वयमपि संध्यां वन्दितुं गमिष्यामः ।

इति श्रीमद्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वकुन्दप्रतिमयशःप्रकरप्रखरकठोरकिरणकरप्रभप्रतिभप्रभाकरभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरीप्रकाशे प्रथमं जवनिकान्तरं समाप्तम् ।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वितीयं जवनिकान्तरम् ।

(ततः प्रविशति राजा प्रतीहारी च ।)

**प्रतीहारी**—(परिक्रामितकेन ।) इदो इदो महाराओ ।

**राजा**—(कतिचित्पदानि गत्वा, तामनुसंधाय ।) तहिं खु अवसरे

ण ट्ठाणाहिं तिलंतरं वि चलिदा सुत्था णिअम्बत्थली
थोउव्वेल्लबलीतरंगमुअरं कंठो तिरच्छि ट्ठिदो ।
वेणीए उण आणणेंदुवलणे लद्धं थणालिंगणं
जादा तीअ चउव्विहा तणुलदा णिज्झाअअंतीअ मं ॥ १ ॥

**प्रतीहारी**—(स्वगतम् ।) कधं अज्ज वि सो ज्जेव्व तालीपत्तसंचओ, ताओ व्विअ अक्खरपंतीओ । ता वसंतवण्णणेण सिढिलआमि से तग्गदं

---

**प्रतीहारी**—
इत इतो महाराजः ।
आयात्विति शेषः ।
**राजा**—
गत्वेत्यनन्तरमाह स्मेति शेषः ।
तस्मिन्खल्ववसरे

न स्थानात्तिलान्तरमपि चलिता स्वस्था नितम्बस्थली
स्तोकोद्वेल्लद्वलीतरङ्गमुदरं कण्ठस्तिर्यक्स्थितः ।
वेण्या पुनराननेन्दुवलने लब्धं स्तनालिङ्गनं
जातास्तस्याश्चतुर्विधा तनुलता निध्याययन्त्या माम् ॥

अत्र स्मृतिः । तल्लक्षणं साहित्यदर्पणे—'सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नयनादिकृत् । स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥' परिकरोऽलंकारः । तल्लक्षणमुक्तं वृद्धैः—'विशेषणसाभिप्रायत्वे परिकरः' इति । अत्र च स्थलीतरङ्गादिविशेषणानां तथात्वमूह्यम् । रूपकं चात्र । तल्लक्षणमुक्तं मम्मटेन—'तद्रूपकमभेदो य उपमानोपमेययोः ।' इति । न स्थानात्तिलान्तरमपीत्यनेन नितम्बस्य गरिमातिशयो ध्वन्यते । वलीतरङ्गमित्यनेन स्वच्छतातिशयो व्यज्यते । तनुलतेत्यनेन च कार्श्यचापल्यशैत्यादिलतागुणवत्त्वं वपुषो ध्वन्यते ।

**प्रतीहारी**—
कथमद्यापि स एव ताडीपत्रसंचयः, ता एवाक्षरपङ्क्तयः । तद्वसन्तवर्णनेन शिथिलयाम्यस्य तद्गतं हृदयावेगम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिअआवेअं । (प्रकाशम् ।) दिट्ठिं देउ महाराओ ईसीसि जरठाअमाणे कुसुमाअरम्मि ।

मूलाहिंतो परहुअवहूकंठमुद्दं दलंता
देंता दीहं महुरिमगुणं जप्पिए छप्पआणम् ।
संचारंता विरहिसु णवं पंचमं किंच राअं
राउम्मत्ता रइकुलघरा वासरा वित्थरंति ॥ २ ॥

**राजा**—(तदेवाकर्ण्य सानुरागम् ।)

अत्थाणीजणलोअणाण बहला लावण्णकल्लोलिणी
लीलाविब्भममहासवासणअरी सोहग्गपालिट्ठिआ ।

---

आवेगशब्देन यद्यपि सर्वथा नास्य तन्मनस्कता निराकर्तुं शक्यते, तथापि विषयान्तरसंचारेण किंचिच्छिथिलयामीति चोच्यते ।

**दिट्ठिमिति** ।

दृष्टिं ददातु महाराज ईषदीषज्जरठायमाणे कुसुमाकरे ।

कुसुमानामाकर उत्पत्तिस्थानमित्यर्थः । कुसुमानामाकरः समूहो यस्मिन्निति वा । कुसुमैराकर इति वा । 'आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते ।' इति विश्वः ।

**मूलेति** ।

मूलात्प्रभृति परभृतवधूकण्ठमुद्रां दलन्तो
ददतो दीर्घं मधुरिमगुणं जल्पिते षट्पदानाम् ।
संचारयन्तो विरहिषु नवं पञ्चमं किंचिद्रागं
रागोन्मत्ता रतिकुलगृहा वासरा विस्तीर्यन्ते ॥

परभृतवध्वः कोकिलस्त्रियः । परभृता वध्व इवेति वा । पक्षद्वयेऽपि संभोगशृङ्गारो व्यङ्ग्यः । मधुरिमैव गुणः । मधुरिम्णा गुणविशेष इति वा । तेन दुःसहत्वे च तेषां तस्य भावादिति भावः(?) । 'पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ।' किंचिद्रागमिति पञ्चममित्यस्य विशेषणम् । किंचिद्रागो यस्यां क्रियायामिति यथा भवति तथेति क्रियाविशेषणं वा । रतयः संभोगास्तेषां कुलं समूहस्तस्य गृहाः स्थानानीत्यर्थः । यद्वा रतिकुलस्य प्रीतिसमुदायस्य गृहाः स्थानानि । तज्जनकत्वादित्याशयः ।

**राजा**—

आस्थानीजनलोचनानां बहला लावण्यकल्लोलिनी
लीलाविभ्रममहासवासनगरी सौभाग्यपारस्थिता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णेत्तेंदीवरदीहिआ मह पुणो सिंगारसंजीअणी
संजादा अह मम्महेण धणुहे तिक्खो सरो पुंखिदो ॥ ३ ॥

(सोन्मादमिव ।) दंसणक्खणादो पहुदि कुरंगच्छी
चित्ते चिहुट्टादि ण खुट्टदि सा गुणेसु
सेज्जासु लोट्टादि विसप्पदि दिम्मुहेसु ।
बोल्लम्मि वट्टादि पअट्टदि कव्वबन्धे
झाणेण तुट्टदि चिरं तरुणी तरट्टी ॥ ४ ॥

अवि अ ।

जे तीअ तिक्खचलचक्खुतिहाअदिट्ठा
ते कामचंदमहुपंचममारणिज्जा ।

---

नेत्रेन्दीवरदीर्घिका मम पुनः शृङ्गारसंजीविनी
संजाताथ मन्मथेन धनुषि तीक्ष्णः शरः पुङ्खितः ॥

लावण्यकल्लोलिनीत्यनेन प्रतिक्षणं सौन्दर्यातिशयवृद्धिर्व्यज्यते । वासनगरीत्यनेन क्षणमपि तद्विच्छेदाभावो ध्वन्यते । तीक्ष्ण इत्यनेन पूर्वमपि शरसंधानमासीदेव, इदानीं त्वतिदुःसहं तदेतादृशशरविस्तारणा द्योत्यते ।

**सोन्मादमिति** । उन्मादलक्षणं शृङ्गारतिलके—'श्वासप्ररोदनोत्कम्पवसुधोल्लेखनैरपि । व्यापारो जायते यत्र स उन्मादः स्मृतो यथा ॥' इति । साहित्यदर्पणेऽपि—'चित्तस्य भ्रम उन्मादः कामशोकभयादिभिः । अस्थानहासरुदितगीतप्रलपनादिकृत् ॥' इति ।

**दंसणेति** ।

दर्शनक्षणात्प्रभृति कुरङ्गाक्षी
चित्ते लगति न क्षीयते सा गुणेषु
शय्यायां लुठति विसर्पति दिङ्मुखेषु ।
वचने वर्तते प्रवर्तते काव्यबन्धे
ध्यानेन त्रुट्यति चिरं तरुणी चलाक्षी ॥

अपि च ।

ये तया तीक्ष्णचलचक्षुस्त्रिभागदृष्टा-
स्ते कामचन्द्रमधुपञ्चममारणीयाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जेसुं पुणो णिवडिदा सअला वि दिट्ठी
वट्टंति ते तिलजलंजलिदाणजोग्गा ॥ ९ ॥

(सस्मरणमिव ।) अवि अ ।

अग्गम्मि भिंगसरणी णअणाण तीए
मज्झे पुणो कढिददुद्धतरंगमाला ।
पच्छा अ से सरदि तंसणिरीक्खिदेसु
आअण्णमंडलिअचावधरो अणंगो ॥ ६ ॥

(विचिन्त्य ।) कधं चिरअदि पिअवअस्सो ।

(प्रविश्य विदूषको विचक्षणा च परिक्रामतः ।)

**विदूषकः**—अइ विअक्खणे, सव्वं सच्चं एदं ।

**विचक्षणा**—सव्वं सच्चअरं ।

**विदूषकः**—णाहं पत्तिज्जामि, जदो परिहाससीला क्खु तुमं ।

---

येषु पुनर्निपतिता सकलापि दृष्टि-
र्वर्तन्ते ते तिलजलाञ्जलिदानयोग्याः ॥

मधुर्वसन्तः । स्मृतिलक्षणमुक्तम् ।

अपि च ।

अग्रे भृङ्गसरणिर्नयनयोस्तस्या
मध्ये पुनः क्वथितदुग्धतरङ्गमाला ।
पश्चाच्च तस्याः सरति तिर्यङ्निरीक्षितेषु
आकर्णमण्डलितचापधरोऽनङ्गः ॥

तद्वक्रनिरीक्षणादनु मदनकृतविमनस्कतावश्यं भवतीति भावः । अयं च कविनिबद्धवक्तृप्रौढोक्तिसिद्धो ध्वनिः ।

कथं चिरयति प्रियवयस्यः ।

**विदूषकः**—

अयि विचक्षणे, सर्वं सत्यमिदम् ।

**विचक्षणा**—

सर्वं सत्यतरम् ।

**विदूषकः**—

नाहं प्रत्येमि, यतः परिहासशीला खलु त्वम् ।

कदाचिदयमपि परिहास एव भवेदिति भावः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा**—अज्ज, मा एव्वं भण । अण्णो वक्करुत्तिकालो, अण्णो कज्जविआरकालो ।

**विदूषकः**—(पुरोऽवलोक्य ।) एसो पिअवअस्सो हंसो विअ विमुक्कमाणसो, करी विअ मअक्खामो, मुणालदण्डो विअ घणघम्ममिलाणो, दिणदीओ विअ विअलिअच्छाओ, पभादपुण्णिमाचंदो विअ पंडुरपरिक्खीणो चिट्ठदि ।

**उभे**—(परिक्रम्य ।) जअदु जअदु महाराओ ।

**राजा**—वअस्स, कधं उण विअक्खणाए मिलिदो सि ।

**विदूषकः**—अज्ज विअक्खणा मए सह संधिं कादुं आअदा । किदसंधीए इमीए सह मंतअंतस्स एत्तिआ वेला लग्गा ।

**राजा**—संधिकरणस्स किं फलं ।

---

**विचक्षणा**—

आर्य, मैवं भण । अन्यो वक्रोक्तिकालः, अन्यः कार्यविचारकालः ।

तथा च नेदं सर्वमसत्यमिति भावः ।

**विदूषकः**—

एष प्रियवयस्यो हंस इव विमुक्तमानसः, करीव मदक्षामः, मृणालदण्ड इव घनघर्मम्लानः, दिनदीप इव विगलितच्छायः, प्रभातपूर्णिमाचन्द्र इव पाण्डुरपरिक्षीणस्तिष्ठति ।

विमुक्तमानस उद्विग्नमनाः । हंसपक्षे विमुक्तं त्यक्तं मानसं सरो येनेत्यर्थः । हंसोपमानेन पाण्डुरतातिशयोऽस्य द्योत्यते । पाण्डुरश्च परिक्षीणश्चेत्यर्थः ।

**उभे**—

जयतु जयतु महाराजः ।

**राजा**—

वयस्य, कथं पुनर्विचक्षणया मिलितोऽसि ।

**विदूषकः**—

अद्य विचक्षणा मया सह संधिं कर्तुमागता । कृतसंध्यैतया सह मन्त्रयमाणस्यैतावती वेला लग्ना ।

**राजा**—

संधिकरणस्य किं फलम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—एसा अहिमदजणपेसिदा लेहहत्था णं विअक्खणा आअदा ।

**राजा**—(गन्धं सूचयित्वा ।) केदईकुसुमगन्धो विअ आआदि ।

**विचक्षणा**—केदईदललेहो एव्व एसो मह हत्थे ।

**राजा**—महुसमये किं केदईकुसुमं ।

**विचक्षणा**—भैरवाणंददिण्णमंतप्पहावेण देवीभवणुज्जाणे केदईलदाए एक्को दाव प्पसवो दंसिदो । तस्स ताए देवीए दलसंपुडेहिं अज्ज हिंदोलअप्पभंजणीए चउत्थीए हरवल्लहा देवी अच्चिदा । अण्णं च दलसंपुडजुअलं उण कणिट्ठबहिणीआए कप्पूरमंजरीए प्पसादीकिदं । तीए वि एक्केण दलसंपुडेण भअवदी गोरी जेव्व अच्चिदा । अण्णं च ।

केदईकुसुमपत्तसंपुडं पाहुडं तुअ सहीअ पेसिदं ।
एणणाहिमसिवण्णसोहिणा तं सिलोअजुअलेण लंछिदं ॥ ७ ॥

(इति लेखमर्पयति ।)

---

**विदूषकः**—
एषाभिमतजनप्रेषिता लेखहस्ता ननु विचक्षणा आगता ।
इदमेव संधिफलमित्याशयः ।
**राजा**—
केतकीकुसुमगन्ध इवायाति ।
**विचक्षणा**—
केतकीदललेख एवैष मम हस्ते ।
तस्यैष गन्ध इत्याशयः ।
**राजा**—
मधुसमये किं केतकीकुसुमम् ।
**विचक्षणा**—
भैरवानन्ददत्तमन्त्रप्रभावेण देवीभवनोद्याने केतकीलतयैकस्तावत्प्रसवो दार्शितः । तस्य तया देव्या दलसंपुटैरद्य हिन्दोलकप्रभञ्जन्यां चतुर्थ्यां हरवल्लभा देवी अर्चिता । अन्यच्च दलसंपुटयुगलं पुनः कनिष्ठभगिन्यै कर्पूरमञ्जर्यै प्रसादीकृतम् । तयाप्येकेन दलसंपुटेन भगवती गौर्येवार्चिता । अन्यच्च ।

केतकीकुसुमपत्रसंपुटं प्राभृतं तव सख्या प्रेषितम् ।
एणनाभिमषीवर्णशोभिना तच्छ्लोकयुगलेन लाञ्छितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(प्रसार्य वाचयति ।)

हंसिं कुंकुमपंकपिंजरतणुं काऊण जं वंचिदो
तब्भत्ता किल चक्कवाअघरिणी एसत्ति मण्णंतओ ।
एदं तं मह दुक्किदं परिणदं दुक्खाण सिक्खावणं
एक्कत्थो वि ण जासि जेण विसअं दिट्ठीतिहाअस्स वि ॥ ८ ॥

(द्वित्रिर्वाचयित्वा ।) एदाइं ताइं मअणरसाअणक्खराइं ।

**विचक्षणा**—दुदीओ उण मए पिअसहीए अवत्थाणिवेदओ कदुअ सिलोओ लिहिदो एत्थ । तं वाचेदु महाराओ ।

**राजा**—(वाचयति ।)

सह दिअहणिसाइं दीहरा सासदंडा
सह मणिवलएहिं वाहधारा गलंति ।
सुहअ तुअ विओए तेअ उव्वेअणीए
सह अ तणुलदाए दुब्बला जीविदासा ॥ ९ ॥

---

**राजा**—

हंसीं कुङ्कुमपङ्कपिञ्जरतनुं कृत्वा यद्वञ्चित-
स्तद्भर्ता किल चक्रवाकगृहिण्येषेति मन्यमानः ।
एतत्तन्मम दुष्कृतं परिणतं दुःखानां शिक्षकं
एकस्थोऽपि न यासि येन विषयं दृष्टित्रिभागस्यापि ॥

एतानि तानि मदनरसायनाक्षराणि ।

**विचक्षणा**—

द्वितीयः पुनर्मया प्रियसख्या अवस्थानिवेदकः कृत्वा श्लोको लिखितोऽत्र । तं वाचयतु महाराजः ।

**राजा**—

सह दिवसनिशाभ्यां दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति ।
सुभग तव वियोगे तस्या उद्वेगिन्या
सह च तनुलतया दुर्बला जीविताशा ॥

श्वासदण्डा इत्यनेन निःश्वासप्राचुर्यं व्यज्यते । इयं च सहोक्तिः । तल्लक्षणमुक्तं वृद्धैः—'सहभावकथनं सहोक्तिः' इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा**—एत्थ जेव्व एदाए अवत्थाए मह जेट्ठबहिणिआए सुलक्खणाए उग्गाविआए भविअ सिलोओ किदो, तं महाराओ सुणादु । (पठति ।)

णीसासाहारलट्ठीसरिसपसरणा चंदणं फोडकारी
चंदो देहस्स दाहो सुमरणसरिसी हाससोहा मुहम्मि ।
अंगाणं पंडुभाओ दिअहससिकलाकोमलो किं च तीए
णिच्चं बाहप्पवाहा तुह सुहअ किदे होंति कुल्लाहिं तुल्ला ॥ १० ॥

**राजा**—(निःश्वस्य ।) किं भणीअदि । सुकइत्तणे तुह जेट्ठबहिणिआ क्खु एसा ।

**विदूषकः**—एसा विअक्खणा महीअलसरस्सई । एदाए जेट्ठबहिणिआ तिहुअणसरस्सई । ता एदाहिं समं पाडिसिद्धं ण करिस्सं । किं उण पिअवअस्सपुरदो मअणावत्थं अत्तणो उच्चिदेहिं अक्खरेहिं णिवेदेमि ।

---

**विचक्षणा**—

इहैवैतस्या अवस्थाया मम ज्येष्ठभगिन्या सुलक्षणया आदेशकारिण्या भूत्वा श्लोकः कृतः, तं महाराजः शृणोतु ।

**णीसासेति**—

निःश्वासा हारयष्टिसदृशप्रसरणाश्चन्दनः स्फोटकारी
चन्द्रो देहस्य दाहः स्मरणसदृशी हासशोभा मुखे ।
अङ्गानां पाण्डुभावो दिवसशशिकलाकोमलः किं च तस्या
नित्यं बाष्पप्रवाहास्तव सुभग कृते भवन्ति कुल्याभिस्तुल्याः ॥

स्मरणसदृशी तदभिव्यञ्जिकेत्यर्थः । दिवसशशिकलासाम्येन निष्प्रभत्वमङ्गानामभिव्यज्यते ।

**राजा**—

किं भण्यते । सुकवित्वे तव ज्येष्ठभगिनिका खल्वेषा ।

**विदूषकः**—

एषा विचक्षणा महीतलसरस्वती । एतस्या ज्येष्ठभगिनिका त्रिभुवनसरस्वती । तदेताभ्यां समं प्रतिस्पर्धा न करिष्यामि । किं पुनः प्रियवयस्यपुरतो मदनावस्थामात्मन उचितैरक्षरैर्निवेदयामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—पढ। एदं पि सुणीअदि ।

**विदूषकः**—

परं जोह्ना उह्ना गरलसरिसो चंदणरसो
खदक्खारो हारो रअणिपवणा देहतवणा ।
मुणाली बाणाली जलदि अ जलद्दा तणुलदा
वरिट्ठा जं दिट्ठा कमलवअणा सा सुणअणा ॥ ११ ॥

**राजा**—वअस्स, तुमं पि थोएण चंदणरसेण समालहिस्ससि। ता कहेहि तग्गदं किंपि वुत्तंतं । अध अंतेउरं णइअ देवीए किं कदं तीस ।

**विदूषकः**—विअक्खणे, किं कदं कहेहि ।

**विचक्षणा**—देव, मंडिदा टिक्किदा भूसिदा तोसिदा अ ।

---

मदनावस्थामित्यनन्तरं तस्या इति शेषः ।

**राजा**—

पठ। एतदपि श्रूयते ।

**विदूषकः**—

परं ज्योत्स्ना उष्णा गरलसदृशश्चन्दनरसः
क्षतक्षारो हारो रजनिपवना देहतपनाः ।
मृणाली बाणाली ज्वलति च जलार्द्रा तनुलता
वरिष्ठा यद्दृष्टा कमलवदना सा सुनयना ॥

क्षते क्षार इवेत्यर्थः । तस्यात्यन्तदुःसहत्वात् । रजनिपवना इत्यनेन तेषामतिशीतलत्वं व्यङ्ग्यम् । देहे तपना इवेत्यर्थः । अत्यन्तदाहकत्वात्। बाणालीवेत्यर्थः । अत्यन्तखेदप्रदत्वात्। अत्रोपमोत्प्रेक्षारूपकादयोऽर्थालंकाराः । छेकलाटानुप्रासादयश्च शब्दालंकारा ऊह्याः । तल्लक्षणं चोक्तं प्राक् ।

**राजा**—

वयस्य, त्वमपि स्तोकेन चन्दनरसेन समालभ्यसे । तत्कथय तद्गतं किमपि वृत्तान्तम् । अथान्तःपुरं नीत्वा देव्या किं कृतं तस्याः ।

**विदूषकः**—

विचक्षणे, किं कृतं कथय ।

**विचक्षणा**—

देव, मण्डिता तिलकिता भूषिता तोषिता च ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—कधं विअ ।

**विचक्खणा**—

घणमुव्वट्टिदमंगं कुंकुमरसपंकपिंजरं तिस्सा ।

**राजा**—

रोसाअणं कुडं ता कंचणमअवालिआरूवम् ॥ १२ ॥

**विचक्खणा**—

मरगअमंजीरजुअं चरणे से लंभिआ वअस्साहिं ।

**राजा**—

भमिअमहोमुहपंकअजुअलं ता भमरमालाए ॥ १३ ॥

**विचक्खणा**—

राअसुअपिच्छणीलं पट्टंसुअजुअलअं णिअसिदा सा ।

---

**राजा**—

कथमिव ।

**विचक्षणा**—

घनमुद्वर्तितमङ्गं कुङ्कुमरसपङ्कपिञ्जरं तस्याः ।

**राजा**—

उज्ज्वलीकृतं तत्काञ्चनमयवालिकारूपम् ॥

रोसाअणमित्युज्ज्वलार्थे देशी । काञ्चनमयेत्यस्य प्रकृतिपीतमेव तद्रूपमिदानीं पीततरेण कुङ्कुमेनोद्वर्तनाच्छोभातिशयो जात इति भावः ।

**विचक्षणा**—

मरकतमञ्जीरयुगं चरणावस्या लम्भितौ वयस्याभिः ।

**राजा**—

भ्रामितमधोमुखपङ्कजयुगलं तद्भ्रमरमालया ॥

अस्याश्चरणौ मरकतमञ्जीरयुगं मरकतनूपुरयुगलं लम्भितौ प्रापितौ । तत्संबद्धौ कृताविति यावत् । भ्रमितेत्यादिना तच्चरणयुगलस्य पङ्कजयुगेन मञ्जीरयुगलस्य च भ्रमरमालया साम्यं प्रकटितम् ।

**विचक्षणा**—

राजशुकपिच्छनीलं पट्टांशुकयुगलकं निवसिता सा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा—**

कअलीकंदलिआ ता खरपवणविलोह्लिअदलग्गा ॥ १४ ॥

**विचक्षणा—**

तीए णिअंबफलए णिवेसिआ पंचराअमणिकंची ।

**राजा—**

कंचणसेलसिलाए ता बरिही कारिओ णच्चं ॥ १५ ॥

**विचक्षणा—**

दिण्णा वलआवलिओ करकमलपउट्ठणालजुअलम्मि ।

**राजा—**

ता भण कधं ण सोहइ विपरीअं मअणतूणीरम् ॥ १६ ॥

**विचक्षणा—**

कंठम्मि तीअ ठविदो छम्मासिअमोत्तिआण वरहारो ।

**राजा—**

सेवइ ता पंतीहिं मुहअंदं तारआणिअरो ॥ १७ ॥

---

**राजा—**

कदलीकन्दली तत्खरपवनविलोलितदलाग्रा ॥

एतावता तदूर्वोः कदलीकन्दल्या वसनस्य च तद्दलानां साम्यमुक्तम् ।

**विचक्षणा—**

तस्या नितम्बफलके निवेशिता पद्मरागमणिकाञ्ची ।

**राजा—**

काञ्चनशैलशिलायां तद्बर्ही कारितो नृत्यम् ॥

अनेन नितम्बस्य पीवरत्वेन काञ्चनशिलासाम्यं काञ्च्याश्च बर्हिसाम्यं प्रकाशितम् ।

**विचक्षणा—**

दत्ता वलयावल्यः करकमलप्रकोष्ठनालयुगे ।

**राजा—**

तद्भण कथं न शोभते विपरीतं मदनतूणीरम् ॥

**विचक्षणा—**

कण्ठे तस्याः स्थापितः षाण्मासिकमौक्तिकानां वरहारः ।

**राजा—**

सेवते तत्पङ्क्तिभिर्मुखचन्द्रं तारकानिकरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा—**

उभएसु वि सवणेसुं णिवेसिअं रअणकुंडलजुअं से ।

**राजा—**

ता वअणमम्महरहो दोहिँ वि चक्केहिँ चंकमिदो ॥ १८ ॥

**विचक्षणा—**

जच्चंजणजणिदपसाहणाइँ जादाइँ तीअ णअणाइ ।

**राजा—**

उप्पुंखिअ णवकुवलअसिलीमुहे पंचबाणस्स ॥ १९ ॥

**विचक्षणा—**

कुडिलालआणँ माला ललाडफलअग्गसंगिणी रइदा ।

**राजा—**

ता ससिबिंबस्सोवरि वट्टइ मज्झम्मि किसणसारंगो ॥ २० ॥

---

तारकानिकरः पङ्क्तिभिः श्रेणीभिः कृत्वा मुखचन्द्रं सेवते तदित्यन्वयः । तथा च मुक्ताहारस्य तारकानिकरोपमा व्यज्यते ।

**विचक्षणा—**

उभयोरपि श्रवणयोर्निवेशितं रत्नकुण्डलयुगं तस्याः ।

**राजा—**

तद्वदनमन्मथरथो द्वाभ्यामिव चक्राभ्यां चङ्क्रमितः ॥

चङ्क्रमितो युक्त इत्यर्थः । अत्र कुण्डलयुगलस्य चक्रद्वयसाम्यं द्योत्यते ।

**विचक्षणा—**

जात्याञ्जनजनितप्रसाधने जाते तस्या नयने ।

**राजा—**

उत्पुङ्खितौ नवकुवलयशिलीमुखौ पञ्चबाणस्य ॥

अत्रापि नयनयोर्नवकुवलयसाम्यमञ्जनस्य च भ्रमरसाम्यं ज्ञाप्यते । शिलीमुखाविव शिलीमुखाविति रूपकेण च कामिविह्वलत्वविधानसामर्थ्यं स्मरशरधर्मस्तत्राभिव्यज्यते । तीक्ष्णत्वं च नेत्रयोर्व्यङ्ग्यम् । उत्पुङ्खितौ सज्जितौ ।

**विचक्षणा—**

कुटिलालकानां माला ललाटफलकाग्रसङ्गिनी रचिता ।

**राजा—**

तच्छशिबिम्बस्योपरि वर्तते मध्ये कृष्णसारङ्गः ॥

शशिबिम्बसाम्यं वदनस्य कृष्णमृगसाम्यं चालकमालानामनेनोक्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा—**

घणसारतारणअणाइ गूढकुसुमोच्चओ चिउरभारो ।

**राजा—**

ससिराहुमल्लजुज्झं विअ दंसिअमेणणअणाए ॥ २१ ॥

**विचक्षणा—**

इअ देवीअ जहिच्छं पसाहणेहिं प्पसाहिदा कुमरी ।

**राजा—**

ता केलिकाणणमही विहूसिआ सुरहिलच्छीए ॥ २२ ॥

**विदूषकः**—देव, एदं परमत्थं विण्णवीअदि ।

जस्सा दिट्ठी तरलधवला कज्जलं तीअ जोग्गं
जा वित्थिण्णत्थणकलसिणी रेहए तीअ हारो ।
चक्काआरे रमणफलहे कोवि कंचीमरट्टो
जिस्सा तिस्सा उण वि भणिमो भूसणं दूसणं अ ॥ २३ ॥

---

**विचक्षणा—**

घनसारतारनयनाया गूढकुसुमोच्चयश्चिकुरभारः ।

**राजा—**

शशिराहुमल्लयुद्धमिव दर्शितमेणनयनायाम् ॥

कुसुमनिचयस्य चन्द्रसादृश्यम्, चिकुरकलापस्य च राहुसाम्यमभिव्यक्तीकृतम् । मल्लयुद्धमित्यनेन तयोः समबलत्वं तेन च तुल्यशोभत्वं ध्वन्यते ।

**विचक्षणा—**

इति देव्या यथेच्छं प्रसाधनैः प्रसाधिता कुमारी ।

**राजा—**

तत्केलिकाननमही विभूषिता सुरभिलक्ष्म्या ॥

केलीनां क्रीडानां काननं समूहस्तत्संबन्धिनी मही उत्पत्तिस्थानम् । तत्साम्यं कुमार्या वसन्तलक्ष्मीसाम्यं देव्या अनेन प्रकटितम् ।

**विदूषकः—**

देव, एतत्परमार्थं विज्ञाप्यते ।

यस्या दृष्टिस्तरलधवला कज्जलं तस्या योग्यं
या विस्तीर्णस्तनकलशिनी शोभते तस्या हारः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(पुनस्तामनुसंधाय ।)

तिवलिवलिअणाहीबाहुमूलेसु लग्गं
थणकलसणिअंबाडंबरेसूस्ससंतं ।
जलणिबिडमिमीए सिक्खणं ह्लाणपोत्तं
पिसुणदि तणुलट्ठीचंगिमं लंगिमं अ ॥ २४ ॥

**विदूषकः**—(सक्रोधमिव ।) भो, मए सव्वालंकारसहिदा वण्णिदा। तुमं उण जलविलुत्तप्पसाहणं जेव्व सुमरसि । ता किं ण सुदं देवेण ।

णिसग्गचंगस्स वि माणुसस्स सोहा समुम्मीलदि भूसणेहिं ।
मणीणँ जच्चाणँ वि कंचणेहिं विहूसणे सज्जदि कावि लच्छी ॥ २५ ॥

---

चक्राकारे रमणफलके कोऽपि काञ्च्याडम्बरो
यस्यास्तस्याः पुनरपि भणामो भूषणं दूषणं च ॥

यद्येतादृशं दृष्ट्यादि कान्तायास्तिष्ठति तदा भूषणाभावेऽपि शोभाविशेषः स्वाभाविकोऽत्रभावत एवेति नातिप्रयोजनवत्त्वाद्भूषणमपि दूषणमिव भवतीति दूषणभूषणयोः प्रयोजनाभावत्वेन साम्यम् । अथवा दूषणं भूषणमिव भवति । अयमर्थः—एतादृशदृष्ट्यादिमत्या असमीचीनवस्तुसंबन्धोऽपि भूषणतुल्य एव भवति । शोभाहतिकरत्वाभावात् । अत एव कविचूडामणिना भगवता कालिदासेनापि वर्णितम्—'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' इति ।

**राजा**—

त्रिवलिवलितनाभीबाहुमूलेषु लग्नं
स्तनकलशनितम्बाडम्बरेषूच्छ्वसत् ।
जलनिबिडमेतस्याः श्लक्ष्णं स्नानवस्त्रं
पिशुनयति तनुयष्टिचङ्गिमानं तारुण्यं च ॥

लंगिमं तारुण्यमिति देशी ।

**विदूषकः**—

भोः, मया सर्वालंकारसहिता वर्णिता । त्वं पुनर्जलविलुप्तप्रसाधनामेव स्मरसि । तत्किं न श्रुतं देवेन।

निसर्गचङ्गस्यापि मानुषस्य शोभा समुन्मीलति भूषणैः ।
मणीनां जात्यानामपि काञ्चनैर्विभूषणे सजति कापि लक्ष्मीः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा—**

मुद्धाणँ णाम हिअआइँ हरंति हंत
णेवच्छकप्पणगुणेण णिअंबिणीओ।
छेआ पुणो पकिदिचंगिमहाराणिज्जा
दक्खारसो ण महुरिज्जइ सक्कराए॥ २६॥

**विचक्षणा—**जधा देवेणादिट्ठं।

थोआणं थणआणँ कण्णकलिआलंघीणँ अच्छीणँ वा
भूचंदस्स मुहस्स कंतिसरिआसोत्तस्स गत्तस्स अ।
को णेवच्छकलाअ कीरदि गुणो जं तं बि सव्वं पिअं
संजुत्तं सुणु तत्थ कारणमिणं रूढीअ का खंडणा॥ २७॥

**राजा—**(विदूषकमुद्दिश्य।) सुपंजल कविंजल, एस सिक्खावीअसि।

---

**राजा—**

मुग्धानां नाम हृदयानि हरन्ति हन्त
नेपथ्यकल्पनगुणेन नितम्बिन्यः।
छेकाः पुनः प्रकृतिचङ्गिमभावनीया
द्राक्षारसो न मधुरीयति शर्करया॥

येषां हृदयानि नेपथ्यकल्पनगुणेन नितम्बिन्यो हरन्ति ते मुग्धा अविदग्धा एवेत्याशयः। ये पुनः प्रकृत्या स्वभावेन यश्चङ्गिमा सौन्दर्यं यासां नितम्बिनीनां ता भावयन्ति त एव विदग्धा इति भावः। द्राक्षारससाम्यं स्वभावसौन्दर्यस्य, शर्करासाम्यं भूषणानामुपदर्शितम्।

**विचक्षणा—**

यथा देवेनादिष्टम्।

स्थूलानां स्तनानां कर्णकलिकालङ्घिनोरक्ष्णोर्वा
भूचन्द्रस्य मुखस्य कान्तिसरित्स्रोतसो गात्रस्य च।
को नेपथ्यकलाभिः क्रियते गुणो यत्तदपि सर्वं प्रियं
संयुक्तं शृणु तत्र कारणमिदं रूढेः का खण्डना॥

रूढिर्योगमपहरतीति यथा रूढेर्योगापेक्षया प्राबल्यं तथा सहजसौन्दर्यस्यापीति भावः।

**राजा—**

सुप्राञ्जल कपिञ्जल, एष शिक्ष्यसे।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं कज्जं कित्तिमेण व्विरअणविहिणा सो णडीणं विडंबो
तं चंगं जं णिअंगं जणमणहरणं तेण सीमंतिणीओ ।
जस्सिं सव्वंगसंगो सअलगुणगणो सो अदंभो अलंभो
तस्सिं णेच्छंति काले परमसुहअरे किं पि णेवच्छलच्छीं ॥ २८॥

**विचक्षणा**—देव, एदं विण्णवीअदि—ण केवलं देवीए णिओएण तिस्सा अणुगदह्मि । तारामेत्तीए वि सहित्तणं पत्ता कप्पूरमंजरीए । तेण तक्कज्जसज्जा अहं पुणो वि ओलग्गाविअ भविअ णिवेदइस्सं ।

---

सुप्राञ्जलः सुसरलः । तथा च चातुर्यलेशोऽपि तव नास्तीति भावः ।

किं कार्यं कृत्रिमेण विरचनविधिना स नटीनां विडम्ब-
स्तच्चङ्गं यन्निजाङ्गं जनमनोहरणं तेन सीमन्तिन्यः ।
यस्मिन्सर्वाङ्गसङ्गः सकलगुणगणः सोऽदम्भोऽलभ्य-
स्तस्मिन्नेच्छन्ति काले परमसुखकरे कामपि नेपथ्यलक्ष्मीम् ॥

कृत्रिमभूषाभिर्नटीनामेवापाततः सौन्दर्यमुल्लसति न पुनः सीमन्तिनीनामित्यर्थः । यच्चङ्गं समीचीनं तदेव निजाङ्गं स्वस्याङ्गमाह्लादकमित्याह्लादकत्वविशिष्टाङ्गेऽङ्गमात्रवाचकाङ्गपदवाच्यसंक्रमादयमर्थान्तरसंक्रमितवाच्यो लक्षणामूलो ध्वनिः । तेन स्वाभाविकाङ्गसौन्दर्येणैव सीमन्तिन्यः कुलाङ्गना जनमनोहरणं भवन्तीत्यर्थः । यद्यपि जनमनोहरणमिति भिन्नलिङ्गवचनं पदं न सीमन्तिन्य इति पदस्य विशेषणत्वमर्हति, तथापि वस्तुपदाध्याहारेण योज्यम् । तस्य चाजहल्लिङ्गत्वान्न दोष इति ध्येयम् । अथवा जनमनोहरणमिति काकाक्षिगोलकन्यायेनोभयत्र संबध्यते । तथा च यन्निजाङ्गं स्वाभाविकाङ्गं चङ्गं तदेव जनमनोहरणं भवतीत्यर्थः । यदा पूर्वत्रैव संबध्यते तदा च तेन स्वाभाविकाङ्गचङ्गत्वेनैव सीमन्तिन्यो भवन्ति । तासामुत्तमसीमन्तिनीत्वं भवतीत्यर्थः । तथा च सीमन्तिनीपदवाच्यस्यैवोत्तमत्वविशिष्टे तस्मिन्संक्रमादत्राप्यर्थान्तरसंक्रमितवाच्यो ध्वनिः । यस्मिन्काले सकलः संपूर्णो गुणानां गणः समूहः सर्वाङ्गसङ्गः सर्वेष्वङ्गेषु सङ्गो यस्य तादृशः, अदम्भः न विद्यते दम्भो यत्रासावदम्भः स्वाभाविकः, अलभ्योऽप्राप्योऽस्ति, अथ च तस्मिन्काले सुखकरे कामपि नेपथ्यलक्ष्मीं नेच्छन्ति । विदग्धा इति शेषः। निजाङ्गमित्येकवचनेनैकमपि स्वाभाविकसुन्दरमङ्गं लोकहृदयहरणसमर्थं किमुत सर्वाङ्गाणीति ध्वन्यते । अत्र च नटीसीमन्तिन्योर्व्यतिरेकालंकारो व्यङ्ग्यः । छेकवृत्त्यनुप्रासालंकारावप्यत्र बोध्यौ तल्लक्षणं प्रागेवोक्तम् ।

**विचक्षणा**—

देव, एतद्विज्ञाप्यते—न केवलं देव्या नियोगेन तस्या अनुगतास्मि । तारामैत्र्यापि सखीत्वं प्राप्ता कर्पूरमञ्जर्याः । तेन तत्कार्यासक्ताहं पुनरपि सेवकीभूय निवेदयिष्यामि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिस्सा दाव परिक्खणत्थ णिहिदो हत्थो थणुत्थंगदो
डाहुड्डामरिदो सहीहिँ बहुसो हेलाअ कड्डिज्जदि।
किं तेणावि इमं णिसामअ गिरं संतोसिणिं तासिणिं
हत्थच्छत्तणिवारिदेंदुकिरणा बोल्लेइ सा जामिणीं॥ २९॥

कज्जसेसं कविंजलो णिवेदइस्सदि। तं च देवेण तधा कादव्वं। (इति परिक्रम्य निष्क्रान्ता।)

**राजा**—वअस्स, किं उण तं कज्जसेसं।

**विदूषकः**—अज्ज हिंदोलणचउत्थी। तहिं देवीए गौरीं कदुअ कप्पूरमंजरीं हिंदोलए आरोहइदव्वा। ता मरगअपुंजट्ठिदेण देवेण कप्पूरमंजरी हिंदोलंती दट्ठव्वा। एदं तं कज्जसेसं। (विचिन्त्य।) ता अदिणिउणा वि छलिदा देवी। पाइआ जुण्णमज्जारिआ दुद्धं त्ति तक्कं।

---

तस्यास्तावत्परीक्षणाय निहितो हस्तः स्तनोत्सङ्गतो
दाहोड्डामरितः सखीभिर्बहुशो हेलया कृष्यते।
किं तेनापीमां निशामय गिरं संतोषिणीं त्रासिनीं
हस्तच्छत्रनिवारितेन्दुकिरणातिवाहयति सा यामिनीम्॥

हेलयावज्ञया कृष्यते। तयेति शेषः। स्वसंबन्धिविरहार्तिभाजनत्वेन। त्रासिनीमिति चैतादृशदुःसहवियोगपीडितापि स्वहस्तेनैवेन्दुकरान्निवारयतीति तेषां हस्तस्पर्शेऽशङ्कनीयमपि मरणादिकं संभाव्यत इति त्रासकरत्वम्। अथवा बलात्कारेण यथेन्दुकिरणस्पर्शो भवति तथा विधत्त इत्यतिदुष्करमिति त्रासकारणं ज्ञेयम्। यद्वा हस्तच्छत्रेत्यनेन हस्तस्य संपूर्णशरीरे चन्द्रकरस्पर्शनिवारकत्वासंभवाद्धस्तानवच्छन्नप्रदेशे शशिकरस्पर्शावश्यंभावस्तत्कारणं वेदितव्यः। अनेन विधानं नाम मुखसंध्यङ्गमुक्तम्। तल्लक्षणं दशरूपके—'विधानं सुखदुःखकृत्' इति। अत्रापि रूपकच्छेकानुप्रासादयः शब्दार्थालंकारा ऊह्याः। लक्षणं तूक्तम्।

कार्यशेषं कपिञ्जलो निवेदयिष्यति। तच्च देवेन तथा कर्तव्यम्।

कपिञ्जलो विदूषकः।

**राजा**—

वयस्य, किं पुनस्तत्कार्यशेषम्।

**विदूषकः**—

अद्य हिन्दोलनचतुर्थी। तत्र देव्या गौरीं कृत्वा कर्पूरमञ्जरीं हिन्दोलके आरोहयितव्या। तन्मरकतपुञ्जस्थितेन देवेन कर्पूरमञ्जरी हिन्दोलन्ती द्रष्ट-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—को अण्णो तुह्माहिंतो मह कज्जसज्जो। को अण्णो चंदाहिंतो समुद्दवड्डणणिट्ठो ।

(इति परिक्रम्य कदलीगृहप्रवेशं नाटयतः ।)

**विदूषकः**—इअं उत्तुंगफलिहमणिवेदिआ । ता इह उपविसदु पिअवअस्सो ।

(राजा तथा करोति ।)

**विदूषकः**—(हस्तमुद्यम्य ।) भो, दीसदु पुण्णिमाअंदो ।

**राजा**—(विलोक्य ।) अए, दोलारूढाए मह वल्लहाए वअणं पुण्णिमाचंदो त्ति णिद्दिससि । (समन्तादवलोक्य ।)

विच्छाअंतो णअररमणीमंडलस्साणणाइं
पच्छालंतो गगणकुहरं कंतिजोह्लाजलेण ।
पेच्छंतीणं हिअअणिहिदं णिद्दलंतो अ दप्पं
दोलालीलासरलतरलो दीसए से मुहेंदू ॥ ३० ॥

---

व्या । एतत्तत्कार्यशेषम् । तदतिनिपुणापि च्छलिता देवी । पायिता जीर्णमार्जारिका दुग्धमिति तक्रम् ।

मरकतपुञ्जः प्रासादविशेषः ।

**राजा**—

कोऽन्यो युष्मत्तो मम कार्यसज्जः । कोऽन्यश्चन्द्रतः समुद्रवर्धननिष्ठः ।

**विदूषकः**—

इयमुत्तुङ्गस्फटिकमणिवेदिका । तदिहोपविशतु प्रियवयस्यः ।

**विदूषकः**—

भोः, दृश्यतां पूर्णिमाचन्द्रः ।

**राजा**—

अए, दोलारूढाया मम वल्लभाया वदनं पूर्णिमाचन्द्र इति निर्दिशसि ।

विच्छाययन्नगररमणीमण्डलस्याननानि
प्रक्षालयन्गगनकुहरं कान्तिज्योत्स्नाजलेन ।
प्रेक्षमाणानां हृदयनिहितं निर्दलयंश्च दर्पं
दोलालीलासरलतरलो दृश्यतेऽस्या मुखेन्दुः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ।

उच्चेहिं गोउरेहिं धवलधअवडाडंबरिल्लावलीहिं
घंटाहिं विदुरिल्लासुरतरुणिविमाणाणुरूअं वहंती।
पाआरं लंघअंती कुणइ रअवसादुण्णमंती णमंती
एंती जंती अ दोला जणमणहरणं कड्ढणुक्कड्ढणेहिं ॥ ३१ ॥

अवि अ।

रणंतमणिणेउरं झणझणंतहारच्छडं
कलक्कणिदकिंकिणीमुहरमेहलाडंबरं।
विलोलवलआवलीजणिदमंजुसिंजारवं
ण कस्स मणमोहणं ससिमुहीअ हिंदोलणं ॥ ३२ ॥

---

विच्छाययन्विगतच्छायानि कुर्वन्। म्लानीकुर्वन्नित्यर्थः। कान्तिरेव ज्योत्स्ना चन्द्रिका तस्या जलं चाकचक्यं तेन गगनं खमेव कुहरं क्षालयन्प्रकाशयन्। जलेन क्षालनमुचितमेवेति भावः। सरलतरल इत्यान्दोलनवशाद्यातायातमाचरन्नित्यर्थः। अत्र रूपकच्छेकावृत्त्यनुप्रासरूपाः शब्दार्थालंकारा विभाव्याः। स्पष्टमन्यत्।

अपि च।

उच्चेषु गोपुरेषु धवलध्वजपटाडम्बरबहलावलीषु
घण्टाभिर्विद्राणसुरतरुणिविमानानुरूपं वहन्ती।
प्राकारं लङ्घयन्ती करोति रयवशादुन्नमन्ती नमन्ती
आयान्ती यान्ती च दोला जनमनोहरणं कर्षणोत्कर्षणैः॥

धवलध्वजपटाडम्बराणां बहला आवल्यो येषु तादृशेषु गोपुरेषु पुरद्वारेषु घण्टाभिरुपलक्षितं विद्राणं वेगेन गच्छयत्सुरतरुणिविमानं देवाङ्गनाविमानं तदनुरूपं तत्तुल्यं प्राकारं वहन्ती बिभ्राणा। कर्षणोत्कर्षणैः रयवशाल्लङ्घयन्ती। सरलगमनादुन्नमन्ती ऊर्ध्वं गच्छन्ती नमन्ती पुनरधो यान्ती आयान्ती यान्ती चेयं दोला कस्य कामिनो मनोहरणं न करोति। अपि तु सर्वस्य विधत्त इति काक्वर्थः। इयं च दोलास्वरूपवर्णमाज्जातिः। तल्लक्षणं काव्यादर्शे दण्डिनोक्तम्—'नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा ॥' इति। उपमानुप्रासादयोऽन्येऽप्यलंकारा ज्ञेयाः।

अपि च।

रणन्मणिनूपुरं झणझणायमानहारच्छटं
कलक्वणितकिङ्किणीमुखरमेखलाडम्बरम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—भो, सुत्तआरो तुमं । अहं उण वित्तिआरो भविअ वित्थरेण वण्णेमि ।

उवरिट्ठिअथणपब्भारपीडिअं चरणपंकजजुअं से ।
पुक्कारइ व्व मअणं रणंतमणिणेउररवेण ॥ ३३ ॥
हिंदोलणलीलाललणलंपडं चक्कचक्कलं रमणं ।
किलकिलइ व्व सहरिसं कंचीमणिकिंकिणिरवेण ॥ ३४ ॥
दोलंदोलणलीलासरंतसरिआछलेण से हारो ।
वित्थारइ व्व कुसुमाउहणरवइणोइ कित्तिवल्लीओ ॥ ३५ ॥

---

विलोलवलयावलीजनितमञ्जुशिञ्जारवं
न कस्य मनोमोहनं शशिमुख्या हिन्दोलनम् ॥

शशिमुख्या हिन्दोलनं कस्य कामिनो मनोमोहनं न । मनो मानसं मोहयति तदेतादृशं न । अपि तु सर्वस्यापीति काकुः । किंभूतम् । रणन्तो मणयो ययोस्ते रणन्मणी, रणन्मणी नूपुरे यत्र तत् । झणझणायमाना हारच्छटा यत्र । इत्यादीनामान्दोलनविशेषणत्वम् । अथवा क्रियाविशेषणानि । यद्वा शशिमुख्या रणन्नूपुरादिकस्य मनोमोहनं नेति प्रत्येकमेव विधिः । तदा दोलनांशे प्रत्यक्षमन्यांशे स्मरणम् । 'रण शब्दे' । झणझणायमानमित्यादि शब्दानुकरणम् । अत्राप्यनुप्रासजात्याद्याः शब्दार्थालंकारा ज्ञेयाः ।

**विदूषकः**—

भोः, सूत्रकारस्त्वम् । अहं पुनर्वृत्तिकारो भूत्वा विस्तरेण वर्णयामि ।

सूचनाद्धि सूत्रत्वं भवतीति भावः । अत एव तल्लक्षणमुक्तमभियुक्तैः—'अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' इति ।

उपरिस्थितस्तनप्राग्भारपीडितं चरणपङ्कजयुगं तस्याः ।
पूत्कारयतीव मदनं रणन्मणिनूपुररवेण ॥

एतन्मणिनूपुररवश्रवणसमकालमेव कामिनां मदनकृता मनोविह्वलता भवतीति भावः । अत्रापि जात्युत्प्रेक्षे अलंकारौ ।

हिन्दोलनलीलाललनलम्पटं चक्रवर्तुलं रमणम् ।
किलकिलायतीव सहर्षं काञ्चीमणिकिङ्किणिरवेण ॥

अत्रापि किलकिलायतीति शब्दानुकरणम् । रमणं जघनम् ।

दोलान्दोलनलीलासरत्सरिकाछलेनास्या हारः ।
विस्तारयतीव कुसुमायुधनरपतेः कीर्तिवल्लीः ॥

सरिका मुक्तापङ्क्तिः । अत्रोत्प्रेक्षालंकारः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संमुहपवणपणोल्लिअवरिल्लदरदाविआइँ अंगाइँ ।
हक्कारिऊण मअणं पासम्मि णिवेसअंति व्व ॥ ३६ ॥
ताडंकजुअं गंडेसु बहलघुसिणेसु घडणलीलाहिं ।
देइ व्व दोलदोलणरेहाओ गणणकोडेण ॥ ३७ ॥
णअणाइँ पसइसरिसाइँ झत्ति फुल्लाइँ कोदुहल्लेण ।
अप्पेंतिअ व्व कुवलअसिलीमुहे पंचबाणस्स ॥ ३८ ॥
दोलारअविच्छेओ कहं वि मा होउ इत्ति पडइ व्व ।
पुट्ठम्मि वेणिदंडो मम्महचम्मट्ठिआअंतो ॥ ३९ ॥
इअएआइँ विलासुज्जलाइँ दोलाप्पवंचचरिआइं ।
कस्स ण लिहइ चित्ते णिडणो कंदप्पचित्तअरो ॥ ४० ॥

---

संमुखपवनप्रेरितोपरिवस्त्रे दरदर्शितान्यङ्गानि ।
आकार्य मदनं पार्श्वे निवेशयन्तीव ॥

अत्रापि स एवालंकारः ।

ताटङ्कयुगं गण्डयोर्बहलघुसृणयोर्घटनलीलाभिः ।
ददातीव दोलान्दोलनरेखा गणनकौतुकेन ॥

अत्राप्युत्प्रेक्षालंकारः ।

नयने प्रसृतिसदृशे झटिति फुल्ले कौतूहलेन ।
अर्पयत इव कुवलयशिलीमुखे पञ्चबाणस्य ॥

कुवलये एव शिलीमुखौ शरौ । कुसुमशरत्वात्तस्येति भावः । रूपकमुत्प्रेक्षा चालंकारः । तल्लक्षणं तु पूर्वोक्तमेव ।

दोलारसविच्छेदः कथमपि मा भवत्विति पततीव ।
पृष्ठे वेणिदण्डो मन्मथचर्मयष्टिकायमानः ॥

अत्रापि रूपकोत्प्रेक्षे ।

इत्येतानि विलासोज्ज्वलानि दोलाप्रपञ्चचरितानि ।
कस्य न लिखति चित्ते निपुणः कंदर्पचित्रकरः ॥

इत्यमुना प्रकारेणैतानि दोलाप्रपञ्चचरितानि कर्मभूतानि कंदर्पचित्रकरः कर्ता कस्य कामिनश्चित्ते न लिखति । अपि तु सर्वस्यापीत्यर्थः । किंभूतानि । विलासा उज्ज्वलाः शुचयो येषु तानि । विलास उज्ज्वलश्च येषु तानीति वा । 'शृङ्गारः शुचिरुज्ज्वलः' इति कोषात् । अत्र रूपकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(सविषादम् ।) कधमवइण्णा कप्पूरमंजरी । रित्ता दोला, रित्तं अ मज्झ चित्तं, रित्ताइं दंसणुस्सुआइं मज्झ णअणाइं ।

**विदूषकः**—ता विज्जुल्लेहा विअ खणदिट्ठणट्ठा ।

**राजा**—मा एव्वं भण । हरिअंदपुरी विअ दिट्ठा पणट्ठा अ । (स्मृतिनाटितकेन ।)

मंजिट्ठी ओट्ठमुद्दा णवघडणसुवण्णुज्जला अंगलट्ठी
दिट्ठी बालेंदुलेहाधवलिमजइणी कुंतला कज्जलाहा ।
इत्थं वण्णाणँ रेहा विहरइ हरिणीचंचलच्छी अ एसा
कंदप्पो दीहदप्पी जुअजणजअणे पुण्णलक्खो व्वि भादि ॥ ४१ ॥

---

**राजा**—

कथमवतीर्णा कर्पूरमञ्जरी । रिक्ता दोला, रिक्तं च मम चित्तम्, रिक्तानि दर्शनोत्सुकानि मम नयनानि ।

**विदूषकः**—

तद्विद्युल्लेखेव क्षणदृष्टनष्टा ।

**राजा**—

मैवं भण। हरिश्चन्द्रपुरीव दृष्टा प्रणष्टा च ।

**स्मृतीति** । स्मृतिलक्षणमुक्तं प्राक् ।

**मंजिट्ठीति** ।

माञ्जिष्ठी ओष्ठमुद्रा नवघटनसुवर्णोज्ज्वलाङ्गयष्टि-
र्दृष्टिर्बालेन्दुरेखाधवलिमजयिनी कुन्तलाः कज्जलाभाः ।
इत्थं वर्णानां रेखा विहरति हरिणीचञ्चलाक्षी चैषा
कंदर्पो दीर्घदर्पी युवजनजये पूर्णलक्ष इव भाति ॥

माञ्जिष्ठीत्यनेन मञ्जिष्ठनिष्ठरक्ततातिशयवत्त्वमोष्ठमुद्रायां ध्वन्यते । नवा घटना यस्येति बहुव्रीहिः । तथा च तादृशस्वर्णनिरूपितचाकचक्यातिशयवत्त्वमङ्गेषु व्यज्यते । यष्टिरूपकेण च तन्निष्ठाधिककृशत्वमङ्गेषु द्योत्यते । इन्दुरेखेत्यनेन चाकलङ्कित्वं ज्ञाप्यते । कज्जलाभा इत्यनेन कज्जलनिष्ठनीलिमातिशयवत्त्वं कुन्तलेष्वभिव्यज्यते। अथवा कज्जले आभा येषामिति विपर्यासोपमा । तल्लक्षणं काव्यादर्शे दण्डिनोक्तम्—'सा प्रसिद्धिविपर्यासाद्विपर्यासोपमेष्यते ।' इति । इत्थमनिर्वचनीयाः । रेखापदेन चोच्चारणगतातिशयविशेषो लक्ष्यते । दीर्घो दर्पोऽस्यास्तीति दीर्घदर्पी । अनेन च लक्ष्यस्वाधीनीकरणे क्लेशलेशस्याप्यभावाद्गर्वकणोऽपि न क्षीण इति भावः । पूर्णलक्ष्यत्वं स्वाधीनं यावल्लक्ष्यत्वमेव । अत्रापि रूपकोपमोत्प्रेक्षानुप्रासलक्षणाः शब्दार्थालंकारा ज्ञेयाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—एदं तं मरगअपुंजं। इह उवविसिअ पिअवअस्सो पडिवालेदु तं । संझावि संणिहिदा वट्टदि ।

(उभौ तथा कुरुतः।)

**राजा**—अदिसिसिरं पि हिमाणिं संदावदाइणिं अणुहवामि ।

**विदूषकः**—तालच्छीसहअरो खणं चिट्ठदु देवो, जाव अहं सिसिरोपआरसामग्गिं संपादेमि । (इति नाट्येन निष्क्रम्य पुरोऽवलोक्य च।) किं उण एसा विअक्खणा इदो णिअडा आअच्छदि ।

**राजा**—संणिहिदो संकेअकालो कहिदो मंतीहिं पि । (स्मृत्वा। मदनाकूतमभिनीय।)

किसलअकरचरणा वि हु कुवलअणअणा मिअंकवअणावि ।
अहह णवचंपअंगी तह ब्बि तावेइ अच्चरिअं ॥ ४२ ॥

---

**विदूषकः**—

एतत्तन्मरकतपुञ्जम्। इहोपविश्य प्रियवयस्यः प्रतिपालयतु ताम् । संध्यापि संनिहिता वर्तते ।

वयस्येति संबुद्धिश्च । 'विदूषकेण वक्तव्यो वयस्येति च भूपतिः ।' इत्युक्तेः ।

**राजा**—

अतिशिशिरामपि हिमानीं संतापदायिनीमनुभवामि ।

'हिमानी हिमसंहतिः' इति त्रिकाण्डी ।

**विदूषकः**—

तल्लक्ष्मीसहचरः क्षणं तिष्ठतु देवः, यावदहं शिशिरोपचारसामग्रीं संपादयामि । किं पुनरेषा विचक्षणा इतो निकटा आगच्छति ।

तल्लक्ष्मी तत्कान्तिः । तन्मात्रसहाय इत्यर्थः ।

**राजा**—

संनिहितः संकेतकालः कथितो मन्त्रिभ्यामपि ।

किसलयकरचरणापि खलु कुवलयनयना मृगाङ्कवदनापि ।
अहह नवचम्पकाङ्गी तथापि तापयत्याश्चर्यम् ॥

अत्रापि च्छेकानुप्रासविभावनारूपकाहेतुसंकररूपाः शब्दार्थालंकारा ऊह्याः । विभावनालक्षणमुक्तमभियुक्तैः—'कारणाभावेऽपि कार्योपक्षेपो विभावना' इति । अहेतुलक्षणमप्युक्तम्—'कारणे सत्यपि कार्याभावोऽहेतुः' इति । अस्यैव संज्ञा विशेषोक्तिरिति काव्यप्रकाशे । संकरलक्षणमप्युक्तम्—'स्वातन्त्र्येणाङ्गत्वेन संशयेनैकपद्येन वालंकाराणामेकत्रावस्थानं संकरः' इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—(सम्यगवलोक्य।) अए, विअक्खणा सिसिरोवआरसामग्गीसहिदहत्था आअदा।

(ततः प्रविशति शिशिरोपचारसामग्रीसहिता विचक्षणा।)

**विचक्षणा**—(परिक्रम्य।) अहो, पिअसहीए महंतो क्खु विरहदाहज्जरो।

**विदूषकः**—(उपसृत्य।) भोदि, किं एदं।

**विचक्षणा**—सिसिरोवआरसामग्गी।

**विदूषकः**—कस्स कदे।

**विचक्षणा**—पिअसहीए कदे।

**विदूषकः**—ता मह वि अद्धं देहि।

**विचक्षणा**—किं णिमित्तं।

**विदूषकः**—महाराअस्स कदे।

---

**विदूषकः**—

अये, विचक्षणा शिशिरोपचारसामग्रीसाहितहस्तागता।

'नासूचितस्य पात्रस्य प्रवेशः' इति पूर्वमेव विदूषकमुखेन सूचनम्।

**विचक्षणा**—

अहो, प्रियसख्या महान्खलु विरहदाहज्वरः।

**विदूषकः**—

भवति, किमेतत्।

**विचक्षणा**—

शिशिरोपचारसामग्री।

**विदूषकः**—

कस्य कृते।

**विचक्षणा**—

प्रियसख्याः कृते।

**विदूषकः**—

तन्ममाप्यर्धं देहि।

**विचक्षणा**—

किं निमित्तम्।

**विदूषकः**—

महाराजस्य कृते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विचक्षणा**—किं उण कारणं तस्स ।

**विदूषकः**—कप्पूरमंजरिए वि किं ।

**विचक्षणा**—किं ण जाणासि महाराअस्स दंसणं ।

**विदूषकः**—तुमं वि किं ण जाणासि महाराअस्स कप्पूरमंजरीए दंसणं ।

(इत्युभौ हसतः ।)

**विचक्षणा**—ता कहिं महाराओ ।

**विदूषकः**—तुह वअणेण मरगअपुंजे चिठ्ठदि ।

**विचक्षणा**—ता महाराएण सह मरगअपुंजदुआरे चिठ्ठ खणं, जेण उहअदंसणे जदे सिसिरोवआरसामग्गीए जलंजली दिज्जदि ।

---

**विचक्षणा**—

किं पुनः कारणं तस्य ।

**विदूषकः**—

कर्पूरमञ्जर्या अपि किम् ।

कारणमिति पूर्वतनाध्याहारः ।

**विचक्षणा**—

किं न जानासि महाराजस्य दर्शनम् ।

**विदूषकः**—

त्वमपि किं न जानासिमहाराजस्य कर्पूरमञ्जर्या दर्शनम् ।

**विचक्षणा**—

तत्कुत्र महाराजः ।

**विदूषकः**—

तव वचनेन मरकतपुञ्जे तिष्ठति ।

**विचक्षणा**—

तन्महाराजेन सह मरकतपुञ्जद्वारे तिष्ठ क्षणम्, येनोभयदर्शने जाते शिशिरोपचारसामग्र्या जलाञ्जलिर्दीयते ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—(तामपहृत्य ।) तहिं गच्छ जहिं णागच्छसि । (इति क्षिपति ।) (पुनस्तां प्रति ।) ता कीस दुआरदेसे होदव्वं ।

**विचक्षणा**—देवीए आदेसेण कप्पूरमंजरी समाअच्छादि ।

**विदूषकः**—को तीए आदेसो ।

**विचक्षणा**—तहिं देवीए बालतरुणो तिण्णि आरोविदा ।

**विदूषकः**—को को ।

**विचक्षणा**—कुरबअतिलआसोआ ।

**विदूषकः**—ता किं तेहिं ।

**विचक्षणा**—भणिदा सा देवीए जधा

कुरबअतिलआसोआ आलिंगणदंसणाग्गचअणहआ ।
विअसंति कामिणीणं ता ताणं देहि दोहलअं ॥ ४३ ॥

**विदूषकः**—
तत्र गच्छ यतो नागच्छसि । तत्किं द्वारदेशे भवितव्यम् ।
**विचक्षणा**—
देव्या आदेशेन कर्पूरमञ्जरी समागच्छति ।
**विदूषकः**—
किं तस्या आदेशः ।
**विचक्षणा**—
तत्र देव्या बालतरवस्त्रय आरोपिताः ।
**विदूषकः**—
कः कः ।
**विचक्षणा**—
कुरबकतिलकाशोकाः ।
**विदूषकः**—
तत्किं तैः ।
**विचक्षणा**—
भणिता सा देव्या यथा

कुरबकतिलकाशोका आलिङ्गनदर्शनाग्रचरणहताः ।
विकसन्ति कामिनीनां तत्तेषां देहि दोहदकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एहिं तं संपादइस्सादि ।

**विदूषकः**—ता मरगअपुञ्जादो पिअवअस्सं आणीअ तमालविडबंतरिदं ठाविअ एदं पच्चक्खं करइस्सं । (तथा नाटयित्वा । राजानं प्रति ।) भो भो, उट्ठिअ पेक्ख णिअहिअअसमुद्दचंदलेहं ।

(राजा तथा करोति ।)

(ततः प्रविशति विशेषभूषिताङ्गी कर्पूरमञ्जरी ।)

**कर्पूरमञ्जरी**—कहिं उण विअक्खणा ।

**विचक्षणा**—(तामुपसृत्य ।) सहि, करीअदु देवीए समादिट्ठं ।

**राजा**—वअस्स, किं उण तं ।

---

यद्यस्मात्कारणात्कामिनीनामालिङ्गनदर्शनाग्रचरणहताः सन्तः कुरबकादयो वृक्षा विकसन्ति उत्फुल्ला भवन्ति तत्तस्मात्तेषां दोहदकं देहीति यत्पदाध्याहारेण योज्यम् । यद्वा तदिदमिति तच्छब्देन पूर्वोक्तालिङ्गनादि परामृश्य योज्यम्, तदा न यत्पदाध्याहारः । कुरबकादित्रयस्य कामिन्यालिङ्गनादित्रयेणैव विकासो वर्ण्यत इति कविसंप्रदायः । तथोक्तम्—'पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः । आलिङ्गितः कुरबकः कुरुते विकासमालोकितस्तिलक उत्कलिको विभाति ॥' इति । 'आलिङ्गनेनैव मृगायताक्ष्याः प्रफुल्लतां वै तिलकः प्रयाति । अशोकशाखी पुनरङ्घ्रिपातैर्विवेकशाली विरलो हि लोके ॥' इति च । अत्रापि च्छेकानुप्रासः ।

इदानीं तत्संपादयिष्यति ।

**विदूषकः**—

तन्मरकतपुञ्जात्प्रियवयस्यमानीय तमालविटपान्तरितं स्थापयित्वा एतत्प्रत्यक्षं कारयिष्यामि । भो भोः, उत्थाय प्रेक्षस्व निजहृदयसमुद्रचन्द्रलेखाम् ।

निजहृदयमेव समुद्रस्तत्र चन्द्रलेखेव कर्पूरमञ्जरी ताम् ।

**कर्पूरमञ्जरी**—

क्व पुनर्विचक्षणा ।

**विचक्षणा**—

सखि, क्रियतां देव्या समादिष्टम् ।

कुरबकादीनां दोहददानमित्यर्थः ।

**राजा**—

वयस्य, किं पुनस्तत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—तमालविडवंतरिदो जाण।

(राजा तथा करोति।)

**विचक्षणा**—एस कुरबअतरू।

(कर्पूरमञ्जरी तमालिङ्गति।)

**राजा**—

णवकुरबअरुक्खो कुंभथोरत्थणीए
रहसविरइदेण णिब्भरालिंगणेण।
तह कुसुमसमिद्धिं लम्भिदो सुंदरीए
जह भसलकुलाणं तत्थ जत्ता पउत्ता॥ ४४॥

**विदूषकः**—भो, पेक्ख पेक्ख महिंदजालं। जेण
बालो वि कुरबअतरू तरुणीए गाढमुवगूढो।
सहसत्ति फुल्लणिअरं मदनसरं विअ समुग्गिरइ॥ ४५॥

---

**विदूषकः**—
तमालविटपान्तरितो जानीहि।
**विचक्षणा**—
एष कुरबकतरुः।
**राजा**—

नवकुरबकवृक्षः कुम्भस्थूलस्तन्या
रभसविरचितेन निर्भरालिङ्गनेन।
तथा कुसुमसमृद्धिं लम्भितः सुन्दर्या
यथा भ्रमरकुलानां तत्र यात्रा प्रवृत्ता॥

जातेति यावत्। अथ च तत्रेति तत इत्यर्थे। तत्र ततो यात्रा गमनागमनं समाप्तमित्यर्थः। सर्वदा तत्रैव तिष्ठन्तीति भावः। यद्वा असमाप्तेति नञ्प्रश्लेषः। तत्रेति विषयसप्तमी। तथा च तद्विषये यात्रा वृक्षान्तरात्तत्रागमनं तन्न समाप्तमित्यर्थः। अनेन कुसुमभूमा, तत्र च सौरभातिशयो ध्वन्यते। अत्रापि छेकानुप्रासरूपकोपमासंकरा अलंकाराः।

**विदूषकः**—
भोः, प्रेक्षस्व प्रेक्षस्व महेन्द्रजालम्। येन
बालोऽपि कुरबकतरुस्तरुण्या गाढमुपगूढः।
सहसेति पुष्पनिकरं मदनशरमिव समुद्गिरति॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—ईदिसो ज्जेब्व दोहलअस्स प्पभावो ।

**विचक्षणा**—अह एसो तिलअदुमो ।

(कर्पूरमञ्जरी चिरं तिर्यगवलोकयति ।)

**राजा**—

तिक्खाणं तरलाणँ कज्जलकलासंवग्गिदाणं पि से
पासे पंचसरं सिलीमुहधरं णिच्चं कुणंताणँ अ ।
णेत्ताणं तिलअद्दुमे णिवडिदा धाडी मिअच्छीअ जं
तं सो मंजरिपुंजदंतुरसिरो रोमंचिदो व्व ट्ठिदो ॥ ४६ ॥

**विचक्षणा**—एसो असोअसाही ।

(कर्पूरमञ्जरी चरणताडनं नाटयति ।)

---

**राजा**—

ईदृश एव दोहदस्य प्रभावः ।

**विचक्षणा**—

अथैष तिलकद्रुमः ।

**राजा**—

तीक्ष्णयोस्तरलयोः कज्जलकलासंवलिगतयोरप्यस्याः
पार्श्वे पञ्चशरं शिलीमुखधरं नित्यं कुर्वतोश्च ।
नेत्रयोस्तिलकद्रुमे निपतिता धाटी मृगाक्ष्या य-
त्तस मञ्जरीपुञ्जदन्तुरशिरा रोमाञ्चित इव स्थितः ॥

तीक्ष्णयोर्दीर्घक्रशाग्रयोः, कज्जलकला सूक्ष्मं कज्जलं तत्संवलिगतयोस्तत्संबद्धयोः, पञ्चशरं काममस्याः कर्पूरमञ्जर्याः पार्श्वे शिलीमुखधरं बाणधरं नित्यं सर्वदा कुर्वतोः, मृगाक्ष्या नेत्रयोर्धाटी रचनाव्यापारविशेषस्तिलकद्रुमे यद्यस्मात्कारणात्पतितस्तस्मात्स तिलकतरुर्मञ्जरीणां पुञ्जः समूहस्तेन दन्तुरं साङ्कुरं शिरोऽग्रं यस्य सः । अत एव रोमाञ्चित इव संजातरोमाञ्च इव वर्तत इत्यर्थः । शिलीमुखधरं पञ्चशरं पार्श्वे नित्यं कुर्वतोरित्यनेन कंदर्पबाणसाम्यं नेत्रयोर्व्यञ्जितम् । तेन च कामिखिन्नतासंपादकत्वं काममार्गणधर्मोऽनयोर्व्यज्यते । अत्रापि च्छेकवृत्त्यनुप्रासोपमोत्प्रेक्षासंकरालंकारा ध्येयाः ।

**विचक्षणा**—

एष अशोकशाखी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—

असोअतरुताडणं रणिदणेउरेणंघिणा
कदं च मिअलंछणच्छविमुहीअ हेलुल्लसं ।
सिहासु सअलासु वि त्थवअमंडणाडंबरं
ठिदं च गअणंगणं जणणिरिक्खणिज्जं खणं ॥ ४७ ॥

**विदूषकः**—भो वअस्स, जं सअं ण कदं दोहलअदाणं देवीए जाणेसि एत्थ किं कारणं ।

**राजा**—तुमं जाणेसि ।

**विदूषकः**—भणामि जइ देवो ण कुप्पदि ।

**राजा**—को एत्थ रोसावसरो । भण उम्मुद्दिआए जीहाए ।

---

**राजा**—

अशोकतरुताडनं रणितनूपुरेणाङ्घ्रिणा
कृतं च मृगलाञ्छनच्छविमुख्या हेलोल्लासम् ।
शिखासु सकलास्वपि स्तबकमण्डनाडम्बरं
स्थितं च गगनाङ्गणं जननिरीक्षणीयं क्षणम् ॥

मृगलाञ्छनच्छविः शशाङ्ककान्तिर्मुखे यस्याः । मृगलाञ्छनस्य च्छविर्यस्मिंस्तत्तादृशं मुखं यस्या इति वा । तादृश्या कर्पूरमञ्जर्या । चद्वयेनोभयमपि समकालमेवोदभवदिति द्योत्यते । अत्रापि च्छेकावृत्तिलाटानुप्रासोपमादयोऽलंकारा ऊह्याः ।

**विदूषकः**—

भो वयस्य, यत्स्वयं न कृतं दोहदकदानं देव्या जानासि तत्र किं कारणम् ।

**राजा**—

त्वं जानासि ।

**विदूषकः**—

भणामि यदि देवो न कुप्यति ।

**राजा**—

कोऽत्र रोषावसरः । भणोन्मुद्रितया जिह्वया ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—

इह जइ वि कामिणीणं सुंदेरं धरइ अवअवाणँ सिरी ।
अहिदेवदे व्व णिवसइ तह वि हु तारुण्णए लच्छी ॥ ४८ ॥

**राजा**—सुणिदो दे अहिप्पाओ । किं उण किं पि भणामो ।

बालाअ होंति कोऊहलेण एमेअ चबलचित्ताओ ।
दरलसिअथणीसु पुणो णिवसइ मअरद्धअरहस्सं ॥ ४९ ॥

**विदूषकः**—तरुणो वि रूअरेहारहस्सेण फुल्लंति । ण उण रइरहस्सं जाणंति ।

(नेपथ्ये ।)

**वैतालिकः**—सुहसंझा भोदु देवस्स ।

लोआणं लोअणेहिं सह कमलवणं अद्धणिद्दं कुणंतो
मुंचंतो तिक्खभावं सह अ सरभसं माणिणीमाणसेहिं ।

---

**विदूषकः**—

इह यद्यपि कामिनीनां सौन्दर्यं धारयत्यवयवानां श्रीः ।
अधिदेवतेव निवसति तथापि खलु तारुण्ये लक्ष्मीः ॥

अत्रापि व्यतिरेकोपमे ।

**राजा**—

*श्रुतस्तेऽभिप्रायः । किं पुनः किमपि भणामः ।*

बाला भवन्ति कौतूहलेनैवमेव चपलचित्ताः ।
दरलसितस्तनीषु पुनर्निवसति मकरध्वजरहस्यम् ॥

**विदूषकः**—

तरवोऽपि रूपरेखारहस्येन विकसन्ति । न पुना रतिरहस्यं जानन्ति ।

यतस्तरुणीकुचसंस्पर्शेन विनापि विकसन्तीति भावः ।

**वैतालिकः**—

सुखसंध्या भवतु देवस्य ।

लोकानां लोचनैः सह कमलवनमर्धनिद्रं कुर्व-
न्मुञ्चंस्तीक्ष्णभावं सह च सरभसं मानिनीमानसैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मंजिट्ठारत्तसुत्तच्छविकिरणचओ चक्कवाएक्कमित्तो
जादो अत्थाचलत्थी उवह दिणमणी पक्कणारंगपिंगो ॥ १० ॥

**राजा**—भो वअस्स, संणिहिदो संझासमओ वट्टदि ।

**विदूषकः**—संकेअकालो कहिदो बंदीहिं ।

**कर्पूरमञ्जरी**—सहि विअक्खणे, गमिस्सं दाव । विआलो संवुत्तो वट्टदि ।

**विचक्षणा**—एवं कीरदु ।

(इति परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति द्वितीयं जवनिकान्तरम् ।

मञ्जिष्ठारक्तसूत्रच्छविकिरणचयश्चक्रवाकैकमित्रं
जातोऽस्ताचलार्थी पश्यत दिनमणिः पक्वनारङ्गपिङ्गः ॥

उवहेति देशी पश्यतेत्यस्मिन्नर्थे । अत्रापि स्वभावोक्त्युपमादयः ।

**राजा**—

भो वयस्य, संनिहितः संध्यासमयो वर्तते ।

**विदूषकः**—

संकेतकालः कथितो बन्दिभिः ।

**कर्पूरमञ्जरी**—

सखि विचक्षणे, गमिष्यामि तावत् । विकालः संवृत्तो वर्तते ।

**विचक्षणा**—

एवं क्रियताम् ।

इति श्रीमद्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वकुन्दप्रतिमयशःप्रकरप्रखरकठोर-
किरणकरप्रभप्रतिभप्रभाकरभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरी-
प्रकाशे द्वितीयं जवनिकान्तरं समाप्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## तृतीयं जवनिकान्तरम् ।

(ततः प्रविशति राजा विदूषकश्च ।)

**राजा**—(तामनुसंधाय ।)

दूरे किज्जदु चम्पअस्स कलिआ कज्जं हरिद्दाअ किं
उत्तत्तेण अ कंचणेण गणना का णाम जच्चेण वि ।
लावण्णस्स णवुग्गदेन्दुमहुरच्छाअस्स तिस्सा पुरो
पच्चग्गेहिं वि केसरस्स कुसुमक्केरेहिं किं कारणं ॥ १ ॥

अवि अ ।

मरगअमणिजुट्ठा हारलट्ठि व्व तारा
भमरकवलिअद्धा मालईमालिए व्व ।
रहसवलिअकण्ठी तीअ दिट्ठी वरिट्ठा
सवणपहणिविट्ठा माणसं मे पविट्ठा ॥ २ ॥

**विदूषकः**—भो वअस्स, किं तुमं भज्जाजिदो विअ किंपि किंपि कुरुकुराअन्तो चिट्ठसि ।

---

**दूरेति** ।

दूरे क्रियतां चम्पकस्य कलिका कार्यं हरिद्रायाः किं
उत्तप्तेन च काञ्चनेन गणना का नाम जात्येनापि ।
लावण्यस्य नवोद्गतेन्दुमधुरच्छायस्य तस्याः पुरः
प्रत्यग्रैरपि केसरस्य कुसुमोत्करैः किं कारणम् ॥

तस्या लावण्यस्येति संबन्धः । अत्राक्षेपोपमे । आक्षेपलक्षणमुक्तं वृद्धैः—'प्रतिषेधपुरःसरोक्तिराक्षेपः ।' काव्यादर्शेऽपि—'प्रतिषेधोक्तिराक्षेपः' इति ।

आपि च ।

मरकतमणिजुष्टा हारयष्टिरिव तारा
भ्रमरकवलितार्धा मालतीमालिकेव ।
रभसवलितकण्ठी तस्या दृष्टिर्वरिष्ठा
श्रवणपथनिविष्टा मानसं मे प्रविष्टा ॥

तारेव भ्रमरस्तेन कवलितमर्धं यस्या इति वा । अत्रापि रूपकोत्प्रेक्षे ।

**विदूषकः**—

भो वयस्य, किं त्वं भार्याजित इव किमपि किमपि कुरुकुरायमाणस्तिष्ठसि ।

११

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—वअस्स, सिविणअं दिट्ठमणुसंधेमि ।

**विदूषकः**—ता कहेदु पिअवअस्सो ।

**राजा**—

जाणे पङ्करुहाणणा सिविणए मं केलिसज्जागदं
कन्दोट्टेण तडित्ति ताडिदुमणा हत्थन्तरे संठिदा ।
ता कोडेण मए वि झत्ति धरिदा ठिल्लं वरिल्लञ्चले
तं मोत्तूण गदं अ तीअ सहसा णट्ठा अ णिद्दा वि मे ॥ ३ ॥

**विदूषकः**—(स्वगतम् ।) भोदु एवं दाव । (प्रकाशम् ।) भो वअस्स, अज्ज मए वि सिविणं दिट्ठं ।

**राजा**—(सप्रत्याशम् ।) ता कहिज्जदु कीरिसं तं सिविणअं ।

**विदूषकः**—अज्ज जाणे सिविणए सुरसरिआसोत्ते सुत्तोह्मि । ता हरसिरसोवरि दिण्णलीलाचलणाए गङ्गाए पक्खालिदोह्मि तोएण ।

---

**राजा**—
वयस्य, स्वप्नं दृष्टमनुसंदधामि ।
**विदूषकः**—
तत्कथयतु प्रियवयस्यः ।
**राजा**—

जाने पङ्करुहानना स्वप्ने मां केलिशय्यागत-
मिन्दीवरेण तटिति ताडितुमना हस्तान्तरे संस्थिता ।
तत्कौतूहलेन मयापि झटिति धृता शिथिलं वस्त्राञ्चले
तन्मोचयित्वा गतं तया च सहसा नष्टा च निद्रापि मे ॥

कन्दोट्टमिन्दीवरमिति, ठिल्लं शिथिलमिति च देशी ।
**विदूषकः**—
भवत्वेवं तावत् । भो वयस्य, अद्य मयापि स्वप्नो दृष्टः ।
**राजा**—
तत्कथ्यतां कीदृशः स स्वप्नः ।
**विदूषकः**—
अद्य जाने स्वप्ने सुरसरित्स्रोतसि सुप्तोऽस्मि । तद्धरशिरस उपरि दत्त-लीलाचरणाया गङ्गायाः प्रक्षालितोऽस्मि तोयेन ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—तदो तदो ।

**विदूषकः**—तदो सरअसमअवरिसिणा जलहरेण जहिच्छं पीदोह्मि ।

**राजा**—अच्छरिअं अच्छरिअं । तदो तदो ।

**विदूषकः**—तदो सत्तिणक्खत्तगदे भअवइ मत्तण्डे तम्मवण्णीणईसंगदं समुद्दं गदो महामेहो । जाणे अहं वि मेहगब्भट्ठिदो गच्छेमि ।

**राजा**—तदो तदो ।

**विदूषकः**—तदो सो तहिं थूलजलबिन्दूहिं वरिसिदुं पउत्तो । अहं च रअणाअरसुत्तीहिं मुत्ताणामहेआहिं संपुडं समुग्घाडिअ जलबिन्दूहिं समं पीदोह्मि । ताणं च दसमासप्पमाणं मोत्ताहलं भविअ गब्भे ठिदो ।

**राजा**—तदो तदो ।

---

**राजा**—

ततस्ततः ।

**विदूषकः**—

ततः शरत्समयवर्षिणा जलधरेण यथेच्छं पीतोऽस्मि ।

**राजा**—

आश्चर्यमाश्चर्यम् । ततस्ततः ।

**विदूषकः**—

ततः स्वातिनक्षत्रगते भगवति मार्तण्डे ताम्रपर्णीनदीसंगतं समुद्रं गतो महामेघः । जानेऽहमपि मेघगर्भस्थितो गच्छामि ।

**राजा**—

ततस्ततः ।

**विदूषकः**—

ततोऽसौ तत्र स्थूलजलबिन्दुभिर्वर्षितुं प्रवृत्तः । अहं च रत्नाकरशुक्तिभिर्मुक्तानामधेयाभिः संपुटं समुद्घाट्य जलबिन्दुभिः समं पीतोऽस्मि । तासां च दशमासप्रमाणं मुक्ताफलं भूत्वा गर्भे स्थितः ।

**राजा**—

ततस्ततः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—

तदो चउस्सट्ठिसु सुत्तिसु ट्ठिदो घणम्बुबिन्दू जिअवंसरोअणो।
सुवत्तुलं णित्तलमच्छमुज्जलं कमेण पत्तो णवमुत्तिअत्तणम् ॥ ४ ॥

**राजा**—तदो तदो।

**विदूषकः**—तदो सोहमत्ताणं ताणं सुत्तीणं गब्भगअं मुत्ताहलत्तणेण मण्णेमि।

**राजा**—तदो तदो।

**विदूषकः**—तदो परिणदे काले समुद्दाहितो कड्ढिदाओ ताओ सुत्तीओ, फाडिदाओ अ। अहं चतुस्सट्ठिमुक्तहलत्तणं गदो ट्ठिदो। किणिदो अ एक्केण सेट्ठिणा सुवण्णलक्खं देइअ।

**राजा**—अहो विचित्तदा सिविणअस्स। तदो तदो।

**विदूषकः**—तदो तेण आणिअ वेधआरएहिं वेधाविआइं मोत्तिआइं। मम वि ईसीसि वेअणा समुप्पण्णा।

---

**विदूषकः**—

ततश्चतुःषष्टिषु शुक्तिषु स्थितो घनाम्बुबिन्दुर्जितवंशरोचनः।
सुवर्तुलं निस्तलमच्छमुज्ज्वलं क्रमेण प्राप्तो नवमौक्तिकत्वम् ॥

**राजा**—

ततस्ततः।

**विदूषकः**—

ततः सोऽहमात्मानं तासां शुक्तीनां गर्भगतं मुक्ताफलत्वेन मन्ये।

**राजा**—

ततस्ततः।

**विदूषकः**—

ततः परिणते काले समुद्रात्कर्षितास्ताः शुक्तयः, विदारिताश्च। अहं चतुःषष्टिमुक्ताफलत्वं गतः स्थितः। क्रीतश्चैकेन श्रेष्ठिना सुवर्णलक्षं दत्त्वा।

**राजा**—

अहो विचित्रता स्वप्नस्य। ततस्ततः।

**विदूषकः**—

ततस्तेनानीय वेधकारैर्वेधितानि मौक्तिकानि। ममापीषदीषद्वेदना समुत्पन्ना।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—तदो तदो।

**विदूषकः**—तदो

तेणावि मुत्ताहलमण्डलेण एक्केक्कदाए दसमासिएण।

एक्कावली गण्ठिकमेण गुत्था जा संठिदा कोटिसुवण्णमुल्ला ॥ ९ ॥

**राजा**—तदो तदो।

**विदूषकः**—तदो तं करण्डिआए कदुअ सागरदत्तो णाम वाणिओ गदो पञ्चालाधिपस्स सिरिवज्जाउहस्स णअरं कण्णउज्जं णाम। तहिं च सा विक्कीणिदा कोटिए सुवण्णस्स।

**राजा**—तदो तदो।

**विदूषकः**—तदो अ।

दट्ठूण थोरत्थणतुङ्गिमाणं एक्कावलीए तह चङ्गिमाणम्।
सा तेण दिण्णा दइआइकण्ठे रज्जन्ति छेआ समसंगमम्मि ॥ १० ॥

---

**राजा**—

ततस्ततः।

**विदूषकः**—

ततः

तेनापि मुक्ताफलमण्डलेनैकैकतया दशमाषिकेण।
एकावली ग्रन्थिक्रमेण गुम्फिता सा संस्थिता कोटिसुवर्णमूल्या ॥

**राजा**—

ततस्ततः।

**विदूषकः**—

ततस्तां करण्डिकायां कृत्वा सागरदत्तो नाम वणिग्गतः पाञ्चालाधिपस्य श्रीवज्रायुधस्य नगरं कान्यकुब्जं नाम। तत्र च सा विक्रीता कोट्या सुवर्णस्य।

**राजा**—

ततस्ततः।

**विदूषकः**—

ततश्च

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ।

णहवहलिदजोह्लाणिब्भरे रत्तिमज्झे
कुसुमसरपहारत्ताससंमीलिदाणं।
णिहुवणपरिरम्भे णिब्भरुत्तुङ्गपीण-
त्थणकलसणिवेसा पीडिदोहं विबुद्धो॥ ७॥

**राजा**—(किंचिद्विहस्य, विचिन्त्य च।)

सिविणअमिअं असच्चं तं दिट्ठं मेणुसंधमाणस्स।
पडिसिविणएण तस्स वि णिआरणं तुह अहिप्पाओ॥ ८॥

**विदूषकः**—भट्टो ठक्कुरो, क्खुहाकिलन्तो बह्मणो, अविणीदहिअआ बालरण्डा, विरहिदो अ माणुसो मणोरहमोदएहिं अत्ताणं विडम्बेदि। अवि अ वअस्स, पुच्छेमि कस्स उण एसो प्पहाओ।

---

दृष्ट्वा स्थूलस्तनतुङ्गिमानमेकावल्यास्तथा चाङ्गिमानम्।
सा तेन दत्ता दयितायाः कण्ठे रज्यन्ति च्छेका समसंगमे॥

कण्ठदानाच्चैकावलीस्तनसंगमो भविष्यतीति भावः। छेका विदग्धाः।

अपि च।

नभोबहलितज्योत्स्नानिर्भरे रात्रिमध्ये
कुसुमशरप्रहारत्राससंमीलितयोः।
निधुवनपरिरम्भे निर्भरोत्तुङ्गपीन-
स्तनकलशनिवेशात्पीडितोऽहं विबुद्धः॥

**राजा**—

स्वप्नमिममसत्यं तद्दृष्टं ममानुसंदधतः।
प्रतिस्वप्नेन तस्यापि निवारणं तवाभिप्रायः॥

न तु वस्तुतः स्वप्नो दृष्ट इति भावः।

**विदूषकः**—

भ्रष्टो राजा, क्षुधाक्रान्तो ब्राह्मणः, अविनीतहृदया बालरण्डा, विरहितश्च मानुषो मनोरथमोदकैरात्मानं विडम्बयति। अपि च वयस्य, पृच्छामि कस्य पुनरेष प्रभावः।

भ्रष्टः। राज्यादिति शेषः। ठक्कुरो राजा। अविनीतहृदया पुरुषसंसर्गाभिलाषिचित्ता। वरहितो विरहयुक्तः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—पेम्मस्स ।

**विदूषकः**—भो, देवीगदे पणअप्परूढे वि पेम्मे किं ति कप्पूरमञ्जरीं सव्वङ्गवित्थारिअलोअणो पिअन्तो विअ अवलोकेसि । किं तदो वि परिहीअप्पमाणगुणा देवी ।

**राजा**—मा एव्वं भण ।

कीए वि संघडइ कस्स वि पेम्मगण्ठी
एमेव्व तत्थ ण हु कारणमत्थि रूअं ।
चङ्गत्तणं उण महिज्जदि जं तहिं पि
ता दिज्जए पिसुणलोअमुहेसु मुद्दा ॥ ९ ॥

**विदूषकः**—भो, किं उण एदं पेम्म पेम्मत्ति भणन्ति ।

**राजा**—अण्णोण्णमिलिदस्स मिहुणस्स मअरद्धअसासणे परूढं पणअगण्ठि पेम्मेत्ति छइल्ला भणन्ति ।

---

**राजा**—
प्रेम्णः ।

**विदूषकः**—
भोः, देवीगते प्रणयप्ररूढेऽपि प्रेम्णि किमिति कर्पूरमञ्जरीं सर्वाङ्गविस्तारितलोचनः पिबन्निवावलोकयसि । किं ततोऽपि परिहीणप्रमाणगुणा देवी ।

परिहीणं प्रमाणं येषामेवंविधा गुणा यस्याः सा ।

**राजा**—
मैवं भण ।

कयाचित्संघटते कस्यापि प्रेमग्रन्थि-
रेवमेव तत्र न खलु कारणमस्ति रूपम् ।
चङ्गत्वं पुनर्मृग्यते यत्तत्रापि
तद्दीयते पिशुनलोकमुखेषु मुद्रा ॥

प्रेमग्रन्थिसंघटने न रूपातिशयः कारणं किं तु तत्स्वभावादेव भवति । तथापि यत्सौन्दर्यान्वेषणं क्रियते केवलं तत्कुटिलमुखेषु मुद्रा दीयते । किमित्यस्यामस्य प्रेमानुबन्ध इति पिशुनजनाकाङ्क्षायां तन्निवर्तकत्वेन परं सौन्दर्यमुपयुज्यत इत्यर्थः । अत्राप्यर्थान्तरन्यासानुप्रासादयः ।

**विदूषकः**—
भोः, किं पुनरेतत्प्रेम प्रेमेति भणन्ति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—कीदिसो सो ।

**राजा**—

जस्सिं विकप्पघडणाइकलङ्कमुक्को
अत्ताणअस्स सरलत्तणमेइ भावो ।
एक्कक्कअस्स पसरन्तरसप्पवाहो
सिंगारवड्डिअमणोभवदिण्णसारो ॥ १० ॥

**विदूषकः**—कधं विअ सो लक्खीअदि ।

**राजा**—

जाणं सहावपसरन्तसलोलदिट्ठी-
पेरन्तलुण्ठिअमणाणँ परप्परेण ।

---

**राजा**—

अन्योन्यमिलितस्य मिथुनस्य मकरध्वजशासने प्ररूढं प्रणयग्रन्थिं प्रेमेति विदग्धा भणन्ति ।

**विदूषकः**—

कीदृशः सः ।

**राजा**—

यस्मिन्विकल्पघटनादिकलङ्कमुक्तः
आत्मनः सरलत्वमेति भावः ।
एकैकस्य प्रसरद्रसप्रवाहः
शृङ्गारवर्धितमनोभवदत्तसारः ॥

यस्मिन्प्रेम्णि विकल्पघटना तत्संबन्धस्तदादिरेव कलङ्कस्तस्मान्मुक्तस्तद्रहितो भावश्चित्ताभिप्राय आत्मनः सरलत्वं सरलभावमेति । कीदृशः । एकैकस्य प्रसरन्रसप्रवाहो यत्र । पुनः कीदृक् । शृङ्गारेण वर्धितो यो मनोभवस्तेन दत्तः सारो यत्र । अत्रापि स्वभावोक्त्यादयः शब्दार्थालंकारा ऊह्याः ।

**विदूषकः**—

कथमिव स लक्ष्यते ।

**राजा**—

ययोः स्वभावप्रसरत्सलोलदृष्टि-
पर्यन्तलुण्ठितमनसोः परस्परेण ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वड्ढन्तमम्महविइण्णरसप्पसारो
ताणं पआसइ लहुं विअ चित्तभावो ॥ ११ ॥

अवि अ ।

अन्तो णिविट्ठमणंविब्भमडम्बरो जो
सो भण्णए मअणमण्डणमेत्थ पेम्मं ।
दुल्लक्खअं पि पअडेइ जणो जअम्मि
तं जाणिमो सुबहुलं मअणिन्दजालम् ॥ १२ ॥

**विदूषकः**—जइ चित्तगदं पेम्ममणुराअमुप्पादेदि, ता किं कज्जदि मण्डणाडम्बरविडम्बणाए ।

**राजा**— वअस्स, सच्चमिणम् ।

किं मेहलावलअणेउरसेहरेहिं
किं चङ्गिमाअ किमु मण्डणडम्बरेहिं ।

---

वर्धमानमन्मथवितीर्णरसप्रसार-
स्तयोः प्रकाशते लघुरिव चित्तभावः ॥

स्वभावतः प्रसरन्त्यः सलोला या दृष्टयस्तासां प्रान्तैर्लुण्ठितं मनो ययोः । लुण्ठितमित्यनेन तदेकरसता ध्वन्यते ।

अपि च ।

अन्तर्निविष्टमनोविभ्रमडम्बरो यः
स भण्यते मदनमण्डनमत्र प्रेम ।
दुर्लक्ष्यमपि प्रकटयति जनो जगति
तज्जानीमः सुबहुलं मदनेन्द्रजालम् ॥

**विदूषकः**—

यदि चित्तगतं प्रेमानुरागमुत्पादयति, तत्किं क्रियते मण्डनाडम्बरविडम्बनया ।

**राजा**—

वयस्य, सत्यमिदम् ।

किं मेखलावलयनूपुरशेखरैः
किं चङ्गिमत्वेन किमु मण्डनाडम्बरैः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं अण्णमत्थि इह किंपि णिअम्बिणीओ
जेणं लहन्ति सुहअत्तणमञ्जरीओ ॥ १३ ॥

अवि अ ।

किं गेअणट्टविहिणा किमु वारुणीए
धूवेण किं अगुरुणा किमु कुङ्कुमेण ।
मिट्ठत्तणे महिअलम्मि ण किं वि अण्णं
रुच्चीअ अत्थि सरिसं पुण माणुसस्स ॥ १४ ॥

अवि अ ।

जा चक्कवट्टिघरिणी जणगेहिणी वा
पेम्मम्मि ताण ण तिलं वि विसेसलाभो ।
जाणे सिरीअ जइ किज्जदि को वि भावो
माणिक्कभूसणणिअंसणकुङ्कुमेहिं ॥ १५ ॥

अवि अ ।

किं लोअणेहिं तरलेहिं किमाणणेण
चन्दोबमेण थणएहिं किमुण्णएहिं ।

---

तदन्यदस्तीह किमपि नितम्बिन्यो
येन लभन्ते सुभगत्वमञ्जरीः ॥

अपि च ।

किं गेयनृत्यविधिना किमु वारुण्या
धूपेन किमगुरुणा किमु कुङ्कुमेन ।
मधुरत्वे महीतलें न किमप्यन्य-
द्रुचेरस्ति सदृशं पुनर्मानुषस्य ॥

अपि च ।

या चक्रवर्तिगृहिणी जनगेहिनी वा
प्रेम्णि तयोर्न तिलमात्रमपि विशेषलाभः ।
जाने श्रिया यदि क्रियते कोऽपि भावो
माणिक्यभूषणनिवसनकुङ्कुमैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं किं पि अण्णमिह भूवलए णिमित्तं
जेणाङ्गणाअ हिअआउ ण ओसरन्ति ॥ १६ ॥

**विदूषकः**— एव्वं णेदम् । किं पुण अण्णं पि मे कधेसु, जं कुमारत्तणे माणुसस्स अमणोज्जमेतस्सिं वि तरुणत्तणे चङ्गत्तणं वड्ढदि ।

**राजा**—

णूणं दुवे इह पवाअइणो जअम्मि
जे देहणिम्मवणजोव्वणदाणदक्खा ।
एक्को घडेदि पढमं कुमरीणमङ्ग-
मुक्कारिऊण पअडेइ पुणो दुदीओ ॥ १७ ॥

---

अपि च ।

किं लोचनैस्तरलैः किमाननेन
चन्द्रोपमेन स्तनैः किमुन्नतैः ।
तत्किमप्यन्यमिह भूवलये निमित्तं
येनाङ्गना हृदयान्नापसरन्ति ॥

यूनामिति शेषः ।

**विदूषकः**—

एवमेतत् । किं पुनरन्यदपि मे कथय, यत्कुमारत्वे मानुषस्यामनोज्ञमेतस्मिन्नपि तारुण्ये चङ्गत्वं वर्धते ।

अमनोज्ञमङ्गादिकमिति शेषः । एतस्मिन्नमनोज्ञे । अपिर्भिन्नक्रमस्तारुण्य इत्यनन्तरं द्रष्टव्यः । यद्वा एतस्मिन्निति तारुण्य इत्यस्यैव विशेषणम् । एतस्मिन्नप्येतादृशोत्कर्षवत्यपीत्यर्थः । तदा न भिन्नक्रमोऽपिः ।

**राजा**—

नूनं द्वाविह प्रजापती जगति
यौ देहनिर्माणयौवनदानदक्षौ ।
एको घटयति प्रथमं कुमरीणामङ्ग-
मुत्कीर्य प्रकटयति पुनर्द्वितीयः ॥

अत्रोत्कीर्य प्रकटयतीत्यनेन निर्माणकर्तृचतुर्मुखापेक्षया कामस्याधिक्यमभिव्यज्यते । तथा च यौवनेऽमनोज्ञस्यापि सौभाग्यवृद्धिर्भवतीति भावः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेण अ।

रणिअवलअकञ्चीणेउरावासलच्छी
मरगअमणिमाला गोरिआ हारलट्ठी।
हिअअहरणमन्तं जोव्वणं कामिणीणं
जअदि मअणकण्डं छट्ठअं वड्डअं अ॥ १८॥

तहा अ।

अङ्गं लावण्णपुण्णं सवणपरिसरे लोअणा हारतारा
वच्छं थोरत्थणिल्लं तिवलिवलइअं मुट्ठिगेज्झं अ मज्झं।
चक्काआरो णिअम्बो तरुणिमसमए किं णु अण्णेण कज्जं
पञ्चेहिं जेव्व बाला मअणजअमहावैजअन्तीअ होन्ति॥ १९॥

(नेपथ्ये।)

साहि कुरङ्गिए, इमिणा सिसिरोवआरेण णलिणिव्व कामं किलिम्मामि।

---

तेन च।

रणितवलयकाञ्चीनूपुरावासलक्ष्मी-
र्मरकतमणिमाला गैरिका हारयष्टिः।
हृदयहरणमन्त्रं यौवनं कामिनीनां
जयति मदनकाण्डः षष्ठको बलिष्ठश्च॥

जयतीति सर्वत्र काञ्च्यादावन्वेति। न च काञ्च्यादीनां बहुत्वान्मदनकाण्डः षष्ठकोऽयमित्येतदनन्वयि स्यादिति वाच्यम्। सर्वसमुदाये षष्ठमदनकाण्डत्वविधाने दोषाभावात्। अथवा यौवनविशेषणम्। बलिष्ठजयतिपदाभ्यां चान्यकाण्डापेक्षयास्य व्यतिरेको ध्वन्यते। यतो बलिष्ठोऽत एव जयतीति हेतुहेतुमद्भावेनान्वयः। अन्योऽपि यो बलिष्ठः स जयतीत्येतदुचितमेवेति भावः।

तथा च।

अङ्गं लावण्यपूर्णं श्रवणपरिसरे लोचने हारतारे
वक्षः स्थूलस्तनं त्रिवलिवलयितं मुष्टिग्राह्यं च मध्यम्।
चक्राकारो नितम्बस्तरुणिमसमये किं न्वन्येन कार्यं
पञ्चभिरेव बाला मदनजयमहावैजयन्त्यो भवन्ति॥

हारे हरणशीले तारे ययोस्ते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विस व्व बिसकन्दली विसहर व्व हारच्छडा
वअस्समिव अत्तणो किरइ तालविन्ताणिलो।
तहा अ करणिग्गअं जलइ जन्तधाराजलं
ण चन्दनमहोसहं हरइ देहदाहं अ मे ॥ २० ॥

**विदूषकः**— सुदं पिअवअस्सेण। भरिआ कण्णा पीऊसगण्डूसेहिं। ता किं अज्जवि उपेक्खीआदि घणघम्मेण किलिमन्ती मुणालिआ, गाढकड्ढणदुःसहेण सलिलेण सिञ्चिज्जन्ती केलिकुङ्कुमत्थली, छम्मासिअमोत्तिआणं झडित्ति फुडन्ती एक्कावलिआ, गण्ठिवण्णकेआलिआ लुण्ठिज्जन्ती गन्धहरिणेण। ता सच्चं दे सिविणअं संपण्णं। एहि, पविसम्ह। उट्ठिज्जदु मअरद्धअपताआ। पअट्टदु कण्ठकुहरम्मि पञ्चमहुंकाराणां रिञ्छोली। थक्कन्तु बाहप्पवाहा। मन्थरिज्जन्तु णीसासप्पसरा। लहदु लावण्णं पुण णवभावं। ता एहि, खिडक्किआदुआरेण पविसम्ह।

(इति प्रविशतः।)

---

(नेपथ्ये।)

सखि कुरङ्गिके, अनेन शिशिरोपचारेण नलिनीव कामं क्लाम्यामि।

शिशिरोपचारः शीतलोपचारः, शिशिरर्तुसमीपागमनं च।

विषमिव बिसकन्दली विषधर इव हारच्छटा
वयस्यमिवात्मनः किरति तालवृन्तानिलः।
तथा च करनिर्गतं ज्वलति यन्त्रधाराजलं
न चन्दनमहौषधं हरति देहदाहं च मे ॥

तालवृन्तानिल आत्मनो वयस्यं सखायं शिखिनमिव किरतीत्यर्थः।

**विदूषकः**—

श्रुतं प्रियवयस्येन। भृतौ कर्णौ पीयूषगण्डूषैः। तत्किमद्याप्युपेक्ष्यते घनघर्मेण क्लाम्यन्ती मृणालिका, गाढक्वथितदुःसहेन सलिलेन सिच्यमाना केलिकुङ्कुमस्थली, षण्मासिकमौक्तिकानां झटिति स्फुटन्त्येकावली, ग्रन्थिपर्णकेदारिका लुण्ठ्यमाना गन्धहारिणेन। तत्सत्यं ते स्वप्नं संपन्नम्। एहि, प्रविशावः। उत्थाप्यतां मकरध्वजपताका। प्रवर्ततां कण्ठकुहरे पञ्चमहुंकाराणां रचना। स्तोकीक्रियन्तां बाष्पप्रवाहाः। मन्थरीक्रियन्तां निःश्वासप्रसराः। लभतां लावण्यं पुनर्नवभावम्। तदेहि, खिडक्किकाद्वारेण प्रविशावः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति नायिका कुरङ्गिका च ।)

**नायिका**— (ससाध्वसं स्वगतम् ।) अम्मो, किं एसो सहसा गअणङ्गणादो अवइण्णो पुण्णिमाहरिणङ्को । किं वा तुट्ठेण णीलकण्ठेण णिअदेहं लम्भिदो मणोहओ । किं वा हिअअस्स दुज्जणो णअणाणं सज्जणो जणो मं संभावेदि । (प्रकाशम् ।) सहि कुरङ्गिए, इन्दजालं विअ पेक्खामि ।

**विदूषकः**—(राजानं हस्ते गृहीत्वा ।) भोदि, सच्चं इन्दजालं संपण्णं ।

(नायिका लज्जते ।)

**कुरङ्गिका**—सहि कप्पूरमञ्जरि, अब्भुट्ठाणेण संभावेहि भट्टारअं ।

(नायिका उत्थातुमिच्छति ।)

**राजा**—(हस्तेन गृहीत्वा ।)

उट्ठिऊण थणभारभङ्गुरं मा मिअङ्कमुहि भञ्ज मज्झअं ।
तुज्झ ईरिसणिवेसदंसणे लोअणाण मअणो पसीददु ॥ २१ ॥

अवि अ ।

जिण्णा पुरो ण हरिदा दलिआ हलिद्दा
रोसाणिअं ण कणकं ण च चम्पआइं ।

---

**नायिका**—

अम्मो, किमेष सहसा गगनाङ्गनादवतीर्णः पूर्णिमाहरिणाङ्कः । किं वा तुष्टेन नीलकण्ठेन निजदेहं लम्भितो मनोभवः । किं वा हृदयस्य दुर्जनो नयनानां सज्जनो जनो मां संभावयति । सखि कुरङ्गिके, इन्द्रजालमिव पश्यामि ।

तुष्टेन रत्यादिस्तुत्या तुष्टेनेत्यर्थः । 'किं वारुष्टेन' इति पाठेऽरुष्टेनेत्यकारप्रश्लेषः । तथापि रत्यादिस्तुत्या रोषरहितेनेत्यर्थः । अथवा नाकारप्रश्लेषः । किं तु रुष्टेन क्रुद्धेन नीलकण्ठेन पुनः शरीरमुत्पाद्य पुनर्दाहेनाधिकतरपीडादानाय पुनः स्वदेहं प्रापितो मनोभव इत्यर्थः ।

**विदूषकः**—

भवति, सत्यमिन्द्रजालं संपन्नम् ।

**कुरङ्गिका**—

सखि कर्पूरमञ्जरि, अभ्युत्थानेन संभावय भट्टारकम् ।

**राजा**—

उत्थाय स्तनभारभङ्गुरं मा मृगाङ्कमुखि भञ्जय मध्यम् ।
तवेदृशनिवेशदर्शनाल्लोचनयोर्मदनः प्रसीदतु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ताइं सुवण्णकुसुमेहिं विलोअणाइं
अच्चेमि जेहिं हरिणच्छि तुमंसि दिट्ठा ॥ २२ ॥

**विदूषकः**—गब्भघरवासेण सेअसलिलसित्तगत्ता संभूदा तत्थभोदी कप्पूरमञ्जरी । ता इमं सिचअञ्चलेण वीजइस्सं दाव । (तथा कुर्वन् ।) हा हा कधं वरिल्लपवणेण णिव्वणो पदीवो । (विचिन्त्य स्वगतम् ।) भोदु । लीलोज्जाणं जेव्व गच्छह्म । (प्रकाशम् ।) भो, अन्धआरणच्चिदं वट्टदि । ता णिक्कामह्म सुरङ्गामुहेण जेव्व पमदुज्जाणं दाव ।

(सर्वे निष्क्रमणं नाटयन्ति ।)

**राजा**—(कर्पूरमञ्जरीं करे धृत्वा ।)
मज्झ हत्थठिदपाणिपल्लवा ईस संचरणबन्धुरा भव ।
जं चिराय कलहंसमण्डली भोदु केलिगमणम्मि दुब्भगा ॥ २३ ॥

(स्पर्शसुखमभिनीय ।)

जे णवस्स तिउसस्स कण्टआ जे कदम्बमउलस्स केसरा ।
अज्ज तुज्झ करफंससङ्गिणो ते हुअन्ति मह अङ्गणिज्जिदा ॥ २४ ॥

---

आपि च ।

यस्याः पुरो न हरिता दलिता हरिद्रा
उज्ज्वलीकृतं न कनकं न च चम्पकानि ।
तानि सुवर्णकुसुमैर्विलोचने
अर्चयामि याभ्यां हरिणाक्षि त्वमसि दृष्टा ।

**विदूषकः**—
गर्भगृहवासेन स्वेदसलिलसिक्तगात्रा संभूता तत्रभवती कर्पूरमञ्जरी । तदिमां सिचयाञ्चलेन वीजयिष्यामि तावत् । हा हा कथं वस्त्राञ्चलपवनेन निर्वाणः प्रदीपः । भवतु । लीलोद्यानमेव गच्छामः । भोः, अन्धकारनृत्यं वर्तते । तन्निष्क्रमामः सुरङ्गामुखेनैव प्रमदोद्यानं तावत् ।

**राजा**—
मम हस्तस्थितपाणिपल्लवा ईषत्संचरणबन्धुरा भव ।
यच्चिराय कलहंसमण्डली भवतु केलिगमने दुर्भगा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नेपथ्ये ।)

**वैतालिकः**—सुहणिबन्धणो होदु देवस्स चन्दुज्जोओ ।

भूगोले तिमिराणुबन्धमलिणे भूमीरुहे व्व ठिदे
संजादा णवभुज्जपिञ्जरमुही जोह्णाअ पुव्वा दिसा ।
मुञ्चन्तो मुचुकुन्दकेसरसिरीसोहाणुआरे करे
चन्दो पेक्ख कलाक्कमेण अ गदो संपुण्णबिम्बत्तणम् ॥ २९ ॥

अवि अ ।

अकुङ्कुममचन्दणं दहदिहावहूमण्डणं
अकङ्कणमकुण्डलं भुअणमण्डलीभूसणम् ।
असोसणममोहणं मअरलञ्छणस्साउहं
मिअङ्ककिरणावली णहअलम्मि पुञ्जिज्जइ ॥ २६ ॥

---

ये नवस्य त्रपुसस्य कण्टका ये कदम्बमुकुलस्य केसराः ।
अद्य तव करस्पर्शसङ्गिनस्ते भवन्ति ममाङ्गनिर्जिताः ॥

कार्ये कारणवदुपचाराद्देहजन्यरोमाञ्चनिर्जिता इत्यर्थः ।

**वैतालिकः**—

सुखनिबन्धनो भवतु देवस्य चन्द्रोद्द्योतः ।

भूगोले तिमिरानुबन्धमलिने भूमिरुह इव स्थिते
संजाता नवभूर्जपिञ्जरमुखी ज्योत्स्नया पूर्वा दिशा ।
मुञ्चन्मुचुकुन्दकेसरश्रीशोभानुकारान्करां-
श्चन्द्रः पश्य कलाक्रमेण च गतः संपूर्णबिम्बत्वम् ॥

तिमिरस्यानुबन्धस्तेन मलिने भूगोले भूमीरुह इव स्थिते । चन्द्रोदयानन्तरं यथा वृक्षमात्रमेव नीलमीक्ष्यते तथा श्यामे भूगोले स्थिते सतीत्यर्थः । 'भूमीघरे' इति वा पाठः । तत्र भूमिगृहे इत्यर्थः । एककलाद्विकलाद्युदयक्रमेणेति कलाक्रमेणेत्यस्यार्थः ।

अपि च ।

अकुङ्कुममचन्दनं दशदिशावधूमण्डनं
अकङ्कणमकुण्डलं भुवनमण्डलीभूषणम् ।
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगाङ्ककिरणावली नभस्तले पुञ्जीभवति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—भो, कणअचण्डेण वण्णिदा चन्दुज्जोअलच्छी। ता संपदं माणिक्कचण्डस्सावसरो।

(नेपथ्ये।)

**द्वितीयो वैतालिकः**—

दज्झन्तागुरुधूपवट्टिकलिआ दीअन्तदीउज्जला
लम्बिज्जन्तविचित्तमोत्तिअलदा मुञ्चन्तपारावदा।
सज्जिज्जन्तमणोजकेलिसअणा जप्पन्तदूईसआ
सज्जुच्छङ्गवलन्तमाणिणिजणा वट्टन्ति लीलाधरा॥ २७॥

अवि अ।

देन्ता कप्पूरपूरच्छुरणमिव दिसासुन्दराण मुहेसु
स्लक्खं जोह्नं किरन्तो भुअणजणमणाणन्दणं चन्दणं व्व।
जिण्णं कंदप्पकन्दं तिहुअणकलणाकन्दलिल्लं कुणन्तो
जादा एणङ्कपादा सअलजलहरम्मुक्कधाराणुआरा॥ २८॥

---

अकुङ्कुममित्यनेन नवोद्गतायास्तस्याः पीतत्वं ध्वन्यते। अचन्दनमित्यनेन चन्दनाधिकशातलता द्योत्यते। दशशब्देन चैकवधूमात्रशोभाकरमण्डनान्तरवैलक्षण्यं द्योत्यते। अकङ्कणमित्यादिना भूषणान्तरवैचित्र्यमस्या अभिव्यज्यते। अशोषणमित्यादिनायुधवैलक्षण्यं चास्या द्योत्यते।

**विदूषकः**—

भोः, कनकचण्डेन वर्णिता चन्द्रोद्द्योतलक्ष्मीः। तत्सांप्रतं माणिक्यचण्डस्यावसरः।

**द्वितीयो वैतालिकः**—

दह्यमानागुरुधूपवर्तिकलिका दीयमानदीपोज्ज्वला
लम्ब्यमानविचित्र्यमौक्तिकलता मुच्यमानपारावताः।
सज्जीक्रियमाणमनोज्ञकेलिशयना जल्पद्दूतीशताः
शय्योत्सङ्गवलन्मानिनीजना वर्तन्ते लीलागृहाः।

दह्यमाना अगुरुधूपवर्तय एव कलिका येषु। यद्वा दह्यमानेत्यादि उज्ज्वला इत्यन्तमेकं पदम्। तदा दह्यमानागुरुधूपाश्च ते वर्तिकलिकाभिर्दीयमानदीपोज्ज्वलाश्चेत्यर्थः। अथवा दह्यमानागुरुधूपयुक्तवर्तिकलिकाभिरेव दीयमानदीपोज्ज्वला इत्यर्थः। तदा शोभाधिक्यं व्यज्यते।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः—**

दिसवहुतंसो णहसरहंसो ।
णिहुअणकन्दो पसरइ चन्दो ॥ २९ ॥

**कुरङ्गिका—**

ससहररइअमरट्टो माणिणिमाणघरट्टो ।
णवचम्पअकोदण्डो मअणो जअइ पअण्डो ॥ ३० ॥

(कर्पूरमञ्जरीं प्रति ।) पिअसहि, तुए कदं चन्दवण्णणं महाराअस्स पुरदो पढिस्सं ।

(कर्पूरमञ्जरी लज्जते । कुरङ्गिका पठति ।)

मण्डले ससहरस्स गोरए दन्तपञ्जरविलासचोरए ।
भादि लञ्छणमिओ फुरन्तओ केलिकोइलतुलं धरन्तओ ॥ ३१ ॥

अपि च ।

ददतः कर्पूरपूरच्छुरणमिव दिशासुन्दरीणां मुखेषु
श्लक्ष्णां ज्योत्स्नां किरन्तो भुवनजनमनआनन्दनं चन्दनमिव ।
जीर्णं कंदर्पकन्दं त्रिभुवनकलनाकन्दलितं कुर्वन्तो
जाता एणाङ्कपादाः सजलजलधरोन्मुक्तधारानुकाराः ॥

श्लक्ष्णां कोमलां ज्योत्स्नां किरन्त इति संबन्धः । तादृशास्ते कीदृशा इव कर्पूरपूरच्छुरणं ददत इवेति विशिष्टवैशिष्ट्यन्यायेन संबन्धः । दिशासुन्दरीणामित्युभयत्र संबध्यते । त्रिभुवनेति । विनाकामं कस्यापि सृष्टेरभावात् । कन्दलयन्तः पल्लवयन्तः । इत्यनेन कामिनां कामातिशयजनकत्वं किरणानां व्यङ्ग्यम् । जलधरोन्मुक्तधारासाम्येन मेघाद्यप्रतिहतत्वं तेषु द्योत्यते ।

**विदूषकः—**

दिग्वधूत्तंसो नभःसरोहंसः ।
निधुवनकन्दः प्रसरति चन्द्रः ॥

हंस इत्यनेन धवलिमातिशयो द्योत्यते ।

**कुरङ्गिका—**

शशधररचितगर्वो मानिनीमानघरट्टः ।
नवचम्पककोदण्डो मदनो जयति प्रचण्डः ॥

घरट्टः पेषणकर्ता ।

प्रियसखि, त्वया कृतं चन्द्रवर्णनं महाराजस्य पुरतः पठिष्यामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—अहो कप्पूरमञ्जरीए अहिणवत्थदंसणं, रमणीओ सद्दो, उत्तिविचित्तदा, रसणिस्सन्दो अ । (तां प्रति ।)

मा कहिं पि वअणेण विब्भमो होउ इत्ति तुह णूणमिन्दुणा ।
लञ्छणच्छलमसीविसेसओ पेक्ख बिम्बफलए णिए किदो ॥ ३२ ॥

किं च ।

पण्डुरेण जइ रज्जए मुहं कोमलङ्गि खडिआरसेण दे ।
दिज्जए उण कपोलकज्जलं ता लहेदि ससिणो विडम्बणं ॥ ३३ ॥

(चन्द्रमुद्दिश्य ।)

मुक्कसङ्क हरिणङ्क किं तुमं सुन्दरीपरिसरेण हिण्डसि ।
गोरगण्डपरिपण्डुरत्तणं पेच्छ दिण्णममुणा मुहेण दे ॥ ३४ ॥

---

मण्डले शशधरस्य गौरे दन्तपञ्जरविलासचौरे ।
भाति लाञ्छनमृगः स्फुरन्केलिकोकिलतुलां धारयन् ॥

**राजा**—

अहो कर्पूरमञ्जर्या अभिनवार्थदर्शनम्, रमणीयः शब्दः, उक्तिविचित्रता, रसनिःष्पन्दश्च ।

मा कथमपि वदनेन विभ्रमो भवत्विति तव नूनमिन्दुना ।
लाञ्छनच्छलमषीविशेषकः पश्य बिम्बफलके निजे कृतः ॥

किं च ।

पाण्डुरेण यदि रज्यते मुखं कोमलाङ्गि खटिकारसेन ते ।
दीयते पुनः कपोलकज्जलं तदा लभते शशिनो विडम्बनम् ॥
मुक्तशङ्क हरिणाङ्क किं त्वं सुन्दरीपरिसरेण हिण्डसे ।
गौरगण्डपरिपाण्डुरत्वं पश्य दत्तममुना मुखेन ते ॥

अनेन सुन्दरीमुखेन ते तुभ्यं गौरगण्डपरिपाण्डुरत्वं दत्तमिति त्वमेव पश्येति वाक्यार्थः कर्म । तादृशसुन्दरीसविधे त्वं किं कुतो न परिभ्रमसि । अत्यनुचितं करोषीति भावः । अत एव साभिप्रायं संबोधनमाह—मुक्तशङ्केति । एतादृशं वस्तु यतः प्राप्तं तत्र भक्तिर्नास्तीति किमुच्यते, शङ्कापि लोकलज्जापि ते नास्तीति महदाश्चर्यमिति भावः । यद्वा यदेकदेशमुखैकदेशेनापि तवैतावद्दत्तं तन्निकटाटनेन विशेषान्तरप्राप्तिरपि संभाव्यते । तदपि त्वं नाचरसीति महानज्ञस्त्वमिति भावः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नेपथ्ये महान्कलकलः। सर्वे आकर्णयन्ति।)

**राजा**—किं उण एस कोलाहलो।

**कर्पूरमञ्जरी**—(ससाध्वसम्।) पिअसहि, एदमवगमिअ आअच्छ।

(कुरङ्गिका निष्क्रम्य प्रविशति।)

**विदूषकः**—देवीए पिअवअस्सस्स वञ्चणा किदेत्ति तक्केमि।

**कुरङ्गिका**—पिअसहि, भट्टारअस्स वञ्चणं कदुअ तुए सह संगमं जाणिअ आअच्छदि देवी। तेण कुज्जवामणकिरातवरिसवरसोविदल्लाणं एस हलहल्लो।

**कर्पूरमञ्जरी**—(सभयम्।) ता मं पेसदु महाराओ जेणाहमिमिणा सुरङ्गामुहेण जेव्व पविसिअ रक्खाघरअं गच्छेमि। जह देवी महाराएण सह संगमं ण जाणादि।

(इति निष्क्रान्ताः सर्वे।)

इति तृतीयं जवनिकान्तरम्।

---

**राजा**—

किं पुनरेष कोलाहलः।

**कर्पूरमञ्जरी**—

प्रियसखि, एतदवगम्यागच्छ।

एतत्कलकलविषयवस्तु।

**विदूषकः**—

देव्या प्रियवयस्यस्य वञ्चना कृतेति तर्कयामि।

**कुरङ्गिका**—

प्रियसखि, भट्टारकस्य वञ्चनां कृत्वा त्वया सह संगमं ज्ञात्वागच्छति देवी। तेन कुब्जवामनकिरातवर्षवरसौविदल्लानामेष कोलाहलः।

**कर्पूरमञ्जरी**—

तन्मां प्रेषयतु महाराजो येनाहमनेन सुरुङ्गामुखेनैव प्रविश्य रक्षागृहकं गच्छामि। यथा देवी महाराजेन सह संगमं न जानाति।

इति श्रीमद्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वकुन्दप्रतिमयशःप्रकरप्रखरकठोर-किरणकरप्रभप्रतिभप्रभाकरभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरी-प्रकाशे तृतीयं जवनिकान्तरं समाप्तम्।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## चतुर्थं जवनिकान्तरम्।

(ततः प्रविशति राजा विदूषकश्च।)

**राजा**—अहो, गाढअरो गिह्मो, पवणो अ पअण्डो। ता कधं णु सहिदव्वो। जदो।

इह कुसुमसरेक्कगोअराणं इदमुभअं वि सुदुःसहं ति मण्णे।
जरठरइकरालिदो अ कालो तह अ जणेण पिएण विप्पलम्भो॥ १॥

**विदूषकः**—एक्के दाव मम्मह वाहणिज्जा, अण्णे दाव सोसणिज्जा। अह्मारिसो उण जणो न कामस्स वाहणिज्जो ण तावस्स सोसणिज्जो।

(नेपथ्ये।)

ता किं ण खु दे मूलुप्पाडिअचूडिआविअलं सीसं करिस्से।

**राजा**—(विहस्य।) वअस्स, लीलावणसच्छन्दचारिणा केलिसुएण किं भणिदं।

**विदूषकः**—(सक्रोधम्।) आ दासीए उत्त, सूलाअरणजोग्गोऽसि।

---

**राजा—**

अहो गाढतरो ग्रीष्मः, पवनश्च प्रचण्डः। तत्कथं नु सोढव्यः। यतः।

इह कुसुमशरैकगोचराणामिदमुभयमपि सुदुःसहमिति मन्ये।
जरठरविकरालितश्च कालस्तथा च जनेन प्रियेण विप्रलम्भः॥

**विदूषकः—**

एके तावन्मदनस्य बाधनीयाः, अन्ये तावच्छोषणीयाः। अस्मादृशः पुनर्जनो न कामस्य बाधनीयो न तापस्य शोषणीयः।

**नेपथ्ये—**

तत्किं न खलु ते मूलोत्पाटितचूलिकाविकलं शीर्षं करिष्ये।

**राजा—**

वयस्य, लीलावनस्वच्छन्दचारिणा केलिशुकेन किं भणितम्।

**विदूषकः—**

आः दास्याः पुत्र, शूलाकरणयोग्योऽसि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नेपथ्ये।)

सव्वं तुह्मारिसाहिन्तो संभाविज्जदि, जइ मे ण होन्ति पक्खावलीओ।

**राजा**—(विलोक्य।) कहं उड्डीणो ज्जेव्व। (विदूषकं प्रति।)

णिसा तलिनवित्थरा तह दिणेसु वड्ढत्तणं
ससी लहदि खण्डणं तह अ चण्डबिम्बो रई।
णिदाहदिअसेसु विप्फुरदि जस्स एव्वं क्कमो
कहं ण स विही तदो खुरसिहाइं खण्डिज्जादि॥ २॥

किं च णिउणं सेवणिज्जो जइ सुहसंगमो भोदि। जदो।

मज्झण्णे सिरिखण्डपङ्ककलणा आ संझमोल्लंसुअं
लीलामज्जणमा पदोससमअं साअं सुरा सीअला।
गिम्हे पच्छिमजामिणीणिहुवणं जं किं पि पञ्चेसुणो
एदे पञ्च सिलीमुहा विजइणो सेसा सरा जज्जरा॥ ३॥

---

**नेपथ्ये**—

सर्वं युष्मादृशेभ्यः संभाव्यते, यदि मे न भवन्ति पक्षावल्यः।

**राजा**—

कथमुड्डीन एव।

निशास्तलिनविस्तरास्तथा दिनेषु वृद्धत्वं
शशी लभते खण्डनं तथा च चण्डबिम्बो रविः।
निदाघदिवसेषु विस्फुरति यस्यैवं क्रमः
कथं न स विधिस्ततः क्षुरशिखाभिः खण्ड्यते॥

किं च निपुणं सेवनीयो यदि शुभसंगमो भवति।

शुभः संगमो यस्य। तादृशत्वं च स्त्रीयुक्तपुमांसं प्रत्येवेति भावः। शुभः संगमो यस्मिन्निति वा।

यतः।

मध्याह्ने श्रीखण्डपङ्ककलना आ संध्यमार्द्रांशुकं
लीलामज्जनमा प्रदोपसमयं सायं सुरा शीतला।
ग्रीष्मे पश्चिमयामिनीनिधुवनं यत्किमपि पञ्चेषो-
रेते पञ्च शिलीमुखा विजयिनः शेषाः शरा जर्जराः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—मा एव्वं भण ।

पण्डुच्छविच्छुरिदणाअलदादलाणं
साहारतेल्लपरिपेसलपोफलाणं ।
कप्पूरपंसुपरिवासिदचन्दणाणं
भद्दं णिदाहदिअसाणँ वअस्स भोदु ॥ ४ ॥

**राजा**—एदं पुण एत्थ रमणिज्जं ।

सपञ्चमतरङ्गिणो सवणसीअला वेणुणो
समं सिसिरवारिणा वअणसीअला वारुणी ।
सचन्दणघणत्थणी सअणसीअला कामिणी
णिदाहदिअसोसहं सहअसीअलं कस्सवि ॥ ५ ॥

---

ननु कंदर्पस्य पञ्चाधिकानां शराणामेवाभावात्कथं शेषाः शरा जर्जरा इत्युक्तमिति चेन्न, कार्यक्षमपञ्चशरवत्तामात्रादेव पञ्चशरत्वव्यवहारोपपत्तावतिरिक्तशराभावकल्पने मानाभाव इत्यभिप्रायात् । यद्वा पञ्चैवेषवो मदनस्य तथापि कालभेदेनान्यानन्यानुपादत्त इति पूर्वस्वीकृतेषु जर्जरता युक्तैवेति न कोऽपि दोषः ।

**विदूषकः**—

मा एवं भण ।

पाण्डुच्छविच्छुरितनागलतादलानां
सहकारतैलपरिपेशलपूगफलानाम् ।
कर्पूरपांसुपरिवासितचन्दनानां
भद्रं निदाघदिवसानां वयस्य भवतु ॥

पाण्डुच्छवीत्यादि हेतुगर्भविशेषणानि । तथा च यत एत एतादृशा अत एषां भद्रं भवत्वित्यर्थः ।

**राजा**—

इदं पुनरत्र रमणीयम् ।

सपञ्चमतरङ्गिणः श्रवणशीतला वेणवः
समं शिशिरवारिणा वदनशीतला वारुणी ।
सचन्दनघनस्तनी शयनशीतला कामिनी
निदाघदिवसौषधं सहजशीतलं कस्यापि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवि अ ।

लीलुत्तंसो सिरीसं सिहिणपरिसरे सिन्दुवाराणँ हारो
अङ्के ओल्लं वरिल्लं रमणपणइणी मेहला उप्पलेहिं ।
दोसुं दोकन्दलीसुं णवबिसवलआ कामवेज्जो मणोज्जो
तावातङ्कक्खमाणं महुसमअगदे एस वेसोऽबलाणं ॥ ६ ॥

**विदूषकः**—अहं उण भणामि—

मज्झण्णलह्णघणचन्दनपङ्किलाणं
साअं णिसेविदणिरन्तरमज्जणाणं ।
सामासु वीअणअवारिकणुक्खिदाणं
दासत्तणं कुणइ पञ्चसरोऽबलाणं ॥ ७ ॥

**राजा**—(स्मरणमभिनीय ।)

पच्चङ्गं णवरूअभङ्गिघडणा रम्मे जणे संगमो
जाणं ताण खणं व्व झत्ति दिअहा वट्टन्ति दीहा अपि ।

कस्यापीत्यपिरर्थः । शीतलं यद्वस्तु तन्निदाघदिवसौषधम् । तापशमनायेति शेषः । कस्य वा न भवति । अपि तु सर्वस्यापि भवतीति काकुः ।

अपि च ।

लीलोत्तंसः शिरीषं स्तनपरिसरे सिन्दुवाराणां हारः
अङ्के आर्द्रं वस्त्रं रमणप्रणयिनी मेखलोत्पलैः ।
द्वयोर्दोःकन्दल्योर्नवबिसवलया कामवैद्यो मनोज्ञ-
स्तापातङ्कक्षमाणां मधुसमये गते एष वेषोऽबलानाम् ॥

तापसंबन्धिन्यातङ्के क्षमाः समर्थाः । तद्युक्ता इति यावत् । अबलानां कामिनीनाम्, बलरहितानां च ।

**विदूषकः**—

अहं पुनर्भणामि—

मध्याह्नश्लक्ष्णघनचन्दनपङ्किलानां
सायं निषेवितनिरन्तरमज्जनानाम् ।
श्यामासु व्यजनजवारिकणोक्षितानां
दासत्वं करोति पञ्चशरोऽबलानाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाणं ते अ मणम्मि देन्ति ण रइं चित्तस्स संदाविणो
तार्णं जान्ति जअम्मि दीहरतमा मासोवमा वासरा ॥ ८ ॥

(विदूषकं प्रति ।) वअस्स, अत्थि तग्गदा कावि वत्ता ।

**विदूषकः**—अत्थि । सुणादु पिअवअस्सो । कधेमि सुहासिदं दे । जदो पहुदि कप्पूरमञ्जरी रक्खाभवणादो सुरङ्गादुआरे देवीए दिट्ठा तदो पहुदि तं सुरङ्गादुआरं देवीए बहलसिलासंचएण णीरन्धं कदुअ पिहिदं । अणङ्गसेणा कलिङ्गसेणा कामसेणा वसन्तसेणा विब्भमसेणेति पञ्च सेणाणामधेआओ चामरधारणीओ फारप्फुरक्किदकरवालहत्थपाइक्कसहस्सेण सह कारामन्दिरस्स रक्खाणिमित्तं पुव्वदिसि णिउत्ताओ ।

अणङ्गलेहा चित्तलेहा चन्दलेहा मिअङ्कलेहा विब्भमलेहेत्ति लेहाणामधेआओ पञ्च सेरन्धीओ पुङ्खिदसिलीमुहधणूहत्थेण णिविडणिबद्धतूणीरदुद्धरेण धाणुक्कसहस्सेण समं दक्खिणाए दिसाए णिवेसिदाओ ।

---

**राजा**—

प्रत्यङ्गं नवरूपभङ्गिघटना रम्ये जने संगमो
येषां तेषां क्षणमिव झटिति दिवसा वर्तन्ते दीर्घा अपि ।
येषां ते च मनसि ददति न रतिं चित्तस्य संतापिन-
स्तेषां यान्ति जगन्ति दीर्घतमा मासोपमा वासराः ॥

वयस्य, अस्ति तद्गता कापि वार्ता ।

**विदूषकः**—

अस्ति । शृणोतु प्रियवयस्यः । कथयामि सुभाषितं ते । यतः प्रभृति कर्पूरमञ्जरी रक्षाभवनात्सुरङ्गाद्वारे देव्या दृष्टा ततः प्रभृति तत्सुरङ्गाद्वारं देव्या बहुलशिलासंचयेन नीरन्ध्रं कृत्वा पिहितम् । अनङ्गसेना कलिङ्गसेना कामसेना वसन्तसेना विभ्रमसेनेति पञ्च सेनानामधेयाश्चामरधारिण्यः स्फारस्फुरत्करवालहस्तपदातिसहस्रेण सह कारामन्दिरस्य रक्षानिमित्तं पूर्वदिशि नियुक्ताः ।

अनङ्गलेखा चित्रलेखा चन्द्रलेखा मृगाङ्कलेखा विभ्रमलेखेति लेखानामधेयाः पञ्च सैरन्ध्र्यः पुङ्खितशिलीमुखधनुर्हस्तेन निबिडनिबद्धतूणीरदुर्धरेण धानुष्कसहस्रेण समं दक्षिणस्यां दिशि निवेशिताः ।

१४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुन्दमाला चन्दणमाला कुवलअमाला कञ्चणमाला बउलमाला मङ्गलमाला माणिक्कमालेति सत्त मालेत्तिणामधेआओ णवणिसिदकुन्तहत्थपाइक्कसहस्सेण समं तम्बूलकरङ्कवाहिणीओ पच्छिमाए दिसाए णिवेसिदाओ।

अणङ्गकेली पुक्करकेली कंदप्पकली सुन्दरकेली कन्दोट्टकेलीति पञ्च केलीत्तिणामधेआओ मज्जणकारिणीओ फलअखग्गकम्पविदुरिल्लेण पाइक्कसहस्सेण समं उत्तरदिसाए आणत्ताओ।

ताणं वि उण उवरि मदिरावदी केलिवदी कल्लोलवदी तरङ्गवदी अणङ्गवदीत्ति पञ्च वदीत्तिणामधेआओ परिचारिआकुमारीओ कणअचित्तदण्डहत्थाओ सुहासिअपाढिआओ बन्दीणामधेआओ सेणाए अद्धक्खीकदाओत्ति।

**राजा**—अहो देवीए सामग्गी अन्तेउरोचिदा।

**विदूषकः**—भो वअस्स, एसा देवीए सारङ्गिआणाम सही किं पि णिवेदिदुं पेसिदा।

---

कुन्दमाला चन्दनमाला कुवलयमाला काञ्चनमाला बकुलमाला मङ्गलमाला माणिक्यमालेति सप्त मालेतिनामधेया नवनिशितकुन्तहस्तपदातिसहस्रेण समं ताम्बूलकरङ्कवाहिन्यः पश्चिमदिशि निवेशिताः।

अनङ्गकेलिः पुष्करकेलिः कंदर्पकेलिः सुन्दरकेलिः उत्पलकेलिरिति पञ्च केलीतिनामधेया मज्जनकारिण्यः फलकखड्गकम्पभीषणेन पदातिसहस्रेण सममुत्तरदिश्याज्ञप्ताः।

तासामपि पुनरुपरि मदिरावती केलिवती कल्लोलवती तरङ्गवती अनङ्गवतीति पञ्च वतीतिनामधेयाः परिचारिकाकुमार्यः कनकचित्रदण्डहस्ताः सुभाषितपाठिका बन्दीनामधेयाः सेनाया अध्यक्षीकृता इति।

**राजा**—

अहो देव्याः सामग्र्यन्तःपुरोचिताः।

**विदूषकः**—

भो वयस्य, एषा देव्या सारङ्गिकानाम सखी किमपि निवेदितुं प्रेषिता।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति सारङ्गिका ।)

**सारङ्गिका**—जअदु जअदु भट्टा । देव, देवी विण्णवेदि—अज्ज चतुत्थदिअहे भविअवडसाइत्तीमहूसवोवअरणाइं केलिविमाणप्पसादमारुहिअ पेक्खिदव्वाइं त्ति ।

**राजा**—जं देवी आणवेदि ।

(चेटी निष्क्रान्ता । उभौ प्रासादाधिरोहणं नाटयतः ।)

(ततः प्रविशति चर्चरी ।)

**विदूषकः**—

मोत्ताहलिल्लाहरणुच्चआओ लासावसाणे चलिअंसुआओ ।
सिञ्चन्ति अण्णोण्णमिमीअ पेक्ख जन्ताजलेहिं मणिभाजनेहिं ॥ ९ ॥

इदो अ ।

परिब्भमन्तीअ विचित्तबन्धं इमाइ दोसोलह णच्चणीओ ।
खेलन्ति तालाणुगदप्पदाओ तुहङ्गणे दीसइ दण्डरासो ॥ १० ॥
समांससीसा समबाहुहत्था रेहाविसुद्धा अपरा अ देन्ति ।
पन्तीहिं दोहिं लअतालबन्धं परप्परं साहिमुहा हुवन्ति ॥ ११ ॥

---

**सारङ्गिका**—

जयतु जयतु भर्ता । देव, देवी विज्ञापयति—अद्य चतुर्थदिवसे भाविवटसावित्रीमहोत्सवोपकरणानि केलिविमानप्रासादमारुह्य प्रेक्षितव्यानीति ।

**राजा**—

यद्देव्याज्ञापयति ।

**विदूषकः**—

मुक्ताफलाभरणोच्चया लास्यावसाने चलितांशुकाः ।
सिञ्चन्त्यन्योन्यमिमाः पश्य यन्त्रजलैर्मणिभाजनैः ॥

लास्यावसाने इमा अन्योन्यं सिञ्चन्तीति संबन्धः ।

इतश्च ।

परिभ्रमन्त्यो विचित्रबन्धं इमा द्विषोडश नर्तक्यः ।
खेलन्ति तालानुगतपदास्तवाङ्गणे दृश्यते दण्डरासः ॥
समांसशीर्षाः समबाहुहस्ता रेखाविशुद्धा अपराश्च ददति ।
पङ्क्तिभ्यां द्वाभ्यां लयतालबन्धं परस्परं साभिमुखा भवन्ति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोत्तूण अण्णा मणिवारआइं जन्तेहिं धारासलिलं खिवन्ति ।
पडन्ति ताआ अ पिआणमङ्के मणोहुओ वारुणबाणकप्पा ॥ १२ ॥
इमा मसीकज्जलकालकाआ तिक्कण्डचावा अ विलासिणीओ ।
पुलिन्दरूवेण जणस्स हासं समोरपिच्छाहरणा कुणन्ति ॥ १३ ॥
हत्थे महामंसबलीधराओ हुंकारफेक्काररवा रउद्दा ।
णिसाअरीणं पडिसीसएहिं अण्णा मसाणाभिणअं कुणन्ति ॥ १४ ॥
कावि वादिदकरालहुडुक्का रम्ममद्दलरएण मिअच्छी ।
भूलदाहिं पडिवाडिचलाहिं चेदिकम्मकरणम्मि पअट्टा ॥ १५ ॥
किङ्किणीकदरणज्झणसद्दा कण्ठगीदलअजन्तिदताला ।
जोगिणीवलअणच्चणकेलिं तालणेउररअं विरअन्ति ॥ १६ ॥
कोउहल्लवसचञ्चलवेसा वेणुवादणपरा अवराओ ।
कालवेसवसहासिदलोआ ओसरन्ति पणमन्ति हसन्ति ॥ १७ ॥

(प्रविश्य ।)

**सारङ्गिका**—(पुरोऽवलोक्य ।) एसो महाराओ पुणो मरगअपुञ्जं जेव्व गदो । कदलीघरं अ अणुप्पइट्ठो । ता अग्गदो गदुअ देवीविण्णाविअं वि-

---

मुक्त्वा अन्या मणिवारणानि यन्त्रैर्धारासलिलं क्षिपन्ति ।
पतन्ति ताश्च प्रियाणामङ्के मनोभुवो वारुणबाणकल्पाः ॥
इमा मषीकज्जलश्यामकायास्त्रिकाण्डचापाश्च विलासिन्यः ।
पुलिन्दरूपेण जनस्य हासं समयूरपिच्छाभरणाः कुर्वन्ति ॥
हस्ते महामांसबलिधारिण्यो हुंकारफेत्काररवा रौद्राः ।
निशाचरीणां प्रतिशीर्षकैरन्याः श्मशानाभिनयं कुर्वन्ति ॥
कापि वादितकरालहुडुक्का रम्यमर्दलरवेण मृगाक्षी ।
भ्रूलताभ्यां परिपाटीचलाभ्यां चेटीकर्मकरणे प्रवृत्ता ॥
किङ्किणीकृतरणज्झणशब्दाः कण्ठगीतलययन्त्रिततालाः ।
योगिनीवलयनर्तनकेलिं तालनूपुररवं विरचयन्ति ॥
कौतूहलवशचञ्चलवेषा वेणुवादनपरा अपराः ।
कालवेषवशहासितलोका अपसरन्ति प्रणमन्ति हसन्ति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ण्णवेमि । (उपसृत्य ।) जअदु जअदु देवो । देवी एदं विण्णवेदि जधा संझासमए जूअं मए परिणेदव्वा ।

**विदूषकः**—भो, किं एदं अकालकोहण्डपडणम् ।

**राजा**—सारङ्गिए, सव्वं वित्थरेण कधेहि ।

**सारङ्गिका**—एवं विण्णवीअदि, अणन्तरातिक्कन्तचउद्दसीदिअहे देवीए पोम्मराअमणिमई गोरी कदुअ भैरवाणन्देण पडिट्ठाविदा । सअं अ दिक्खा गहिदा । तदो ताए विण्णत्तो जोगीसरो गुरुदक्खिणाणिमित्तं । भणिदं च तेण जइ अवस्सं गुरुदक्खिणा दादव्वा ता एसा दीअदु महाराअस्स । तदो देवीए विण्णत्तं जं आदिसादि भअवं । पुणो वि उल्लविदं तेण । अत्थि एत्थ लाटदेसे चण्डसेणो णाम राजा । तस्स दुहिदा घणसारमञ्जरी णाम । सा देवण्णेहिं आदिट्ठा एसा चक्कवट्टिघरिणी भविस्सदि त्ति । तदो महाराअस्स परिणेदव्वा । तेण गुरुद-

---

**सारङ्गिका**—

एष महाराजः पुनर्मरकतपुञ्जमेव गतः । कदलीगृहं चानुप्रविष्टः । तदग्रतो गत्वा देवीविज्ञापितं विज्ञापयामि । जयतु जयतु देवः । देवीदं विज्ञापयति यथा संध्यासमये यूयं मया परिणेतव्याः ।

**विदूषकः**—

भोः, किमेतदकालकूष्माण्डपतनम् ।

**राजा**—

सारङ्गिके, सर्वं विस्तरेण कथय ।

**सारङ्गिका**—

एवं विज्ञाप्यते, अनन्तरातिक्रान्तचतुर्दशीदिवसे देव्या पद्मरागमणिमयी गौरी कृत्वा भैरवानन्देन प्रतिष्ठापिता । स्वयं च दीक्षा गृहीता । ततस्तया विज्ञप्तो योगीश्वरो गुरुदक्षिणानिमित्तम् । भणितं च तेन यद्यवश्यं गुरुदक्षिणा दातव्या तदेषा दीयतां महाराजस्य । ततो देव्या विज्ञप्तं यदादिशति भगवान् । पुनरप्युल्लपितं तेन । अस्त्यत्र लाटदेशे चण्डसेनो नाम राजा । तस्य दुहिता घनसारमञ्जरी नाम । सा दैवज्ञैरादिष्टा एषा चक्रवर्तिगृहिणी भविष्यतीति । ततो महाराजस्य परिणेतव्या । तेन गुरुदक्षिणा दत्ता भवति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्खिणा दिण्णा भोदि। भट्टा वि चक्कवट्टी किदो भोदि। तदो देवीए विहसिअ भणिअं जं आदिसदि भअवं। अहं च विण्णविदुं पेसिदा गुरुस्स गुरुदक्खिणाणिमित्तम्।

**विदूषकः**—(विहस्य।) एदं तं संविधाणअं सीसे सप्पो देसन्तरे वेज्जो। इह अज्ज विवाहो लाटदेसे घणसारमञ्जरी।

**राजा**—किं ते भैरवाणन्दस्स प्पहाओ ण पच्चक्खो। (तां प्रति।) कहिं संपदं भैरवाणन्दो।

**सारङ्गिका**—देवीकारिदपमदुज्जाणस्स मज्झट्ठिदवडतरुमूले चामुण्डाअदणे भैरवाणन्दो देवी अ आगमिस्सदि। ता अज्ज दक्खिणाविहिदो कोऊहलपरो विवाहो। ता इह ज्जेव्व देवेण ठादव्वं। (इति परिक्रम्य निष्क्रान्ता।)

**राजा**—वअस्स, सव्वं एदं भैरवाणन्दस्स विजम्भिदं त्ति तक्केमि।

**विदूषकः**—एव्वं णेदं। ण हु मअलञ्छणमन्तरेण अण्णो मिअङ्कमणिपुत्तलिअं पस्सवएदि। ण हु सरअसमीरमन्तरेण सेहालिआकुसुमुक्करं विकासेदि।

---

भर्तापि चक्रवर्ती कृतो भवति। ततो देव्या विहस्य भणितं यदादिशति भगवान्। अहं च विज्ञापयितुं प्रेषिता गुरोर्गुरुदक्षिणानिमित्तम्।

**विदूषकः**—

एतत्तत्संविधानकं शीर्षे सर्पो देशान्तरे वैद्यः। इहाद्य विवाहो लाटदेशे घनसारमञ्जरी।

**राजा**—

किं ते भैरवानन्दस्य प्रभावो न प्रत्यक्षः। कुत्र सांप्रतं भैरवानन्दः।

**सारङ्गिका**—

देवीकारितप्रमदोद्यानस्य मध्यस्थितवटतरुमूले चामुण्डायतने भैरवानन्दो देवी चागमिष्यति। तदद्य दक्षिणाविहितः कौतूहलपरो विवाहः। तदिहैव देवेन स्थातव्यम्।

**राजा**—

वयस्य, सर्वमेतद्भैरवानन्दस्य विजृम्भितमिति तर्कयामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति भैरवानन्दः ।)

**भैरवानन्दः**—इअं सा वडतरुमूले णिब्भिण्णस्स सुरङ्गादुआरस्स पिहाणं चामुण्डा । (हस्तेन प्रणम्य पठति ।)

कप्पन्तकेलिभवणे कालस्स पुराणरुहिरसुरम् ।
जअदि पिअन्ती चण्डी पम्मेट्ठिकवालचसएण ॥ १८ ॥

(प्रविश्योपविश्य ।) अज्जवि ण णिग्गच्छदि सुरङ्गादुआरेण कप्पूरमञ्जरी ।

(ततः प्रविशति सुरङ्गोद्घाटितकेन कर्पूरमञ्जरी ।)

**कर्पूरमञ्जरी**—भअवं, पणमिज्जसि ।

**भैरवानन्दः**—उइदं वरं लहेसु । इह ज्जेव्व उवविससु ।

(कर्पूरमञ्जरी तथा करोति ।)

**भैरवानन्दः**—(स्वगतम् ।) अज्ज वि ण आअच्छदि देवी ।

(प्रविश्य ।)

**राज्ञी**—(परिक्रम्यावलोक्य च ।) इअं भअवदी चामुण्डा । (प्रणम्यावलोक्य च ।) अए, इअं कप्पूरमञ्जरी । ता किं णेदं । (भैरवानन्दं प्रति ।)

---

**विदूषकः**—

एवमेतत् । न खलु मृगलाञ्छनमन्तरेणान्यो मृगाङ्कमणिपुत्तलीं प्रस्वेदयति । न खलु शरत्समीरमन्तरेण शेफालिकाकुसुमोत्करं विकासयति ।

**भैरवानन्दः**—

इयं सा वटतरुमूले निर्भिन्नस्य सुरङ्गाद्वारस्य पिधानं चामुण्डा ।

कल्पान्तकेलिभवने कालस्य पुराणरुधिरसुराम् ।
जयति पिबन्ती चण्डी परमेष्ठिकपालचषकेण ॥

अद्यापि न निर्गच्छति सुरङ्गाद्वारेण कर्पूरमञ्जरी ।

**कर्पूरमञ्जरी**—

भगवन्, प्रणम्यसे ।

**भैरवानन्दः**—

उचितं वरं लभस्व । इहैवोपविश ।

**भैरवानन्दः**—

अद्यापि नागच्छति देवी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदं विण्णवीअदि, णिअभवणे कदुअ विवाहसामग्गिं आअदह्मि । तदो तं गेह्णिअ आगमिस्सं ।

**भैरवानन्दः**—वच्छे, एवं करीअदु ।

(राज्ञी व्यावृत्य परिक्रामति ।)

**भैरवानन्दः**—(विहस्य । स्वगतम् ।) इअं कप्पूरमञ्जरीठाणं अण्णेसिदुं गदा । (प्रकाशम् ।) पुत्ति कप्पूरमञ्जरि, सुरङ्गादुआरेण ज्जेव्व तुरितपदं गदुअ सट्ठाणे चिट्ठ । देवीआगमणे पुणो आगन्तव्वं ।

(कर्पूरमञ्जरी तथा करोति ।)

**देवी**—एदं रक्खागेहम् । (प्रविश्यावलोक्य च ।) अए, इअं कप्पूरमञ्जरी । सा का वि सरिच्छा मए दिट्ठा । वच्छे कप्पूरमञ्जरि, कीरिसं दे सरीरं । (आकाशे ।) किं भणसि मह सरीरे वेअणा ।

---

**राज्ञी**—

इयं भगवती चामुण्डा । अये, इयं कर्पूरमञ्जरी । तत्किमिदम् । इदं विज्ञाप्यते, निजभवने कृत्वा विवाहसामग्रीमागतास्मि । ततस्तां गृहीत्वागमिष्यामि ।

**भैरवानन्दः**—

वत्से, एवं क्रियताम् ।

**भैरवानन्दः**—

इयं कर्पूरमञ्जरीस्थानमन्वेष्टुं गता । पुत्रि कर्पूरमञ्जरि, सुरङ्गाद्वारेणैव त्वरितपदं गत्वा स्वस्थाने तिष्ठ । देव्यागमने पुनरागन्तव्यम् ।

**देवी**—

इदं रक्षागृहम् । अये, इयं कर्पूरमञ्जरी । सा कापि सदृशा मया दृष्टा । वत्से कर्पूरमञ्जरि, कीदृशं ते शरीरम् ।

**आकाश इति** । 'किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमपि चेत्तत्स्यादाकाशभाषितम् ॥' इति भरतः ।

किं भणसि मम शरीरे वेदना ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राज्ञी**—(स्वगतम् ।) ता पुणो तहिं गमिस्सं। (प्रविश्य पार्श्वतोऽवलोक्य च।) हला सहीओ, विवाहोवकरणाइं लहु गेह्णिअ आअच्छध। (इति परिक्रामति।)

(प्रविश्य कर्पूरमञ्जरी तथैवास्ते।)

**राज्ञी**—(पुरोऽवलोक्य।) इअं कप्पूरमञ्जरी।

**भैरवानन्दः**—वच्छे विब्भमलेहे, आणीदाइं विवाहोवअरणाइं।

**देवी**—आणीदाइं। किं उण घणसारमञ्जरीसमुचिदाइं आहरणाइं विसुमरिदाइं। ता पुणो गमिस्सं।

**भैरवानन्दः**—एवं करीअदु।

(देवी नाटितकेन निष्क्रामति।)

**भैरवानन्दः**—पुत्ति कप्पूरमञ्जरि, तह ज्जेव्व करीअदु।

(कर्पूरमञ्जरी निष्क्रान्ता।)

---

**राज्ञी**—

तत्पुनस्तत्र गमिष्यामि। हला सख्यः, विवाहोपकरणानि लघु गृहीत्वा-गच्छत।

**राज्ञी**—

इयं कर्पूरमञ्जरी।

**भैरवानन्दः**—

वत्से विभ्रमलेखे, आनीतानि विवाहोपकरणानि।

**देवी**—

आनीतानि। किं पुनर्घनसारमञ्जरीसमुचितान्याभरणानि विस्मृतानि। तत्पुनर्गमिष्यामि।

**भैरवानन्दः**—

एवं क्रियताम्।

**भैरवानन्दः**—

पुत्रि कर्पूरमञ्जरि, तथैव क्रियताम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राज्ञी**—(रक्षागृहं प्रविश्य कर्पूरमञ्जरीं दृष्ट्वा ।) अए, सारिच्छएण विडम्बिदह्मि । (स्वगतम् ।) झाणविमाणेण णिव्विग्घपरिसप्पिणा तामाणेदि महाजोई । (प्रकाशम् ।) सहीओ, जं जं णिवेदिदं तं तं गेह्णिअ आअच्छध । (चामुण्डायतनप्रवेशनाटितकेन तामवलोक्य ।) अहो सारिच्छअं ।

**भैरवानन्दः**—देवि, उवविस । महाराओ वि आअदो जेव्व वट्टदि ।

(ततः प्रविशति राजा विदूषकः कुरङ्गिका च ।)

**भैरवानन्दः**—आसणं महाराअस्स ।

(सर्वे यथोचितमुपविशन्ति ।)

**राजा**—(नायिकां प्रति ।) एसा सरीरिणी मअरद्धअपालिद्धिआ । देहान्तरेण संठिदा सिङ्गाररसलच्छीव । दिअससंचारिणी पुण्णिमाअन्दचन्दिआ । अवि अ पगुणगुणमाणिक्कमञ्जूसा । रअणमई अञ्जणसलाआ । तधा अ एसा रअणकुसुमणिप्पण्णा महुलच्छी । किं च ।

---

**राज्ञी**—

अये, सादृश्येन विडम्बितास्मि । ध्यानविमानेन निर्विघ्नपरिसर्पिणा तामानयति महायोगी । सख्यः, यद्यन्निवेदितं तत्तद्गृहीत्वागच्छत । अहो सादृश्यम् ।

**भैरवानन्दः**—

देवि, उपविश । महाराजोऽप्यागत एव वर्तते ।

**भैरवानन्दः**—

आसनं महाराजस्य ।

**राजा**—

एषा शरीरिणी मकरध्वजपापर्द्धिका[1] । देहान्तरेण संस्थिता शृङ्गाररसलक्ष्मीव । दिवससंचारिणी पूर्णिमाचन्द्रचन्द्रिका । अपि च प्रगुणगुणमाणिक्यमञ्जूषा । रत्नमय्यञ्जनशलाका । तथा चैषा रत्नकुसुमनिष्पन्ना मधुलक्ष्मीः । किं च ।

---

१. 'प्रारब्धिका' इति कामराजकृतटीकायाम्; 'प्रतिस्पर्धिका' इति पुस्तकान्तरे; 'पापर्द्धिका मृगया' इत्येकस्मिन्मूलपुस्तके टिप्पणम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भुअणजअवडाआ रूअसोहा इमीए
जह जह णअणाणं गोअरे जस्स जादि ।
वसइ मअरकेदू तस्स चित्ते विचित्तो
वलइदधणुदण्डो पुङ्खिदेहिं सरेहिं ॥ १९ ॥

**विदूषकः**—(जनान्तिकम् ।) सच्चं कदं तुए आभाणकं । तडं गदाए वि णौकाए ण विससीदव्वं । ता तुह्णीं चिट्ठ ।

**राज्ञी**—(कुरङ्गिकां प्रति ।) तुमं महाराअस्स णेवच्छं कुरु । सारङ्गिआ घणसारमञ्जरीए करेदु ।

(इत्युभे उभयोर्विवाहनेपथ्यकरणं नाटयतः ।)

**भैरवानन्दः**—उवज्झाओ हक्कारीअदु ।

**राज्ञी**—अज्जउत्त, एसो उवज्झाओ अज्जकविञ्जलओ चिट्ठदि । ता करेदु अग्गिआरिअं ।

---

भुवनजयपताका रूपशोभास्या
यथा यथा नयनयोर्गोचरं यस्य याति ।
वसति मकरकेतुस्तस्य चित्ते विचित्रो
वलयितधनुर्दण्डः पुङ्खितैः शरैः ॥

**विदूषकः**—

सत्यं कृतं त्वयाभाणकम् । तटं गताया अपि नौकाया न विश्वसितव्यम् । तत्तूष्णीं तिष्ठ ।

**राज्ञी**—

त्वं महाराजस्य नेपथ्यं कुरु । सारङ्गिका घनसारमञ्जर्याः करोतु ।

**भैरवानन्दः**—

उपाध्याय आकार्यताम् ।

**राज्ञी**—

आर्यपुत्र, एष उपाध्याय आर्यकपिञ्जलस्तिष्ठति । तत्करोत्वग्न्याचार्यकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—एस सज्जोह्मि। भो वअस्स, उत्तरीए गण्ठि दाइस्सं। दाव हत्थेण हत्थं गेह्ण कप्पूरमञ्जरीए।

**राज्ञी**—(सचमत्कारम्।) कुदो कप्पूरमञ्जरी।

**भैरवानन्दः**—(तं तस्या भावमुपलभ्य विदूषकं प्रति।) तुमं सुट्ठुतरं भुल्लोसि। जदो कप्पूरमञ्जरीए घणसारमञ्जरीति णामन्तरं जाणासि।

**राजा**—(करमादाय।)

जे कण्टआ तिउसमुद्धफलाणँ सन्ति
जे केअईकुसुमगब्भदलावलीसु।
फंसेण णूणमिह मज्झ सरीरअस्स
ते सुन्दरीअ बहला पुलअङ्कुराओ॥ २०॥

**विदूषकः**—भो वअस्स, भामरीओ दिज्जदु। हुअवहे लाजञ्जलीओ खिवीअदु।

---

**विदूषकः**—

एष सज्जोऽस्मि। भो वयस्य, उत्तरीये ग्रन्थिं दास्यामि। तावद्धस्तेन हस्तं गृहाण कर्पूरमञ्जर्याः।

**राज्ञी**—

कुतः कर्पूरमञ्जरी।

**भैरवानन्दः**—

त्वं सुष्ठुतरं भ्रान्तोऽसि। यतः कर्पूरमञ्जर्या घनसारमञ्जरीति नामान्तरं जानासि।

**राजा**—

ये कण्ठकास्त्रपुसमुग्धफलानां सन्ति
ये केतकीकुसुमगर्भदलावलीषु।
स्पर्शेन नूनमिह मम शरीरस्य
ते सुन्दर्या बहलाः पुलकाङ्कुराः।

**विदूषकः**—

भो वयस्य, भ्रामर्यो दीयन्ताम्। हुतवहे लाजाञ्जलयः क्षिप्यन्ताम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(राजा भ्रमणं नाटयति । नायिका धूमेन व्यावृतमुखी तिष्ठति । राजा परिणयति । राज्ञी सपरिवारा निष्क्रान्ता ।)

**भैरवानन्दः**—विवाहे दक्खिणा दिज्जदु आचारिअस्स ।

**राजा**—दिज्जदु । वअस्स, गामसअं ते दिण्णं ।

**विदूषकः**—सोत्थि होदु । (इति नृत्यति ।)

**भैरवानन्दः**—महाराअ, किं ते पुणो वि पिअं कुणोमि ।

**राजा**—जोईसर, किमवरं पिअं वट्टदि । जदो

कुन्तलेसरसुआकरफंसप्फारसोक्खसिढिलीकिदसग्गो ।
पालएमि वसुहातलरज्जं चक्कवट्टिपअवीरमणिज्जं ॥

---

**भैरवानन्दः**—

विवाहे दक्षिणा दीयत आचार्यस्य ।

**राजा**—

दीयते । वयस्य, ग्रामशतं ते दत्तम् ।

**विदूषकः**—

स्वस्ति भवतु ।

**भैरवानन्दः**—

महाराज, किं ते पुनरपि प्रियं करोमि ।

**राजा**—

योगीश्वर, किमपरं प्रियं वर्तते । यतः

कुन्तलेश्वरसुताकरस्पर्शस्फारसौख्यशिथिलीकृतस्वर्गः ।
पालयामि वसुधातलराज्यं चक्रवर्तिपदवीरमणीयम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तहावीदं होदु दाव ।

सत्थो णन्ददु सज्जणाणँ सअलो वग्गो खलाणं पुणो
णिच्चं खिज्जदु होदु बह्मणजणो सच्चासिहो सव्वदा ।
मेहो मुञ्चदु संचिदं वि सलिलं सस्सोचिअं भूअले
लोओ लोहपरम्मुहोऽणुदिअहं धम्मे मई भोदु अ ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति चतुर्थं जवनिकान्तरम् ।

---

तथापीदं भवतु तावत् ।

सार्थो नन्दतु सज्जनानां सकलो वर्गः खलानां पुन-
र्नित्यं खिद्यतु भवतु ब्राह्मणजनः सत्याशीः सर्वदा ।
मेघो मुञ्चतु संचितमपि सलिलं सस्योचितं भूतले
लोको लोभपराङ्मुखोऽनुदिवसं धर्मे मतिर्भवतु च ॥

इति श्रीमद्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वकुन्दप्रतिमयशःप्रकरप्रखरकठोर-
किरणकरप्रभप्रतिभप्रभाकरभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरी-
प्रकाशे चतुर्थं जवनिकान्तरं समाप्तम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

KÂVYAMÂLÂ 27.

# THE JÎVÂNANDANA

OF

# ÂNANDARÂYA MAKHÎ.

EDITED BY

PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1891.

*Price 12 Annas.*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

*( Registered according to Act XXV of 1867. )*

All rights reserved by the publisher )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काव्यमाला. २७.

आनन्दरायमखिप्रणीतं

# जीवानन्दनम्।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम्।

तच्च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम्।

१८९१

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः।)

मूल्यं १२ आणकाः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# काव्यमाला।

## श्रीमदानन्दरायमखिप्रणीतं

## जीवानन्दनम्।

प्रथमोऽङ्कः।

लक्ष्मीकैरवबन्धुकल्पकतरूंल्लब्ध्वाथ लब्धेप्सिते
भूयो मथ्नति देवदानवगणे दुग्धाब्धिमृद्धश्रमे।
तस्यानन्दथुना समं समुदयन्कुम्भं सुधापूरितं
बिभ्राणः स्वकरे करोतु भवतां भद्राणि धन्वन्तरिः॥ १॥

अपि च।

प्राग्जन्मीयतपःफलं तनुभृतां प्राप्येत मानुष्यकं
तच्च प्राप्तवता किमन्यदुचितं प्राप्तुं त्रिवर्गं विना।
तत्प्राप्तेरपि साधनं प्रथमतो देहो रुजावर्जित-
स्तेनारोग्यमभीप्सितं दिशतु वो देवः पशूनां पतिः॥ २॥

(नान्द्यन्ते)

**सूत्रधारः**—मारिष, इतस्तावत्।

(प्रविश्य)

**पारिपार्श्वकः**—भाव, एषोऽस्मि।

**सूत्रधारः**—

रीतिः सुखपदन्यासा शारदीया विजृम्भते।
पूर्णचन्द्रोदयश्चायं निहन्ति ध्वान्तमामयम्॥ ३॥

अपि च।

क्रममाणेषु दिगन्ते जलधरजालेषु शङ्खधवलेषु।
शान्तिमुपयाति सहसा कालुष्यदशा भृशं पयसाम्॥ ४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पारिपार्श्वकः**—अतः किमाचरितव्यम् ।

**सूत्रधारः**—शृणु तावत् । अत्र तञ्जापुरे पौरजानपदा देशान्तरादागताश्च बृहदीश्वररथोत्सवदिदृक्षया संघीभूताः ।

सरसकवितानाम्नो हेम्नः कषोपलतां गता
 विहरणभुवः षड्दर्शन्या विवेकधनाकराः ।
विदधति तपोलभ्याः सभ्या इमे मम कौतुकं
 तदिह हृदयं नाट्येनैतानुपासितुमीहते ॥ ५ ॥

**पारिपार्श्वकः**—(सशिरःकम्पम् ।) कं पुनः प्रबन्धमवलम्ब्य ।

**सूत्रधारः**—नन्वस्ति मम वशे सहृदयजनहृदयचन्दनं जीवानन्दनं नाम नवीनं नाटकमिति ।

**पारिपार्श्वकः**—कस्तस्य प्रबन्धस्य कविः ।

**सूत्रधारः**—विद्वत्कविकल्पतरुरानन्दरायमखी । य एष इह

गुरुदेवद्विजभक्तो नैमित्तिकनित्यकाम्यकर्मपरः ।
दीनजनाधीनदयो विहरति समरे च विक्रमार्क इव ॥ ६ ॥

यः स्नातोऽजनि दिव्यसिन्धुसलिले यः स्वात्मविद्याश्रितो
 येनाकारि सहस्रदक्षिणमखो यः सद्भिराश्रीयते ।
सोऽयं त्र्यम्बकराययज्वतिलको विद्वत्कवीनां प्रभो-
 र्यत्तातस्य नृसिंहरायमखिनस्तुल्यप्रभावोऽनुजः ॥ ७ ॥

**पारिपार्श्वकः**—(सबहुमानम् ।) आः, ज्ञायत एवायम् । किं त्वस्य सर्वलोकविदिता अप्येते गुणाः प्रबन्धनिर्वाहधूर्वहत्वमवबोधयितुं नेशते । यतः ।

आराध्नोति यदेष भक्तिभरितो देवान्द्विजातीन्गुरू-
 न्यच्च श्रद्दधदातनोति समये नित्यादिकर्मत्रिकम् ।
यद्दीनेषु दयां करोति समरे शौर्यं यदालम्बते
 तत्सर्वं नरसिंहयज्वसुततालाभस्य लीलायितम् ॥ ८ ॥

इदं तु श्रोतव्यम् ।

आनन्दरायमखिनो वाल्मीकेरिव योगिनः ।
इतरापेक्षणात्सारः स्वतः सारस्वतोदयः ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सूत्रधारः**—(विहस्य ।) मारिष, त्वं न जानासि यत एवं ब्रवीषि । शृणु तावत् ।

आबाल्यादपि पोषितोऽजनि मया प्रेम्णा तथा लालित-
स्तेनासौ सरसामुपैतु कवितामानन्दरायाध्वरी ।
इत्येकक्षितिपालवंशजलधेर्देव्या गिरां जातया
श्रीशाहावनिनायकाकृतिभृता नूनं प्रसादः कृतः ॥ १० ॥

अत एव

कवीनां पूर्वेषां कथमपि च चित्तैरवहितै-
र्गृहीता या नासीत्सरसकवितासारपदवी ।
असौ तामाक्रामन्हरति नरसिंहाध्वरिकुल-
प्रदीपः सूरीणां श्रवणयुगजाड्यान्धतमसम् ॥ ११ ॥

**पारिपार्श्वकः**—श्रीशाहराज इति नाम दधत्याः सरस्वत्याः कियानानन्दरायमखिनि दयाविशेपः । यतः ।

पुष्यत्कौतुकपद्मसंभृतकरद्वन्द्वाङ्गुलीवेल्लन-
द्राङ्क्ष्पीडितचन्द्रमण्डलगलत्पीयूषधारासखैः ।
वाग्गुम्फैर्बलवैरिधारितशचीधम्मिल्लमल्लीसर-
स्फारामोदमदापहैश्च कवयत्यानन्दरायाध्वरी ॥ १२ ॥

युक्तमुक्तं च भावेन 'शाहभूपतिरूपेण गिरां देवी जाता' इति । कथमन्यथानन्यसाधारणमस्य प्रागल्भ्यम् । तदिदानीमिदमुत्प्रेक्ष्यते—

भर्तुं लालयितुं भुवि प्रथयितुं विद्वज्जनानाश्रिता-
न्श्रीशाहक्षितिपात्मना क्षितिगतां मत्वा गिरां देवताम् ।
आसिञ्चन्नसकृत्कमण्डलुजलैरङ्गानि पर्याकुलो
धाता वाहनहंसपक्षपवनैस्तापं किलापोहति ॥ १३ ॥

**सूत्रधारः**—तन्नियोजय भूमिपरिग्रहायास्मद्वर्ग्यं शैलूषगणम् ।

**पारिपार्श्वकः**—बाढम् । किं तु सन्ति कथानायकस्य जीवस्य परिजना विज्ञानशर्मप्रभृतयः प्रतिनायकस्य च यक्ष्मणः परिजनाः पाण्डुश्वासकासज्वरगुल्मातिसारप्रभृतयः । तेषां यद्यपि भूमिकाग्रहणपटवो नटबटवः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्डरीककेयूरकमयूरकसारङ्गकतरङ्गकप्रभृतयः संनह्यन्ति । तथापि प्रयोगस्य बहुत्वेन दुरवगाहतया कथमभीप्सितार्थसिद्धिर्भविष्यतीति विचारेण व्याकृष्यत इव मे हृदयम् ।

**सूत्रधारः**—यत्किंचिदेतत् । महतामेषां सामाजिकानामनुग्रह एवास्माकमभीप्सितमर्थं समग्रयिष्यति । यतः ।

जाड्यं भिनत्ति जनयत्यधिकं पटुत्वं
सार्वज्ञमावहति संमदमातनोति ।
विद्वेषिवर्गविजयाय धृतिं विधत्ते
किं किं करोति न महद्भजनं जनस्य ॥ १४ ॥

**पारिपार्श्वकः**—एवं च मन्ये त्वया सह स्पर्धमानोऽपि विकटनामा नटबटुरभिनयविद्यायां महदनुग्रहात्त्वयैव विजेष्यत इति ।

**सूत्रधारः**—विकटो नाम नटबटुर्मया सह स्पर्धत इत्यतत्त्वविदो वचनम् । शृणु तावत् ।

अभिनयविद्याविषये दुरहंकाराकुलीकृतो विकटः ।
स नटबटुर्मां वाञ्छन्त्यभिभवितुं जीवमिव यक्ष्मा ॥ १५ ॥

(नेपथ्ये)

अरे रे शैलूषापसद, 'अभिभवितुं जीवमिव यक्ष्मा' इति किमसंभावितमर्थं दृष्टान्तयसि ।

मयि जीवति जीवस्य स्वामिनो मन्त्रिणि प्रिये ।
दुर्बलो यक्ष्महतकः कथं वाभिबुभूषति ॥ १६ ॥

**सूत्रधारः**—(आकर्ण्य ।) मारिष, जीवराजमन्त्रिणो विज्ञानशर्मणो भूमिकामादाय मम कनीयान्कलहंसो रङ्गभुवमवतरति । तदावामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

**प्रस्तावना ।**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति जीवमन्त्री विज्ञानशर्मा ।)

**विज्ञानशर्मा**—('अरेरे शैलूषापसद–' इत्यादि पठित्वा विचिन्त्य ।) सर्वथा राजसमीपं गत्वा तदनुज्ञया यक्ष्मणः प्रवृत्तिमुपलब्धुं चारान्प्रेषयिष्यामि । अथवा 'तत्प्रवृत्त्युपलम्भाय प्रेषय धारणाम्' इति मयोक्तो राजा तथा कुर्यात् । (श्रुतिमभिनीय ।)

दिक्षूदञ्चति ताम्रचूडरसितं यद्ध्रस्वदीर्घप्लुत-
प्रायोवर्णनिभं ब्रवीति तदिदं व्युष्टा निशाभूदिति ।
स्त्रीणां निर्गमनं विहत्य पतिभिर्ब्रूते विनैवाक्षरैः
क्रीडावेश्मकपाटिकाविघटनक्रेंकारपारम्परी ॥ १७ ॥

तदिदानीं देव्या प्रसन्नया बुद्ध्या सह राजा प्रतिबुध्य निवसेत् । तदुपसर्पामि । (इति पुरो दृष्टिक्षेपमभिनयन् ।)

चञ्चत्खेटकृपाणकञ्चुकशिरस्त्राकल्पदृप्यद्भटा
सादिव्यञ्जितवक्रमण्डलगतित्वङ्गत्तुरङ्गव्रजा ।
गण्डद्वन्द्वगलन्मदाम्बुमुखरीभूतद्विरेफद्विपा
दृष्टयोर्मे कुतुकाय राजभवनद्वारोपकण्ठस्थली ॥ १८ ॥

अपि च ।

प्रौढामात्यनिरुक्तमन्त्रपदवीविस्रम्भसंचारिणो
राज्ञो दुःसहतेजसो निशमने यद्वद्भृतिं द्वेषिणः ।
प्रासादप्रतिहारवेदिषु तथा स्नेहाङ्कपात्रस्थिताः
प्रत्यूषोपगमे प्रदीपमुकुलाः कान्तिं त्यजन्त्यञ्जसा ॥ १९ ॥

(पुरो विलोक्य ।) का पुनरियं तपश्चरणजनितप्रभुत्वगौरवेव मामभिवर्तते ।

गाढोन्नद्धजटाकलापकपिलश्रीधूतबालातपा
बिभ्राणा भसितानुलेपधवलच्छायां तनुं पावनीम् ।
भिक्षापात्रमयूरपिच्छचयभृत्पाणिद्वया मेऽधुना
काषायाम्बरधारिणी कलयति स्वान्ते धृतिं तापसी ॥ २० ॥

(निपुणं निरूप्य ।)

अस्यामक्षिभ्रुवं नासा रदपङ्क्ती रदच्छदः ।
चुबुकं मन्दहासश्च धारणायामिवेक्ष्यते ॥ २१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति तापसीवेषा धारणा ।)

**धारणा**—अहं खु पच्चत्थिराआभिसेणणसंणाहं कस्स वि पुरिसस्स मुहादो सुदवन्तेण रण्णा 'इमं उत्तन्तं पुरं पविसिअ जाणीहि' त्ति पेसिदह्मि । मए वि तावसीवेसाए तह जाणिअ रण्णो समीवे समागमीअदि । (अग्रतो दत्तदृष्टिः स्वगतम् ।) एसो विण्णाणसम्मा अमच्चो आअच्छदि । होदु । वेसेण पदारेमि णम् । जज्जवि सव्वस्सिं वि कज्जे इमस्स अणुमदिं विणा राआ ण पवट्टइ तह वि जं मह संसओ वट्टइ ता एअकस्स पआसो ण भवे । (इति परिक्रामति ।) (क)

**मन्त्री**—(दृष्ट्वा स्वगतम् ।) इयं तापसी राजप्रहिता प्रच्छन्ना किं धारणा भवेत् । भवतु । पृच्छामि । (प्रकाशम् ।) अये तापसि, का त्वम् । कुत आगच्छसि ।

**धारणा**—(स्वगतम् ।) इमस्स पडिवअणं भासन्तरेण भणेमि । अण्णहा कहं वि जाणिस्सदि इअं सेति । (प्रकाशम् ।) अहं खलु गार्गी यक्ष्मणो राज्ञो वयस्या देव्या गृहिण्याः स्नेहसर्वस्वभाजनं तदन्तःपुरादेवागच्छामि । (ख)

**मन्त्री**—(स्वगतम् ।) भवेदेवेयं धारणा तापसीवेषेण रिपुप्रवृत्तिमुपलभ्यागतवती । अयं स्वनामानुगुणमभिज्ञो वा न वेति मां परीक्षितुं संस्कृत-

---

(क) अहं खलु प्रत्यर्थिराजाभिषेणनसंनाहं कस्यापि पुरुषस्य मुखाच्छ्रुतवता राज्ञा 'इमं वृत्तान्तं पुरं प्रविश्य जानीहि' इति प्रेषितास्मि । मयापि तापसीवेषया तथा ज्ञात्वा राज्ञः समीपे समागम्यते । एष विज्ञानशर्मा अमात्य आगच्छति । भवतु । वेषेण प्रतारयाम्येनम् । यद्यपि सर्वस्मिन्नपि कार्येऽस्यानुमतिं विना राजा न प्रवर्तते तथापि यन्मम संशयो वर्तते तदेककस्य प्रकाशो न भवेत् ।

(ख) अस्य प्रतिवचनं भाषान्तरेण भणामि । अन्यथा कथमपि ज्ञास्यति इयं सेति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाषया वेषानुगुणमपलपते प्रतिपक्षकुले च पक्षपातमात्मनः सूचयति । भवतु । अहमप्यजानन्निवानुनयन्पृच्छाम्येनाम् । (प्रकाशम् ।) अये तापसि,

निखिलं जगतश्चरितं विज्ञातं ते समाधिनैव भवेत् ।
तन्मे महाप्रभावा भाग्येनासादिता भवती ॥ २२ ॥

**धारणा**—(स्वगतम् ।) मं तावसिं एव्व जाणिअ मह मुहादो पच्चत्थिराअप्पउत्तिं सुणिदुं अणुणअप्पआरो एसो । होदु । अहं वि अजाणन्तीव पुच्छामि । (प्रकाशम् ।) कस्त्वम् । क्व गच्छसि । सूनृतेन ते वचनेन साधुर्भवानिति पृच्छामि । (क)

**मन्त्री**—(स्वगतम् ।) इयमात्मानं गोपयति । अहमपि तथैवोत्तरयामि । (प्रकाशम् ।) कार्यविशेषेऽधिकृतं जानीहि येनैवमधिकृतस्तन्निकटे गच्छामि ।

**धारणा**—(स्वगतम् ।) एसा विपक्खजणपक्खवादिणित्ति गोपणप्पआरो एसो । (प्रकाशम् ।) केनाधिकृतोऽसि । (ख)

**मन्त्री**—भगवति, त्वमेव जानासि । यतः प्रणिधानेन योगिनः सकलमपि प्रत्यक्षयन्ति ।

**धारणा**—(स्वगतम् ।) कहं एदं आपडिदम् । होदु । जोइणो विअ आसिअं करिअ अमच्चं वञ्चेमि । (इति ध्यानारूढा तिष्ठति ।) (ग)

**मन्त्री**—(स्वगतम् ।) एषा खलु

कृत्वा स्वस्तिकमासनं करयुगं विन्यस्य जानुद्वये
नासाग्रार्पिततारका नतमृजूकृत्यावलग्नं दृढम् ।
निःश्वासोच्छ्वसितोपरोधघटितस्तैमित्यपीनस्तनी
चित्ते मे कृतसंयमेव कुरुते धूर्ता महत्कौतुकम् ॥ २३ ॥

(प्रकाशम् ।) परिनिष्ठितं योगाभासनं भवत्याः ।

---

(क) मां तापसीमेव ज्ञात्वा मम मुखात्प्रत्यर्थिराजप्रवृत्तिं श्रोतुमनुनयप्रकार एषः । भवतु । अहमप्यजानतीव पृच्छामि ।

(ख) एषा विपक्षजनपक्षपातिनीति गोपनप्रकार एषः ।

(ग) कथमेतदापतितम् । भवतु । योगिन इवासिकां कृत्वा अमात्यं वञ्चयामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**धारणा**—(ध्यानाद्विरम्य सस्मितम् ।) जीवस्य राज्ञो मन्त्री विज्ञानशर्मा भवान् ।

**मन्त्री**—महाप्रभावा योगसिद्धिमती भवती । तथाहि ।

बुध्या महत्या कृतसाहचर्या देवे निजे दर्शितभूरिभक्तिः ।
परप्रवृत्तिं विदती महिम्ना साधारणा त्वं त्वहिते हिते च ॥ २४ ॥

**धारणा**—(स्वगतम् ।) किं जाणिदं म्हि अमच्चेण जहत्थणामधेएण जं तावसीवण्णणव्वाजेण अहं जेव्व वण्णिदा । होदु । एव्वं भणामि । (प्रकाशम् ।) महान्खलु योगप्रभावः । (क)

**मन्त्री**—भगवति, तव न किंचित्प्राणिनामन्तर्गतमविदितमस्ति । अतस्त्वां प्रार्थये । कथमस्माकं राजनि यक्ष्मा मन्यते । योगिन्यास्तव दुःखितेषु कथमेषां दुःखविमुक्तिः स्यादिति चित्तपरिकर्मविशेषः करुणा भवत्येव । योगाङ्गेषु यमेषु वाङ्मनसयोर्यथार्थत्वरूपः सत्यं नाम द्वितीयो यमोऽपि तथा । अत इदं निर्विशङ्कं प्रार्थनापूर्वं पृष्टासि ।

**धारणा**—(स्वगतम् ।) जक्खराजपक्खवादविसेसे वि जोइणीए पुच्छिदस्स जहत्थुत्तरं अभणिअ असक्कं ठादुं त्ति मण्णइ अमच्चो । (प्रकाशम् ।) किमन्यत् । पुरान्निष्क्रमयितव्योऽयमिति मन्यते । (ख)

**मन्त्री**—कथमेतदेतस्य संघटते सामादिषु चतुर्षूपायेष्वेकैकस्यापि प्रयोगेण सुसाधो हि रिपुमनोरथभङ्गः ।

**धारणा**—नन्विमं दुष्करं पश्यामि ।

यक्ष्मणि विभौ प्रयोगं घटयन्ति न सामभेददानानि ।
दण्डः प्रभवेन्नु कथं प्रबलतरे रिपुजने स्वस्मात् ॥ २५ ॥

**मन्त्री**—यथार्थमाह भवती । किं त्विदं पक्षपातवचनम् । केनेममस्मत्प्रबलतरं मन्यसे ।

---

(क) किं ज्ञातास्म्यमात्येन यथार्थनामधेयेन यत्तापसीवर्णनव्याजेनाहमेव वर्णिता । भवतु । एवं भणामि ।

(ख) यक्ष्मराजपक्षपातविशेषेऽपि योगिन्या पृष्टस्य यथार्थोत्तरमभणित्वा न शक्यं स्थातुमिति मन्यतेऽमात्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**धारणा**—(स्वगतम् ।) एसो अत्तकेरअस्स पहुणो अमच्चो । ता पहुजअविषअणीए मन्तविचारसिद्धीए परपक्खबलट्ठिदिं एदस्स जेव्व कहइस्सम् ।(क) (प्रकाशम् ।) सर्वरोगराजो यक्ष्मा निष्प्रतीकार इति सर्वजनविदितमेतत् । शृणु तावत् । परीवारा एतस्य रोगविशेषा भीमरूपा बहवः । तथाहि ।

ज्वरपाण्डुप्रमेहार्शः शूलगुल्मभगंदराः ।
कासश्वासावतीसारसंनिपाताश्मरीव्रणाः ॥ २६ ॥

किं च ।

रोगा मूर्ध्नि शतं चतुर्नवतिरेवाक्ष्णोस्तथा नासिकां
प्रत्याष्टादश कर्णयोरपि तथा वक्त्रे चतुःसप्ततिः ।
पञ्चैवं हृदि किं च सन्ति बहवः सर्वेऽप्यमी दुस्तराः
प्राप्तौ कल्ककषायलेह्यवटकप्रायौषधानामपि ॥ २७ ॥

तस्माद्दुर्जयो युष्माभिः ।

**मन्त्री**—(स्वगतम् ।) इयं किल भीत्या निसर्गकातरा प्रबलपरबलप्रवेशहृदया मदीयप्रभावमजानती स्वबुद्ध्यनुरूपं किमपि प्रलपति । भवतु । किमनया वृथा संवादकदर्थनया । प्रस्तुतकार्यसाधनार्थमिमां तावदन्तरयामि । (प्रकाशं सोपहासम् ।)

आलोक्य शात्रवबलं बहुधारणे त्वं
भीतासि संप्रति रसं प्रतिपन्नधैर्या ।
जीवस्य जीवितसमे मयि सत्यमात्ये
भूयात्कथं बत विरोधिशिरोधिरोहः ॥ २८ ॥

**धारणा**—(विहस्य ।) कधं जाणिदह्मि अमच्चेण । ता कहेमि विस्सद्धं जहत्थं सुणादु अमच्चो । अहं खु देईए बुद्धीए सहअरी रण्णा जीवेण तावसीवेसं करिअ रत्तिम्मि पुरं पविसिअ जक्खराअस्स विआरणीओ व-

---

(क) एष आत्मीयस्य प्रभोरमात्यः । तत्प्रभुजनविषयिण्या मन्त्रविचारसिद्धेः परपक्षबलस्थितिमेतस्यैव कथयिष्यामि ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वसाओ त्ति पेसिदह्मि । तह ज्जेव विचारिअ अज्जं पदारेदुं पच्छण्णे व ठिदह्मि । (क)

**मन्त्री**—युज्यत एतत् । अतो राजसमीपमेव गच्छावः ।

**धारणा**—तुमं जेव्व गदुअ इमं वुत्तन्तं भणाहि । रण्णो णिवेदणादो वि तुह पुरदो कज्जणिवेदणं अब्भहिदम् । अहं उण दुज्जणसंसग्गकिदं कलुसं पक्खालेदुं महाणदिं ण्हादुं गच्छेमि । (ख) (इति निष्क्रान्ता ।)

**मन्त्री**—(सविचारम् ।) यद्यपि कुटिलप्रकृतयः स्वामिनि निबद्धदृढभक्तयो दुर्जया एव परसैनिकास्तथापि किमसाध्यं बुद्धिविभवस्य । यतः ।

दुर्जाते सुमहत्यपि क्षितिपतेः शालीनतां संत्यज-
ञ्शत्रूञ्जेतुमथेप्सितं घटयितुं शक्नोत्युपायेन यः ।
प्रायो मन्त्रिपदं महोन्नतमतिः प्राप्तुं स एवार्हति
स्वोत्सेकी न तु पण्डितो भुवि जनो वाचा वदन्पौरुषम् ॥ २९ ॥

अत इदानीम् ।

संचिन्तयामि कंचन संप्रति समयोचितं जयोपायम् ।
येनास्माकं श्रेयो भविता सहसा पराजयो द्विषताम् ॥ ३० ॥

(इति ध्यानं नाटयन् ।) आः, चिन्तितोऽयमबाधितोपायः । तथाहि ।

प्रथन्ते यास्तिस्रः प्रबलजडतीक्ष्णाः प्रकृतयो
वशीकारे तासां जगति सदुपायाः परममी ।
क्रमात्स्नेहास्ते ते कुशलमतिभिः सद्भिरुदिता-
स्तथा तीक्ष्णोपाया नियतमुपचाराश्च मधुराः ॥ ३१ ॥

---

(क) कथं ज्ञातास्म्यमात्येन । तत्कथयामि विश्रब्धं यथार्थं शृणोत्वमात्यः । अहं खलु देव्या बुद्धेः सहचरी राज्ञा जीवेन तापसीवेषं कृत्वा रात्रौ पुरं प्रविश्य यक्ष्मराजस्य विचारणीयो व्यवसाय इति प्रेषितास्मि । तथैव विचार्यार्यं प्रतारयितुं प्रच्छन्नेव स्थितास्मि ।

(ख) त्वमेव गत्वा इमं वृत्तान्तं भण । राज्ञो निवेदनादपि तव पुरतः कार्यनिवेदनमभ्यर्हितम् । अहं पुनर्दुर्जनसंसर्गकृतं कलुषं प्रक्षालयितुं महानदीं स्नातुं गच्छामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मात्प्रबलजडतीक्ष्णप्रकृतीनां वातपित्तकफानां मध्ये प्रबलो यो वातः स तु बहुविधस्नेहविशेषप्रयोगेण वशीकार्यः । तदनुगतस्य पित्तस्य मधुरोपचारेणैव सुकरो वशीकारः । उभयविरुद्धो जडो यः कफस्तत्रेतरोपायस्याप्रसरात्तीक्ष्णप्रयोगेणैव स वशमानेतव्यः । एवं च तत्तत्समुचितैरुपायैः सर्वामयनिदानेषु वातादिषु स्वाधीनेषु तज्जनितानामितरेषामुन्मेष एव दूरतोऽपास्तः । किं च ।

सर्वस्मिन्विषये निरङ्कुशतया यद्दुर्निरोधं मनः
प्रायो वायुरिव प्रकृष्टबलवत्सर्वात्मना चञ्चलम् ।
तत्कामादिभिरुद्धतैरुपहतं संप्रेरितैर्यक्ष्मणा
तत्सौहार्दमुपेत्य यद्यपि पुनर्नः प्रातिकूल्यं चरेत् ॥ ३२ ॥

अतस्तदपि महाधिकारेण वशीकृत्य महति व्यापारे विनियोज्य तैरपि दुर्भेदं करिष्यामि । यद्यपि मद्विरोधिचेष्टोऽज्ञानशर्मा मदसंनिधाने राज्ञ उपजापेन कार्यभेदमेव जनयेत् तथापि जाग्रतिः फलकमैव (?) ।

सर्वानर्थनिदाने यक्ष्मणि तस्मिन्समूलमेव मया ।
उन्मूलिते ततो नः कर्तव्यं नावशिष्यते किंचित् ॥ ३३ ॥

तथाकर्तुमेव तावद्राजनिकटमेव गच्छामि । (इति कतिचित्पदानि गत्वा पुरो विलोक्य ।) इदं तद्राजभवनम् । यावत्प्रविशामि । कः कोऽत्र भोः ।

(प्रविश्य ।)

**प्रतीहारः**—मन्त्रिन्, किमाज्ञापयसि ।

**मन्त्री**—प्राण दौवारिक, संप्राप्तं मां राज्ञे निवेदय ।

**प्राणः**—तथा । (इत्यन्तःपुरं प्रविष्टः ।)

**मन्त्री**—(परितो विलोक्य ।) इह खलु

संमृज्य शोधिनीभिश्चत्वरवेदीतलेषु रम्येषु ।
रचयन्ति रङ्गवल्लीरन्तःपुरचारिका एताः ॥ ३४ ॥

गृह्णन्वेत्रलतां वसत्यवसरापेक्षो जरत्कञ्चुकी
राजा मामवलोकयेदिति समं वत्सेन गौस्तिष्ठति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वादित्रध्वनिमण्डलीकृतगरुद्बर्हीं नटत्यङ्गणे
देव त्वं विजयीभवेति गुणयन्नास्ते शुकः पञ्जरे ॥ ३५ ॥

(प्रविश्य ।)

**दौवारिकः**—(मन्त्रिणं प्रति ।) स्वामिन्, भवन्तं द्रष्टुं बुद्ध्या सह देव्या भद्रासनमधिवसति राजा ।

**मन्त्री**—

अतिपरिचयेऽपि राज्ञो बिभेमि सहसोपगन्तुमभ्यर्णम् ।
येनाग्नेरिव तेजः स्फुरदस्याराग्निवर्तयति ॥ ३६ ॥

(विचिन्त्य ।) परपक्षं प्रति प्रतिविचारणाय प्रेषितां धारणां प्रतीक्षमाण इव लक्ष्यते । भवतु तदेतदहं वक्ष्यामि ।

(ततः प्रविशति बुद्ध्या देव्या सह राजा जीवः ।)

**मन्त्री**—(उपसृत्य ।) विजयतां महाराजः ।

**राजा**—इतो निषीदतु भवान् । (इति मन्त्रिणे आसनं निर्दिशति ।)

**मन्त्री**—(आसने उपविश्य स्वगतम् ।) एष खलु

गण्डूषोदकशोधितेऽपि वदने ताम्बूलरक्ताधरः
स्नानापोहितचन्दनेऽपि वपुषि प्रोद्दामतत्सौरभः ।
निर्णिक्ते सिचये धृतेऽपि कनकाकल्पेन पीताम्बरः
सोऽयं सत्यपि न प्रमाद्यति सदाचारादतिप्राभवे ॥ ३७ ॥

(प्रकाशम् ।) महाराजेन प्रहिताया धारणाया मुखात्तत्रत्यः सर्ववृत्तान्तो विदित एव । सा पुनर्दुर्जनसंसर्गदोषपरिहाराय नद्यां स्नातुं गता । तया च मयि संक्रमितस्तत्रत्यवृत्तान्तः ।

**राजा**—(सोत्कण्ठम् ।) कथमिव ।

**देवी**—अहं वि अवहिदह्मि । (क)

**मन्त्री**—(स्वगतम् ।) इयं हि देवी

किमपि नियमिताग्रैः कुन्तलैः स्निग्धनीलैः
परिलसदपराङ्गा धारयन्ती दुकूलम् ।

---

(क) अहमप्यवहितास्मि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धवलमुपरि भर्तुश्चामरं धूयमानं
विरमयति करेण व्यक्तमाकर्णनाय ॥ ३८ ॥

(प्रकाशम् ।) श्रोतव्यमिदं धारणावचनम् । यक्ष्महतकः पुरान्निष्क्रामणमेवासाकमिच्छतीति ।

**राजा**—किमत्र प्रतिविधातव्यम् ।

**देवी**—(सोद्वेगम् ।) दाणिं किं कुम्भो । (क)

**मन्त्री**—देवि, मा भैषीः । प्रतिविधानप्रकारोऽपि धारणया विदितः ।

**राजा**—कथमिव ।

**मन्त्री**—(कर्णे) एवमेवम् ।

**राजा**—कथमिदं धारणया निर्धारितम् ।

**मन्त्री**—रसगन्धकप्रयोगमन्तरेण सपरिवारोऽहमजय इति यक्ष्मराजस्य हृदयं विश्वसनीयया तापसीवेषया धारणया गृहीतम् ।

**देवी**—(साश्वासम् ।) जइ एव्वं ता कहं अह्मेहिं रसगन्धआ संपादणिज्जेत्ति । (ख)

**राजा**—

शंभोर्वीर्यं रसो नाम शर्वाण्या नाम गन्धकः ।
ताभ्यामेव प्रसन्नाभ्यां तौ ग्राह्याविति मे मतिः ॥ ३९ ॥

**देवी**—केण उण उवाएण ताणं पसादो संपादणिज्जो । (ग)

**मन्त्री**—उपासनयैव ।

**राजा**—युक्तमुक्तं भवता । श्रूयते हि पुरा मृकण्डुरुमापतिमुपास्य पुत्रं लेभे । तत्पुत्रोऽपि तदुपासनया मृत्युमुखान्मुक्तो दीर्घमायुरलभतेति ।

**मन्त्री**—सम्यगवगतं महाराजेन । यतः खल्वेष

पादाघातत्रुटितयमुनाभ्रान्तबाह्वन्तरोद्य-
द्रक्तस्रोतः समुपशमिताशेषशोकाश्रयाशम् ।

---

(क) इदानीं किं कुर्मः ।

(ख) यद्येवं तत्कथमस्माकं रसगन्धकौ संपादनीयौ इति ।

(ग) केन पुनरुपायेन तयोः प्रसादः संपादनीयः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्कण्डेयं व्यतनुत यदा सर्वभूतैस्तदादि-
स्तुत्यं मृत्युंजय इति यशः स्फारमीशः प्रपेदे ॥ ४० ॥

**राजा**—पुरा खलु देवदानवैरमृतार्थिभिर्महोरगयोक्त्रपरिवेष्टितविकृष्य-माणमन्दरमन्थानदण्डैर्मथ्यमाने दुग्धसागरे गरलमुद्भटमुत्थितमसहमानेषु भुवनेषु विनष्टप्रायेषु पलायनाभिमुखे चतुर्मुखे विगलितौजसि बिडौजसि भगवानेवैष विषमश्नन् जगदनुचकम्पे । तथाहि ।

मेघाक्रान्तदिगन्तदर्शरजनीमूर्छत्तमोमेचकं
तापद्रावितदेवदानवनरं यः कालकूटं गरम् ।
जग्ध्वा जम्बिवव बालकस्त्रिभुवनत्राणं तताना‌ञ्जसा
तस्य द्राङ्महिमा न वाङ्मनसयोः पन्थानमारोहति ॥ ४१ ॥

**मन्त्री**—किमुच्यते महिमेति । श्रूयतां तावत् । त्रिपुरविजयप्रसक्ताव-सक्त इव स्वयं तदर्थं कतिचित्साधनानि संपाद्य तान्यपि वितथीकृत्य स भगवान्निजमेव महिमानमभिव्यक्तवान् । तथाहि ।

सूर्याचन्द्रमसौ रथाङ्गयुगलं सूतो विधाता स्वयं
रथ्याश्वा निगमाश्च यस्य रथमारूढेन भूमीमयम् ।
मेरुं धन्वविषक्तवासुकिगुणं कृत्वा शरं चाच्युतं
तिस्रस्तेन पुरः स्मितेन तु परं दग्धाः सुरद्वेषिणाम् ॥ ४२ ॥

**राजा**—एवमपरिमितान्याश्चर्यचरितानि देवस्य ।

**देवी**—किं अच्चरिअं । महेसरस्स जह जह जारिसो उपासनं करेदि तह तह तारिसं सो तं तं फलं पावेदि । (क)

**मन्त्री**—एवमेतत् ।

**राजा**—एवमनिर्धारणीयनानास्वरूपा भगवतीपरमेतत् । परंतु भग-वतो दयारूपैवेयम् । अत एव लोकरक्षणार्था प्रवृत्तिरेतस्याः । श्रूयतां तावत् ।

---

(क) किमाश्चर्यम् । महेश्वरस्य यथा यथा यादृश उपासनं करोति तथा तथा तादृशं स तं तं फलं प्राप्नोति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्तिप्रह्वमहेन्द्रमुख्यमखभुक्प्रारब्धभूरिस्तव-
प्रादुर्भावितनिर्भरप्रमदया कारुण्यभाजा यया ।
निद्राभङ्गमवापितेन हरिणा दीप्तौजसा घातया-
मासाते मधुकैटभावतिबलौ सा केन वा वर्ण्यते ॥ ४३ ॥

**मन्त्री**—राजन्, तथ्यमेवाह भवान् । अस्याः किल भक्तवात्सल्यमनन्यतुल्यं पश्यामि ।

दूरोद्धूतविषाणकोटिघटनाचूर्णीकृताम्भोधरं
प्रेङ्खत्पादचतुष्टयीखुरपुटप्रक्षुण्णपृथ्वीतलम् ।
कल्पान्ताभ्रकठोरकण्ठनिनदत्रस्तत्रिलोकीजनं
विक्रान्तं महिषासुरं युधि पुरा चिच्छेद शूलेन या ॥ ४४ ॥

**देवी**—सा खु परमेसरी बहुविहदेवआसत्तिरूआवअवा पअण्डपरक्कमखण्डिअचण्डमुण्डधुम्मलोअणरत्तबीजप्पहुदिदाणवमण्डला सुणीअदि चण्डिआणामधेएत्ति । (क)

**राजा**—तदपि ज्ञायते । यथा खलु ।

शस्त्रच्छिन्नसुरारिसैन्यपिशितग्रासग्रहप्रीतिम-
त्कङ्कक्रोष्टरि संगरे सुरवधूमुक्तप्रसूने स्थितम् ।
देव्या शुम्भनिशुम्भदानववधप्रक्लिन्नचित्तस्तुव-
द्रुद्रेन्द्राग्निकृतान्तनैर्ऋतजलाधीशानिलश्रीदया ॥ ४५ ॥

**मन्त्री**—राजन्, एवं भक्तवत्सलयोरनादिदंपत्योरुपासनया संपादनीया सिद्धिः । किं च ।

सामर्थ्यसिद्ध्यै रसगन्धकानां संयोजनार्थं सकलौषधीश्च ।
संपादयामोऽथ तदाश्रितस्य सर्वौषधीशस्य विधोः प्रसादात् ॥४६॥

**देवी**—कदमं उण देसं पविसिअ उवासणिज्जा एदे । (ख)

---

(क) सा खलु परमेश्वरी बहुविधदेवताशक्तिरूपावयवा प्रचण्डपराक्रमखण्डितचण्डमुण्डधूम्रलोचनरक्तबीजप्रभृतिदानवमण्डला श्रूयते चण्डिकानामधेयेति ।

(ख) कतमं पुनर्देशं प्रविश्योपासनीयावेतौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—पुण्डरीकपुरं प्रविश्य।

**देवी**—कहं तत्थ पवेसो। (क)

**मन्त्री**—देवि,

शक्यं तत्खलु पुण्डरीकनगरं गन्तुं मनोद्वारत-
स्तत्रास्ते शिवभक्तिरित्यनुपमा कापि प्रमोदास्पदम्।
दृष्ट्वा तां प्रथमं तथा परिचयस्तस्या विधेयस्त्वया
चत्वारोऽपि भवन्ति ते करतलं प्राप्ताः पुमर्था यथा॥ ४७॥

**राजा**—(सोत्कण्ठम्।)

तामद्वैतां स्वरूपेण भक्तिं हृदयरञ्जिनीम्।
स्वीकृत्याहं भविष्यामि प्राप्ताखिलमनोरथः॥ ४८॥

**देवी**—(सासूयमिव स्वगतम्।) कहं सव्वपुरुसत्थप्पसवित्तिआ सेत्ति सुणिअ सुदवणाघणगज्जिदो मोरो व्विअ उक्कण्ठिदो अज्जउत्तो। होदु। ता मए वि सह गन्तव्वम्। (प्रकाशम्।) अज्जउत्त, अहं वि आगमिस्सम्। (ख)

**राजा**—(स्वगतम्।) कथमनयाप्यागन्तव्यम्। (विचिन्त्य।) भवतु। (प्रकाशम्।) अयि भद्रे, भक्तिपराधीनं साम्बमुपास्यावामभिलषितमर्थं साधयावः। (मन्त्रिणं प्रति।)

राज्यं त्वयि समारोप्य योग्ये सर्वाङ्गसंहितम्।
देव्या सह शिवं साम्बमुपास्तुं यामि तत्पुरम्॥ ४९॥

**मन्त्री**—यथा रोचते देवस्य।

(इति निष्क्रान्ताः सर्वे।)

इति प्रथमोऽङ्कः।

---

(क) कथं तत्र प्रवेशः।

(ख) कथं सर्वपुरुषार्थप्रसवित्रिका सेति श्रुत्वा श्रुतघनाघनगर्जितो मयूर इवोत्कण्ठित आर्यपुत्रः। भवतु। तन्मयापि सह गन्तव्यम्। आर्यपुत्र, अहमप्यागमिष्यामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटः कासः ।)

**कासः**—अहं खलु स्वमन्त्रिहतकोपदिष्टं किमपि रहस्यं शृण्वञ्जीवो नाम प्रतिराजा स्वस्मिन्किमपि चेष्टितुमन्तर्मुखस्तिष्ठतीति चारमुखादवगतवता संभ्रान्तेन महाराजेन यक्ष्मणा किमयं वृत्तान्तः श्रुतस्त्वया न वेति युवराजं पाण्डुं पृष्ट्वागच्छेति प्रेषितोऽस्मि । अतस्त्वरन्वितो युवराजसमीपं गच्छामि । अहो महाराजस्य युवराजे महती प्रीतिः । यतः ।

यद्यज्ज्ञातं स्वयं तत्तद्युवराजोऽपि वेत्ति चेत् ।
तदा राज्याधिकारेऽस्य शक्तिः स्यादिति मन्यते ॥ १ ॥

(पार्श्वतो विलोक्य ।) कथमियं छर्दिः । यैषा

प्रवालमृदुलाधरप्रकरचारुबिम्बप्रभा-
ह्रताह्रतविलोचनाञ्जनविशेषदृश्यानना ।
मयूरपदकस्फुरत्कठिनतुङ्गपीनस्तनी
तरङ्गयति कौतुकं तरुणिमश्रिया चेतसि ॥ २ ॥

(स्मरणमभिनीय ।)

श्लथजलधरजालश्लिष्टशीतांशुबिम्बा-
नभिनवमुकुराविर्भूतमुक्ताकदम्बान् ।
दरतरलितचक्रद्वन्द्वखेलन्मृणाला-
न्विवशहृदयमस्या विभ्रमानन्वभूवम् ॥ ३ ॥

(सभयम् ।) तदियं मामवलोकयति चेदिदानीं विभ्रममूल्यमनुपयुज्य मां निरुन्धीत ततो गमनविघ्नः स्यात् । (इत्युत्तरीयपटेन मस्तकमवगुण्ठयन्नन्यतो गच्छति ।)

(प्रविश्य)

**छर्दिः**—अए सठ, रत्तम्मि मुत्ताफलं परिपणीकदुअ पुरुसाइदं मए कारविअ दाणिं मं पेक्खिअ ओगुण्ठिदसीसो बद्धकटी कुदो पलाएसि । (क)

(इति कासं हस्ते गृह्णाति ।)

(क) अये शठ, रतौ मुक्ताफलं परिपणीकृत्य पुरुषायितं मया कारयित्वा इदानीं मां प्रेक्ष्यावगुण्ठितशीर्षो बद्धकटिः कुतः पलायसे ।

२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कासः**—मुञ्च मुञ्च। (इति हस्तं धुनोति।)

**छर्दिः**—(दृढं हस्तमवलम्ब्य।) हदास, मह पडिण्णादं दाऊण गच्छेहि। (क)

**कासः**—हञ्जे, यावदागत्य दास्यामि।

**छर्दिः**—कुदो आगमिअ। (ख)

**कासः**—धिङ्मूर्खे, नायमवसरः। पश्चात्कथयिष्यामि।

**छर्दिः**—जइ दाणिं ण कहेसि अहं वि ण मुञ्चेमि। (ग)

**कासः**—तर्हि गृहाण मुक्ताफलस्य प्रतिनिधिमिमामूर्मिकाम्। (इत्यङ्गुलीयकं विमुच्य प्रयच्छति।)

**छर्दिः**—इदं होदु। कुदो आगमिअ त्ति कहेहि। (घ)

**कासः**—किं मम वधमिच्छसि। यतः।

कार्यं राज्ञां मन्त्रिभिर्मन्त्रितं यत्सर्वेषां तत्सर्वथा गोपनीयम्।
येऽभिव्यञ्जन्त्येतदुद्यत्प्रमादाः शीर्षच्छेद्यांस्तन्वते तान्नरेन्द्राः॥ ४॥

**छर्दिः**—जह तह होदु। एदं दाव कहेहि। (ङ)

**कासः**—(स्वगतम्।) अहो दास्याः स्नेहपरिपाकः। यः परमनर्थाय संपद्यते। तथा हि।

स्त्रियः स्वार्थपराः प्रायः परदुःखं न जानते।
अप्रष्टव्यं यदप्राक्षीद्द्रुहिणी कैकयाधिपम्॥ ५॥

(प्रकाशम्।) राजकौलीनमेतदिति न कथयामि। मुञ्च। (इति त्वरयति।)

**छर्दिः**—मा भयाहि तुमं। जं मञ्जूसा क्खु अहं राजकज्जाणं। अदो ण पआसेमि। (च)

---

(क) हताश, मम प्रतिज्ञातं दत्त्वा गच्छ।

(ख) कुत आगत्य।

(ग) यदीदानीं न कथयसि अहमपि न मुञ्चामि।

(घ) इदं भवतु। कुत आगत्येति कथय।

(ङ) यथा तथा भवतु। इदं तावत्कथय।

(च) मा बिभीहि त्वम्। यन्मञ्जूषा खल्वहं राजकार्याणाम्। अतो न प्रकाशयामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कासः**—(विहस्य ।) छर्दिका किल त्वं प्रकृत्या । तत्कुतो न प्रकाशयसि ।

**छर्दिः**—(विहस्य ।) भसणसीलस्स कुक्कुरस्स विअ तुह जाआ अहम् । होदु । एदं कहेहि पत्थुदम् । (क)

**कासः**—(स्वगतम् ।) इयं राजकार्यकथननिर्बन्धान्न मुञ्चति माम् । का गतिः । (प्रकाशम् ।) हञ्जे, कथयामि । शृणु तावत् ।

**छर्दिः**—ओहिदम्हि । (ख)

**कासः**—मया कटकप्रवेशः कर्तव्यो युवराजस्य पाण्डोर्दर्शनाय ।

**छर्दिः**—ता किं विचारीअदि । अम्हकेरभडक्कन्ते सुगमो सत्तुणो पुरे मग्गो तुज्झ । सान्दणक्खत्ते णहे इन्दुणो व्विअ । (ग)

**कासः**—त्वं पुरोपरोधमात्रं जानासि । तत एवं ब्रवीमि ।

**छर्दिः**—किं अण्णं वि तत्थ कडए पउत्तं जं मए ण जाणीअदि । (घ)

**कासः**—श्रूयताम् ।

अस्मत्सैन्यैर्निरोधं कृतमगणयता स्वे पुरे सूपदिष्टं
जीवोऽमात्येन योगं स किल निशमयन्प्रापदन्तर्मुखत्वम् ।
इत्यस्माकं निशम्य प्रभुरतिविशदं चारवक्त्रात्कुमारं
गत्वा पृच्छ त्वयेदं विदितमथ न वेत्याकुलः प्राहिणोन्माम् ॥ ६ ॥

**छर्दिः**—जुवराएण पण्डुणा विदिदं ण वेत्ति णत्थि संदेहो । जेण एदं एव्व सुणिअ सअलसामन्तचक्केण सह सिद्धसेणिओ रहस्सागारे णिद्दाभङ्गकसाइदलोअणो चिन्तापज्जाउलो जुवराओ चिट्ठदि । तुए वि तत्थ

---

(क) भषणशीलस्य कुक्कुरस्येव तव जायाहम् । भवतु । एतत्कथय प्रस्तुतम् ।

(ख) अवहितास्मि ।

(ग) तत्किं विचार्यते । अस्मदीयभटाक्रान्ते सुगमः शत्रोः पुरे मार्गस्तव । सान्द्रनक्षत्रे नभसि इन्दोरिव ।

(घ) किमन्यदपि तत्र कटके प्रवृत्तं यन्मया न ज्ञायते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गच्छीअदु । णाह, पञ्च वि तुह वअस्सा सासा सेवातप्परा तह ज्जेव वट्टन्दि । (क)

**कासः**—कथमिदं ज्ञातं त्वया ।

**छर्दिः**—तुह पुव्वगिहिणीए कण्ठकण्डूए परिदेवणमुहेण देइए विसूचीए संणिहाणे सव्वं राअकज्जं णिवेदिदम् । तहिं संणिहिदथम्भन्तरिदाए मए सुदम् । (ख)

**कासः**—कुतः कीदृशं च परिदेवनं तस्याः ।

**छर्दिः**—जं तुए मं कामअन्तेण पुव्वगिहिणीए ताए पणअभङ्गो किदो तेण कादव्वं परिदेवणं क्खु ताए । तह खु कण्ठकण्डू देवीए कहिदवदी जं किल भट्टिणि, एदं मह दुज्जादं पण्डुगिहिणीए णिवेदिदुं गदम्हि । सा उण कालन्तरे एदं होदुत्ति जह तह मह अस्सुप्पमज्जणं किदवदी । तं जह—(ग) (स्मरणमभिनीय सभयम्, संस्कृतमाश्रित्य ।)

अस्यात्याहितकर्मणो व्यपगमे कासेन भर्त्रा समं
संधास्येत्यवतीं (?) तु तत्प्रियसखान्संप्रेषयन्ती रहः ।

---

(क) युवराजेन पाण्डुना विदितं न वेति नास्ति संदेहः । येनैतदेव श्रुत्वा सकलसामन्तचक्रेण सह सिद्धसैनिको रहस्यागारे निद्राभङ्गकषायितलोचनश्चिन्तापर्याकुलो युवराजस्तिष्ठति । त्वयापि तत्र गम्यताम् । नाथ, पञ्चापि तव वयस्याः श्वासाः सेवातत्परास्तत्रैव वर्तन्ते ।

(ख) तव पूर्वगृहिण्याः कण्ठकण्ड्वाः परिदेवनमुखेन देव्या विषूचिकायाः संनिधाने सर्वं राजकार्यं निवेदितम् । तत्र संनिहितस्तम्भान्तरितया मया श्रुतम् ।

(ग) यत्त्वया मां कामयमानेन पूर्वगृहिण्यास्तस्याः प्रणयभङ्गः कृतस्तेन कर्तव्यं परिदेवनं खलु तया । तथा खलु कण्ठकण्डूर्देव्यै कथितवती यत्किल भट्टिनि, एतन्मम दुर्जातं पाण्डुगृहिण्यै निवेदितुं गतास्मि । सा पुनः कालान्तरे एतद्भवत्विति यथा तथा ममाश्रुप्रमार्जनं कृतवती । तद्यथा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं श्वासविलासिनीरुपगताः पञ्चापि हिक्काः सुखी-
कृत्य द्रागुपसान्त्व्य पाण्डुदयिता मां प्राहिणोत्कामला ॥ ७ ॥

तत्थ वि मन्दभाइणी अहं हदमणोरहा जादेत्ति । (क)

**कासः**—(विचिन्त्य ।) मा बिभेहि । ज्ञातस्तव भावः । त्वयि प्रणयस्य भङ्गे कण्ठकण्डूा यत्नः क्रियत इति गच्छामि तत्रैव तानपि वशीकुर्याम् । तेऽपि मद्धुच्यैव पुष्टाः कथं मह्यं द्रुह्येयुः ।

**छर्दिः**—गच्छेहि कज्जसिद्धीए अहं वि देईए सकासं गमिस्सम् ।

(इति निष्क्रान्तौ ।)

प्रवेशकः ।

---

(ततः प्रविशति रहस्यागारस्थः सुप्तोत्थितः सचिन्तः पाण्डुः ।)

**पाण्डुः**—कः कोऽत्र भोः ।

(प्रविश्य)

**दौवारिकः**—विजयतां देवः ।

(पाण्डुर्निद्रालसो जृम्भते ।)

**दौवारिकः**—(आत्मगतम् ।) एष किल

आरक्तसंकुचदपाङ्गमुदग्रदंष्ट्रं
व्यादाय वक्त्रमुरुपाटलदीर्घजिह्वम् ।
उच्चैर्भुजौ वलयितौ ग्रथिताङ्गुलीकौ
कुर्वन्सशब्दमिह जृम्भणमातनोति ॥ ८ ॥

अपि च ।

जृम्भावसरे दारुणमाननबिम्बं सजिह्वमेतस्य ।
निपतितदीर्घकपाटं पातालद्वारमिव हि पश्यामि ॥ ९ ॥

(प्रकाशम् ।) देवस्य कीदृशो मयि नियोगः ।

**पाण्डुः**—गलगण्ड, सेनापतीनाहूय मम निकटं प्रवेशय ।

(गलगण्डो निष्क्रम्य त्रयोदशप्रकारान्संनिपातान्प्रवेशयति । सर्वे प्रविश्य प्राञ्जलयस्तिष्ठन्ति ।)

---

(क) तत्रापि मन्दभागिन्यहं हतमनोरथा जाता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र **एकः**—सविचार इव दृश्यते युवराजः । तत्क्षणं जोषमास्यताम् । यदेषः

खट्वामङ्गविवर्तनेन लुलितक्षौमास्तरामावस-
न्वीटीं भृत्यकरार्पितामगमयन्वक्त्रं गृहीतामपि ।
उत्तानस्तिमिते दृशावपि चिरादुच्चैर्विताने‍ऽर्पय-
न्नत्यर्थं श्वसितोद्गमैर्विवृणुते चिन्तां निजान्तर्गताम् ॥ १० ॥

किं च पूर्वमपि ।

न स्नाति वारिषु चिरं त्वरितं दुकूलं
वस्ते विलम्बसहनो न कदापि भुङ्क्ते ।
भूषागणं वहति किं च विपर्ययेण
राजा युवैष हृदि कार्यविचारकृष्टः ॥ ११ ॥

**गलगण्डः**—(दण्डेन भूमिमाघट्टयन् ।) देव, सेनापतयः प्राप्ताः ।

**पाण्डुः**—(विलोक्य ।) भो भोः संनिपाताः, प्रतिराजस्य जीवस्य सकाशादस्मदीयराजस्य यक्ष्मणोऽधुना पराभवः संभावयिष्यत इति श्रूयते । स यथा न भवेत्तथा सैन्यैः सह संनद्धव्यं भवद्भिः ।

**संनिपाताः**—

अस्मादृशेषु बलशालिषु सैनिकेषु
राजन्नलं प्रभुपराभवचिन्तया ते ।
स्यात्किं वसन्तदिवसेषु विसृत्वरेषु
पद्माकरस्य तुहिनाभिभवप्रसक्तिः ॥ १२ ॥

कति कत्यस्मदीयाः सैनिकाः । तत्रैकैकस्य पराक्रमवतो युद्धाय न पर्याप्तमखिलं शत्रुसैन्यम् । किं पुनः सर्वेषाम् । श्रूयन्तां तावदस्मदीयाः ।

अष्टौ कुष्ठा दश च बलिनः प्लीहगुल्मास्तथाष्टौ
षट् चोन्मादा वसति दशकं पञ्चकं च व्रणानाम् ।
अर्शोभेदाः षडतिधृतयो विंशतिश्च प्रमेहाः
किं चाश्मर्यो दश दश पुनः सन्ति सप्तातिसाराः ॥ १३ ॥

---

१. अतिधृतय एकोनविंशतिः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(गलगण्डं प्रति ।) स्वामिनः कुमारस्य संनिधिं प्रापय सर्वानपि सैनिकान् ।

**गलगण्डः**—तथा । (इति निष्क्रम्य सर्वैः सह प्रविशति ।)

(सर्वे पाण्डुं प्रणम्य प्राञ्जलयस्तिष्ठन्ति ।)

**पाण्डुः**—एवं प्रवृत्ते राजकार्ये किं भवन्तो मन्यन्ते ।

तत्रादौ **कुष्ठाः**—

कार्या न चेतसि कुमार कदापि चिन्ता
स्थास्यन्ति के वद पुरः प्रतिगर्जतां नः ।
शत्रोः प्रविश्य पुरमीक्षितुमप्ययोग्यं
कुर्मो वयं तनुभृतामतिकुत्सनीयम् ॥ १४ ॥

**उन्मादाः**—सर्वे सैनिकास्तिष्ठन्तु । ज्ञायतामस्माकमभिप्रायः ।

कोपाध्मातककुत्स्थपुंगवकरव्याकृष्टगर्जद्धनु-
र्ज्यानिर्गत्वरमार्गणानलशिखादीने नदीने भृशम् ।
पाठीनान्कमठैः समं विलुठतः सर्वेऽनुकुर्वन्तु ते
शार्दूला इव शम्बरान्सरभसं यानद्य गृह्णीमहे ॥ १५ ॥

**व्रणाः**—स्वामिन्कुमार, प्रथमं पुरमेव बाधितव्यम् । तद्बाधया शिथिलीभविष्यत्यन्तर्मुखतापि जीवस्य । अत इदानीम्

प्रचण्डमदपाण्डवप्रहितकाण्डवर्गत्रुट-
त्तरक्षुकरिकेसरिप्रियकशल्यशार्दूलकम् ।
अरण्यमिव खाण्डवं घनसरण्यतीतं द्रुम-
व्रजं दहनहेतयः पुरमरेर्दहामो वयम् ॥ १६ ॥

सर्वेऽपि **अर्शोभेदाः**—स्वामिन्, यदुक्तं व्रणैस्तदस्माकमपि रोचते । तेन वयं च निरुद्धमूलद्वाराः ।

गृह्णीयाम व्यथयितुमरेस्तत्पुरं येन सर्वे
व्याघ्राकृष्टा इव हि पशवः प्राणिनोऽसद्गृहीताः ।

१. समुद्रे. २. मृगभेदान्.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थातुं गन्तुं शयितुमशितुं यातुमाभाषितुं वा
नापेक्षन्ते मनसि दधतो दुःखमात्रानुभूतिम् ॥ १७ ॥

**प्रमेहाः**—स्वामिन्, अस्मासु विधेयेषु पुरोवर्तिषु किमर्थमन्येषां प्रस्तुतकार्यं प्रति प्रेषणम् । तत्क्रियतामस्मदुक्तिश्रवणादरः ।

**पाण्डुः**—वक्तव्यानि वो विवक्षितानि ।

**प्रमेहाः**—

संप्रस्रावात्परिणतिमसृङ्मांसमेदोस्थिमज्ज्ञां
व्यातन्वन्तो वयमनुदिनं तत्पुरं शोषयामः ।
क्वान्तर्वक्त्रो भवतु विधुरीभूय जीवः क्व मन्त्री
तत्साहाय्यं कलयतु भवांस्तद्विषादं जहातु ॥ १८ ॥

**अश्मर्यः**—सर्वे सैनिकाः स्वस्वबलानुरूपं गर्जन्ति । स्वामिन्, न वयं गर्जनपराः । किं तु भूतार्थवादिन्यः ।

वर्धिष्यते न यावत्स हितः सर्वैर्भटैर्निजैर्वैरी ।
तावन्निग्रहणीयः श्रेयस्कामेन पुरुषेण ॥ १९ ॥

तथा हि ।

वेलालङ्घिप्रसर्पत्तटविटपिसमुत्पाटनाटोपमूर्छ-
त्कल्लोलाक्रान्तपृथ्वीवलयजनलयोल्लेखसंत्रस्तलेखः ।
अम्भोधिर्मा जनीति प्रतिकलमुदयद्वारिभूरीभविष्य-
च्चूषत्यह्नाय वह्निर्विघटितवडवावक्त्ररन्ध्रादुदञ्चन् ॥ २० ॥

**पाण्डुः**—युक्तमुक्तं भवद्भिः ।

**अतीसाराः**—स्वामिनः कृपयैव भुजप्रतापं दर्शयन्तो वयं विजेष्यामह इति किमत्र चित्रम् । अतः किमपि ब्रूमः । चिदांकरोतु स्वामी ।

नेत्रं मज्जयितुं मुखं ग्लपयितुं जत्रुद्वयं व्यञ्जितुं
पार्श्वास्थ्नां गणनीयतां गमयितुं सत्त्वं भृशं लुण्ठितुम् ।
सत्त्वेऽपि निजे स्थिते वटयितुं पञ्चत्वमेवाङ्गिनां
शक्तान्नः प्रहिणोपि यत्र तरसा तत्साधयामो वयम् ॥ २१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पाण्डुः**—(सबहुमानम् ।)

अतिसारा इति स्पष्टं विष्टपत्रयविश्रुतम् ।
युष्मन्नामैव युष्माकं ब्रूतेऽतिशयितं बलम् ॥ २२ ॥

**गुल्मप्लीहानः**—श्रूयतां स्वामिना ।

अस्मासु प्रविशत्सु शात्रवपुरं पीडाकरेषु द्रुतं
कार्याकार्यविवेक एव न भवेदल्पोऽपि तस्मिन्क्षणे ।
आस्तामेतदिदं वचो निशमय क्षन्तुं व्यथामक्षमो
विज्ञानेन च मन्त्रिणा सह पुराज्जीवः पलायिष्यते ॥ २३ ॥

**पाण्डुः**—अस्मत्सैनिकोपरुद्धे पुरे पिपीलिकापि न प्रसरीसरीति, कुतः पुनरियं तस्य पलायनशङ्का । परंतु सर्वैरिदमाकर्णनीयम् । नीतिशास्त्रानुसारिणि मन्त्रिणि तदनुरक्ते विक्रमाभिमानरक्षणैकपरे द्विजदेवपोषणैकतानमानसे राजनि तस्मिन्निपुणं किमपि प्रतिविधानमनुसंधेयम् । अतः प्रागेवातर्कयं किंचिदत्याहितहेतुस्तदीयान्तर्मुखतेति ।

**कुष्ठेष्वेकः**—(स्वगतम् ।) प्रागस्माभिः प्रेषितः शत्रुशिबिरं प्रविष्टः कर्णमूलोऽद्यापि नागतः किं तैर्गृहीतः स्यात् ।

(ततः प्रविशत्यध्वश्रान्तः कर्णमूलः ।)

**कर्णमूलः**—(दृष्ट्वा ।) एतत्खलु

तत्तत्कार्यनिवेदनार्थमिलितान्योन्यानभिज्ञस्पश-[1]
प्राप्तव्यावसरप्रतीक्षणकृतद्वाःपार्श्ववेद्यासिकम् ।
अन्तर्मन्दिरनिःसरज्जनवचोविज्ञाप्यमानप्रभु-
व्यापारश्रवणेप्सुबाह्यमनुजं पश्यामि पाण्डोर्गृहम् ॥ २४ ॥

(द्वाःस्थं प्रति ।) गलगण्ड, कथय कर्णमूलं संप्राप्तं माम् ।

(गलगण्डः प्रविश्य निष्क्रम्य कर्णमूलेन सहान्तः प्रविशति ।)

**कर्णमूलः**—(आत्मानं दृष्ट्वा स्वगतम् ।)

श्रमाम्भःसंसिक्तालिकललितपुण्ड्राङ्कवदनो
द्रवच्चर्मोपानद्दृढपिहितपार्श्वाञ्चलपटः ।

---

१. स्पशश्चरः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समुद्यन्निःश्वासप्रसरपरिशुष्काधरपुटो
विलङ्घ्याहं दीर्घां सरणिमगमं पाण्डुसविधम् ॥ २५ ॥

(पाण्डुं दृष्ट्वा ।) कुमार, विजयी भव ।

**पाण्डुः**—भद्र, किम् । किंचिदुपलब्धं तत्र भवता प्रविष्टेन ।

**कर्णमूलः**—किं सफलो न भविष्यति कुमारनियोगो विशेषोपलम्भेन ।

**पाण्डुः**—कथय ।

**कर्णमूलः**—श्रूयताम् । उपरुद्धमसत्सैनिकैः पुरम् ।

**पाण्डुः**—किमेतत्परिज्ञानाय प्रेषितोऽसि । विदितं खल्विदं सर्वेषाम् ।

**कर्णमूलः**—(सर्वतो विलोक्य ।) एतदेव प्रस्तोतुमयमवसरः ।

**पाण्डुः**—विस्रब्धं कथय । किं न जानासि असच्छरीराण्येव कीलैते ।

**कर्णमूलः**—देव, भवदाज्ञया प्रविष्टोऽस्मि पुण्डरीकपुरम् । तत्राद्राक्षं च सन्निरीक्षणैकपरे ईक्षणे । निगमार्थश्रवणप्रसिते श्रवसी । शिवनिर्माल्यगन्धसंतर्पितं घ्राणम् । विघसामृतास्वादनैकतानां रसनाम् । त्रेताभस्मावगुण्ठितां त्वचम् । धर्मार्थसंग्रहीतारौ करौ । तदर्थं कृतसंचरणौ चरणौ । चिरंतनसरस्वतीचिकुरपरिमलामोदसदनं वदनं च । तद्दर्शनेन क्वचिदपि स्थलमलभमानः स्थातुमपि नाशक्नुवम्, किं पुनर्देवस्याज्ञां परिपालयितुम् ।

**कुष्ठः**—(विहस्य ।) अनासारवर्षणमजागलस्तनसमवस्थं तव गमनागमनं च ।

**संनिपातः**—कुष्ठ, सावशेषमिव तव वचनम् ।

**कुष्ठः**—स्वामिपोषितस्वकलेवरनिरर्थकता च ।

**कर्णमूलः**—जाग्रति मच्छिरसि महाराजपादपङ्कजरेणौ कथमेतद्भविष्यति ।

**पाण्डुः**—ततस्ततः ।

**कर्णमूलः**—ततश्च ।

तस्मिन्पुरे स्थानमहं विवेक्तुं चरन्समन्तात्क्वचिदप्यपश्यम् ।
त्रिष्वाशयेषु स्थितिमत्स्वशङ्कं संचारितं केन च पङ्गुयुग्मम् ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पाण्डुः**—(स्वगतम् ।) वायुसंचार्यमाणं कफपित्तयोर्युगं तद्भवेत् । (प्रकाशम् ।) ततस्ततः ।

**कर्णमूलः**—तस्मादन्तःपुरचारिणः पङ्गुयुग्मात्तत्संचारयतः पुरुषाच्च प्रवृत्तिरुपलब्धुं शक्येति तच्च तं चोपासर्पमहम् । स च तच्च मयि दृष्टमात्रे

भद्र गच्छ परिसर्प मा कुतो देशतस्त्वमसि नन्विहागतः ।
कस्य वा वद परिग्रहो भवानित्यपृच्छदथ सोऽपि तच्च माम् ॥ २७ ॥

भो भो भद्रमुखाः परिग्रहतया कस्यापि नाहं स्थितो
रात्रिं नेतुमिहागतोऽस्मि नियतं सायाह्नि भिक्षामटन् ।
स्थानं मे यदि शक्यतेऽपगतये प्रान्त(?)स्तदादीयता-
मित्युक्ते तु मया तदन्तरुदभूदन्योन्यमालोचना ॥ २८ ॥

अनन्तरं च कार्यान्तरव्यापृते च राजनि नूतनपुरुषपरिमार्गणपरे च नागरिके, भिक्षो, रात्रौ नावसरस्त्वादृशामत्र शयितुमित्युक्तवत्सु तेषु, क्व कार्ये राजा व्याप्रियते कुत एवं भिक्षुकाणामप्युपरोध इति पृष्टवानस्मि ।

**पाण्डुः**—ततस्ततः ।

**कर्णमूलः**—तेऽपि मां भद्रेत्यामन्त्र्य समकथयन् ।

पुण्डरीकपुरे मन्त्रिप्रेरितः परमेश्वरम् ।
आराद्धुं गतवान्राजा मनोद्वारेण तिष्ठति ॥ २९ ॥

किं च ।

शत्रुनिरुद्धे च पुरे परिसर्पाशङ्कया नगरगुप्त्यै ।
नागरिकशिक्षणमिति प्रावोचन्मां तदानीं ते ॥ ३० ॥

अत्रान्तरे विजृम्भमाणं यामिककलकलमश्रृणवम् । श्रुत्वा च कथंचिल्लब्धावकाशः स्वामिकार्यगौरवादागतोऽस्मि ।

**पाण्डुः**—(आकाशे लक्ष्यं बद्ध्वा सोपहासम् ।) रे रे मन्त्रिहतक, अस्मज्जयार्थं सहजवैरिणं रसं साधयितुं किल तव प्रयत्नः । तर्हि पश्य ।

साधितोऽपि स किं कुर्याद्रसः पथ्यक्रमं विना ।
जिह्वाचापलमुद्भाव्य स एव ध्वंसयिष्यते ॥ ३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं च। भक्त्या त घटयित्वा चतुरोऽपि पुमर्थांस्तस्य साधयितुं किलायमपरो यत्नस्तत्रापि प्रतिविधास्यते।

**कर्णमूलः**—(सप्रश्रयम्।) देव, युगविगमसमयसमसमुदितमार्तण्डमण्डलस्येवाखण्डितप्रतापस्य तवापि कियान्स रसः शोषण इव तस्य (?) तव किं महिमातिशयः। तथाहि।

दृष्ट्वा वैरिचमूसमूहमवशादुद्वेलमुज्जृम्भित-
क्रोधात्संगररङ्गसीमनि भवत्यद्धा निबद्धादरे।
जीवः कः क्व च तस्य मन्त्रिहतको विज्ञानशर्मा पुन-
र्दृश्येरन्क तृणाग्नितुल्यमहसस्तस्याल्पसारा रसाः॥ ३२॥

**पाण्डुः**—आः, अस्त्वेतत्। भद्र, कथय कीदृशी प्रकृतीनां प्रवृत्तिः।

के स्वामिनि दृढभक्ता के प्रबलाः के च दुर्बला नगरे।
अरिमित्रोदासीनाः के पुनरङ्ग त्वया दृष्टाः॥ ३३॥

**कर्णमूलः**—कथयामि देव, श्रूयताम्।

तत्र प्रकृतयस्तिस्रो वातपित्तकफात्मकाः।
तत्र यः प्रबलो वातः स तु स्नेहैर्वशीकृतः॥ ३४॥

किं च।

तदनुगतं यत्पित्तं मधुरमयैस्तद्विजेयमुपचारैः।
पङ्गुर्यस्तत्र कफस्तीक्ष्णोपायैर्वशं स चानीतः॥ ३५॥

**पाण्डुः**—अथ कीदृशो मनसो वृत्तान्तः।

**कर्णमूलः**—

उद्दामबुद्धिविभवेन मनस्तु तत्र
विज्ञानशर्मसचिवेन वशीकृतं सत्।
कार्ये महत्यधिकृतं हितकारिराज्ञः
सर्वात्मनाप्यनुसरत्यधुना तमेव॥ ३६॥

**पाण्डुः**—अथ विज्ञानशर्मस्पर्धिनो ज्ञानशर्ममन्त्रिणः कीदृशः प्रकारः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कर्णमूलः**—

विज्ञानमन्त्रिमन्त्रैर्विविधैरसकृद्विधूतनिजशक्तिः ।
स ज्ञानशर्ममन्त्री तिष्ठति केवलमसौ स्वरूपेण ॥ ३७ ॥

एवंविधविविधविचित्रचरित्रविस्मापितसकललोकस्य स्वामिहितकरणैकतानस्य मन्त्रिणः पारे खलु वाङ्मनसोश्चरिताद्भुतानि । तथाहि ।

तत्तद्दुर्घटराजकार्यघटनाव्यापारपारीणया
शक्त्या दुष्प्रसहस्य तस्य वचनैर्नानोपपत्त्यन्वितैः ।
निर्द्वन्द्वोऽपि स निर्गुणोऽपि च निराकारोऽपि निर्लेपनो-
ऽप्याः कष्टं प्रतिपक्षतामुपगतो जीवो विचेष्टेत नः ॥ ३८ ॥

तस्मादेवंस्थिते प्रकृतिमण्डले दुर्भेद्ये च शत्रुपक्षे महदत्याहितमापतिष्यति । (इति भयं नाटयति ।)

**पाण्डुः**—(विचिन्त्य ।) मा बिभिहि । तत्रापि काचिदस्त्यबाधिता नीतिः ।

**कर्णमूलः**—कीदृशी ।

**पाण्डुः**—श्रूयताम् ।

यच्चञ्चलं प्रकृत्या विषयेषु मनो निसर्गदुर्दान्तम् ।
तत्कामादिभिरेतैर्भेदयितुं शक्यते शनकैः ॥ ३९ ॥

तस्मिन्सर्वविषयाधिष्ठाने मनसि स्वाधीने सुकर एव कार्यशेषः । किं च याः किलाद्यास्तत्र तिस्रः प्रकृतयस्तासु यस्तीक्ष्णोपायैः संयमितवृद्धिः श्लेष्मा तस्योपचयं केनाप्युपायेन विधाय तेनैव तावपि क्षोभयितुं शक्येते ।

विज्ञानोऽयं यद्यपि स्वामिभक्तस्तत्राप्यस्यासंनिधाने विविक्ते ।
भेदो राज्ञस्तस्य तैस्तैरुपायैः शक्यः कर्तुं ज्ञानशर्मोपजापैः ॥ ४० ॥

एवं राजमन्त्रिणोर्विरोधेन विश्लिष्टे प्रकृतिमण्डलेऽचिरादेव हस्तगता महाराजस्य यक्ष्मणो जयलक्ष्मीः ।

**कर्णमूलः**—(सहर्षम् ।) साधु चिन्तिता मन्त्रिवर्येण राजतन्त्रनीतिः ।

**पाण्डुः**—भद्र, नाद्यापि महाराजनिकटगतोऽत्रायाति कासः ।

(प्रविश्य)

**गलगण्डः**—देव, महाराजपादमूलात्कासः प्राप्तः ।

**पाण्डुः**—त्वरितं प्रवेशय ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति गलगण्डेनानुगम्यमानः कासः।)

(कासो जानुभ्यां प्रणम्य किंचिदुपसर्पति।)

**पाण्डुः**—भद्र, कीदृशो मयि राजनियोगः।

**कासः**—(करपिहितमुखः। कर्णे।) एवमेवम्।

**पाण्डुः**—भद्र, तदर्थमेवेयं बद्धपरिकरता। तिष्ठ त्वमत्रैव। राजानमिममुदन्तमन्यमुखेन प्रापयिष्ये।

(नेपथ्ये यामप्रहारध्वनिः।)

**पाण्डुः**—(श्रुत्वा सैनिकान्प्रति।) तदहमिदानीं कार्यशेषं निर्वर्त्य प्रकृतकार्यार्थं संनह्यामि। भवन्तोऽपि तावत्

बिभ्राणास्तान्युपमितमहाभोगिभिर्बाहुदण्डै-
र्येषां येषां दधति निजतां यानि यान्यायुधानि।
स्वस्वस्थानेष्ववहितमनोवृत्तयस्त्यक्तशङ्काः
सर्वे तिष्ठन्त्वरिपुरमभिव्याप्य सैन्याः प्रवीराः॥ ४१॥

(इति निष्क्रान्ताः सर्वे।)

इति द्वितीयोऽङ्कः।

---

## तृतीयोऽङ्कः।

(ततः प्रविशति पश्चाद्बद्धं पुरुषं किंकरेण विकर्षन् विचारो नागरिकः।)

**नागरिकः**—अङ्ग गद, कस्त्वमसि।

**पुरुषः**—(स्वगतम्।) किमहं ज्ञातोऽस्म्यनेन गद इति।

**नागरिकः**—किं विचारयसि। यदि सत्यं गदोऽसि ततो मोक्ष्यसे।

**पुरुषः**—(स्वगतम्।) नाहमनेन ज्ञातः।

बिभ्राणो मुखबाहुवक्षसि कृतं पुण्ड्रत्रयं भस्मना
हस्तोपात्तविशुद्धताम्रकलशो रुद्राक्षमाली गले।
धृत्वा वैदिकवेषमाविशमिह स्वस्वामिना प्रेरितो
हृद्रोगोऽहमरेरवेक्षितुमना जीवस्य राज्ञः स्थितिम्॥ १॥

अनन्तरमनेन नागरिकेण संयमितः। भवतु। एवं ब्रवीमि। (प्रकाशम्।) आर्य, मुञ्च माम्। विप्रश्निकतामुपजीव्येदं जठरहतकं पुष्णामि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नागरिकः**—अस्त्वेतत् । कुतो रात्रिसंचारः ।

**पुरुषः**—यस्यकस्यचिद्यत्किंचिद्धाविफलमुक्त्वा पारितोषिकं गृह्णामीति ।

**नागरिकः**—किं दिवसस्ते तत्कर्मणो न पर्याप्तः ।

**पुरुषः**—बाढम् । श्रूयताम् ।

यामो यात्यविलम्बितं दिनमुखे स्नानादिभिः कर्मभिः
पश्चाद्भिक्षितुमारभे प्रतिदिनं धान्यानि वा तण्डुलान् ।
तैरन्नाद्युपपाद्य धूर्जटिमुखान्देवान्निवेद्यातिथी-
न्संतर्प्याश्नत एव याति दिवसः शेषः कुतः संचरः ॥ २ ॥

**किंकरः**—अये, युक्तमिदम् । इह तु यामादूर्ध्वं रुध्यते नगरसंचारः ।

**पुरुषः**—यदीदानीं यामादूर्ध्वं कालस्तर्हि न संचरामि स्वप्स्यामि ।

**किंकरः**—कुत्र निद्रास्थानम् ।

**पुरुषः**—धर्मशालायाम् ।

**नागरिकः**—किमिदं राजमन्दिरं तव धर्मशाला । अत्र हि

नोंकारः प्लुवते न गीतिरटति स्वाहेति न श्रूयते
न न्यायव्यवहारतारवचसः संघीभवन्ति द्विजाः ।
नात्युच्चैः पृषदाज्यहोमसुरभिर्धूम्या जरीजृम्भते
भक्ताः पञ्चजनाः स्वपन्ति परितो न स्त्री कुमारो न च ॥ ३ ॥

**पुरुषः**—अस्त्विदं राजमन्दिरं तथापि सुप्रवेशमस्मादृशामिति श्रुतमस्ति ।

**नागरिकः**—सुप्रवेशमिति कस्मात्त्वया श्रुतम् ।

**पुरुषः**—आर्यमिश्रेभ्य एव ।

**नागरिकः**—हन्त, किमस्माभिरिदं कथितम् ।

**पुरुषः**—नहि नहि । अन्यजनैः ।

**नागरिकः**—कैस्ते कथितम् । यदिदं परिचितजनस्यापि राजशासनमन्तरेण दुष्प्रवेशम्, किं पुनरपरिचितस्य ते ।

**किंकरः**—विसंस्थुलैवास्य वचनव्यक्तिः गृहीत इव चोरस्तरलतारकविलोचनः पश्यन्नयं वक्तुं न शक्तः प्रत्युत्तरं ततश्चर इव लक्ष्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नागरिकः**—तर्हि शिक्षयतु भवानिमम्।

**किंकरः**—अरे, कथय तथ्यम्। मृषावादिनस्तव वैदिकता राजशासनस्य न प्रतिरोधिनी। (इति कशामुद्यच्छति।)

**पुरुषः**—मा ताडय। तथ्यं वदामि।

**नागरिकः**—यदि तथ्यं वदसि तदा विज्ञानमन्त्रिणं दर्शयित्वा संभावयिष्यामि।

**किंकरः**—प्रतीहार्या धारणया सह प्रासादमधिरूढो मन्त्री। तत्संनिधौ त्वमपि नेष्यसे।

**पुरुषः**—(स्वगतम्।) तथा चेन्मम दुर्लभमेव जीवितम्। (प्रकाशं भीतिमभिनीय।) अभयं मे दीयतां यदि तथ्यमेव श्रोतव्यम्। (इति प्रणमति।)

**नागरिकः**—दत्तभयोऽसि। कथयात्मानम्।

**पुरुषः**—(उत्थाय प्राञ्जलिः।) हृद्रोगोऽस्मि। विसृज मां दयया।

**नागरिकः**—चार एवायं वैदिकवेषमवलम्ब्यागतो दत्ताभयश्च।

**किंकरः**—तर्हि किं कर्तव्यम्।

**नागरिकः**—'सर्वमिदं राजकार्यं त्वया कस्मैचिदपि न कथनीयम्' इति शपथं गृहीत्वा पुराद्बहिर्विसृज्यताम्। अथवा किमनेन वराकेण कथनीयम्। दत्ताभयोऽयमिति मन्त्रिणे निवेद्य कथंचिन्मोचयितव्यः।

**किंकरः**—तथा करोमि। (इति निष्क्रान्तः।)

(नेपथ्ये कुक्कुटध्वनिः।)

**नागरिकः**—(आकर्ण्य।) कथं रजनीविरामः।

(पुनर्नेपथ्ये)

**वैतालिकः**—

पत्यावस्तं व्रजति विगलच्चञ्चरीकाञ्जनाश्रु-
त्रासान्मीलद्दलदशमितो रागमर्कक्रमेण।
द्रागालिङ्गेदपि कुमुदिनीमित्यपन्यायशङ्की
कूकूशब्दं विसृजति जवात्कुक्कुटः पूर्वमेव॥ ४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**द्वितीयो वैतालिकः—**

रागं मुखेन दरदर्शिततारकेण
मां व्यञ्जतीमपि समेत्य करेण गाढम् ।
आलिङ्ग्यते कुमुदिनीति रुषापराद्धि
यातां निशां द्रुतमनुव्रजतीव चन्द्रः ॥ ५ ॥

अपि च ।

प्रातर्जातमिति द्रुतं प्रशिथिलं बद्ध्वा दुकूलं दृढं
धम्मिल्लं च्युतमाल्यमप्युपवनान्निर्गत्वरीरित्वरीः ।
आकृष्टांशुकपल्लवे कठिनयोरालिङ्ग्य वक्षोजयो-
राघ्रायाननपङ्कजे च कथमप्युज्झन्त्यहो कामिनः ॥ ६ ॥

**नागरिकः**—तदधुना राजकार्ये चावहितस्तिष्ठामि । (इति निष्क्रान्तः ।)

शुद्धविष्कम्भकः ।

(ततः प्रविशति प्रासादाधिरूढः प्रतीहार्या धारणया दर्शितमार्गो मन्त्री ।)

**मन्त्री**—संप्रति हि

सोपानानि हिरण्मयानि परितः प्रत्युप्तरत्नान्यहं
पादाभ्यां समतीत्य किंकरगणालम्बी स्वयं पाणिना ।
भित्तिष्वालिखितैर्वृतं खगमृगस्त्रीपुंसवृक्षाचलै-
रारुक्षं निटिलाक्षशैलधवलं प्रासादमभ्रंलिहम् ॥ ७ ॥

(विचिन्त्य स्वगतम् ।) अहो दुरन्तता राजधर्माणाम् ।

आत्मानं परिरक्ष्य दुष्करतपोवृद्धद्विजाराधनै-
र्दानीयेषु च भक्तिपूर्वमसकृद्दानप्रदानैरपि ।
दण्डं दण्डयितव्यमात्रविषयं कृत्वा धरित्रीतले
राज्ञा धर्मपथे मतिं क्रमयता संरक्षितव्याः प्रजाः ॥ ८ ॥

किं बहुना ।

स्वश्रेयसार्थं यततेऽनिशं यो राज्ञा किलानेन पृथग्विमर्शः ।
स्वस्मिन्नमात्येषु सुहृत्सु राष्ट्रे दुर्गेषु कोषेषु बलेषु कार्यः ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्ज्ञातसर्वतन्त्रेषु विगूढामोघमन्त्रेषु मन्त्रिषु विन्यस्तसमस्तकार्यभरस्य तु राज्ञो निश्चिन्ततैव । परंतु तेषां व्याकृष्यन्ते दुरन्तया चिन्तया हृदयानि ।

सामन्ताविनमेयुरित्युपचयः कोषस्य सिध्येदिति
स्थानेषु द्विषतां स्थितीरपि चराः पश्येयुराप्ता इति ।
स्यादायोपगमो यथेति विभवैस्तुष्टाः प्रवीरा भटा
वर्तेरन्निति मा मलिम्लुचगणाद्भूरुद्विजेतेति च ॥ १० ॥

अहमपि राज्ञा विन्यस्तसमस्तकार्यभारतया यत्सत्यं व्याकुल एव । तथा हि ।

कार्येषूक्तेषु राज्ञा कतिचिदपि मया साधितान्येव पूर्वं
साधिष्यन्ते परस्तात्कतिचन कतिचिच्चापि साध्यन्त एव ।
किंचानुक्तेषु सद्यः किमपि किल कुशाग्रीययात्मीयबुद्ध्या
पर्यालोच्यैव तत्तत्समयसमुचितं कर्तुमुत्कण्ठितोऽस्मि ॥ ११ ॥

अत एव सर्वत्र तत्रतत्र व्यापृते मया पुरगुप्त्यै मत्सदृश एव कोऽपि विनियुक्तो विचारनामा नागरिकः । तत्प्रकृतकार्ये व्यापृतव्यम् । कः कोऽत्र भोः ।

(प्रविश्य ।)

**दौवारिकः**—विजयतां देवः ।

**मन्त्री**—भद्र, मद्वचनेनानुशासनीयाः पौरा नगरालंकाराय ।

आलिम्पन्तां सुधाभिः पुरसदनगता भित्तयो भृत्यवर्गै
रम्भास्तम्भाः क्रियन्तां कपिशफलभृतः पार्श्वयोर्द्वारभूमेः ।
बध्यन्तां तोरणानि श्रितनवमणिभिर्दामभिः सन्तु रथ्याः
संमृष्टाश्चाम्बुसिक्ताः प्रतिगृहमुपरि ग्रथ्यतां केतनाली ॥ १२ ॥

यतः संप्रत्येव सिद्धप्रतिज्ञो राजा समागमिष्यति ।

**दौवारिकः**—यदाज्ञापयत्यार्यः । (इति निष्क्रान्तः ।)

**मन्त्री**—(सदृष्टिक्षेपं परिवृत्त्यावलोक्य च ।) अहो रिपूणां पुरावस्कन्दनप्रकारः । तथा हि । प्राण्डुना प्रेरिता रोगाः,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूर्धानं व्याप्तुकामाः शतमथ नवतिर्लोचने चाधिचत्वा
नासामष्टादशास्यं खलु चतुरधिका सप्ततिर्हृच पञ्च ।
वक्षोजौ पञ्च शूलैः सह समगणनैः कुक्षिमष्टौ च गुल्माः
स्वार्हस्थानान्युपेतं त्रिगुणगणनया पञ्चकं च व्रणानाम् ॥ १३ ॥

अथ च स्वयमेव मन्त्रिभूतस्य युवराजस्य पाण्डोः पुरोपरोधवैचित्री वाचामतिवर्तते पन्थानम् । (सामर्षं सावहित्थं चाकाशे ।) साधु मन्त्रिधुरीण, साधु । अनया गुप्तप्रयोगप्रकारगौरवया धिषणया शौर्येण च दैत्यगुरुं वृषपर्वाणं चाधिशेषे । (सोपहासम् ।) मयि— (इत्यर्धोक्ते विरमति ।)

**धारणा**—(सस्मितम् ।) अमच्चस्स वाक्यसेसेण तक्कीअदि धीरोदत्तत्तणम् । (क)

**अमात्यः**—अस्खलितासाधारणकार्यावधारणधौरेयस्खलितानि तव मनीषितानि भवन्ति । (इति पुरो विलोक्य ।) अहो नगरालंकारचातुरी पौराणाम् ।

कीर्णान्यम्बुपृषन्ति किंकरगणैरभ्यन्तरे ताडिता-
न्यातोद्यानि निकेतकेकिनटनप्रारम्भमूलानि च ।
बद्धा मन्दिरमार्गसीमसु हसन्नाथापनीतांशुक-
व्यक्तोरोजसलज्जसिद्धयुवतिव्याकृष्टचेलध्वजाः ॥ १४ ॥

अपि च ।

मन्ये रम्भाः पुरमृगदृशामूरुसौभाग्यचौर्या-
द्बद्धा भृत्यैः प्रतिगृहमपि द्वारपार्श्वद्वयेषु ।
अम्भोदुर्गात्कथमपि हृता यन्त्रितोच्चैर्विताने
तासां वक्त्राम्बुजपरिमलग्राहिणी पद्ममाला ॥ १५ ॥

किं च । सुधालेपधवलीकृतसौधवसतयः पौरयुवतयः शारदाभ्रगतपरमाद्भुततडिल्लताविभ्रममुद्भावयन्ति । किं च, चञ्चरीकगणश्चित्रलिखितसहकारमञ्जरीकलितोत्कलिकया संचरमाणोऽपि कदर्यमवनीपतिमुपगतो वनीपकलोक इव निष्फल एव निवर्तते । कतिचन निकेतनानि च नूतनालि-

(क) अमात्यस्य वाक्यशेषेण तर्क्यते धीरोदात्तत्वम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खितेनाहिनकुलेनाश्वमहिषेण गोव्याघ्रेण च भित्तिषु निर्वैरसत्त्वान्यनुकुर्वन्ति चत्वराणि तपोधनाश्रमपदस्य । (अन्यतोऽवलोक्य सहासम् ।)

दृष्ट्वाकृष्टकचामुदस्तचिबुकां पत्या कराभ्यां बला-
त्कामप्येणदृशं करौ विधुवतीमास्वाद्यमानाधराम् ।
आलेख्ये पुरशिल्पिना विरचितां भित्तौ बहिर्मन्दिरा-
न्नार्यः सस्मितनम्रवक्त्रकमलाः कर्षन्ति यूनां मनः ॥ १६ ॥

नन्विदानीमत्र नगरालंकारदर्शिनो राज्ञः समागमं प्रतीक्षमाणाः पौरास्तस्य परमुपचाराय संनह्यन्ति । तथा हि ।

स्थाप्यन्ते गृहवासवेदिषु घटाः संवेष्टितास्तन्तुभिः
प्रत्यग्राम्रदलप्रसाधितमुखा विप्रैः पयःपूरिताः ।
कन्याभिर्घृतसिक्तवर्तिनिकरैर्नीराजनाभाजनैः
साध्यन्ते सममेव लाजसुमनश्चित्राणि पात्राणि च ॥ १७ ॥

(विचिन्त्य ।) कथमसौ राजा लिप्सितं फलं लब्ध्वा समायास्यति । कथमस्य साम्बशिवप्रसादमन्तरेण लिप्सितफललाभः । कथं वा कठोराणि तपांसि विनानेन सुलभः शिवप्रसादः । कथमनेन स्वकालविकस्वरशिरीषदलकोमलशरीरेण सुकरा कठोरा तपश्चर्या । न चैतस्य तादृशतपश्चरणादृतेऽखिलपुरुषार्थसाधनं भगवतश्चन्द्रकलावतंसस्य निरन्तरध्यानं संभाव्यते । नलिनीदलान्तरालतरलोदबिन्दुसमस्पन्दा दुर्निरोधा हि चित्तवृत्तयः । तदिदानीं मदीयमन्तःकरणं दुरन्तचिन्तोदधौ निमज्य पुनरुन्मज्जति । अथवा कस्य किमसंभावितमनुकूलतामुपगते दैवे । (दक्षिणभुजस्पन्दमभिनीय ।) कथमस्थाने मम विचारः । सर्वं सुघटितं भविष्यति ।

(नेपथ्ये)

**वैतालिकः**—

वातं प्रावृषिकं निरुध्य सहसा गात्रप्रकम्पप्रदं
संफुल्लानि विधाय चारुकमलान्यासाद्य हंसागमम् ।
दिष्ट्या लब्धवता प्रसादमधिकं वापीजलाधारयोः
सद्यः शारदवासरेण धवलो मेघोऽम्बरं प्रापितः ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—(श्रुत्वा सहर्षम् ।) समच्युत(?)प्राणनिरोधेन निर्धूतसकलतपोविघ्नेन विशुद्धाद्वैतज्ञानसाधनेन समाराधितयोर्धूर्जटिधरराजकन्ययोः प्रसादेन राज्ञा रसो हस्तगतः कृत इत्यनेन वैतालिकवचनेन सूच्यते ।

(पुनर्नेपथ्ये ।)

दिङ्मण्डलस्य विमलीकरणे प्रवीणा-
न्निर्विघ्नमुत्सृजति नीरजबन्धुरंशून् ।
पङ्कश्च पान्थपदयोगममृष्यमाणः
संशोषमेत्य शकलीभवति क्षणेन ॥ १९ ॥

**मन्त्रीः**—(श्रुत्वा ।) एतेनापि वचसा निरोगीकरणसमर्थान्रसान्प्रयोक्तुं राज्ञस्तस्य च यक्ष्महतकस्य विनशितुं प्राप्तः कालोऽयमिति च सूच्यते । (सबहुमानम् ।) साधु रे वैतालिक, साधु । यदधुना गूढाभिप्रायेण भवता बोधितव्यं बोधितम् । तदेव वृत्तं सप्रकारमवगमयितुं राजानं प्रत्युद्गमनेन बहुमन्तुं च तत्रैव गच्छामि । (इत्युत्थाय आकाशे ।) अरे यक्ष्महतक, भवदीयमतःपरं पश्यामि शौण्डीर्यम् । (पुरो विलोक्य ।) कथमागत एव देवः । यतो देवी पुरोमार्गप्रदर्शिनी पुरो दृश्यते । यैषा

धम्मिल्ले घनसंनिभे सिततडिद्वल्ल्येव मल्लीस्रजा
वक्रेन्दो रुचिरेण नाभितिलकव्याजात्कलङ्केन च ।
हारेण स्तनकोकयोरपि बिसस्वच्छेन चायामिना
पादाम्भोरुहयोश्च हंसकयुगेनाराविणा राजते ॥ २० ॥

अयमपि महाराजस्तस्या अनुपदमागच्छति । संप्रति हि एतस्य

विचारविगमादिदं विलसति प्रसन्नं मुखं
गृहीतसुषमं हिमव्यपगमादिवाम्भोरुहम् ।
विषाणिन इव प्रतिद्विरददर्शनामर्षिणो
गतिश्च किल मेदिनीं नमयतीव धीरोद्धता ॥ २१ ॥

(ततः प्रविशति जीवो बुद्धिश्च ।)

**जीवः**—अहो श्रुतिस्मृतिविहितानां कर्मणां प्रभावः । यानि मया समयेषु समनुष्ठितानि मदीयमन्तःकरणमशोधयन् । शोधिते च तस्मिन्म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गवद्भक्तिर्नाम कापि कल्पलता प्रथममङ्कुरिता पश्चादुपचितपरिचया च सा मम हृदयानुरञ्जनी क्रमेण भगवन्तौ परमेश्वरौ साक्षाद्दर्शितवती । अनितरसाधारणया च तया प्रसन्नौ भगवन्तौ संप्रत्यभिलषितान्रसगन्धकादीन्प्रसादीकृत्यार्पितवन्तौ । अग्रेऽपि तस्या एव महिम्ना सकलमप्यभिलषितं पुमर्थं लप्स्यामहे ।

**बुद्धिः**—अज्जउत्त, किं एदे रसगन्धआ अण्णणिव्वेक्खा सअं जेव्व विवक्खक्खवणं णिव्वहन्दि । (क)

**राजा**—देवि, दिव्यौषधीभिः शोधिताः सन्तो विविधरसायनद्वारा उक्तसामर्थ्या ह्येते ।

**देवी**—ता एव्वं संविहाणसमत्थेण केण वि होदव्वम् । (ख)

**राजा**—विज्ञानशर्मैवात्र निर्वोढा । यतः ।

ऋषिरेव विजानाति द्रव्यसंयोगजं गुणम् ।
विज्ञानशर्मणः कोऽन्यः सर्वज्ञाननिधिर्ऋषिः ॥ २२ ॥

किं च ।

महेशतेजःसंभूतो रसः कारुणिकाग्रणीः ।
यः स्वानिष्टमुरीकृत्य परपीडां व्यपोहति ॥ २३ ॥

तदुक्तम्—

'मूर्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति हि मृतः कोऽन्यः करुणाकरः सूतात् ॥ २४ ॥'
'सुरगुरुगोद्विजहंसापायकलापोद्भवं किलासाध्यम् ।
श्वित्रं महदपि शमयति कोऽन्यस्तस्मात्पवित्रतरः ॥ २५ ॥'

गन्धकस्यापि माहात्म्यमुक्तम्—

'ये गुणाः पारदे प्रोक्तास्ते गुणाः सन्ति गन्धके ।

---

(क) आर्यपुत्र, किमेते रसगन्धका अन्यनिरपेक्षाः स्वयमेव विपक्षक्षपणं निर्वहन्ति ।

(ख) तदेवं संविधानसमर्थेन केनापि भवितव्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धो गन्धो हरेद्रोगान्कुष्ठमृत्युजरादिकान् ।
अग्निकारी महानुष्णो वीर्यवृद्धिं करोति च ॥ २६ ॥'

किं च प्रतिदिनं निषेव्यमाणैरेतैः प्रियरतीनां युवतीनामनभिमतानां पुंसां जरामुपरुध्य तासामभिमते यौवने तेषां स्थापनं भवति ।

**देवी**—(सलज्जं सदृष्टिक्षेपं च ।) संपत्तो एसो विण्णाणणामहेओ अमच्चो । ता णम्मालावस्स ण एसो समओ । (क)

**राजा**—(विलोक्य ।) अये, मन्त्रिबृहस्पतिः संप्राप्तः । (सानुशयम् ।)

कर्तव्यो विधिरित्थमित्थमिति मामुक्त्वा जिगीषुर्द्विषं
स्वस्यैवोपरि राज्यतन्त्रमखिलं द्रष्टव्यमासज्य च ।
अद्येदं क्रियते करिष्यत इदं पश्चादकारि त्विदं
प्रागेवेति दुरन्तया कृशतनुं पश्याम्यमुं चिन्तया ॥ २७ ॥

एतदनुज्ञयैव निर्विचारमानसेन मया कृतं भगवदाराधनम् ।

**मन्त्री**—(उपसृत्य ।) स्वस्ति सफलमनोरथाभ्यां स्वामिभ्याम् ।

**जीवः**—भवत्साहाय्यमेवात्र हेतुः ।

**बुद्धिः**—एवमप्पमत्तेण चित्तवावारेण सहायत्तणं कुणन्तो दीहाऊ होइ । (ख)

**राजा**—अत्र निषीदतु भवान् ।

**मन्त्री**—(उपविश्य ।) निर्विघ्नेन कार्यसिद्धिर्जातेति मनोरथानामुपरि वर्तामहे ।

**राजा**—तदेव वक्तुकामोऽस्मि ।

**मन्त्री**—अवहितोऽस्मि ।

**राजा**—त्वदुक्तमार्गेण प्रथमं पद्मासनं बद्ध्वा तथैवोपविष्टोऽहम् ।

शुद्धान्तःकरणेन संततपरिध्यातार्ककोटिप्रभ-
प्रालेयद्युतिकोटिशीतलशिवारूढाङ्कगङ्गाधरः ।

---

(क) संप्राप्त एष विज्ञाननामधेयोऽमात्यः । तन्नर्मालापस्य नैष समयः ।

(ख) एवमप्यमात्येन चित्तव्यापारेण सहायत्वं कुर्वन्दीर्घायुर्भव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सानन्दाश्रुकणो दृशोः सपुलको गात्रेषु सप्रश्रय-
स्तुत्युक्तिर्वदने कृताञ्जलिपुटो मूर्धन्यभूवं चिरम् ॥ २८ ॥

तदनु मयि प्रसादाभिमुखः प्रज्वलदग्निशिखाकलापकपिलजटामण्डलाटवीविलुठज्जाह्नवीचरबालहंसायमानचन्द्रलेखः कण्ठगतकालकूटद्युतियमुनाभयपार्श्वनिःसरन्निर्झरायमाणरुद्राक्षमालिकः परिहितशार्दूलचर्मसंदर्शनभीतमिव मृगमेकं संरक्षितुं करे बिभ्राणः करान्तरे च प्रणतजनदुरदृष्टशिलाभञ्जनं टङ्कं च कंचन भगवान्काञ्चनगिरिधन्वा गिरिकन्यासमेतो मामेतदवोचत—

ध्यानेन ते प्रसन्नोऽस्मि वृणीष्व वरमर्पये ।
इत्युक्तवन्तं तं देवमयाचे रसगन्धकान् ॥ २९ ॥

ततस्तेन दीयमानान्रसगन्धकानग्रहीषम् । पुनश्च प्रणम्य सप्रश्रयमयाचिषम् । देवदेव,

फलिन्यः फलहीना याः पुष्पिण्यो या अपुष्पिकाः ।
गुरुप्रसूतास्ता मुञ्चन्त्वंहसो न इति श्रुतिः ॥ ३० ॥
यस्मै ददासि तं रुग्भ्यः सर्वाभ्यः पारयामहे ।
इति सोमेनौषधयः संवदन्तीति च श्रुतिः ॥ ३१ ॥

अतः सर्वास्ताः सिद्धौषधयः सोमायत्ताः स च भगवतः शिरोभूषणमत्रैव संनिहितः । अतः ।

शोधयितुं रसगन्धान्कर्तुं च रसौषधानि विविधानि ।
दिव्यौषधीश्च सर्वा दापय मौलिस्थितेन चन्द्रेण ॥ ३२ ॥

ततश्च भगवदाज्ञया तेन सोमेन सर्वास्ता मह्यं दत्ताः । (इति मन्त्रिहस्तेऽर्पयति ।)

**मन्त्री**—(सहर्षं गृहीत्वा दृष्ट्वा च ।) सप्तकञ्चुकादिदोषनिराकरणेन शुद्धानेतानोषधीभिः सह शत्रुजयाय प्रयोक्ष्यामहे ।

**देवी**—कित्तिआ ते सत्तुजणा किणामहेआ अ कस्सि समए पुरोपरोहं किदवन्तो । (क)

(क) कियन्तस्ते शत्रुजनाः किंनामधेयाश्च कस्मिन्समये पुरोपरोधं कृतवन्तः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—श्रूयतां तावत् ।

पुण्डरीकपुरं राज्ञि प्रविष्टे रन्ध्रलाभतः ।
स्वराजानुज्ञया पाण्डुररुधत्सैनिकैः पुरम् ॥ ३३ ॥

यक्ष्महतकस्यास्मच्छत्रोर्बहवः सैनिकाः ।

ग्रहण्यश्मर्यतीसारशूलार्शःपाण्डुकामलाः ।
विषूचिकाकुष्ठगुल्मसंनिपातज्वरादयः ॥ ३४ ॥

**देवी**—अमच्च, एत्तिअं पुरोपरोहसंरम्भं कुणन्तेण सहसैणिएण तेण जक्खहदएण अम्हाणं किं अच्चाहिदं कादव्वम् । (क)

**मन्त्री**—देवि, पुरान्निष्क्रमयितव्या वयमित्येव तस्य हताशस्य दुराशाभिनिवेशः ।

**देवी**—अहो अणत्तणीणत्तणं जक्खहदअस्स । जो अम्हेसु पुरादो णिक्कन्तेसु सअं कहिं ठाइस्संति अप्पणो वि णासं ण गणेदि । (ख)

**मन्त्री**—सत्यमुक्तं देव्या ।

महापातकसंभूतेस्तस्य पापस्य यक्ष्मणः ।
वैरायितमिदं चित्रं स्वविनाशमपीच्छतः ॥ ३५ ॥

यदुक्तमभियुक्तैः—

'अपथ्यसेविनश्चौरा राजदाररता अपि ।
जानन्त एव स्वानर्थमिच्छन्त्यारब्धकर्मतः ॥ ३६ ॥' इति ।

ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे
ह्येवं या समभाणि भर्तृहरिणा काष्ठा परा पापिनाम् ।
तामेतामतिशेत एष सपरीवारस्य नाशं निज-
स्योत्पश्यन्नपि निष्क्रमाय यतते यो नः पुरात्पातकी ॥ ३७ ॥

---

(क) अमात्य, एतावन्तं पुरोपरोधसंरम्भं कुर्वाणेन सहसैनिकेन तेन यक्ष्महतकेनास्माकं किमत्याहितं कर्तव्यम् ।

(ख) अहो अनात्मनीनत्वं यक्ष्महतकस्य । योऽस्मासु पुरान्निष्क्रान्तेषु स्वयं कुत्र स्थास्यामीत्यात्मनोऽपि नाशं न गणयति ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्त्यत्र लौकिकोऽप्याभाणकः—'स्वनाशाच्छेदेन शत्रोरमङ्गलमापादयत्यनात्मनीनो मूर्खः' इति।

**देवी**—ता कहिं दाणिं एत्तिआणं रोगाणं णिग्गहो सुअरो। (क)

**मन्त्री**—देवि, मा भैषीः। निखिलरोगनिसर्गवैरिणि रसे स्वाधीने कः शत्रुजये संदेहः।

**राजा**—तर्हि कुतो विलम्ब्यते।

**मन्त्री**—अहं पुनरधुना रसमोषधीभिः सह संयोजयितुं गच्छामि। देवेनापि विश्रम्यताम्।

(इति निष्क्रान्ताः सर्वे।)

इति तृतीयोऽङ्कः।

---

चतुर्थोऽङ्कः।

(ततः प्रविशति विदूषकः।)

**विदूषकः**—उत्तं खु दोआरिएण पाणेण रण्णो रसगन्धअवरप्पदाणं सुणिअ बलिअं रोसवसंगदेण जक्खहदएण पण्डुणा सह किंवि मन्तूण सपरिवारस्स अम्हाणं रण्णो उवरि वइक्कमं किंवि कादुं उज्जोओ करीअदित्ति सुदवन्देण विण्णाणणामहेएण मन्तिणा कज्जगदिं आवेदिअमाणो अन्तेउरवेदिअन्तरे चिट्ठदित्ति। ता राअसमीपं गमिस्सम्। (इति परिक्रम्योदरं करतलेन परामृष्य।) अहो, मुहुत्तादो पुव्वं खादिदं मातुलुङ्गफलप्पमाणाणं मोदआणं सदं वि जिण्णं जादम्। जं तस्सिं समए धण्णकुम्भीपीणुत्तुङ्गो मह पिचण्डो ठिदो। दाणिं उण तिण्णकिदो कटो विअ तणूहोदि। (विमृश्य।) णं मज्झण्णो वट्टदि। तह हि।

पत्तगदं घरहरिणो तिह्लाए पिबइ सीअलं सलिलम्।
गन्धेण कुणइ सुहिदं घाणं चिदमिस्ससक्करापूवो॥ १॥

अहो पमादो। राअसमीवं गमिस्सं ति महाणससमीवं गदो ह्मि। अदो एव्व तह वत्तुलतणुअरगोधूमापूवसंहितसरावेहिं माहिसदहिमण्डमिस्सिदमासविरइअभक्खविसेसणिबिडिअभाअणेहिं परितत्तम्बरिसभज्जिदचणअचअपूरिअपिण्डएहिं फाणिअसंकलिअजवधाणासमुल्लसिदविसालामत्तेहिं दुद्धदहिसक्करासलिलभाविदविविहपिथुअरासिसंपुण्णविसङ्कडचसअविसेसेहिं मल्लिअमुउलपुञ्जधवलसालितण्डुलन्नसमुच्चअविराजिदतम्ममअभण्डगणब्भन्तरट्ठाविदसुवण्णसवण्णसूपणिहाणपिठरेहिं कित्तपरिवक्कवन्ताककारइल्लपडोल-

---

(क) तत्कथमिदानीमेतावतां रोगाणां निग्रहः सुकरः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोसातईणिप्पावराअमासकदलीपणसकुम्भण्डप्पमुहसलाटुखण्डमयशाकषण्डमण्डिदबहुविधभाअणविसेसेहिं अ परिसोहमाणस्स महाणसस्स विसमरो गन्धो । घुमघुमाअदि मे णासाबिलम् । सिलसिलाअदि तालुरसणामूले सुणिग्गत्तरं लालाजलम् । पज्जलदिव्व हणूमन्तवालग्गलग्गग्गिसिहागहिदघरपरम्परं लङ्काउरं विअ बुभुक्खाउरं मे उदरम् । (किंचित्पुरतो विलोक्य ।) इह खु महाणसदुवारदेसे अवणदपुव्वकाओ विलोईअदि चुल्लिपावअपज्जलणत्थफुक्कारपवणविकिण्णभसितलेशपुञ्जधूसरमुखो णिडिलदीसन्तविरलसेदम्बुकणिओ करङ्गुलीलग्गहिङ्गुपरिमलसंतप्पिदसमीवगदजणघाणेन्दिओ ईससंकमिदेङ्गालल्लञ्छिदपरिधाणपडो दक्खिणकरग्गहीददव्वीसिहरतणुतरदीसन्तविलोलिअसाअपाअवप्फो अण्णकरलम्बितेन्धणसअलो भद्दमुहो णाम पोरोगवो । ता एणं एव्व पुच्छामि । अए भद्दमुह, तुए पक्केसु भक्खविसेसेसु किं वि किं वि मह हत्थे दादव्वं जं भक्खिअ एदं सुट्ठु एदं णेत्ति विआरिअ कहेमि जं सुट्ठु तं परिवेसिअ रण्णो हत्थादो पारितोसिअं गेह्णदु भवम् । (सामर्षम् ।) कहं एसो दासीएपुत्तो 'जइ तुह बुभुक्खा तदो रण्णो समीपं गदुअ भोअणं दादव्वं ति पुच्छ । अहं उदरंभरिणो तुह किं बि ण दाइस्सं' ति भणिअ महाणसब्भन्तरं गदो । होदु । राअसमीपं गमिस्सम् । (इति परिक्रम्यावलोक्य च ।) कहं एत्थ राअसमीवे विअणे अलगद्देण गिल्लिअ बिलं पवेसिदो मण्डूओ विअ किं वि अणक्खरं पलवन्तो अमच्चो वेधवेओ (?) चिट्ठइ । ता समअं पडिवालइस्सम् । (इति तिष्ठति ।) (क)

---

(क) उक्तं खलु दौवारिकेण प्राणेन राज्ञो रसगन्धवरप्रदानं श्रुत्वा बलवद्रोषवशंगतेन यक्ष्महतकेन पाण्डुना सह किमपि मन्त्रयित्वा सपरिवारस्यास्माकं राज्ञ उपरि व्यतिक्रमं किमपि कर्तुमुद्योगः क्रियत इति श्रुतवता विज्ञाननामधेयेन मन्त्रिणा कार्यगतिमावेद्यमानोऽन्तःपुरवेदिकान्तरे तिष्ठतीति । तद्राजसमीपं गमिष्यामि । अहो, मुहूर्तात्पूर्वं खादितं मातुलुङ्गफलप्रमाणानां मोदकानां शतमपि जीर्णं जातम् । यत्तस्मिन्समये धान्यकुम्भीपीनोत्तुङ्गं मम पिचण्डं स्थितम् । इदानीं पुनस्तृणकृतः कट इव तनूभवति । ननु मध्याह्नो वर्तते । तथाहि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(ततः प्रविशति राजा मन्त्री च।)

**राजा**—(कर्णं दत्त्वा।) कार्यपर्यालोचनयातिक्रान्तोऽप्यर्धदिवसो न ज्ञातः। यत इदानीम्

पात्रगतं गृहहरिणस्तृष्णया पिबति शीतलं सलिलम्।
गन्धेन करोति सुखितं घ्राणं घृतमिश्रशर्करापूपः॥

अहो प्रमादः। राजसमीपं गमिष्यामीति महानससमीपं गतोऽस्मि। अत एव तथा वर्तुलतनुतरगोधूमापूपसंहितशरावैः माहिषदधिमण्डमिश्रितमाषविरचितभक्ष्यविशेषनिबिडितभाजनैः परितताम्बरीषभर्जितचणकचयपूरितपिण्डकैः फाणितसंकलितयवधानासमुल्लसितविशालामत्रैः दुग्धदधिशर्करासलिलभावितविविधपृथुकराशिसंपूर्णविषङ्कटचषकविशेषैः मल्लिकामुकुलपुञ्जधवलशालितण्डुलान्नसमुच्चयविराजितताम्रमयभाण्डगणाभ्यन्तरस्थापितसुवर्णसवर्णसूपनिधानपिठरैः कृत्तपरिपक्ववृन्ताककारवेल्लपटोलकोशातकीनिष्पावराजमाषकदलीपनसकूष्माण्डप्रमुखशलाटुखण्डमयशाकषण्डमण्डितबहुविधभाजनविशेषैश्च परिशोभमानस्य महानसस्य विसृमरो गन्धः। घुमघुमायते मे नासाबिलम्। सिलसिलायते तालुरसनामूले सुनिर्गत्वरं लालाजलम्। प्रज्वलतीव हनूमद्वालाग्रलग्नाग्निशिखागृहीतगृहपरम्परं लङ्कापुरमिव बुभुक्षातुरं मे उदरम्। इह खलु महानसद्वारदेशेऽवनतपूर्वकायो विलोक्यते चुल्लीपावकप्रज्वलनार्थफूत्कारपवनाविकीर्णभसितलेशपुञ्जधूसरमुखो निटिलदृश्यमानविरलस्वेदाम्बुकणिकः करागुलिलग्नहिङ्गुपरिमलसंतर्पितसमीपगतजनघ्राणेन्द्रियः ईषत्संक्रमितेङ्गालला‌ञ्छितपरिधानपटो दक्षिणकरगृहीतदर्वीशिखरतनुतरदृश्यमानविलोलितशाकपाकबाष्पः अन्यकरलम्बितेन्धनशकलो भद्रमुखो नाम पौरोगवः। तदेनमेव पृच्छामि। अये भद्रमुख, त्वया पक्केषु भक्ष्यविशेषेषु किमपि किमपि मम हस्ते दातव्यं यद्भक्षयित्वा इदं सुष्ठु इदं नेति विचार्य कथयामि यत्सुष्ठु तत्परिवेष्य राज्ञो हस्तात् पारितोषिकं गृह्णातु भवान्। कथमेष दास्याःपुत्रः 'यदि तव बुभुक्षा तदा राज्ञः समीपं गत्वा भोजनं दातव्यमिति पृच्छ। अहमुदरंभरेस्तव किमपि न दास्यामि' इति भणित्वा महानसाभ्यन्तरं गतः। भवतु। राजसमीपं गमिष्यामि। कथमत्र राजसमीपे विजने अलगर्देन गृहीत्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रासादोदरपुञ्जितप्रतिरवप्राग्भारदीर्घीकृतं
सद्यः पञ्जरगर्भ एव चकितानुद्भ्रामयन्तं शुकान् ।
कार्यव्याप्रियमाणमानवमुखं कर्षन्तमात्मोन्मुखं
मध्याह्नागमसूचनाय पटहो धत्ते ध्वनिं ताडितः ॥ २ ॥

संप्रति हि घोरातपसंतापमसहमानाः प्राणिनः प्रायेण प्रच्छायशीतलं प्रदेशमावासाय प्रार्थयन्ते । तथा हि ।

आसीदन्ति विशालशैलशिखरभ्रश्यन्नदीनिर्झरां
शुक्लापाङ्गकुलानि सूर्यकिरणैः शून्यामरण्यावनीम् ।
आवर्तस्फुटपुण्डरीकमुकुलप्रेङ्खोलनोद्गन्धिना
तृप्यन्तो मरुता स्वपन्ति च नदीतीरे बिलेषूरगाः ॥ ३ ॥

**मन्त्री**—अहो यौवनश्रियं पुष्णात्येष दिवसः । यतः ।

छायाशीतलमध्वनि द्रुमतलं चण्डातपोपप्लुताः
शौरिं दानवपीडिता इव सुराः पान्था भजन्ति द्रुतम् ।
दुष्कीर्तिं क्षितिपा इव प्रकृतिभिर्लोभावधूतार्थिनो
गाहन्ते च करेणुभिः सह नदीमारण्यका वारणाः ॥ ४ ॥

अपि चेदानीम्

घर्माम्भःकणलुप्यमानमकरीपत्राङ्कुरालंक्रियं
भूयिष्ठोद्गतफूत्क्रियानिलगलन्मासृण्यबिम्बाधरम् ।
ताम्यल्लोचनतारकालसगतिव्याख्यातनिद्रागमं
प्रच्छाये पथि रोचते स्थितवते पान्थाय कान्तामुखम् ॥ ५ ॥

**राजा**—(स्वगतम् ।) नन्वस्मिन्नवसरे

स्नातव्यं जपितव्यं वसितव्यं नमसितव्यमत्तव्यम् ।
अ............मनुकूलं दैवतमत्र क्रमेण मया ॥ ६ ॥

(प्रकाशम् ।) किमतःपरमाचरितव्यम् ।

---

बिलं प्रवेशितो मण्डूक इव किमप्यनक्षरं प्रलपन्नमात्यो............तिष्ठति । तत्समयं प्रतिपालयिष्यामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—मध्याह्न इति बुभुक्षिताः परिजनाः। ततः स्नानार्थमुत्तिष्ठतु महाराजः।

(राजा उत्तिष्ठति मन्त्री च।)

**विदूषकः**—(श्रुत्वा।) एवंवादिणो मन्तिणो होदु पुण्णलोओ। (उपसृत्य।) जेदु जेदु महाराओ। (क)

**राजा**—वयस्य, कथमागतोऽसि।

**विदूषकः**—(मन्त्रिणं प्रति।) अवि कुसलं अमच्चस्स। (ख)

**मन्त्री**—कथमभ्यवहारसमय इति प्राप्तोऽसि।

**विदूषकः**—दाणिं जेव्व णिअघरे भोअणं कदुअ आअदेण अज्जेण वि किं ण विण्णादं मज्झह्नो वट्टदित्ति। (ग)

**मन्त्री**—विज्ञातमेव। श्रूयतामिदानीम्।

यूना सस्पृहदृश्यमानकबरीभारोरुपीनस्तनी
पान्थेनाध्वनि शालिगोपवनिता शून्ये स्फुरद्यौवना।
आसन्नां·······वारणबुसापत्रापनीतातपा-
मारामक्षितिमापगातटगतां साकूतमालोकते॥ ७॥

**विदूषकः**—(समुखभङ्गम्।) अण्णस्स पुरिसस्स अण्णाए इत्थिआए संपक्कसूअणं णाम अणुइदं किं ति वण्णीअदु अज्जेण। जइ मज्झह्नो वण्णणीओ त्ति आग्गहो तदो माणवाणं संभाविदं पाणभोअणं वण्णीअदु। जेण सुदमेत्तेण वि मह संतोसो होदि। (घ)

---

(क) एवंवादिनो मन्त्रिणो भवतु पुण्यलोकः। जयतु जयतु महाराजः।

(ख) अपि कुशलममात्यस्य।

(ग) इदानीमेव निजगृहे भोजनं कृत्वा आगतेनार्येणापि किं न विज्ञातं मध्याह्नो वर्तत इति।

(घ) अन्यस्य पुरुषस्यान्यया स्त्रिया संपर्कसूचनं नामानुचितं किमिति वर्ण्यते आर्येण। यदि मध्याह्नो वर्णनीय इत्याग्रहस्तदा मानवानां संभावितं पानभोजनं वर्णयतु। येन श्रुतमात्रेणापि मम संतोषो भवति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—(विहस्य ।) भोजनेन तत्प्रकारस्य तत्साधनस्य च श्रवणे कुतूहली भवान् ।

(प्रविश्य)

**दौवारिकः**—महाराअ, उवाअणहत्था सामन्तभूवाला संपत्ता मए वि तिदीअकच्छं पवेसिदा महाराओ पेक्खिदव्वोत्ति चिट्ठन्ति । (क)

(राजा मन्त्री च तद्दर्शनप्रदानाय निर्गमनं नाटयतः ।)

**विदूषकः**—(आत्मगतम् ।) अए दासीएपुत्तेहिं सामन्तराएहिं मम ऊसाहभङ्गो किदो । (ख)

(इति तदनुसरणं नाटयति ।)

**मन्त्री**—एते स्वामिनं प्रणमन्ति ।

**राजा**—(आकाशे ।) अपि कुशलिनो यूयम् ।

**मन्त्री**—एते 'स्वामिनः कुशलप्रश्नेन कृतार्थाः स्मः' इति वदन्ति ।

**विदूषकः**—(स्वगतम् ।) बुभुक्खिदस्स मह अकुसलं ति ण जाणादि वअस्सो । (ग)

**मन्त्री**—

कश्चित्स्वर्णौघमेको मणिगणमपरो भूषणव्रातमन्यः
क्षौमस्तोमं परोऽश्वान्रथकुलमितरो बालमातङ्गसंघम् ।
सामन्तक्षोणिपालेष्वहमहमिकयोपाहरद्दृष्टिपातै-
र्देवस्यानुग्रहीतुं सकरुणमुचितं सर्वमित्यर्थयेऽहम् ॥ ८ ॥

अपि च ।

हंसाश्चित्रगताः शुकाः स्फुटगिरो लावा मिथोऽमर्षिणः
श्येनाः शीघ्रजवाः शिखण्डिन उपारोहत्कलापोच्चयाः ।
आनीतास्तपनीयपञ्जरगता भूपैरमीभिर्मुदा
किं चावेक्षितविक्रमाश्च मृगयाकालेषु कौलेयकाः ॥ ९ ॥

---

(क) महाराज, उपायनहस्ताः सामन्तभूपालाः संप्राप्ता मयापि तृतीयकक्षां प्रवेशिता महाराजः प्रेक्षितव्य इति तिष्ठन्ति ।

(ख) अये, दास्याःपुत्रैः सामन्तराजैर्ममोत्साहभङ्गः कृतः ।

(ग) बुभुक्षितस्य ममाकुशलमिति न जानाति वयस्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—मन्त्रिन्,

दत्तानि भूपतिभिरेभिरुपायनानि
तेषां वशे कुरु मयाधिकृता नरा ये ।
एतान्सभाजयितुमर्पय तत्तदर्हा-
न्युष्णीषकञ्चुकदुकूलविभूषणानि ॥ १० ॥

**मन्त्री**—यथाज्ञापयति देवः ।

**विदूषकः**—णं वअस्स, मए वि विजई होइत्ति वाआमेत्तेण तुह उवाअणं दिण्णं तदो बुभुक्खिदं मं किं त्ति ण संभावेसि । (क)

**मन्त्री**—राजन्, श्रोतव्यः कार्यशेषः ।

**विदूषकः**—हुं, चिट्ठदु दासीए वच्छो कज्जसेसो । वअस्स, किं मह पडिवअणम् । (ख)

**राजा**—मन्त्रिन्, ब्राह्मणस्य प्रथमं भोजनं निर्वर्तयेति अन्तःपुरं गत्वा देवीं वद । अतः प्रागेव संभाव्यात्र सामन्तभूपान्स्वस्थानं प्रेषय । वयस्य, त्वमपि मन्त्रिणा सह गच्छ ।

**विदूषकः**—दीहाओ होइ । (ग)

**मन्त्री**—विजयी भवतु देवः । (इति विदूषकेन सह निष्क्रान्तः ।)

**राजा**—कः कोऽत्र भोः ।

(प्रविश्य)

**दौवारिकः**—आणवेदु महाराओ । (घ)

**राजा**—मज्जनगृहमार्गमादेशय ।

**दौवारिकः**—इदो इदो भवं । (ङ) (परिक्रम्यावलोक्य च संस्कृतमाश्रित्य ।)

---

(क) ननु वयस्य, मयापि विजयी भवेति वाचामात्रेण तवोपायनं दत्तं तद्बुभुक्षितं मां किमिति न संभावयसि ।

(ख) हुं, तिष्ठतु दास्या वत्सः कार्यशेषः । वयस्य, किं मम प्रतिवचनम् ।

(ग) दीर्घायुर्भव ।

(घ) आज्ञापयतु महाराजः ।

(ङ) इत इतो भवान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नातुं ते परिचारिकाः स्तनभरश्रान्ताः शनैः सांप्रतं
क्काथोष्णानि जलानि मज्जनगृहे कुम्भीषु संगृह्णते ।
आयान्तीव तृषा जलार्थनमिषादासां विलासाद्गतिं
हंसाः केशभरश्रियं च शिखिनः स्नेहादिमा याचितुम् ॥ ११ ॥

अत्र च हिरण्मयस्य गृहस्थूणस्य पार्श्वभागे

अभ्यङ्गाय सुवर्णपात्रनिहितं तैलं चलत्सौरभं
विस्तीर्णस्फुटकर्णिकारकुसुमे येनाभिभाव्यं मधु ।
न्यस्तं चन्दनदारुनिर्मितमिदं कूर्मासनं चासितुं
यत्पृष्ठे पृथिवीव च त्रिगुणिता कौशेयशाटी स्थिता ॥ १२ ॥

अपि च नवाम्बुदश्यामलायां विपुलायतायामिन्द्रनीलमणिनिर्मितायां हर्म्यभित्तौ प्रतिफलितवपुश्चेटीजनस्तडिल्लताविन्यासमवलम्बते । अत्रैव

कञ्चुल्या दृढसंयतस्तनभरा हारं गले कुर्वती
पश्चाल्लम्बितमम्बरं च जघने काञ्च्या दृढं बध्नती ।
स्वेदाम्भःकणमञ्जरीं च भजती चेलाञ्चलेनानने
चेटीष्वेकतमेयमत्र यतते कर्तुं तवाभ्यञ्जनम् ॥ १३ ॥

**राजा**—दौवारिक, मन्त्री विदूषकश्च कृतोचितव्यापारो न वेति विचार्यताम् । अहमप्यत्र स्नात्वा कृतशिवार्चनो भोजनाय यतिष्ये ।

**दौवारिकः**—तह । (क) (इति निष्क्रान्तः ।)

**राजा**—(स्मृतिमभिनीय ।) अये महानुभावा शिवभक्तिः, यस्याः प्रसादाद्भगवन्तं साम्बं साक्षात्कृत्य तदीयकरुणाकटाक्षामृतनिःष्यन्दकन्दलिताखिलपुमर्थोऽपि सन्संप्रति प्राकृतानर्थनिवर्तकान्रसगन्धकानासाद्य तावतैव कृतकृत्यंमन्यो मूढोऽहं विस्मृतवानस्मि तां भगवतीं शिवभक्तिम् । अहो धिक् प्रमादम् । नूनं सा भगवती मां कृतघ्नं मन्येत । (निःश्वस्य ।)

दृङ्मात्रदर्शितनिजप्रथितप्रभावा
प्रह्लादभूमसुरभूरुहमूलभूता ।

---

(क) तथा ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जन्मान्तरीयतपसां परिपाकतः सा
प्राप्तापि दैवहतकेन मया विमुक्ता ॥ १४ ॥
तामेव हा स्मितसुधामधुराननेन्दुं
भक्तिं तथा निरुपमामसकृद्विचिन्त्य ।
स्नातुं च भोक्तुमशितुं शयितुं विहर्तुं
शक्नोमि नाहमधुना परितप्यमानः ॥ १५ ॥
हृदयानन्दविधात्रीं भक्तिं तामन्तरा न मे सौख्यम् ।
आसारेण विना किं घर्मम्लानस्य शालिनस्तृप्तिः ॥ १६ ॥

तत्कथमहं प्राकृतमिमं व्यासङ्गं परित्यज्य तामेव परमानन्दलीलामनुभूय कृतार्थो भूयासम् । (इति सचिन्तस्तिष्ठति ।)

(ततः प्रविशति स्मृतिः ।)

**स्मृतिः**—अम्मो, भअवदीए शिवभत्तीए विओएण बलिअं उक्कण्ठिदो राआ संपदं ण्हाणभोअणव्वावारं वि णाणुमण्णेदि । ता तुरिअं गदुअ भअवदीए इमं वुत्तन्तं णिवेदिअ ताए णं संयोजइदुं यतिस्सं ति पुण्डरीअपुरं गदुअ तत्थ सद्धाए सेविज्जन्तीं भअवदिं दिट्ठुण सद्धामुहेण तह संविधाणं कदुअ आअदह्मि । ता राअसमीवं गदुअ एदं णिवेदेमि । (इति परिक्रम्योपसृत्य ।) जेदु जेदु देवो । (क)

**राजा**—(दृष्ट्वा ।) अये, कथमियं स्मृतिः । सखि, दिष्ट्या चिरादागतासि ।

**स्मृतिः**—देव, भअवदिं शिवभत्तिं उद्दिसिअ तुह एआरिसीं बलिअं उक्कण्ठं दिट्ठुण–(ख) (संस्कृतमाश्रित्य ।)

---

(क) अम्मो, भगवत्याः शिवभक्तेर्वियोगेन बलवदुत्कण्ठितो राजा सांप्रतं स्नानभोजनव्यापारमपि नानुमन्यते । तत्त्वरितं गत्वा भगवत्या इदं वृत्तान्तं निवेद्य तयैनं संयोजयितुं यतिष्ये इति पुण्डरीकपुरं गत्वा तत्र श्रद्धया सेव्यमानां भगवतीं दृष्ट्वा श्रद्धामुखेन तथा संविधानं कृत्वा आगतास्मि । तद्राजसमीपं गत्वा इदं निवेदयामि । जयतु जयतु देवः ।

(ख) देव, भगवतीं शिवभक्तिमुद्दिश्य तवैतादृशीं बलवदुत्कण्ठां दृष्ट्वा–

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यातं देव मया जवेन महता तत्पुण्डरीकं पुरं
श्रद्धायै विनिवेदितं च भवदीयौत्कण्ठ्यमेतादृशम् ।
तां त्वद्विस्मृतिकोपितामिव मुहुः संप्रार्थ्य भक्ति तयै-
वागत्यानुजिघृक्ष्यसे न तु यथा श्रद्धा समाधात्तथा ॥ १७ ॥

**राजा**—(सहर्षम् ।) कथमेतावदनुगृहीतः । अहो प्रसादातिशयो मयि भगवत्याः । कथय सखि, किमत्रैवागमनानुग्रहं करिष्यति भगवती ।

**स्मृतिः**—अध इं । (क)

(ततः प्रविशति श्रद्धया सह भक्तिः ।)

**भक्तिः**—सखि श्रद्धे, सहजनिःसङ्गनिर्मलस्वभावोऽपि देवो जीवस्तथा सर्वपुमर्थप्रसवित्रीमपि मां विस्मृत्य बुद्धिपारवश्यमापन्नो विरसविषयाभिमुख एव संवृत्तः ।

**श्रद्धा**—अम्ब, देईए गुणमईए दुरच्चआए माआए कुडिलाए एसो अणादिसिद्धो सहावो जं विवेइणं वि पुरिसं मोहिअ विरसविसअप्पवणं करेइ । तह अ कदिदं अहिजुत्तेहिं । (ख) (संस्कृतमाश्रित्य ।)

जरठापि काचिदसती संदर्भ्य गुणान्परस्य पुरुषस्य ।
सङ्गं विनैव हसितैः सर्वस्वं हरति हन्त किं ब्रूमः ॥ १८ ॥

**भक्तिः**—भवतु । अतस्तस्मिन्मम दृढः प्रेमातिशयः ।

सत्यज्ञाननिधिः सदैव सहजानन्दस्वभावोऽप्ययं
देवो बुद्धिवशं गतः पुरमिदं त्रातुं व्यवस्यत्यहो ।
अस्त्वेतद्व्यपयुक्तमात्मकलने तस्मान्निरस्तामयं
निश्चिन्तं पुनरीशतत्परममुं कुर्यामभीष्टाप्तये ॥ १९ ॥

---

(क) अथ किम् ।

(ख) अम्ब, देव्या गुणमय्या दुरत्ययाया मायायाः कुटिलाया एषोऽनादिसिद्धः स्वभावो यद्विवेकिनमपि पुरुषं मोहयित्वा विरसविषयप्रवणं करोति । तथा च कथितमभियुक्तैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**श्रद्धा**—जुज्जइ एदं णिरुपधिणिरवधिकरुणाए भअवदीए। ता एहि तं जेव्व अणुग्गहीदुम्। (क)

**राजा**—अहो अमृतासारमयः कोऽप्यालापः कर्णविवरमाप्याययति। सखि, किमागतवती भगवती।

**स्मृतिः**—को संदेहो। (ख)

**राजा**—(पुरोऽवलोक्य।) अहो।

निरुपाधिकनिःसीमकरुणामृतवारिधिः।
दिष्ट्या दृष्टा भगवती पुमर्थघटनापटुः॥ २०॥

(उत्थाय सरभसं प्रत्युद्गच्छति। श्रद्धाभक्ती परिक्रम्योपसर्पतः। राजा साष्टाङ्गं प्रणमति।)

**भक्तिः**—सकलाभीष्टभाजनं भूयाः।

**श्रद्धा**—जेदु जेदु देवो। (ग)

**राजा**—(उत्थाय।) देवि निरुपधिकरुणानिधे, अपराधिनमपि मामेवमनुगृहीतवत्यसीति सकलमनोरथानामुपरि वर्तामहे।

अवने हि निरागसां जनानां भजतां जाग्रति दैवतान्तराणि।
अवनाद्विहितागसोऽपि मेऽस्तु प्रथितं ते निरुपाधिवत्सलत्वम्॥ २१॥

उक्तं चात्राभियुक्तैः।

प्रवहन्ती तु दया तव परिहृतनीचोच्चवस्तुवैषम्या।
पततु मयि स्फुटमधुना पङ्कोरुपरीव गगनगङ्गोर्मिः॥ २२॥

**भक्तिः**—देव, भवान्मामनुसृत्य बलवदुत्कण्ठितः प्रकृतकार्यविमुखः संवृत्त इति श्रुत्वा तत्रभवन्तं सान्त्वयितुमागतास्मि। संप्रति विज्ञानमन्त्रिमतानुसारेणैव प्रकृतशत्रुविजयाय व्याप्रियस्व। तदनन्तरम्

निर्जितनिखिलविपक्षं नीरुजमुरुसुस्थमपगतातङ्कम्।
अहमागत्य विधास्ये परमानन्दाब्धिमाप्तकामं त्वाम्॥ २३॥

---

(क) युज्यत एतन्निरुपधिनिरवधिकरुणाया भगवत्याः। तदेहि तमेवानुग्रहीतुम्।

(ख) कः संदेहः।

(ग) जयतु जयतु देवः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(सप्रश्रयम् ।) परमनुगृहीतोऽस्मि । इदं तु प्रार्थये ।

या प्रीतिरविवेकानामिति न्यायात्सदा मम ।
हृदयान्मापसर्प त्वं प्रसीद करुणानिधे ॥ २४ ॥

**भक्तिः**—तथा भवतु । (स्मृतिं प्रति ।) अयि वत्से, एतत्त्वदायत्तम् ।

**स्मृतिः**—भअवदि, अवहिदह्मि । (क)

**भक्तिः**—तथा भवतु । (इति निष्क्रान्ता ।)

**राजा**—(सोत्कण्ठम् ।) कथं गतवती भगवती । (स्मृतिं प्रति ।) सखि, सर्वदा हृदि संनिहिता भव ।

**स्मृतिः**—तह । (ख) (इति निष्क्रान्ता ।)

(प्रविश्य)

**दौवारिकः**—देव, एसो अमच्चो भुत्तवन्तेण विदूसएण अणुगदो आअच्छदि । (ग)

(ततः प्रविशति मन्त्री विदूषकश्च ।)

**मन्त्री**–भोः, साधु भुक्तं भवता ।

**विदूषकः**—देवीए बुद्धीए साहुपडिवेसणं किदं जहमणोरहं उदरं पूरिअम् । (घ) (सहर्षं संस्कृतमाश्रित्य ।)

भूमौ साधु वितत्य गारुडमणिश्यामं कदल्या दलं
शाल्यन्नं घृतपक्वफाणितमथापूपैः सहात्रार्पितम् ।
धन्या एव हि सूपपायसमधुक्षीराज्यदध्यन्वितं
नानाशाकयुतं फलैश्च मधुरैरेवं सदा भुञ्जते ॥ २५ ॥

**मन्त्री**—भुक्तवतोऽप्येवमिहादरश्चेत्किमुत बुभुक्षितस्य । (राजानमुपसृत्य ।) विजयतां देवः । देवानुज्ञया सर्वेऽपि सामन्ता यथार्हं संभाविताः । अयमपि बटुराकण्ठमभीप्सिताभ्यवहार्येण भोजितो देव्या । तद्देवेनापि स्नानपूजनभोजनादिविधिर्निर्वर्त्यताम् ।

---

(क) भगवति, अवहितास्मि ।

(ख) तथा ।

(ग) देव, एषोऽमात्यो भुक्तवता विदूषकेणानुगत आगच्छति ।

(घ) देव्या बुद्ध्या साधुपरिवेषणं कृतं यथामनोरथमुदरं पूरितम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—तर्ह्यत्रैवावस्थीयतां भवता । अहमपि प्रकृतमाह्निकं निर्वर्त्यागच्छामि । (इति दौवारिकेण सह निष्क्रान्तः ।)

(नेपथ्ये ।)

अभ्यक्तः स्नापिताङ्गः शुचिवसनधरो जप्यमन्त्राञ्जपित्वा
देवानभ्यर्च्य भक्त्या घुमघुमितवपुश्चन्दनैश्चन्द्रमिश्रैः ।
रज्यत्ताम्बूलपूर्णाननसरसिरुहो रम्यमारामभागं
साकं देव्यैष राजा प्रविशति सुलभो यत्र दोलाविहारः ॥ २६ ॥

**मन्त्री**—(आकर्ण्य ।) यत्र महाराजस्तिष्ठति तत्रैव गच्छामः । (इति विदूषकेण सह परिक्रामति ।)

(ततः प्रविशति देव्या सह राजा ।)

**राजा**—देवि, पश्य पश्य रामणीयकमारामस्य ।

क्रीडच्चिक्रीडदन्तक्षतविवरगलन्नालिकेराम्बुधारा-
संपूर्णालवालपुष्प्यत्फलकुहुकदलीदाडिमीमातुलुङ्गा ।
संपुष्प्यत्पूगपाली परिमलमिलितोत्फुल्लमालत्युदञ्च-
त्सौरभ्योच्छ्रायलभ्यश्रमशमपथिका सेयमारामसीमा ॥ २७ ॥

**देवी**—मलअपवणचलिदतरुलदापुप्फगन्धा दिसासु विसप्पन्ति । इदो तदो परिब्भमन्तो भमरा कलं कूजन्दि । (क)

**राजा**—युक्तमाह भवती ।

कुरबककलिका विलोकमाने तरुणपिके मृदु गायति द्विरेफे ।
नटति किल मुहुः कृतोपदेशा मलयमहीध्रभवेन मारुतेन ॥ २८ ॥

देवि, सर्वतश्चारय चारुसरोरुहदलसयमुषी चक्षुषी ।

कंदर्पागममन्त्रपाठमुखरे पुंस्कोकिले कानन-
श्रीपाणिग्रहमङ्गले सति मधोर्देवस्य दीप्तौजसः ।
वह्नौ पाटलकान्तिपल्लवमये स्मेरप्रसूनोत्करः
प्राक्षिप्तस्य मतिं न किं वितनुते लाजव्रजस्याधुना ॥ २९ ॥

---

(क) मलयपवनचलिततरुलतापुष्पगन्धा दिशासु विसर्पन्ति । इतस्ततः परिभ्रमन्तो भ्रमराः कलं कूजन्ति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्दारबकुलचम्पककुरबकसहकारमञ्जरीलोलः ।
अलिनिकरः केलिश्लथवनलक्ष्मीकेशपाश इव लसति ॥ ३० ॥

**देवी**—पेक्खदु भवं । (क)

किअमाले टिट्टिभओ रसालरुक्खम्मि कोइलो वसइ ।
णीवविडवे सिहण्डी जम्बूसिहरे सुओ एक्को ॥ ३१ ॥

**विदूषकः**—(उपसृत्य ।) जेदु वअस्सो । देवि, सोत्थि भोदीए । (ख)

**मन्त्री**—देव, विजयी भव । देवि, जयतु भवती ।

**राजा**—अत्र निषीदतु वयस्यः । इहास्यताममात्येन ।

**मन्त्री**—(उपविश्य उद्यानभूमिमभितो विलोक्य ।) आश्चर्यमाश्चर्यम् ।

इहोद्याने तादृक्पशुपतिदयासादितमहा-
महिम्नस्ते सेवारसपरवशाः सर्वत इमे ।
यथास्वं पुष्प्यन्तो युगपदृतवः संनिदधते
प्रसङ्गादत्राहं कतिचन वदाम्यार्तवगुणान् ॥ ३२ ॥

**राजा**—अवहिताः शृणुमस्तावत् । (पुरो विलोक्य ।) मन्त्रिन्, पश्य पश्य ।

स्फुटकुटजमन्दहासा कदम्बमुकुलाभिरामरोमाञ्चा ।
नीलाम्बुदकुचविगलद्घनपुष्पा विहरतीव वनलक्ष्मीः ॥ ३३ ॥

**मन्त्री**—राजन्, तर्हि वर्षा एताः । पित्तसंचयोऽत्र भवति । एवं हि ऋतुचर्यां भिषजो भाषन्ते ।

**राजा**—कथमिव ।

**मन्त्री**—

शंसन्ति भाद्रपदमाश्वयुजं च वर्षा-
स्तास्वौषधिप्रचुरता सुदृशोऽल्पवीर्याः ।

---

(क) पश्यतु भवान् ।

कृतमाले टिट्टिभको रसालवृक्षे कोकिलो वसति ।
नीपविटपे शिखण्डी जम्बूशिखरे शुक एकः ॥

(ख) जयतु वयस्यः । देवि, स्वस्ति भवत्यै ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीर्यं प्रसन्नमसुमत्सु च शीतवाता-
विष्टेषु तत्र शिखिनोदयते विदाहः ॥ ३४ ॥

स एव पित्तसंचयमापादयति।

**राजा**—शरदि कथम्।

**मन्त्री**—

मासौ शरत्कार्तिकमार्गशीर्षौ तत्राभ्रकार्श्ये सति पङ्कशोषः।
विलापितः पित्तचयोऽर्कभासा सपैत्तिकं व्याधिकुलं प्रसूते ॥ ३५ ॥

**राजा**—हेमन्ते कीदृशो रोगः।

**मन्त्री**—श्रूयताम्।

हेमन्तः पौषमाघाविह भवति बलं वीर्यमप्यौषधीनां
स्निग्धाश्चापः प्रसन्ना भृशगरिमभृतो याः पिबन्त्यङ्गभाजः।
मन्दांशुत्वाच्च भानोः सहिममरुदुपस्तम्भिताङ्गेषु देहि-
ष्वेषु स्नेहाद्विदग्धाद्भवति हिमभराच्छ्लेष्मणः संचयश्च ॥ ३६ ॥

**राजा**—कदा पुनरयं श्लैष्मिकान्व्याधीञ्जनयति।

**मन्त्री**—फाल्गुनचैत्रमासरूपे वसन्ते यतोऽर्करश्मिप्रविलापितः श्लेष्मसंचयोऽस्मिन्नृतौ भवति। एवं च

निःसारा रौक्ष्यभाजो दधति च लघुतामोषधीनां समूहाः
सर्वे ते ग्रीष्मसंज्ञां भजति किल ऋतौ ज्येष्ठवैशाखरूपे।
तस्मिन्सूर्यप्रतापग्लपिततनुभृतां लाघवाच्चापि रौक्ष्या-
ज्जन्तूनां पीयमानं जनयति सलिलं संचयं मारुतस्य ॥ ३७ ॥

स संचयः प्रावृषि शीतवातवर्षेरितो वातिकरोगकारी।
क्लिन्नाङ्गभाजां पयसैव नित्यं प्रकोपहेतुस्त्रयसंचयस्य ॥ ३८ ॥

**राजा**—कौ मासौ प्रावृट्।

**मन्त्री**—आषाढश्रावणौ तथा भिषग्भिरुच्यते।

**राजा**—कदा पुनरेषामुपशमः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—सोऽप्येतेषां ज्ञातव्य एव स्वामिना । तद्यथा—

हेमन्ते किल पैत्तिकामयशमो ग्रीष्मे कफोद्यद्रुजः
शान्तिर्वातिकरोगशान्तिरुदयेद्वर्षात्यये केवलम् ।
एवं षड्तुषु स्वभावजतया व्याख्यायि तुभ्यं मया
पित्तश्लेष्मनभस्वतां सह चयेनापि प्रकोपः शमः ॥ ३९ ॥

अपि च ।

रजनीमुखार्धरात्रप्रत्यूषा नक्तमहह पूर्वाह्णः ।
मध्याह्नोऽप्यपराह्णो वर्षाद्याः षट् प्रकीर्तिता ऋतवः ॥ ४० ॥

एष्वपि पित्तश्लेष्मवातानां संचयप्रकोपशमाः प्राग्वदेव ज्ञातव्याः ।

**राजा**—अस्त्वेतत् । दौवारिक, आन्तःपुरिकं जनं प्रवेशय ।

**विदूषकः**—किं उक्कण्ठिदो भवं दोलाविहारस्स । (क)

**राजा**—स्मारितं भवता । तथैव क्रियते । मन्त्रिविन्यस्तसमस्तकार्यभरस्य मम विहारादृते कोऽन्यो व्यापारः ।

**मन्त्री**—देव्या सह दोलामधिरोहतु महाराजः । दौवारिक, पद्ममुखीं चन्द्रमुखीं च चेटीमानय ।

**दौवारिकः**—तथा । (इति निष्क्रम्य चेटीभ्यां सह प्रविशति ।)

(राजा देवी च दोलाधिरोहणं नाटयतः ।)

**मन्त्री**—(चेट्यौ प्रति ।) गायन्त्यौ दोलयतं भवत्यौ ।

**प्रथमा**—

जअइ महुतुन्दिरगुणो सुरहिसरो महुरकम्मुओ वीरो ।
जस्स खु वि जअपताआ सामारुणवामदक्खिणावअवा ॥ ४१ ॥(ख)

**विदूषकः**—(सकोपम् ।) आः दासीए पुत्ति, वालिसा क्खु तुमं । जह अत्थबोधो ण होदि तह पढिदम् । (ग)

---

(क) किमुत्कण्ठितो भवान्दोलाविहाराय ।

(ख) जयति मधुतुन्दिलगुणः सुरभिशरो मधुरकार्मुको वीरः ।
यस्य खल्वपि जयपताका श्यामारुणवामदक्षिणावयवा ॥

(ग) आः दास्याः पुत्रि, बालिशा खलु त्वम् । यथार्थबोधो न भवति तथा पाठितम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—वयस्य, जयति भ्रमरगुणः पुष्पबाण इक्षुचापो मन्मथः यस्यार्धनारीश्वररूपा विजयपताकेति पद्यार्थः ।

**विदूषकः**—(सशिरःकम्पम् ।) जुज्जइ । (क)

**द्वितीया**—

कैरवणिद्दाभङ्गे चओरतिह्णाणिवारणे अ पडु ।
सो को वि जअउ देवो पेक्खन्तणिडालपुरुसमौलिमणी ॥४२॥(ख)

**विदूषकः**—एदस्स पज्जस्स अत्थो वण्णीअदि । (ग)

**राजा**—कथमिव ।

**विदूषकः**—कैरवविआसआरी चकोरतित्तिआरी भअवं तस्स तिणेत्तस्स सिहामणी चन्दो जअइ त्ति । (घ)

**मन्त्री**—सम्यगुक्तः पद्यार्थो भवता ।

**विदूषकः**—(सगर्वम् ।) पुव्वपज्जस्स वि मह अत्थबोधो जादो जेव्व । वअस्सेण अत्थो वण्णीअदि ण वेति तुह्णि ठिदम् । (ङ)

**मन्त्री**—(विहस्य ।) कः संदेहः ।

**विदूषकः**—अमच्च, किं उवहससि मं । एदं सुणादु भवं । घरणीए विअ मह घरणीए अनक्खराए वाआए वि मह अत्थबोधो होइ । (च)

( सर्वे हसन्ति ।)

---

(क) युज्यते ।

(ख) कैरवनिद्राभङ्गे चकोरतृष्णानिवारणे च पटुः ।
स कोऽपि जयति देवः पश्यन्निटालपुरुषमौलिमणिः ॥

(ग) एतस्य पद्यस्यार्थो वर्ण्यते ।

(घ) कैरवविकासकारी चकोरतृप्तिकारी भगवान् तस्य त्रिनेत्रस्य शिखामणिश्चन्द्रो जयतीति ।

(ङ) पूर्वपद्यस्यापि ममार्थबोधो जात एव । वयस्येनार्थो वर्ण्यते न वेति तूष्णीं स्थितम् ।

(च) अमात्य, किमुपहससि माम् । एतच्छृणोतु भवान् । धरण्या इव मम गृहिण्या अनक्षराया वाचाया अपि ममार्थबोधो भवति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नेपथ्ये)

**वैतालिकः—**

गन्धेन स्फुटकैरवाकरभुवा विष्वग्विकर्षन्नली-
न्स्वच्छन्दं दिवसावसानपिशुनो मन्दानिलः स्यन्दते ।
भावी नौ विरहाधिरित्यविदितेऽप्यन्तः शुचा स्थीयते
कोकेन प्रियया सहैकनलिनीनालाधिरूढेन च ॥ ४३ ॥

**द्वितीयः—**

मोक्तुं तापमिव प्रतीचिजलधौ मज्जत्ययं भानुमा-
न्रागः कोऽपि विजृम्भते घनपथे चित्ते वधूनामपि ।
आर्द्रागाः कुपितामुपासिसिषते कान्तां विलासी जनो
भक्त्या कर्मठभूमिदेवपरिषत्संध्यां च सायंतनीम् ॥ ४४ ॥

**मन्त्री**—अहमपि संध्योपासनार्थं गच्छामि ।

**विदूषकः**—अहं पि । (क)

**राजा**—अहमप्यन्तःपुरमेव गच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति चतुर्थोऽङ्कः ।

---

पञ्चमोऽङ्कः ।

(ततः प्रविशति धावन्मत्सरः ।)

**मत्सरः**—(विचिन्त्य ।)

जीवे साधयितुं रसं पशुपतेर्ध्यानस्य सिद्धौ स्थिते
तद्विघ्नाचरणाय षट् प्रणिहिताः कामादयः पाण्डुना ।
ते गत्वापि वयं परैरभिभवं प्राप्ता यथा पूर्वजाः
पञ्चापि व्यगलन्नहं च चकितः षष्ठः पलाय्यागतः ॥ १ ॥

इतःपरं किं करोमि मन्दभाग्यः ।

किं पाण्डोर्निकटं व्रजामि धृतिमानेवं कृते भ्रातृभि-
स्तस्याग्रे कथमस्तकार्यनिकरः संदर्शयिष्ये मुखम् ।

---

(क) अहमपि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजानं यदि वानुवर्तितुमये किं राजतन्त्रेऽमुना
पृष्टे चोत्तरयामि हन्त शरणं कं वा करिष्येऽधुना ॥ २ ॥

तत्सर्वथा नास्ति दैवानुकूल्यम् । (विचिन्त्य ।) भवतु । वनमेव गत्वा तपश्चरणेनात्मानं कृतार्थयामि । यतः ।

अश्रान्तप्रवहत्तुषारतटिनीशीतालुशातोदरी-
संघायासगृहीतशोषितसमित्संवर्धिताग्नित्रयाः ।
प्रालेयाचलकाननोटजगता विप्रास्तृतीयाश्रमे
स्थित्वापुः कति वाञ्छितानि तपसामाश्चर्यया चर्यया ॥ ३ ॥

(पुरो विलोक्य ।)

समन्तादालोके सवितुरुपगच्छत्युपशमं
गुरोर्दिष्ट्या लब्धे महत इव सेवापरिचये ।
तमः सर्वामुर्वी स्थगयति खलानामिव मतिं
तदस्यामत्यर्थं न भवति विवेकः सदसतोः ॥ ४ ॥

तथापि पश्यतो मम द्वावपि पुरुषौ गृह्येते । (कतिचित्पदानि गत्वा निपुणं निरूप्य ।) हन्त, सकिंकरः कुष्ठोऽयमागच्छति । स्वजनेनाप्यनेनाहमिदानीं संभाषणाय जिह्रेमि । तदस्य दर्शनं परिहरणीयम् । मार्गोऽपि न दृश्यते निलीय गन्तुम् । भवत्वत्रैव स्थाणुतामवलम्ब्य तिष्ठामि । गते चैतस्मिंस्त्वरितपदं व्रजेयम् । (इति तथा स्थितः ।)

(ततः प्रविशति किंकरेणानुगम्यमानः कुष्ठः ।)

**कुष्ठः**—(सदृष्टिक्षेपम् ।) किमिदं दृश्यते पश्य ।

**किंकरः**—(सान्द्रे तमसि न्यञ्चितपूर्वकायः पश्यन् ।)

पश्यामि न करचरणं न चात्र पश्यामि चलनमपि किंचित् ।
वैशिष्ट्यमूर्ध्वतायाः पश्यामि स्थाणुरयमतो भवति ॥ ५ ॥

**कुष्ठः**—भद्र, वदन्ति खल्वेवं नीतिशास्त्रविदः ।

आक्रान्ते रिपुभिः पुरेऽन्नसलिलादीनामभावाद्बहि-
स्तान्यानेतुमशब्दकल्पितपदन्यासास्तमस्यागताः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संप्राप्ते सति संनिधिं परिजने द्राग्विभ्रतः स्थाणुतां
लीनत्वं दधतोऽथवाधिसरणि स्वं साधयन्तीप्सितम् ॥ ६ ॥

अतः सम्यङ्निरूपय ।

(किंकरो गत्वा मत्सरं हस्ते गृह्णाति ।)

**मत्सरः**—(स्वगतम् ।) मम खलु माशब्दकीयमवस्था संप्राप्ता । यद्यहं शब्दं कुर्यां ततः स्वरेण मां जानीयुरतोऽविकटं प्रविष्टेन मलिम्लुचेन गृहीत उरभ्र इव तूष्णीमासिष्ये । (इति हस्तं विधुनोति ।)

**किंकरः**—चोर, दृढं गृहीतोऽसि । वृथा ते हस्तधूननम् । (कुष्ठं प्रति ।) आवुक, पुरुषः पुरुषः । गृहीत एष दृढं मया ।

**कुष्ठः**—सफलो मे तर्कः । दृढबद्धमेनमत्रैवानय ।

**किंकरः**—एहि रे चोर, एहि । रक्तकरवीरमालामामुच्य कण्ठे त्वां संभावयामि । अहो तव तपःप्रभावः । गङ्गाचन्द्रादिपरिकरं विना शूली भविष्यसि ।

**मत्सरः**—(स्वगतम् ।)

दग्धो मनोरथो मे बत चिन्तितमन्यदापतितम् ।

(हर्षमभिनीय ।)

मोक्ष्याम्यथवा शोकाद्देहवियोगेन भाविना दैवात् ॥ ७ ॥

(किंकरो बलान्मत्सरमाकृष्य कुष्ठनिकटं गमयति ।)

**कुष्ठः**—भद्र, दीपिकासमीपमानय क एष इति पश्यामि । साधारणश्चेन्मोक्ष्याम एनम् ।

**किंकरः**—आर्य, ज्ञातचर इव दृश्यते । (इति दीपिकासमीपमानयति ।)

**कुष्ठः**—(निरूप्य ।) अहो रूपमिदं मत्सरस्येव लक्ष्यते, वेषस्तु कापालिकस्य । तथाहि ।

भस्मानुलेपधवलीकृतसर्वगात्रः
श्वेतां वहञ्छिरसि नारकपालमालाम् ।
एकेन शूलमितरेण दधत्कपालं
हस्तेन तिष्ठति पुरो मृगचर्मवासाः ॥ ८ ॥

भवतु । एनं संबोधयामि । सखे, कीदृशीयमवस्था ते संप्राप्ता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मत्सरः**—(आत्मगतम्।) हन्त, ज्ञातोऽस्म्यनेन मन्दभाग्यः। ज्ञातस्याधुना ममात्मापलापोऽनुचितः। (प्रकाशम्।) तस्यैवेयं दशा दैवहतकस्य।

**कुष्ठः**—(किंकरं प्रति।) भद्र, सखायं मे मत्सरः। तन्मुञ्चैनम्। (किंकरस्तथा करोति।)

**कुष्ठः**—सखे मत्सर, कथं गृहीता भवता कापालिकतापिशाचिका।

**मत्सरः**—सखे, सत्यमाह भवान् कापालिकतापिशाचीति। या खलु मामाकृष्य मरणसुखाद्दूरवस्थामिमां प्रापितवती।

**कुष्ठः**—

सुखं मरणमप्येवंविधं तव भविष्यति।
संगतिः स्वजनेनापि कथं तद्दुर्दशा परम्॥ ९॥

(मत्सरस्तूष्णीमधोमुखस्तिष्ठति।)

**कुष्ठः**—सखे,

न वदसि किमुत्तरं मे कथय कथयितुं क्षमं यदि तवेदम्।
श्रुत्वा विचारयिष्ये त्रपया चालं भिया चालम्॥ १०॥

**मत्सरः**—सखे, मम किमुपरोधेन। किमन्यद्वनगमनादृते कर्तव्यम्।

**कुष्ठः**—

कापालिकताद्य कुतः कुतस्तरां ते वने गमनम्।

**मत्सरः**—

सख्युपरोधेऽरिकृते सर्वं संभाव्यतेऽभिमानजुषाम्॥ ११॥

**कुष्ठः**—किं शत्रूपजापार्थं प्रवृत्ताः सखायस्ते निरुद्धाः।

**मत्सरः**—अथ किम्।

**कुष्ठः**—कथय कीदृशो वृत्तान्तः।

**मत्सरः**—(स्वगतम्।)

कथयामि किं रहस्यं पर्यालोचितममात्यवर्येण।
उपजापस्य कथं वा जातामाकाशचित्रतामरिषु॥ १२॥
अथवा तपसितुमिच्छन्सख्युः कुष्ठस्य गोपयामि यदि।
तद्द्रोहस्य न किं स्यादास्थानाय स्वहस्तदानमिदम्॥ १३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतः सर्वमस्मै निवेदयामि । यदयमपि तस्य पाण्डोर्विश्वासस्थानमेवेति । (प्रकाशम् ।) सखे, तवाप्यकथनीयं नाम किमस्ति श्रूयताम् ।

विज्ञानप्रहितेन राजहतकेनासन्निसर्गद्विषो
यावत्साधयितुं रसं कथमपि ध्यानस्य सिद्ध्या क्रमात् ।
स्वच्छन्देन च पुण्डरीकनगरीं गत्वा मनोद्वारतः
साम्बस्यैव महेश्वरस्य दृढया भक्त्या प्रसादात्स्थितम् ॥ १४ ॥

तदिदमाकर्ण्य मन्त्रिणा पाण्डुना एतस्य विज्ञाचरणं मनसः पारतन्त्र्यं विना नोपपद्यत इति तदर्थं कामादयः षडेव प्रभवन्तीति त एव वयं प्रेषिताः । अस्माभिश्च तत्र सखिस्नेहवशादङ्गीकृतं मनसः पारतन्त्र्यकरणम् ।

**कुष्ठः**—ततस्ततः ।

**मत्सरः**—ततश्च तेष्वहमेको मन्दभाग्य इमां दुरवस्थामनुभवामि ।

**कुष्ठः**—अथ कामस्य कावस्था ।

**मत्सरः**—सखे, किं कथयामि मन्त्रिहतकस्य दुर्बुद्धिविलसितम् ।

श्रुत्वा पित्तकफात्मपङ्गुयुगलस्पष्टोपजापं तथा
हृद्रोगस्य विमोचनं च सचिवः स्वात्किकराद्विसितः ।

(आकाशे लक्ष्यं बद्ध्वा ।)

पाण्डो साधु भवान्यदेव परमेशाराधने साधनं
चेतःस्थैर्यवदुद्यतस्तदरिणा तद्भेत्तुमित्यब्रवीत् ॥ १५ ॥

इतःपरमपि स बुद्धिमान्पाण्डुर्मम रसौषधसेनासंधानव्यापृततां तां राज्ञ एकाकितां मनसश्चञ्चलतां निरूप्य प्रबलांस्तद्भेदिनः कामादीन्प्रेषयिष्यतीति मत्वा किंकरमुखेनैव स्वनागरिकाय विचाराय नगरपर्यटनमपहाय तत्रैव कामादिभेदने सावधानेन स्थेयमिति विज्ञानमन्त्रिणा समादिष्टम् ।

**कुष्ठः**—ततो विचारेण किं कृतम् ।

**मत्सरः**—तेन च तत्सदृशबुद्धिना कामः कामपि योगकलामुत्पाद्यो-पजापेन ध्यानविषयतामापादितः ।

**कुष्ठः**—हा कामस्यापि परिणतिः । अथ क्रोधस्य को वृत्तान्तः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मत्सरः**—

कमपि प्रदर्श्य दोषं विचारहतकेन सोऽपि च क्रोधः।
अस्मास्वेव प्रत्युत झटिति परावृत्तिमेव नीतोऽभूत्॥ १६॥

**कुष्ठः**—हा क्रोध, त्वमपि सखीनेवाभिद्रोग्धुं प्रवृत्तः। अथ लोभः कथम्।

**मत्सरः**—यादृशः कामः।

**कुष्ठः**—

साधु लोभ सखे साधु सम्यग्व्यवसितं त्वया।
यादृशीं प्रापितोऽवस्थां कामस्त्वमपि तादृशीम्॥ १७॥

अथ दम्भः क्व।

**मत्सरः**—

उपजप्तोऽपि बहुधा तैरस्माकं स केवलम्।
सौहार्दमुपरुन्धानः शस्त्रघातहतोऽजनि॥ १८॥

**कुष्ठः**—धन्योऽसि दम्भ, धन्योऽसि। यतः सख्युरनृणतां गतोऽसि। अथ कथय किमध्यवसितं मदेन।

**मत्सरः**—मदस्तु निगृह्य कारागारे स्थापितः।

**कुष्ठः**—ततः।

**मत्सरः**—निर्गते च पुण्डरीकनगराद्राजनि नर्मकर्मण्येनमुपयोक्ष्यामह इति।

**कुष्ठः**—मत्सर, एवंस्थिते शत्रुमण्डलादेक एव त्वं कथं निर्गतोऽसि।

**मत्सरः**—शृणु तावत्। नहि मम स्वेच्छया ततो निर्गमो जातः। यतो रससिद्ध्यनन्तरं संनद्धे च सैन्ये इममेव मत्सरमत्रत्यवृत्तान्तहारिणं करिष्याम इति निगृह्य स्थापितोऽस्मि।

**कुष्ठः**—तर्हि सखे, तवागमनमिदानीं तत्र रससिद्धिं सेनासंनाहं च सूचयति।

**मत्सरः**—एवमेतत्। समनन्तरमेव

राज्ञः संनिधिमृच्छ भद्र कथय त्वं पाण्डुमाविष्कुरु
स्वामिप्रीतिमुपेहि मन्त्रकलनाकौशल्यमप्यश्लथम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मा ग्लासीरिति मास्तु भीतिरिति मामुक्त्वा चमूनायका-
न्नामग्राहमपि प्रदर्श्य नगरान्निःसारितोऽहं शनैः ॥ १९ ॥

**कुष्ठः**—

प्रज्ञोन्मदः स सचिवस्तदनर्थो भविष्यति ।
गत्वा निवेद्यतां राज्ञे मन्त्रिणेऽहं निवेदये ॥ २० ॥

**मत्सरः**—

तप्स्यमानस्तपः सख्युरविकीर्त्यमिदं तव ।

**कुष्ठः**—

फलिष्यति तपः किं ते न चेत्सख्यमजीगणः ॥ २१ ॥

ग्लानिर्मनसस्तपसे प्रवर्तयति शक्तिमन्तमपि पुरुषम् ।
अग्लानिस्तस्य यदि क्रमाहतस्यापि साधयति कार्यम् ॥ २२ ॥

तस्मादग्लानिरेव क्रियताम् ।

**मत्सरः**—का गतिः । (इति कुष्ठेन किंकरेण च सह निष्क्रान्तः ।)

**शुद्धविष्कम्भकः ।**

(ततः प्रविशति पाण्डुः कुष्ठश्च ।)

**पाण्डुः**—(सामर्षम् ।)

अग्राह्यमल्पमतिभिः सचिवस्य तस्य
वैयात्यमूर्जितमहो किमिति ब्रवीमि ।
यः प्रेषयन्किमपि तादृशवाचिकं द्रा-
गुन्मस्तकं निजमसूचयदूष्मलत्वम् ॥ २३ ॥

जीवसमाधिभङ्गाय प्रेषितेषु कामादिष्वपि तथाभूतेषु भक्तिमूला खल्वेतस्याभिमतसिद्धिरिति तद्विघाताय प्रेषितो व्याक्षेपो नाम गूढचारः । स गतोऽपि तत्सख्या श्रद्धयापहतो व्यर्थयत्नोऽभूत् । किमतः प्रतिविधातव्यम् ।

**कुष्ठः**—मम त्वेवं प्रतिभाति ।

मन्त्रिणामूष्मलत्वं हि पश्यद्भिः प्रतिमन्त्रिभिः ।
शौर्येण प्रतिकर्तव्यं तथा चेदुचितं भवेत् ॥ २४ ॥

**पाण्डुः**—मैवं वादीः । परस्य मन्त्रशक्तिः स्वस्य मन्त्रशक्त्यैव प्रतिह-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्तव्या । यथा खलु शास्त्रविद आचक्षते । यो यादृशेन साधनेन प्रहरति स तादृशसाधनेनैव प्रतिहन्तव्य इति । अतो मन्त्रकृतं संविधानमुपायान्तराभावे शौर्येण प्रतिक्रियतामित्यन्तिममिदमौपयिकम् । अहमिदानीं तदुचितं प्रतीकारमालोचयामि ।

**कुष्ठः**—आलोचयतु भवान् ।

आकर्णयिष्यति यदा वृत्तान्तमिदं स मत्सरमुखेन ।
दीपितरोषो हृदये देवोऽपि समागमिष्यति तदैव ॥ २९ ॥

तस्य पुरस्तादसदायत्तमुपायं सफलीकरिष्यामः ।

**पाण्डुः**—अस्त्वेवम् । भवानवहितस्तिष्ठतु ।

**कुष्ठः**—तथा । (इति निष्क्रान्तः ।)

**पाण्डुः**—कः कोऽत्र भोः ।

(प्रविश्य ।)

**गलगण्डः**—आज्ञापय करणीयम् ।

**पाण्डुः**—भद्र, अपथ्यतां प्रवेशय ।

**गलगण्डः**—(निष्क्रम्य पुनस्तया सह प्रविश्य ।) आर्य, कटकसीमनि देवः प्राप्त इति वल्लभपालो विज्ञापयति ।

**पाण्डुः**—(अपथ्यतां प्रति । अपवार्य ।) अये, त्वं क्वचिन्महति राजकार्ये नियोजयितव्यासि ।

**अपथ्यता**—अवहिदह्मि । (क)

**पाण्डुः**—जीवं प्रविश्य तमपथ्येष्वाहारविहारादिषु नियोजय ।

**अपथ्यता**—तह । (इति निष्क्रान्ता ।)

**पाण्डुः**—(पुरोऽवलोक्य ।) अये, देवः प्राप्तः । गलगण्ड, गच्छाग्रतः ।

(ततः प्रविशति राजयक्ष्मा मत्सरश्च ।)

**पाण्डुः**—(प्रणम्य ।) राजन्, कथमेतत् ।

तन्वन्पुनः पुनरपि भ्रुकुटिं ललाटे
निःसीमनिःश्वसितमुच्चलिताधरोष्ठम् ।

---

(क) अवहितास्मि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवस्य शंसति मुखाम्बुजमन्तरङ्गे
रूढां रुषा रिपुजने सहसैव चिन्ताम् ॥ २६ ॥

**राजा**—पाण्डो, विजने प्रासादे समुपविश्य सर्वं बोधयिष्यामि ।

**पाण्डुः**—गलगण्ड, प्रासादमार्गमादेशय ।

**गलगण्डः**—इत इतो देवः ।

**पाण्डुः**—(विलोक्य ।) राजन्, आरुह्यतामयम् ।

श्रीकण्ठक्षितिधरशृङ्गभङ्गदायी प्रासादः शिखरविराजिहेमकुम्भः ।
सोपानैः स्फटिकमयैः सुखेन गम्यो रम्योऽयं भवति कलस्वनैः कपोतैः॥२७॥

(सर्वे प्रासादारोहणं नाटयित्वोपविशन्ति ।)

**राजा**—पाण्डो, किं न त्वया श्रुतो मत्सरात्परवृत्तान्तः ।

**पाण्डुः**—श्रुतं कुष्ठमुखात्पुरवृत्तं तं विशेषतः श्रोतुमिच्छामि ।

**राजा**—पाण्डो, श्रूयतां मत्सरमुखात्। ततः समुचितं प्रतीकारं विधास्यसि । मत्सर, कथय ।

**मत्सरः**—

संनद्धैः पुररक्षणे परिगतं प्राणादिभिः पञ्चभि-
स्तत्तद्देशगतैश्च यत्ननिचयैस्तद्दुष्प्रवेशं पुरम् ।
रन्ध्रान्वेषितया कथं कथमपि प्राप्ताः स्म देवाज्ञया
यत्रान्तर्मुखतामुपेत्य नियतं जीवस्तपोऽतप्यत ॥ २८ ॥

**राजा**—के ते प्राणादयः कतिविधाः कुत्र गताः किंनामधेयाश्च । कानि च तानि यत्नानि कीदृशानीति सप्रकारमावेदय ।

**मत्सरः**—

हृदयसततावासः प्राणो महाबलविक्रमः
सकलमपि तद्वस्यायत्तं पुरं सपरिच्छदम् ।
कलितनिलयोऽपानो मूलस्थले हितकृद्विभो-
र्वसति च समानाख्यो गुल्फे बली घनशूलभृत् ॥ २९ ॥

किं च ।

कण्ठोपकण्ठे निवसन्नुदानः करोत्यकुण्ठां किल राजभक्तिम् ।
व्यानस्तु सर्वत्रचरः पुरेऽस्मिन्करोति जीवे सकलानुभूतिम् ॥ ३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शल्यानि यानि किल देहभृतां शरीरे
नानाङ्गकेषु महतीं प्रथयन्ति बाधाम् ।
तेषां समुद्धरणकर्मणि साधनानि
यन्त्राणि कानिचन संघटितानि तत्र ॥ ३१ ॥

यानि किल

अर्शोभगंदरमुखस्य रुजां गणस्य
क्षाराग्निशस्त्रपरियोजनमङ्गरक्षाम् ।
बस्त्यादिकर्मघटकादि च कार्यजातं
कुर्वन्त्यपायरहितानि च तत्र तत्र ॥ ३२ ॥

अपि च ।

यद्धर्यक्षसदृक्षरूक्षवदनं तत्सिहवक्राभिधं
यच्चर्क्षस्य मुखाभभीषणमुखं भल्लूकवक्त्रं हि तत् ।
तत्कङ्काननामकं प्रतिभयं यत्कङ्कतुल्याननं
यन्त्रं काकमुखं तदेव यदपि ध्वाङ्क्षातितीक्ष्णाननम् ॥ ३३ ॥
विस्तीर्णानि नवद्वयाङ्गुलपरीणाहानि कण्ठे परं
संनद्धानि च कीलकैः सुघटितैर्मूलेऽङ्कुशाभानि च ।
पर्यन्तेषु पुनर्मसूरसदृशाकाराणि तिष्ठन्त्यहो
तत्र स्वस्तिकनामकानि कतिचिद्यन्त्राणि घोराणि च ॥ ३४ ॥
तान्येव सुदृढान्यस्थिलग्नशल्यापकर्षणम् ।
कुर्वन्ति स्वस्तिकाख्यानि यन्त्राणि हि शरीरिणाम् ॥ ३५ ॥

अपि च ।

एकान्येकमुखान्यपि नाडीयन्त्राणि सूक्ष्मसुषिराणि ।
स्रोतोगतशल्यानां दर्शनचूषणविधौ समर्थानि ॥ ३६ ॥

एवमादिभिर्बहुविधैर्यन्त्रनिवहैरन्यैरपि परिगुप्ततया दुर्गममपि पुरं कथंचन प्रविश्य मनसः पारतन्त्र्यकरणाय वयं यावदितस्ततः संचरितुं प्रवृत्तास्तावदेव विज्ञानविधेयेन विचारनाम्ना नागरिकहतकेन परिज्ञाताः ।

**पाण्डुः**—ततस्ततः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मत्सरः**—ततः कामादिषु तत्र तादृशीं दुरवस्थां प्रपन्नेष्वहमेक एव हतभाग्यतया वैरिवशं गतस्तत्कृतमवमानजातमशरणतया सहमानस्तदीयभटैरितस्ततो विकृष्यमाणस्तदुदितवाचिकमपि निशमयंश्चारवधविमुखैस्तैरेव कृपया विमुक्तः प्रज्वलदवमानाग्निसंतप्यमानः स्वजनमुखावलोकने कृतलज्जतया क्वचन विजनकाननसीमनि कठोरतपश्चर्यया विनिपातिततनुर्भर्तुरानृण्यं भजेयमिति पुरान्निःसरन्नन्तरा सकिंकरेण कुष्ठेन देवपादमूलं प्रापित इत्येतदवसानं प्रवृत्तेः श्रुत्वा देवः प्रमाणम् ।

**राजा**—कुमार, श्रुतं खलु निरवशेषमस्य मुखात् । किमत्र प्रतिविधेयम् ।

**पाण्डुः**—(विचिन्त्य ।) देव, किमन्यत् ।

सन्तु यन्त्राण्यनेकानि सन्तु वा सैनिकाः परे ।
त्वत्कोपाग्नौ पतङ्गत्वं भजेरन्निति मे मतिः ॥ ३७ ॥

**राजा**—पाण्डो, सत्यमेव किं कालविलम्बेन । सर्वथा प्रविश्यान्तःकोशागारम्

शस्त्रेण सर्वमपि खण्डश एव कृत्वा
गृध्रव्रजाय निखिलं बलिमर्पयामि ।
येनौदनो दिविषदां विकलीकृतोऽभू-
त्किं तस्य मे भयममी कितवा विदध्युः ॥ ३८ ॥

अपि च ।

अमृतनिधिरयं यः सोऽपि मत्पीडितः स-
न्न विसृजति मदीयेनाधिनाद्यापि कार्श्यम् ।
निजविकटजटालीकाननस्थापितस्य
प्रभवति स महेशोऽप्यस्य किं पूरणाय ॥ ३९ ॥

हन्त हन्त ।

स ददाति नाम गिरिशो रसमेतेषामुपासनपराणाम् ।
लब्धैनैतेनास्मानेते नाम प्रशमयन्ति ॥ ४० ॥

(विहस्य ।) अहो विचारचातुरी विज्ञानहतकस्य ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(आकाशे ।)

अरे विज्ञानहतक,

आश्रित्य यं सततमुत्पतसि सयेन
निर्वापयामि तमहं सहसैव जीवम् ।
पश्चाद्विनङ्क्ष्यति भवानपि चाश्रयस्य
नाशान्न सिध्यति किमाश्रयिणोऽपि नाशः ॥ ४१ ॥

**राजा**—कः कोऽत्र भोः, शस्त्रम् । (इत्युत्थातुमिच्छति ।)

**पाण्डुः**—ननु संनिहितमेव शस्त्रम् । तथापि किंचिद्विज्ञापयामि । अस्त्येवायमन्तिमः प्रकारः । अपि तु

त्रिषूपायेषु सत्स्वन्त्यो न युक्त इति तान्त्रिकाः ।
उपायमिममेवातो मनो मे प्रयुयुक्षते ॥ ४२ ॥

**राजा**—कोऽयमुपायः ।

**पाण्डुः**—(कर्णे ।) एवमेवम् ।

**राजा**—भवतु तथा । अस्त्येवैतदनन्तरकर्तव्यम् ।

**पाण्डुः**—देव, मार्गश्रम इव दृश्यते सिद्धं च सर्वं शयनादि ।

**राजा**—त्वमपि स्वकार्येऽवहितस्तिष्ठ । अहमपि भुक्त्वा निद्रास्थानं गच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ।

---

षष्ठोऽङ्कः ।

(ततः प्रविशति कर्मणा सह कालः ।)

**कालः**—वत्स कर्मन्, जीवस्य राज्ञः पुरबाधनार्थं यक्ष्मराजमन्त्रिणा पाण्डुना प्रयुक्तान्रोगरूपान्भटान्प्रतियुधा जेतुं विज्ञानमन्त्रिणा नियुक्तं सरसतत्प्रतिभटजातं किं करोतीति जिज्ञासते मे हृदयम् ।

**कर्म**—भगवन्, सर्वानुस्यूतस्य तव किं नामाविदितमस्ति ।

**कालः**—भवानपि तादृश एव । महान्खलु तव प्रभावः । तथाहि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वामज्ञातमनुग्रहाय जगतां देवी विधत्ते श्रुति-
लोकः साधयतीप्सितं भवदनुष्ठानादिहामुत्र च ।
किं चायं समनुष्ठितेन भवता चित्तस्य शुद्धिं गत-
स्तत्त्वं वेदितुमात्मनः प्रभवति त्रय्यन्तसंदर्शितम् ॥ १ ॥

अपि च ।

त्वं नित्यनैमित्तिककाम्यभेदात्स्थित्वा त्रिधानेकफलानि दत्से ।
इन्द्रत्वमिन्द्रस्य विधेर्विधित्वं हरेर्हरित्वं च फलं त्वदीयम् ॥ २ ॥

**कर्म**—आर्य, अवाङ्मनसगोचरस्तव महिमा ।

सुमतिभिरनुमेयस्त्वं सहस्रांशुगत्या
(सविनयम् ।) भवति भवदधीनं मद्विधानं जनानाम् ।

भगवन्, किमन्यद्ब्रवीमि ।

परिणमयसि पुंसां दातुमर्थात्मना मां
त्वयि कृतिमति पोढा विक्रियन्ते च भावाः ॥ ३ ॥

किं च ।

त्रैधं जनः शंसति वर्तमानं भूतं भविष्यन्तमहं पुनस्त्वाम् ।
ऐकध्यमापन्नमखण्डरूपमाधारमेषो जगतामवैमि ॥ ४ ॥

निमेषकाष्ठे च कलाक्षणौ च मुहूर्तरात्रिंदिवपक्षमासान् ।
भवत्तनूभृत्त्वयने तथाब्दं युगं च मन्वन्तरमप्यवैमि ॥ ५ ॥

**कालः**—तदिदानीं पाण्डुविज्ञानमन्त्रिभ्यां युद्धाय नियुक्तानां भटानां विक्रमविलासानवलोक्य चक्षुषी कृतार्थयिष्यावः । पाण्डुना खलु जीवराजे प्रयुक्तो भविष्यतो रोगस्य पुरो भावी बुभुक्षाजनको भस्मकरोगस्तद्गृहीतो राजेति जानामि ।

आवां यथा न विदुः सर्वेऽपि दिविस्थितावुच्चैः ।
उभयेषामपि युद्धं पश्यावः संलपावश्च ॥ ६ ॥

किं च, ज्ञानशर्मणोपजापितोऽपि राजा भूयो विज्ञानशर्मणा प्रत्यावृत्य पर्यवस्थापितः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कर्म**—भगवन्, कीदृशो ज्ञानशर्मणोपजापः ।

**कालः**—वत्स, श्रूयताम् ।

तत्तत्कार्यविशेषसाधनविधावुक्त्वेतिकर्तव्यतां
जीवस्यास्य विभोः स्वकीयपृतनासंनाहमालोकितुम् ।
निष्क्रान्ते सचिवे कदाचन भजत्येकाकितां राजनि
श्रुत्वा तत्समयं तदन्तिकभुवं स ज्ञानशर्मा ययौ ॥ ७ ॥

अनन्तरमायान्तमवलोक्य दूरादेव

अथ सुचिरवियोगात्संदिहानः सखित्वे
किमपि विवशचेता निर्भरैर्हर्षभारैः ।
कथमपि समुदश्रुर्बाष्पसंरुद्धकण्ठो
वचनमिदमवोचन्मत्तहंसस्वरेण ॥ ८ ॥

चेतः शीतलतामुपैति नयने विस्तारिणी कौतुका-
न्निर्मर्यादमुपैत्यमानिव तनौ कोऽप्यन्तरानन्दथुः ।
बाहू मां परिरम्भणे त्वरयतस्त्वां वीक्ष्य कस्त्वं सखे
पुण्यैः पूर्वकृतैश्चिरान्मम दृशोः पन्थानमारोहसि ॥ ९ ॥

**कर्म**—ततस्ततः ।

**कालः**—ततोऽसौ जीवस्य वचनमिदमाकर्ण्य ज्ञानशर्माकथयत् ।

सोऽहं जीव विभो चिरन्तनसखस्ते ज्ञानशर्मा तथा
प्राणेष्वन्यतमो मुहुस्तव हिताकाङ्क्षी च सर्वात्मना ।
विज्ञानस्य कुमन्त्रितैः परवति त्वय्यव्यवस्थस्थितौ
शान्तस्त्वन्नगराद्विरक्तहृदयः प्रास्थामनास्थावशात् ॥ १० ॥

संप्रति हि ।

दुःसामाजिकबोधनैः कुपदवीसंचारमासेदुष-
स्तेनापज्जलधौ निराश्रयतया राज्ञो वृथा मज्जतः ।
ब्रूते यो न हितं वचोऽप्रियमपि स्वेष्टं निगृह्याग्रहा-
त्स्वामिभ्यः स तु बुद्धिमत्पशुरिति प्राप्नोति मन्त्री प्रथाम् ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतः किल

विज्ञानशर्महतकस्य वृथा कुमन्त्रै-
घोरामिमां सुमहतीं गतमापदं त्वाम् ।
आकर्ण्य देव हितवागुपदेशहेतो-
रघ्यान्तिकं तव गतोऽस्म्यनृणो बुभूषुः ॥ १२ ॥

**कर्म**—ततस्ततः ।

**कालः**—ततश्च राजा सरलप्रकृतितया 'सखे ज्ञानशर्मन्, चिरेण दृष्टोऽसि । त्वत्तोऽपि मे श्रेयःसंपादकः कोऽन्योऽस्ति । तत्कथय प्रस्तुतोचितं हितम्' इति तमन्वयुङ्क्त ।

**कर्म**—ततस्ततः ।

**कालः**—ततो ज्ञानशर्मा राजानमुपह्वरे स्वैरमित्थं बोधयामास ।

शश्वन्नश्वरमेव विश्वविदितं पापप्ररोहस्थलं
मेदोमज्जवसास्थिमांसरुधिरत्वग्रोमकूपं वपुः ।
एतस्मिन्मलमूत्रभाण्डकुहरे हेये मनीषावतां
दुःखे न्यायविदो विमोहमिह के तन्वन्ति नन्वन्तिमे ॥ १३ ॥
जगत्प्रोतं यस्मिन्विविध इव सूत्रे मणिगणः
समस्तं यद्भासा तदपि च विभाति स्फुटमिदम् ।
अखण्डानन्दं यन्निरवधिकसच्चित्सुखमयं
निराकारं यत्तत्त्वमसि परमं ब्रह्म न पुमान् ॥ १४ ॥
तत्तादृशः सुखघनस्य निरञ्जनस्य
सर्वात्मनापि ननु हेयतरे पुरेऽस्मिन् ।
विज्ञानशर्मवचनैर्विपरीतवृत्ते-
र्मन्ये न युक्त इव ते ममताभिमानः ॥ १५ ॥
इत्यादिभिर्बहुविधैरुपपत्तिपूर्वै-
रेतैर्वचोभिरथ तेन रहः प्रयुक्तैः ।
कोषे बले रिपुवधे च बभूव सद्यो
जीवो विरक्तहृदयो विगताभिमानः ॥ १६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कर्म**—भगवन्, इत्थं ज्ञानशर्मणोपजप्तस्यापि जीवस्य राज्ञः कथमधुना रिपुवधे प्रवृत्तिः ।

**कालः**—श्रूयताम् । इत्थं ज्ञानशर्मा राज्ञो रहस्युपजापं कुर्वन्सेनासंनिवेशादागतस्य विज्ञानशर्मणो वचनमाकर्ण्य न नः परमिह स्थातव्यमिति राजानमामन्त्र्य जगाम ।

**कर्म**—ततस्ततः ।

**कालः**—ततश्च निष्क्रान्ते ज्ञानशर्मणि प्रविश्य विज्ञानशर्मा राजानमालोक्य अये, किमयमपूर्व इव राजा पुरादिषु परित्यक्ताभिमान इव दृश्यते । तद्बहुधा ज्ञानशर्मणोपजापितः स्यात् । भवतु । सर्वमिदं स्वयमेव व्यक्तीभविष्यति । (इति राजसमीपं गतः ।)

**कर्म**—ततस्ततः ।

**कालः**—राजा च तमालोक्य सावहित्थस्तमनुसरन्निव सादरमपृच्छत् । 'मन्त्रिन्, कथय कीदृशः पुरवृत्तान्तः परवृत्तान्तश्च' इति ।

**कर्म**—ततस्ततः ।

**कालः**—

इति राज्ञा समाज्ञप्तो नयज्ञो मन्त्रिशेखरः ।
प्रत्युत्तरं तदादत्त प्रज्ञावज्ञातवाक्पतिः ॥ १७ ॥

स्वायत्तं पुरमेव नः समजनि स्वामिन्भवच्छासना-
त्तत्तद्देशनिविष्टपत्रनिचयव्यापारसंरक्षितम् ।
निर्दग्धा भवतः प्रतापमहसा नूनं पतङ्गा इव
प्रत्यर्थिप्रकरा भवेयुरधुना नामावशेषाः क्षणात् ॥ १८ ॥

**कर्म**—ततस्ततः ।

**कालः**—इत्याकर्ण्य राजा ज्ञानशर्मवचोऽनुसरन्नुभयोर्मतयोरपि दोलायमानमानस इतिकर्तव्यतामव्यवस्यन्नित्थमाक्षेपमुखेन व्याजहार ।

निसर्गतो ये रिपवो हि रोगा वातादिभिस्तज्जनकैः समन्तात् ।
अधिष्ठितेऽस्मिन्कुटिलैः प्रवृत्त्या स्वायत्तता हन्त कथं पुरे नः ॥ १९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं च ।

संरक्ष्यते निजवशंवदसेवकेन
य: पाण्डुना विमतखण्डनपण्डितेन ।
सोऽयं प्रतापपरिदग्धपुरो विसर्प-
ज्ञेयः कथं कथय संप्रति राजयक्ष्मा ॥ २० ॥

**कर्म**—ततस्ततः ।

**कालः**—इति राज्ञो वचनमाकर्ण्य समञ्जसयुक्तिकं वचोऽब्रवीत् । राजन्, श्रूयताम् ।

वातादिजा यद्यपि सर्वरोगास्तथापि तानेव विनाशयन्ति ।
यथारणेर्वह्निरुदर्चिरुद्यन्दहत्ययत्नादरणिं तमेव ॥ २१ ॥
अपन्थानं त्विति न्यायादात्मद्रोहिषु तेष्वमी ।
आत्मजेष्वपि न स्नेहमातन्वन्त्यधुना प्रभो ॥ २२ ॥

अतस्तदधिष्ठितमपि पुरं स्वाधीनमेवेति निश्चिनु । किं च ।

स्वायत्ते नगरे तस्मिन्स्वामिपादप्रसादतः ।
जयश्रियं हस्तगतां जानातु भगवान्क्षणात् ॥ २३ ॥

**कर्म**—ततस्ततः ।

**कालः**—इत्थं मन्त्रिवरवचननिशमनेन किंचिदिव निर्वृतचेतसा राज्ञा मन्त्रिन्, 'इयतापि कालेन पुरस्य स्वायत्तत्वे किमनेन फलं पश्यसि' इति पृष्टो मन्त्री कथयामास—

पुरस्य दार्ढ्ये योगस्य सिद्धिः सर्वार्थसाधिनी ।
अखण्डानन्दसिद्धिश्च फलं तेनैव जायते ॥ २४ ॥

**कर्म**—ततस्ततः ।

**कालः**—इत्याकर्ण्य क्षुद्राभिमानेन न भवतीष्टसिद्धिः । प्रत्युत हानिरेव फलम् । अतः स्वयमेव त्यक्तेष्वेतेषु सिद्धैवात्मनो दृढयोगसिद्धिरखण्डानन्दता च । कुत एतावान्यत्न इति वदति राजनि पुनरपीत्थं समाहितवान्मन्त्री—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रारब्धरहितस्यैवं भवेदेव न संशयः ।
प्रारब्धपरतन्त्रं त्वां ते मुञ्चन्ति कथं पुनः ॥ २५ ॥

किं च ।

श्लथाभिमाने पुरि हन्त देवे क्षोभो भवेत्त्वत्प्रकृतिष्वकस्मात् ।
ततोऽवकाशं प्रतिलक्ष्य सर्वे प्रत्यर्थिनस्ते प्रबला भवेयुः ॥ २६ ॥

किं च ।

यक्ष्मणि जाग्रति तस्मिन्पाण्डुज्वरसंनिपातपरिवारे ।
देवस्य कथं भविता स्थितिरिह यत्नादपि स्वरूपेण ॥ २७ ॥

इममर्थमप्रतिहतया प्रतिभया स्वयमेव विचारयतु देवः ।

**कर्म**—ततस्ततः ।

**कालः**—तत इत्यात्मनीनानि वचनान्याकर्णयन्कुतूहलाकुलितहृदयः समरयत्नकृतत्वरः मुहुर्मुहुस्तमित्थं प्रशंसन्नवोचत्—

त्वयि दत्तभरस्य मेऽधुना किं बहुनानेन विचारणश्रमेण ।
भवते ननु रोचते यथा वा यतितव्यं हि तथैव निर्विशङ्कम् ॥ २८ ॥

**कर्म**—ततस्ततः ।

**कालः**—ततश्च किल यदेवं देवस्य मनसो व्याकुलीभावः स सर्वोऽपि शत्रूपजाप इति मन्तव्यम् । अतो विज्ञापयामि । तिष्ठतु दार्ढ्यं मद्वचसि इति राजानं पर्यवस्थाप्य स्वकार्य एव व्याप्रियते ।

**कर्म**—भगवन्, ज्ञानविज्ञानयोरेकरूपयोरिव सतोः कुत इयान्विरोधः ।

**कालः**—वत्स,

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।
तयोर्विरोध इत्येतत्किमाश्चर्यकरं तव ॥ २९ ॥

**कर्म**—भवतु नाम तयोर्विरोधः । तदेवान्तरमुपलभ्य क्रियतां च द्विषद्भिरुपजापः । ज्ञानशर्मणा तु स्वामिहितैषिणा विपक्षानुकूलं पुराभिमानशैथिल्यं कथमुपदिष्टम् ।

**कालः**—नहि विपक्षानुकूलमिति न च तदीयोपजाप इति वा प्रवृत्तिरेतस्य । किं तु वस्तु तत्त्वमुपदेष्टव्यमित्येव तस्य स्वभावः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञानमद्वैतसन्मात्रं विपक्षस्तत्र को वद ।
स्वरूपस्थितिरेतस्य सारिता पारमार्थिकी ॥ ३० ॥

मूढवद्देहतादात्म्यं राजा न प्रतिपद्यताम् ।
बाधितं तद्दग्धपटन्यायेनास्त्विति तस्य धीः ॥ ३१ ॥

तदुक्तमभियुक्तैः—

'बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते ।
जीवन्नाखुर्न मार्जारं हन्ति हन्यात्कथं मृतः ॥ ३२ ॥

किं च ।

मायया बहुरूपत्वे सत्यद्वैतं न नश्यति ।
मायिकानां हि रूपाणां द्वितीयत्वमसंभवि ॥ ३३ ॥

**कर्म**—भगवन्, युज्यत एतत् ।

**कालः**—एवं च ज्ञानशर्मणोपजप्तोऽपि विज्ञानशर्ममन्त्रिमन्त्रवशात्प्रोत्साहितो राजा यदाचरिष्यति तदालोकयिष्यावहे । (भुवमवलोक्य ।) कथं विदूषकेण सहायमागच्छति राजा तत्रैव गच्छावः ।

(इति परिक्रामतः ।)

(ततः प्रविशति राजा विदूषकश्च ।)

**राजा**—

संख्यापेततया रसानपि भृशं षट्सेवमानस्य मे
तेष्वेवातिबुभुक्षुता प्रतिमुहुर्हाहा सखे जायते ।
एवं व्यापृतिरैच्छिकी मम यतो भुञ्जेऽन्नराशीनहं
पीयन्ते च रसालमाक्षिकदधिक्षीराज्यकुल्या मया ॥ ३४ ॥

अन्नान्येव निरन्तरं विवृणुतां सर्वाणि सस्यानि भू-
र्वारि प्रावृषि कोऽपि वर्षतु दधिक्षीरात्मकं वारिदः ।
सर्वोऽयं लवणाम्बुराशिरपि चेद्दुग्धाम्बुधिर्जायतां
भुञ्जानस्य तथापि हन्त पिबतो न क्षुत्पिपासाशमः ॥ ३५ ॥

तदतिशयेन संपादनीयो मम पानभोजनविधिरिदानीम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—(सहर्षम् ।) अज्ज एव्व एदं करणिज्जं । जेण अहं वि एदस्सि कज्जे तुअ सहाअत्तणे दक्खो होमि । जम्मेण तु विण्णाणेण भवं मिदभोअणे सव्वदा सिक्खीअदि तेण विण्णत्तो वि तुमं तस्स वअणं मा करेहि । (क)

**राजा**—साधु सखे, साधु । सम्यगुपदिष्टम् । तथा करिष्ये ।

**कालः**—वत्स, श्रुतं भवता ।

**कर्म**—श्रुतमेव । एष पाण्डुना प्रहितामपथ्यताजननीं स्वस्य बहु बुभुक्षां न जानाति विदूषकोऽप्यजानन्नेवं भाषते ।

**राजा**—कः कोऽत्र भोः ।

**विदूषकः**—सिक्खिदो वि मए किं तुमं पडिऊलकारिणो अमच्चस्स आआरणत्थं दोआरिअं आमन्तेसि । (ख)

**राजा**—वयस्य, मा बिभिहि । तव मतमेवानुसरामि ।

**विदूषकः**—जइ एव्वं थिरपडिण्णो होहि । एदस्स अविह्मरणत्थं वसणन्ते मए बद्धो गण्ठी । अहं जेव्व तं आणेमि । (ग) (इति निष्क्रम्यामात्येन सह प्रविशति ।)

**अमात्यः**—सति दौवारिके राज्ञा किमर्थं त्वं प्रहितः ।

**विदूषकः**—एत्थ कज्जे अहं जेव्व दोवारिओ । (घ)

**अमात्यः**—कीदृशे कार्ये ।

---

(क) अद्यैवैतत्करणीयम् । येनाहमप्येतस्मिन्कार्ये तव सहायत्वे दक्षो भवामि । जाल्मेन तु विज्ञानेन भवान्मितभोजने सर्वदा शिक्ष्यते तेन विज्ञप्तोऽपि त्वं तस्य वचनं मा कुरु ।

(ख) शिक्षितोऽपि मया किं त्वं प्रतिकूलकारिणोऽमात्यस्याकारणार्थं दौवारिकमामन्त्रयसि ।

(ग) यद्येवं स्थिरप्रतिज्ञो भव । एतस्याविस्मरणार्थं वसनान्ते मया बद्धो ग्रन्थिः । अहमेव तमानयामि ।

(घ) अत्र कार्येऽहमेव दौवारिकः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कालः**—कर्मन्, मन्त्रिणापि न विज्ञाता औपाधिकी राज्ञो बुभुक्षा ।

**कर्म**—बाढम् ।

**विदूषकः**—अमच्च, रण्णो दाणिं बहुभक्खणणामहेए उवट्ठिदे कज्जे । (क)

**मन्त्री**—कीदृशी बहुभक्षणता ।

**विदूषकः**—किमण्णं । बुभुक्खिदो वग्घो विअ सव्वपकिदीणं अह्माणं जीवणं भक्खिदुकामो राआ मा खु णं णिवारेहि जं पलअकालकुविदो रुद्दो विअ चिट्ठदि । (ख)

**मन्त्री**—(विहस्य । स्वगतम् ।) राज्ञः पानभोजनसंपादने स्वस्यापि तद्भविष्यतीत्येतस्य हृदयम् । (प्रकाशम् ।) गच्छाग्रतः । अहमप्यागमिष्यामि । (आकाशे दत्तदृष्टिः ।) किं न्वेतत्स्यात् ।

कार्यान्ववेक्षणविधौ सदसि स्थितेन
येन क्षमाजनि चिरं सहितुं बुभुक्षा ।
भुक्त्वा च यस्य कियदप्यशनं नितान्तं
तृप्तिर्भवेत्स कथमीदृशबुद्धिमेति ॥ ३६ ॥

**कालः**—अहं खलु प्राणिनामव्यवस्थितामवस्थां करोमि ।

**कर्मः**—बाढम् । अलमिदम् । अन्यदप्यचिन्तनीयं बुद्धिविलसितमिति जानामि । यत्किल

दृष्ट्वा दक्षकृतापराधजनितक्रोधोज्झिताङ्गीं सतीं
यः शान्तस्तपसि स्थितः स गिरिशः स्वं प्रत्युपात्तायुधम् ।
कोपोद्घाटितनैटिलेक्षणपुटप्रोद्दामधूमज्वल-
ज्ज्वालाजालविजृम्भणेन सहसा भस्मीचकार स्मरम् ॥ ३७ ॥

**कालः**—(विहस्य ।) शृणु तावत् ।

---

(क) अमात्य, राज्ञ इदानीं बहुभक्षणनामधेये उपस्थिते कार्ये ।

(ख) किमन्यत् । बुभुक्षितो व्याघ्र इव सर्वप्रकृतीनामस्माकं जीवनं भक्षितुकामो राजा मा खल्वेनं निवारय यत्प्रलयकालकुपितो रुद्र इव तिष्ठति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मारुतं यः पिबन्नेव महर्षिस्तपसि स्थितः ।
तमहं कुम्भजन्मानं तोयराशिमपाययम् ॥ ३८ ॥

**मन्त्री**—अतिबुभुक्षया राज्ञः किमप्याशङ्कते मे हृदयम् । यथाहुर्नीतिज्ञाः—'अतिबुभुक्षा राज्ञो राज्यच्युतिसूचिका' इति । (राजानं निरूप्य ।)

शुष्यन्त्या घृतशोषणे रसनया शश्वल्लिहन्सृक्किणी
किंचिन्मग्नविलोचनः श्रमजलक्लिद्यत्कपोलालिकः ।
आरूढभ्रुकुटीभयंकरमुखो निःश्वासदूनाधरो
दृष्ट्या कूणितया विलोकयति मामायान्तमेवान्तिके ॥ ३९ ॥

(उपसृत्य ।) जयतु जयतु देवः ।

**राजा**—उपविश्यताम् । (इत्यासनं निर्दिशति ।)

**विदूषकः**—वअस्स, मए गहिदत्थो किदो अमच्चो । (क)

**राजा**—अमात्य, सज्जीक्रियतामनेनोक्तं सर्वमपि ।

**मन्त्री**—

किमियमपूर्वा बुद्धिर्देवस्य विजृम्भते ससंरम्भम् ।
ननु कुर्वे यदिदानीमनेन दुर्मेधसा कथितम् ॥ ४० ॥

**विदूषकः**—दाणिं वअस्स, तुमं जेव्व मह सरणं, जं कुविदो अमच्चो ।(ख)

**राजा**—अलं चापलेन ।

**मन्त्री**—तिष्ठ तूष्णीम् । जानामि ते दौष्ट्यम् ।

(विदूषको लज्जितस्तिष्ठति ।)

**मन्त्री**—(स्वगतं विचिन्त्य ।)

स्यादेतत्किं नात्र पश्यामि हेतुं राज्ञो न क्षुद्राज्यविभ्रंशचिह्नम् ।
अस्य श्रेयः सिद्धये बद्धकक्षः किं नाहं स्यां किं न मे स्वामिभक्तिः॥४१॥

परं त्वेवं निश्चिनोमि द्विषद्राजमन्त्रिणा पाण्डुना कृतमिदं वैकृतमिति ।

---

(क) वयस्य, मया गृहीतार्थः कृतोऽमात्यः ।

(ख) इदानीं वयस्य, त्वमेव मम शरणम् । यत्कुपितोऽमात्यः ।

For Private and Personal Use Only

भवतु । अस्य चित्तं बहुभक्षणायत्तमन्यत्र व्याक्षिपामि । स एवास्य प्रतीकारः । (प्रकाशम् ।) प्रासादस्योपरि चलतु देवः । तत्रैव संपाद्यते महती तृप्तिः ।

**राजा**—बाढम् ।

(सर्वे प्रासादाधिरोहणं नाटयन्ति ।)

**विदूषकः**—(सर्वतो विलोक्य ।) भो वअस्स, किं एदं भासिणीपाआरे अपुव्वं किं वि दीसइ । (क)

**राजा**—अमात्य, किमिदम् ।

**कर्म**—भगवन्काल, सन्ति खलु शरीरे भासिनीप्रभृतयः सप्तत्वचः तत्र त्वग्रूपप्रथमप्राकारे सिध्मकपज्झककण्टका नाम त्रयो रोगाः पाण्डुना प्रहिता दृश्यन्ते । तान्विदूषको राजा च न वेत्ति, अतः पृच्छति ।

**कालः**—सत्यमेवेदम् ।

**मन्त्री**—राजन्, सिध्मकपज्झककण्टकाः ।

**विदूषकः**—(सभयम् ।) वअस्स, एदाणं एदे भटा पहारं कुणन्ति तदो ते वि अह्माणं उवरि पडिस्सन्ति । ता असदो सिग्घं पलाअणं करेह्म । (ख)

**मन्त्री**—विदूषक, मा भैषीः ।

गुञ्जाफलाग्निलेपः प्रतियोद्धा सिध्मपज्झयोः समरे ।
एष हरिद्राक्षारः कण्टकहृतये मया प्रहितः ॥ ४२ ॥

**राजा**—सुष्ठु कृतममात्येन ।

**कालः**—गुञ्जाफलाग्निलेपहरिद्राक्षारानौषधिविशेषान्प्रहरतो दृष्ट्वा विदूषको ब्रवीति ।

**कर्म**—एवमेतत् ।

**विदूषकः**—अज्ज, को एसो । (ग)

(क) भो वयस्य, किमेतद्भासिनीप्राकारेऽपूर्वं किमपि दृश्यते ।

(ख) वयस्य, एतेषामेते भटाः प्रहारं कुर्वन्ति तदा तेऽप्यस्माकमुपरि पतिष्यन्ति । तदस्माच्छीघ्रं पलायनं कुर्मः ।

(ग) आर्य, क एषः ।

११

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—व्यङ्गनामा रोगः ।

अभिमुखमवेक्षमाणः शशरुधिरालिप्ततनुरिमं हन्तुम् ।
तिष्ठति मुखमावृण्वन्मञ्जिष्ठाप्रमुखसाधनो लेपः ॥ ४३ ॥

**विदूषकः**—किं एदं मल्लाणं आजोहणं विअ जं रत्तप्पवाहो दीसइ । (क)

**मन्त्री**—

वैधेय शस्त्रधाराक्षुण्णं प्रवहति पुरो न रक्तं यत् ।
तत्र मूढतां धिगेष प्राकारो लोहिनी नाम ॥ ४४ ॥

**कालः**—त्वग्नृप एष द्वितीयः ।

**कर्म**—तथैव ।

**विदूषकः**—अहो पमादो । सुवेदाए उपरि सव्वत्थ गअकण्णा वित्थिण्णा । (ख)

**कालः**—कर्मन्, श्वेतनाम्नि तृतीयत्वक्प्राकारे चर्मदलं नाम रोगं पृच्छति विदूषकः ।

**राजा**—क एते संवर्तन्ते श्वेतायाम् ।

**मन्त्री**—

देव योधेन तत्रापि नियुक्तेन मया पुरा ।
आम्रपेश्यभिधानेन लेपेनाक्रम्य भूयते ॥ ४५ ॥

**विदूषकः**—वअस्स, पेक्ख एत्थ का वि दुद्धतरङ्गिणी विअ वहइ । ता अञ्जलीहिं गेह्णिअ पिब । (ग)

**मन्त्री**—धिगौदर्य, सर्वत्राभ्यवहारभ्रान्तिः । भ्रान्त,

नेयं दुग्धतरङ्गिणी प्रवहति श्वित्रोऽयमिन्दुप्रभः
प्राकारं किल तुर्यतामुपगतं ताम्राख्यमाक्रामति ।

(क) किमेतन्मल्लानामायोधनमिव यद्रक्तप्रवाहो दृश्यते ।

(ख) अहो प्रमादः । श्वेताया उपरि सर्वत्र गजकर्णा विस्तीर्णाः ।

(ग) वयस्य, पश्यात्र कापि दुग्धतरङ्गिणीव वहति । तदञ्जलिभिर्गृहीत्वा पिब ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संरम्भो भवतो वृथा स्मरयसि त्वं किं तृषं विस्तृतां
पातुं शक्यत एष किं तव ततो मौढ्यं त्वयाविष्कृतम् ॥४६॥

(इति सभ्रूक्षेपं तर्जयते ।)

**राजा**—क एनमभिसरति ।

**मन्त्री**—एष मया नियुक्तो महातालेश्वरः ।

**कालः**—कर्मन्, औषधविशेषोऽयम् ।

**विदूषकः**—अध वेदिणीलोहिदाणं उवरि के वि उल्लुठअन्तो विअ दीसन्ति । (क)

**मन्त्री**—सर्वेऽपि कुष्ठा गलगण्डादयश्च नृत्यन्ति ।

**कर्म**—भगवन्, वेदिनीलोहिते पञ्चमीषष्ठ्यौ त्वचौ । तत्र कुष्ठादेरुत्पत्तिः ।

**कालः**—अस्त्येतत् ।

**विदूषकः**—एत्थ उण थूलाणाम्मि सत्तमे पाआरे को वि लोहआरभत्थिआ विअ पूरिज्जमाणसरीरो दीसइ । (ख)

**मन्त्री**—स्थूलायां विद्रधिरेष शत्रुमल्लः ।

**विदूषकः**—(सभयम् । संस्कृतमाश्रित्य ।)

प्राकारसप्तकमपि प्रसभं गृहीत्वा
स्वेद्यानि सप्त च विशोष्य तथैव कोषान् ।
उल्लुण्ठयिष्यति रिपोर्निवहो भटानां
म्लायंस्त्वमन्ध इव मूढ इव स्थितोऽसि ॥ ४७ ॥

**राजा**—धिक् प्रमादम् । हन्त विज्ञानशर्मन्, आक्रान्तमेवारिभिरान्तरम् ।

---

(क) अथ वेदिनीलोहितयोरुपरि केऽप्युल्लुठन्त इव दृश्यन्ते ।

(ख) अत्र पुनः स्थूलानाम्नि सप्तमे प्राकारे कोऽपि लोहकारभस्त्रिकेव पूर्यमाणशरीरो दृश्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—देव, धीरो भव। यदि नाहं प्राणिष्यस्तदिदमभविष्यत्।

**विदूषकः**—(सकोपोपहासम्।) एदं पच्चक्खं खु वट्टइ। तुमं उण अणुमाणेण एदं णत्थित्ति वण्णेसि। ता अच्छरिअं तक्को विण्णाणसम्ममन्तिणो। वअस्स, आकण्णेहि मे वअणं। एसो अमच्चो एव्व सव्वदुवारेसु सत्तुहिं आक्कन्तेसु भिक्खुवेसं गेह्णिअ पलाइस्सदि। तुह पुणो दुल्लहो मोक्खो। ता एहि। सुरङ्गादुवारेण तुमं णइस्से। (इत्युत्थाय सर्वतो विलोक्य।) हद्धी हद्धी। किं करेमि मन्दभग्गो। जलमत्तं वि कहिं वि ण दीसइ। सत्तावि जं परिहाओ रित्ताओ विअ दीसन्ति। (पुनर्दृष्ट्वा।) वअस्स, किं एदं इन्दजालं विअ दीसइ जं सत्तावि परिहाओ दाणिं एव्व सुक्काओ पुणो वि अपरिमिदरसाओ दीसन्ति। कधं इमाओ उत्तरिअ गच्छह्म। (क)

**राजा**—अमात्य, श्रुतमेतस्य वचनम्।

**मन्त्री**—

एतन्न किंचन ततस्तव मास्तु भीति-
रोजायितं रिपुजनस्य निरीक्ष्य किंचित्।
यत्खेयपूरणविशोषणयोः समर्थं
तन्मूलमेव हि विजृम्भणमप्यरीणाम्॥ ४८॥

अपि च।

रिपवो लब्ध्वा मार्गं रसादिपरिखाः प्रकोप्य तन्मूलम्।
देव भवन्ति यथेष्टं पुरमुल्लुण्ठयितुमीशानाः॥ ४९॥

---

(क) एतत्प्रत्यक्षं खलु वर्तते। त्वं पुनरनुमानेनैतन्नास्तीति वर्णयसि। तदाश्चर्यं तर्को विज्ञानशर्ममन्त्रिणः। वयस्य, आकर्णय मे वचनम्। एषोऽमात्य एव सर्वद्वारेषु शत्रुभिराक्रान्तेषु भिक्षुवेषं गृहीत्वा पलायिष्यते। तव पुनर्दुर्लभो मोक्षः। तदेहि। सुरङ्गाद्वारेण त्वां नेष्ये। हा धिक् हा धिक्। किं करोमि मन्दभाग्यः। जलमात्रमपि कुत्रापि न दृश्यते। सप्तापि यत्परिखा रिक्ता इव दृश्यन्ते। वयस्य, किमेतदिन्द्रजालमिव दृश्यते यत्सप्तापि परिखा इदानीमेव शुष्काः पुनरप्यपरिमितरसा दृश्यन्ते। कथमिमा अवतीर्य गच्छामः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कालः**—रसरक्तमांसमेदोस्थिमज्जशुक्ररूपाः परिखात्वेन निरूपिताः ।

**कर्म**—एषां वृद्धौ श्लेष्मविद्रधिरक्तविसर्पादयो भवन्ति । कार्श्ये तु रौक्ष्यश्रमशोषादयः ।

**कालः**—युक्तं भवतोक्तम् ।

**मन्त्री**—एवमेते स्वामिकार्ये बद्धपरिकरा यतन्तु नाम । सन्त्येवैषां प्रतीकारशस्त्राण्यस्मदायत्तानि ।

**विदूषकः**—किं एसा वादाली विअ मह अक्खीहिं आउलेदि । (क)

**राजा**—अहो प्रचण्डोऽयमनिलः । तथाहि ।

ताराश्च्यावयितुं घनान्विकिरितुं कृत्वार्कतूलोपमा-
न्भित्त्वा पातयितुं भुवि क्षितिभृतां तुङ्गानि शृङ्गाणि च ।
सद्यः शोषयितुं समुद्रमवनीकर्तुं तु पांस्वात्मना
द्रागुन्मूल्य च भूरुहान्भ्रमयितुं शक्तो भवत्यम्बरे ॥ ९० ॥

**मन्त्री**—अयमेव वृद्धिशोषहेतुः परिखाणाम् । एनमुपजीव्योत्कुप्यन्ति शुष्यन्ति च सर्वतः परिखाः ।

**विदूषकः**—किं मूढो विअ पेक्खसि । करेहि एदाणं पडीआरं । (ख)

**मन्त्री**—अदृष्ट्वा किमेवं प्रलपसि ।

**विदूषकः**—(उच्चग्रीविकया विलोक्य ।) अच्चरिअं अच्चरिअं । एत्थ सत्तासत्ति वट्टइ । वड्ढन्तेसु सत्तुसु एदे वीरा रोअउलं पहरन्दि । (ग)

**मन्त्री**—तत्र श्लेष्मप्रभृतीन्रक्तपुत्रांश्चन्द्रप्रभा प्रहरति ।

**विदूषकः**—कधं इत्थिआ वि सूराअदि । (घ)

**मन्त्री**—रक्तपुत्राणां विसर्पप्लीहप्रभृतीनाममृतगुग्गुलुच(तृ ?)णपञ्चका-

(क) किमेषा वातालीव ममाक्षिणी आकुलयति ।

(ख) किं मूढ इव पश्यसि । कुर्वेतेषां प्रतीकारम् ।

(ग) आश्चर्यमाश्चर्यम् । अत्र शस्त्राशस्त्रि वर्तते । वर्धमानेषु शत्रुषु एते वीरा रोगकुलं प्रहरन्ति ।

(घ) कथं स्त्री अपि शूरायते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयः प्रहर्तारः । तथा मांसपुत्राणां शाखोटकतैलप्रभृतयः । मेदसः पुत्राणां कफकेसरिप्रभृतयः ।

**कालः**—कर्मन्, एवं वातपित्तकफेषु वात एको रसरक्तमांसादिधातूनां शोषकः पोषकश्च ।

**कर्म**—एवमेवैतत् । धातूनां प्रकोपे धातुकार्श्यं च भिषजो वदन्ति 'कटुकादयो मांसवृद्धिहेतवः' इति ।

'कटुकाद्वर्धते मांसं कषायाच्छोणितो रसः ।
लवणाद्वर्धते ह्यस्थि मज्जा त्वम्लात्प्रवर्धते ।
मधुराद्वर्धते शुक्रं तिक्तान्मेदः प्रवर्धते ॥'

**विदूषकः**—(परिवृत्यावलोकनकेन ।) अज्ज एदं हादु जुज्झदंसणम् । पेक्खदु भवं पुरट्ठिदं अच्चरिअं । (क)

**राजा**—आर्य, किमेतत्पश्यसि ।

**मन्त्री**—(विहस्य ।) पश्याम्येतत् ।

एतत्पङ्कुद्वितयमनिलश्चारयत्याशयेषु
त्रिष्वश्रान्तं जरठगणिका काचिदेषा पुरस्तात् ।
आजान्वग्रप्रविततकुचा लोभयन्ती प्रसूते
हन्तानर्थाङ्कुरमनुगता सर्वदा देहभाजाम् ॥ ९१ ॥

**कालः**—सम्यगुक्तं मन्त्रिणा यत्पित्तकफौ पङ्गू इति भिषक्प्रसिद्धिः । आशयेष्विति कफपित्तवातानामाशया विवक्षिताः । अपथ्यतां जरठगणिकेति निरूपयन्ति । अनर्थाङ्कुर इति च तत्प्रभवरोगसमुदायम् ।

**कर्म**—साधु निरूपितम् ।

**राजा**—किमिदमप्यरिभिरेवं कृतम् ।

**मन्त्री**—कः संदेहः । श्रूयताम् ।

पाण्डुः स्वस्य निशम्य मत्सरमुखात्तूलायितं विक्रमं
सेर्ष्यो मामकवाचिकेन हृदये राज्ञा निषिद्धोऽपि सन् ।

---

(क) अद्यैतद्भवतु युद्धदर्शनम् । पश्यतु भवान्पुरःस्थितमाश्चर्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रज्ञागर्ववशान्मदीयविजये जाताभिलाषोऽब्रवी-
दित्थं सान्त्वमपथ्यतां निजकुले स्नेहप्रकर्षान्विताम् ॥ ९२ ॥

**विदूषकः**—कहं सन्तं उत्तवन्तो पाण्डू । (क)

**मन्त्री**—एवम्

अप्यस्मत्कुलपक्षपातिनि पथा कामोपभोगप्रदे
किं नात्मप्रभवं कुलं गणयसि प्रक्षीयमाणं शनैः ।
औदासीन्यमिदं कुतस्तव विनोपेक्षां यदि व्यापृता
त्वं नालं बलवानपि प्रभुररिः स्थातुं कुतोऽस्यानुगाः ॥ ९३ ॥

अतस्त्वां विज्ञापयामि । संप्रति शत्रुपुरं प्रविशन्ती तत्तदभिमतेन तेन तेन रसेनाशयगतानस्मत्कुलकारकान्रसवाहिनीभिर्नाडीभिश्च पोषयन्ती राजानमपि स्ववशं नयन्ती भेदय विज्ञानहतकात् इत्युपदिश्य मन्दाग्निना सह प्रेषितवान् ।

**विदूषकः**—अच्चरिअं एदाए दूतत्तणं जाए पङ्गुणो वि चालिदा । पेक्ख दाणिं वि किं वि मन्तअन्ती चिट्ठदि । सुणाहि दाव तूह्णीओ भविअ । (ख)

(ततः प्रविशन्त्यपथ्यतया सह मन्दाग्निवातकफपित्ताः ।)

**मन्दाग्निवातकफपित्ताः**—अयि रसवति, किमु वक्तव्यमस्मदीया रोगा इति । यतस्त्वत्संततिः खल्वेते । त्वयैव वशीकृतेऽस्मिन्राजनि एतत्पुरे सुकरस्तेषां प्रवेशः । वयं तु तत्र निमित्तमात्रम् ।

**कालः**—कर्मन्, रसवतीत्यपथ्यताया नामान्तरेण भवितव्यम् ।

**कर्म**—रुचिमतीत्यप्येतस्या नाम ।

**विदूषकः**—एसा ताडआ विअ भीसणा अणुवट्टदि । (ग)

(क) कथं सान्त्वमुक्तवान्पाण्डुः ।

(ख) आश्चर्यमेतस्या दूतत्वं यया पङ्गवोऽपि चालिताः । पश्येदानीमपि किमपि मन्त्रयन्ती तिष्ठति । शृणु तावत्तूष्णीको भूत्वा ।

(ग) एषा ताडकेव भीषणानुवर्तते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—राजा चाहं च रामलक्ष्मणाविव वर्तावहे।

**विदूषकः**—अहं वि कोसिओ विअ। (क)

**राजा**—(विहस्य।) तादृक्प्रभावो महर्षिः खलु भवान्।

**विदूषकः**—भो वअस्स, एसो अमच्चो एदाए मं बलिं दाऊण अप्पाणं मोचेदुं अहिलसन्तो विअ दीसइ। दाणिं भवं जेव मह सरणम्। (ख)

**मन्त्री**—वैधेय, क्षणं तूष्णीं तिष्ठ। शृणुमः शेषमपि वचनमेषाम्।

**वातादयः**—अयि रुचिमति,

त्वां वीक्ष्य जागरूकां तस्यां तस्यां रुचिप्रविष्टायाम्।
स्वत एव भिद्यतेऽसौ विज्ञानादञ्जसा राजा॥ ९४॥

**राजा**—

आलापादेतेषां कुलालदण्डावघट्टनादिव मे।
हृदयं भ्रमतीदानीं सहसा चक्रमिव किं न्वेतत्॥ ९५॥

**विदूषकः**—अण्णं किम्। दिढं खु णिगिहीदो सि तुमं एदाए अपत्थदापिसाचिआए। अहं उण छवेदो बह्मणो होमित्ति सज्झसेण इमाए विसज्जिदो ह्मि। (ग)

**मन्त्री**—(विहस्य।) षड्वेदा इत्यनया संख्ययैव सूचितं वेदविज्ञानम्।

**राजा**—किं विस्मृतं त्वया यत्प्रागेव मम मनीषितार्थं विदूषकेण बोधितोऽसि।

**मन्त्री**—(स्वगतम्।) अहो त्रुटितसंघटिताया दास्या विलसितं यदियन्तं कालं विस्मृतापि बुभुक्षा स्मृता सती राज्ञो हृदयमाकुलयति। (प्रकाशम्।) तदप्यग्रे भविष्यति। देवेन तु एतद्वैरिप्रयुक्तमिति निश्चित्य तद्वशे न भवितव्यमिति बहुशः प्रार्थये।

---

(क) अहमपि कौशिक इव।

(ख) भो वयस्य, एषोऽमात्य एतस्या मां बलिं दत्त्वा आत्मानं मोचयितुमभिलषन्निव दृश्यते। इदानीं भवानेव मम शरणम्।

(ग) अन्यत्किम्। दृढं खलु निगृहीतोऽसि त्वमेतया अपथ्यतापिशाचिकया। अहं पुनः षड्वेदो ब्राह्मणो भवामीति साध्वसेनानया विसर्जितोऽस्मि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(सबहुमानम् ।) तथ्यं पथ्यं चाह भवान् । तदहमवहितोऽस्मि ।

**विदूषकः**—को एसो विज्जपुञ्जो विअ धगधग्गअमाणो सव्वदो वि मह अच्छी आउलेदि । (क)

**मन्त्री**—परिवारपरिवृतो ज्वरराज एषः । यमेनमुपरुध्य सर्वेऽपि रोगाः प्रहरन्ति । अत एवायं राजपदभागिति भिषग्व्यवहारः ।

**कर्म**—युक्तमाह मन्त्री । तथाहि ।

ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽन्तकः ।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥ ५७ ॥
जन्मान्तयों मोहमयः संतापात्मापचारजः ।
विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते ॥ ५८ ॥

**कालः**—कर्मन्, नानायोनिष्विति सुष्ठूक्तं त्वया ।

पाकलस्तद्यथेभानामभितापो हयेषु च ।
वान्तादानामलर्कः स्यान्मत्स्येष्विन्द्रमदः स्मृतः ॥ ५९ ॥
ओषधीषु तथा ज्योतिश्चूणपा धान्यजातिषु ।
जलेषु नीलिका भूमावूषो नृणां ज्वरो मतः ॥ ६० ॥

**राजा**—पश्य सखे, पश्य ।

त्रिकूटाद्रेः कूटैस्त्रिभिरिव शिरोभिः प्रतिभयो
दिशः पश्यन्दग्भिः शशरुधिरसोदर्यरुचिभिः ।
त्रयाणां पादानां तृणतरुसमुच्छ्रायजयिना-
मयं न्यासैर्भूमिं नमयति गदानामधिपतिः ॥ ६१ ॥

**कालः**—कर्मन्, पश्यायं यस्मिन्नुदेष्यति तस्य जनस्य ।

आलस्यमश्ममयतां पुलकोद्गमं च
गात्रे करोति न रतिं क्वचिदातनोति ।
जाताश्रु जृम्भयति सम्प्रविघूर्णमल्प-
प्राणं तमम्बु च पिपासयतेऽनुवेलम् ॥ ६२ ॥

(क) क एष विद्युत्पुञ्ज इव धगधगायमानः सर्वतोऽपि ममाक्षिणी आकुलयति ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कर्म**—एवमेतत् । अपि चानेनाविष्टः ।

यद्भक्ष्यमम्लकटुतिक्तमपेक्षते त-
न्न स्वादु खादति च सूक्षयते हितोक्तम् ।
जङ्घां विवेष्टयति हुंकृतिमादधाति
बालेषु न क्वचन दर्शयते रुचिं च ॥ ६३ ॥

**विदूषकः**—दिट्ठी वि ण पहुवदि णं पेक्खिदुं । (क)

**मन्त्री**—एष ज्वरोऽपि यक्ष्मराजसखः ।

क्रोधनारोचकाध्मानैस्त्रिभिः पुत्रैरुपैधते ।
भार्यया पञ्चविधया ग्रहण्यभिधया सह ॥ ६४ ॥

**विदूषकः**—(अन्यतो विलोक्य सभयकम्पम् ।) वअस्स, अहं दाणिं ण जीविस्सं, जदो खु करगहिदखग्गखेडअसरकम्मुअपरिघसूलगदा पच्चत्थिराअसेणा अभिवड्ढइ साअरो विअ । (ख)

**मन्त्री**—(विलोक्य ।) एते व्रणराजपुत्रा अष्टविधा भगंदराः । एते च षड्विधा मूलाधिष्ठानमभिव्याप्नुवन्ति । एते च कफसंभवा दश मेहाः पित्तसंभवैः षड्भिर्वातसंभवैश्चतुर्भिश्च सह विंशतिसंख्याका यक्ष्मराजपुत्राः । अपरत्र च त्रयोदश मूत्रघाताः प्रसज्जन्ते । एतान्यपि च वातपित्तकफसंनिपातभुक्तविटधात्वश्मरीकृच्छ्राणीत्यष्टौ कृच्छ्राणि चतसृभिरश्मरीभिः सह सज्जीभवन्ति । एष गुल्मोऽपि शूलमवलम्ब्य विजृम्भते तथाष्टविधशूलाश्च निरुन्धन्ति ।

**कालः**—कर्मन, समर्थोऽयं मन्त्री रोगविशेषपरिज्ञाने ।

**मन्त्री**—तथान्येऽप्यत्र बहवः प्रभवन्ति । ये किल

मन्दाग्न्युत्थोदरस्थामयसुहृद उदावर्तभेदा अशीति-
र्वातोत्थाः पित्तजा विंशतियुगगणिता विंशतिः श्लेष्मजाश्च ।

---

(क) दृष्टिरपि न प्रभवत्येनं प्रेक्षितुम् ।

(ख) वयस्य, अहमिदानीं न जीविष्ये, यतः खलु करगृहीतखड्गखेटकशरकार्मुकपरिघशूलगदा प्रत्यर्थिराजसेनाभिवर्धते सागर इव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चत्वारोऽक्ष्णोर्वसन्तो नवतिरपि चतुःसप्ततिर्वक्त्रनिष्ठा
मूर्धस्थाः पङ्क्तिसंख्याः क्रिमिगदनिवहोऽप्यस्ति नैके च शोफाः ॥६५॥

तथा भूतोन्मादा विंशतिः ।

आमवात इति कोऽपि चतुर्धा जायते निखिलरोगनिवासः ।
वातपित्तकफशोणितमद्यक्ष्वेडजा षडुदयन्ति च मूर्छाः ॥ ६६ ॥

अपि च ।

एते षोढा भिन्ना उन्मादाश्च प्रवर्तन्ते ।
अभिवर्तन्ते चामी हृद्रोगाः पञ्चधा भिन्नाः ॥ ६७ ॥

**विदूषकः**—पमादो पमादो । एदेहिं अरिहिं दुवाराइं पाआरा परिखा कोसाआराइं अ सव्वं वि अक्कन्तम् । किं बहुजम्पिदेण । हृदयं गुम्मं करिअ अधिट्ठिदं । तिलप्पमाणो वि देसो अणक्कन्तो ण दीसइ । (अञ्जलिं बद्ध्वा ।) वअस्स, अदो वरं णत्थि मे जीविदासा । मम बह्मणीए विहुराए अन्धकूवणेत्ताए तुमं एव्व सुमरिअ जोअक्खेमं वहेहि । पढमं एव्व एसो अणत्थो सुणाविदो सि मए । तुमं उण दुम्मन्तिणो से वअणवीसम्भेण इमं दुरवत्थं पावदो सि । पेक्ख दाव तस्स फलं एदं संवुत्तं । (क)

**राजा**—अमात्य, संवदत्येव विदूषकवचनम् ।

त्वद्बुद्धिप्रसरोऽत्र धिग्विफलितो निक्षिप्य सर्वामपि
त्वय्येवात्मधुरां मया निवसता संप्राप्तमीदृक्फलम् ।
वैयग्र्यं हृदि सर्वथास्मि गमितो द्वाराणि कोषालयाः
प्राकाराः परिखाश्च हा निखिलमप्याक्रान्तमेवारिभिः ॥ ६८ ॥

---

(क) प्रमादः प्रमादः । एतैररिभिर्द्वाराणि प्राकाराः परिखाः कोषागाराणि च सर्वमप्याक्रान्तम् । किं बहुजल्पितेन । हृदयं गुल्मं कृत्वा अधिष्ठितम् । तिलप्रमाणोऽपि देशोऽनाक्रान्तो न दृश्यते । वयस्य, अतःपरं नास्ति मे जीविताशा । मम ब्राह्मण्या विधुराया अन्धकूपनेत्रायास्त्वमेव स्मृत्वा योगक्षेमं वह । प्रथममेव एषोऽनर्थः श्रावितोऽसि मया । त्वं पुनर्दुर्मन्त्रिणोऽस्य वचनविश्रम्भेणेमां दुरवस्थां प्रापितोऽसि । पश्य तावत्तस्य फलमिदं संवृत्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं स्थिते किमन्यद्ब्रवीमि ।

गात्रं मे परितप्यते पदयुगं शक्नोति न स्पन्दितुं
स्तब्धं चोरुयुगं भुजौ च भजतः कम्पं मुखं शुष्यति ।
नास्त्यक्ष्णोर्विषयग्रहः श्रवणयोरप्येवमेव त्वचो-
ऽप्यन्यत्किं चलतीव हृन्निजपदादाशा भ्रमन्तीव च ॥ ६९ ॥

अपि च ।

ननु मे दुःखभागात्मा न धैर्यमवलम्बते ।
काठिन्यमिव मृत्पिण्डो घनवारिसमुक्षितः ॥ ७० ॥

किं च मया भवत्संविहितरसगन्धकौषधघटितरसायनप्रत्याशया

त्वदुपदेशवशंवदचेतसा वपुषि नश्वरके ममता वृथा ।
विदधता शिवभक्तिरसायनं शिवशिवान्तरितं परमार्थदम् ॥ ७१ ॥

**मन्त्री**—सत्यमेतच्छिवभक्तिरसायनं परमार्थदमिति सकलैहिकसंकटवि-घटनं च । किं तु

पुराभिमानो न वृथा तद्दार्ढ्येन विना कथम् ।
चित्तस्वास्थ्यं विना तच्च शिवभक्तिर्दृढा कथम् ॥ ७२ ॥

अतो विज्ञापयामि ।

कृच्छ्रेऽपि धैर्यग्रहणं राज्ञो विजयसाधनम् ।
इति नीतिविदः प्राहुर्धैर्यमालम्ब्यतां ततः ॥ ७३ ॥

किं च तव निदर्शयामि तादृशमितिहासम् । यथा ।

श्रेयः प्रापदगस्तिना स नहुषः शप्तोऽपि धैर्यग्रहा-
न्नन्वालम्ब्य धृतिं शुभं नलहरिश्चन्द्रावपि प्रापतुः ।
कृत्वा छद्मकृतेऽरिणा प्रणयिनीचौर्येऽपि धैर्यं वह-
न्बद्ध्वा सेतुमुदन्वदम्भसि न किं रामो विजिग्ये रिपून् ॥७४॥

**विदूषकः**—वअस्स, सुदं किं दाणिं वि एदस्स मन्तिणो एदं एव्व वअ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णम् । संपदं एसो अत्ताणं वि ण जाणादि राजकज्जं कुदो उण उम्मादं वा उवजावं वा सत्तुकिदम् । (क)

**मन्त्री**—(विहस्य ।) वैधेय, किं वृथा प्रलपसि । देव, अलं धैर्यत्यागेन । एते च मत्संनिहिता रसौषधिविशेषा भवत्सेवनमेव प्रतीक्षमाणा विपक्षक्षपणाय सज्जीभवन्ति तानेताननुगृहाण । (नेपथ्ये ।) देव, एते वयम्

शिवभक्तिप्रसादेन लब्धा मन्त्रिवरेण च ।
सम्यक्संविहिताः सर्वे विपक्षान्विजयामहे ॥ ७५ ॥

पुरस्तादचिरादेवास्माभिर्बाध्यमानं यक्ष्माणं सामात्यं सपुत्रकलत्रं ससैन्यं च पश्य ।

**राजा**—(दृष्ट्वा ।) प्रियं प्रियम् । सर्वे यूयमप्रमत्ता विपक्षक्षपणाय यतध्वम् ।

(ततः प्रविशति यक्ष्मा पाण्डुश्च ।)

**यक्ष्मा**—पाण्डो, क्व पुनरस्मदीया भटाः प्रहारार्थं वर्तन्ते ।

**पाण्डुः**—देव, पश्य । केचिदनुगच्छन्ति, केचित्पुरो गच्छन्ति ।

**कालः**—कर्मन्, यदुक्तं पाण्डुना तत्तथैव । यतः,

अनेकरोगानुगतो बहुरोगपुरोगमः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति यः स्मृतः ॥ ७६ ॥

**कर्म**—जानामि यादृश एष इति ।

नक्षत्राणां द्विजानां च राजाभूद्यो विधुः पुरा ।
तं प्रजग्राह यक्ष्मासौ राजयक्ष्मा ततः स्मृतः ॥ ७७ ॥
देहेषु यः क्षयकृतेः क्षयस्तत्संभवाच्च सः ।
रसादिशोषणाच्छोषो रोगराड्रोगरञ्जनात् ॥ ७८ ॥

**यक्ष्मा**—सखे पाण्डो, प्रबलेषु सामदानभेदा न प्रसरन्ति, अतोऽन्तिम एव प्रयोगः संप्रतिपत्तव्यः । तदत्र किं विलम्बेन ।

---

(क) वयस्य, श्रुतं किमिदानीमप्येतस्य मन्त्रिण इदमेव वचनम् । सांप्रतमेष आत्मानमपि न जानाति राजकार्यं कुतः पुनरुन्मादं वा उपजापं वा शत्रुकृतम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शस्त्राशस्त्रि प्रसह्याथ प्रवृत्ते रणवैशसे।
अजीवकमरोगं वा पुरमेतद्भविष्यति ॥ ७९ ॥

तदेहि। तत्क्षमां भूमिमेव गच्छामः। (इति पाण्डुना सह निष्क्रान्तः।)

**कालः**—कर्मन्, पश्य पश्य विपक्षविजयाय विज्ञानमन्त्रिप्रयुक्तान्भटान्।

**राजा**—वयस्य, मन्त्रिणा दर्शितेन विक्रमव्यापारेण हृदयं मम निर्वृणोति। यतः।

भूपतिरससिन्दूरज्वराङ्कुशानन्दभैरवैः साकम्।
चिन्तामणिश्च शत्रून्राजमृगाङ्कश्च जेतुमुद्युङ्क्ते ॥ ८० ॥

पश्य चात्रारोग्यचिन्तामणेरुत्तरेण।

कृतसिद्धरसेश्वरः पुरस्तात्करमालम्ब्य च वातराक्षसस्य।
समराङ्गणमेति पूर्णचन्द्रोदय एषोऽग्निकुमारदर्शिताध्वा ॥ ८१ ॥

प्रतापलङ्केश्वर एष यश्च प्रतापयत्यत्र निजप्रतापात्।
गदान्धनुर्वातमुखानशेषांल्लङ्केश्वरः शत्रुभिरप्रसह्यः ॥ ८२ ॥

वसन्तकुसुमाकरः सरभसं विधत्ते रणं
सुवर्णरसभूपतिर्वशयते रुजां मण्डलम्।
प्रसह्य वडवानलाभिधमिदं च चूर्णं जवा-
द्विशोषयति सर्वतः प्रबलमग्निमान्द्यारुचिम् ॥ ८३ ॥

सुदर्शनं चक्रमिवामरारीन्सुदर्शनं चूर्णमिदं रणाग्रे।
निहन्ति जीर्णज्वरमाशु पित्तजन्या रुजश्चूर्णयति प्रसह्य ॥ ८४ ॥

प्रबलानलसंकुलितं गदगहनं दुरवगाढमन्येन।
हन्ति धुरि तीक्ष्णसारो वातकुठारः समूलमुन्मूल्य ॥ ८५ ॥

असकृत्स्खलतः किंचिद्गतिमान्द्यविधायिनः।
प्रमेहान्माद्यतो हन्ति मेहकुञ्जरकेसरी ॥ ८६ ॥

गतिमन्थरताधायिवपुर्वैपुल्यशालिनः।
सर्वान्वातगजान्हन्ति वातविध्वंसनो हरिः ॥ ८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—देव, अचेतणा वि एदे चिन्तामणिपहुदिणो संपदं संपहारं कुणन्ति त्ति अच्चरिअम् । ता इन्दजालं विअ एदं मे पडिभादि । (क)

**राजा**—धिङ्मूर्ख, अनभिज्ञोऽसि शास्त्रतत्त्वस्य । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । अभिमानिदेवताश्चैषां सचेतनाः श्रूयन्ते । (कर्णं दत्त्वा ।) मन्त्रिन्, कोऽयं कलकलाविर्भावः ।

**मन्त्री**—पश्यतु देवः ।

शस्त्राशस्त्रि गदागदि प्रथमतो निर्वर्तिते संयुगे
मुष्टीमुष्टि तलातलि प्रववृते पश्चादिदं भीषणम् ।
जित्वारीनिह देव तावकभटैरापूर्यते काहला
शङ्खः संप्रति शब्द्यते दृढतरं संताड्यते दुन्दुभिः ॥ ८८ ॥

अपि च ।

आस्फालयन्ति दृढमूरुयुगं कराग्रैः
कुर्वन्ति कुण्ठितघनारवमन्दहासम् ।
जीवोऽयमस्मदधिपो जितवानमित्रा-
नित्युद्धतं युधि भटास्तव पर्यटन्ति ॥ ८९ ॥

**विदूषकः**—कहं एत्थ एव भग्गमणोरहदाए परुण्णो विअ जक्खराओ लक्खीअदि । (ख)

**राजा**—वयस्य, सम्यङ्निरूपितं भवता ।

गण्डस्थलप्रसृमराश्रु करं करेण
निष्पीडयन्कटकटाकृतदन्तपङ्क्तिः ।
यक्ष्मा ललाटघटितभ्रुकुटिः किलाय-
मन्तःस्पृशं रुषमभीक्ष्णमभिव्यनक्ति ॥ ९० ॥

**मन्त्री**—न केवलां रुषं शुचं च ।

---

(क) देव, अचेतना अप्येते चिन्तामणिप्रभृतयः सांप्रतं संप्रहारं कुर्वन्तीत्याश्चर्यम् । तदिन्द्रजालमिवैतन्मे प्रतिभाति ।

(ख) कथमत्रैव भग्नमनोरथतया प्ररुदित इव यक्ष्मराजो लक्ष्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विदूषकः**—एसो सोएण पलवन्तो विअ दीसइ । (क)

**मन्त्री**—शृणुमस्तर्हि प्रलापमेतस्य । विषूचीमत्सरावप्येनमनुवर्तेते ।

(ततः प्रविशति विषूचीमत्सराभ्यां सहितो यक्ष्मा ।)

**यक्ष्मा**—हन्त कथं तादृशानामपि मत्सैन्यानामीदृशीयं दुरवस्था । आश्चर्यमाश्चर्यम् ।

जीवस्य ध्वजिनीचराननतिबलाञ्शक्नोति कः शासितुं
दुर्वारैर्युधि पातितानि मम यैः सर्वाणि सैन्यानि च ।
पाण्डुर्मे सचिवः परैरवधि वा भीतः पलायिष्ट वा
नो जाने मम जीवतो बत हताः पुत्रास्तथा बान्धवाः ॥ ९१ ॥

(सशोकावेगम् ।)

भो भोः सुताः क्व नु गताः स्थ विना भवद्भि-
र्जीर्णाटवीव जगती परिदृश्यते मे ।
आक्रम्यते च तमसा हरिदन्तरालं
शोकाग्निसंवलितमुत्तपते वपुश्च ॥ ९२ ॥

(इति मूर्छति ।)

**मत्सरः**—समाश्वसिहि समाश्वसिहि ।

**यक्ष्मा**—(समाश्वस्य ।)

वत्सा हे वदनाम्बुजानि मुदितो द्रक्ष्यामि केषामहं
केषां माक्षिकमाक्षिपन्ति वचनान्याकर्णयिष्ये मुदा ।
मर्त्यानां तनुषु प्रविष्टमचिरान्मां वर्धयिष्यन्ति के
यूयं यत्समरे परैरतिबलैर्नामावशेषीकृताः ॥ ९३ ॥

**कालः**—

पुत्रप्रविलयाद्दुःखं न सोढुं शक्यते जनैः ।
वसिष्ठोऽपि महान्येन ववाञ्छ पतनं भृगोः ॥ ९४ ॥

तदिमं पुत्रशोकसंतप्तं यक्ष्माणमवेक्षितुं न शक्नोमि ।

---

(क) एष शोकेन प्रलपन्निव दृश्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कर्म**—अहमप्येवमेव ।

(इत्युभौ निष्क्रामतः ।)

**मत्सरः**—

देवालं शोकेन द्विषि जीवति न खलु धर्मोऽयम् ।
यावच्छक्ति ततोऽरीन्हत्वा शोचन्ति नैव तान्वीराः ॥ ९५ ॥

अत इदानीं पुनरानीय परिभवमरिहतानामस्मदीयानामानृण्यमृच्छतु भवान् ।

**विषूची**—

दाणिं खु एव्व दिट्ठा राअकुमारा कहिं गदा तुह्मे ।
दज्जइ हिअअं सोओ अग्गी विअ सुक्कतिणजालम् ॥ ९६ ॥ (क)

**यक्ष्मा**—

गण्डद्वयेऽपि गलितैर्नयनाम्बुपूरै-
रामृष्टपत्त्रलतमाकुलकेशपाशम् ।
पाणिद्वयप्रहतपाटलबाहुमध्य-
मस्या वपुर्मम शुचं द्विगुणीकरोति ॥ ९७ ॥

**मत्सरः**—राजन्, धैर्यमवलम्ब्यताम् । कृतं शोकेन । संप्रति हि कतिपये देवपादमूलोपजीविनः सैन्याः केनापि दुरपनेयप्रवृत्तयः ।

**यक्ष्मा**—ततः किम् ।

**मत्सरः**—ततश्च तत्प्रयोगेण कुण्ठितशक्तिर्भविष्यति विज्ञानमन्त्रिहतकः । तथा च वैरनिर्यातनं कर्तुमुचितमिति प्रतिभाति ।

**यक्ष्मा**—(सविमर्शम् ।) अवन्ध्योऽयं प्रयत्नः । तदर्थमेव शत्रून्मूलनाय गच्छामः । (इति विषूचीमत्सराभ्यां सह निष्क्रान्तः ।)

**मन्त्री**—मत्सरेण कर्णेऽस्मज्जयार्थं किमप्युपदिष्टो यक्ष्मा निष्क्रान्तः

---

(क) इदानीं खल्वेव दृष्टा राजकुमाराः कुत्र गता यूयम् ।
दहति हृदयं शोकोऽग्निरिव शुष्कतृणजालम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्वयमपि तदिङ्गितानुमितं पर्यालोच्य तत्प्रतिविधानाय व्याप्रियमाणा इष्टं साधयामः ।

(इति निष्क्रान्ताः सर्वे ।)

---

सप्तमोऽङ्कः ।

(ततः प्रविशति जीवराजो विज्ञानमन्त्री च )

**जीवराजः**—(सहर्षम् ।)

मन्त्रिस्त्वदीयमतिकौशलनौबलेन
तीर्णो रणाम्बुधिरभूदतिदुस्तरोऽपि ।
यस्मिन्भयंकरगतिर्ज्वरपाण्डुमुख्यो
रोगव्रजः किल तिमिंगिलतामयासीत् ॥ १ ॥

किं ब्रवीमि संकुलयुद्धेऽस्मदीयानां तदीयेषु प्रवृत्तमोजायितम् ।

एकत्र मण्डभेदो गुटिकाभेदः परत्र मन्दाग्निम् ।
निखिलामयजननकरं निजपानं प्रथममिदमहमदर्शम् ॥ २ ॥

अथ गुलूच्यादिपञ्चभद्रकषायं निकषा यत्नवं (?) तमवलोक्य पलायन्त पित्तसमीरज्वराः । तदनन्तरं जगदन्तरप्रसिद्धः स्वयमनश्वरसारो यक्ष्मपरिक्षपणदक्षिणः सन्नपि संननाह स्वयं त्रैलोक्यचिन्तामणिर्विनिपाताय संनिपातेन साकमष्टविधानामपि ज्वराणाम् ।

स्थावरजङ्गमगरलं ज्वरमामोत्थं व्रणोपजातं च ।
आरोग्यपूर्वचिन्तामणिरपि निघ्नन्मया रणे दृष्टः ॥ ३ ॥

ततः सर्वज्वरानपि निगृहीतवन्तं ज्वराङ्कुशमुत्तरेण गुल्मार्शः संग्रहिणीर्विपाटितवतो ग्रहिणीकपाटस्य पूर्वभागे

या पञ्चामृतपर्पटी ग्रहिणिकायक्ष्मातिसारज्वर-
स्त्रीरुक्पाण्डुगदाम्लपित्तगदरुक्क्षुन्मान्द्यविध्वंसिनी ।
तामद्राक्षमहं रणे स्त्रियमपि व्यातन्वतीं पौरुषं
चामुण्डामिव चण्डमुण्डसमरप्रक्रान्तदोर्विक्रमाम् ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्चाद्भागे तस्याः

अरुचिप्लीहवमिज्वरकासार्शःश्वासशूलानाम् ।
सूक्ष्मैलादिमचूर्णं निरवर्णयमाशु युधि निहन्तारम् ॥ ५ ॥

तदनु जलजाक्ष इव दनुजलोकस्य सिद्धवसन्तः शुक्रदोषस्य गोक्षुरकादिचूर्णमिश्रितपयःपानविधिः पुंस्त्वदोषस्य त्रिविक्रमरसो मूत्रकृच्छ्राश्मर्योर्विष्यन्दनतैलयोगो भगंदरस्य लघुलङ्केश्वरः कुष्ठस्य नित्योदितरसो मूलानां विद्याधररसो गुल्मानां त्रिनेत्ररसः शूलानां महावह्निरस उदररोगाणां गिरिकर्ण्यादिविधिर्गुञ्जातैललेपश्च शिरोरोगस्य चन्द्रोदयवर्तिश्च चक्षूरोगस्य सौवीरादिपक्वतैलनिषेकः कर्णरोगाणां सिद्धार्थत्रिफलाद्यौषधयोगविशेषपानविधिः कृत्योन्मादविषज्वरसर्वग्रहाणां मधुसर्पिर्युतचूर्णविशेषलेहनविधिः पाण्डुहृद्रोगभगंदरशोफकुष्ठोदरार्शसां मेहकुञ्जरकेसरीप्रमेहाणां च विजयमहोत्सवेन समुत्सारितसर्वरोगखेदाः समरजनैरप्यस्तूयन्त । ततः किमप्यवशिष्यते कार्यमस्माकम् ।

**मन्त्री**—स्वामिन्, श्रूयताम् ।

जन्यार्णवोऽरिजनितः सुमहानिदानीं
तीर्णोऽप्यतीर्ण इति निश्चिनुते मनो मे ।
यन्मत्सरेण रणभुव्युपदिष्टकार्यः
कर्णे स तत्परमितो विदधीत यक्ष्मा ॥ ६ ॥

**राजा**—विज्ञानसचिव यथार्थनामधेय, मत्सरेण यक्ष्मणः कर्णे किमुक्तं भवेत् । यक्ष्मा च तदाकर्ण्य किं विदध्यात् । तद्विधानेन चास्माकमुत्तिष्ठेत कीदृशमत्याहितम् ।

**मन्त्री**—(क्षणं विचिन्त्य ।) किमन्यद्ब्रवीमि । केचिदसाध्यरोगा यक्ष्माणमुपासते तैरस्मान्बाधितुं यक्ष्माणं प्रति मत्सरेण संकेतितमिति शङ्के ।

**राजा**—(सवितर्कम् ।) एवमेवास्मासु यक्ष्मा यदि वक्रं विधिमुपक्रंस्यते तत्र कमुपायं पश्यति भवान् ।

**मन्त्री**—'भक्ताय भवते कदापि मया दर्शयिष्यते साम्बः' इति भगवत्या तुभ्यं जातुचिदावेदितं भक्त्या इति कदाचित्कथान्तरे देवेनैव मां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रति प्रागुक्तम्। तदिदानीं तामेव भगवतीं भक्तिं हृदि दृढमवलम्ब्य भगवद्दर्शनार्थं संनिधानानुग्रहः प्रार्थ्यताम्। तत एवासाध्यरोगाभिभवः सुलभः प्रतिभाति।

**राजा**—यद्येवमनुध्याय विध्यादिविबुधकृतनिषेवणं करोमि मनसा शरणं शंकरम्। (इत्यनुध्यायति।)

**मन्त्री**—आश्चर्यमाश्चर्यम्। भक्तवत्सला भगवतश्चन्द्रचूडस्य परां कोटिमवलम्बते। यदनुध्यानमात्रमनुतिष्ठति स्वामिनि तदाविर्भावसूचनमेतद्विलक्ष्यते। यत्किल

शैलस्थूलशिरोभिरुग्रभुजगप्रायश्रवोभूषणै-
जानुस्पर्शिबृहत्पिचण्डचटुलैस्तालद्रुदीर्घाङ्घ्रिभिः।
प्रावृण्नैशतमिस्रनीलतनुभिर्भस्मत्रिपुण्ड्राङ्कितैः
शूलोद्भासिभुजैः समावृतमिदं भूतैरभूद्भूतलम्॥ ७॥

**राजा**—(ध्यानाद्विरम्य कर्णं दत्त्वा।) अहो भाग्यप्रकर्षो जीवलोकस्य। यतः।
'जय विश्वपते जयेन्दुमौले जय शंभो जय शंकरेति शंसन्।
परितः श्रुतिगोचरो जनानां कलुषं लुम्पति काहलीनिनादः॥ ८॥

**मन्त्री**—(सहर्षम्।) राजन्, फलितस्ते मनोरथः। पश्य।
आरूढः स्फाटिकक्ष्माधरनिभवृषभं साधमद्रीन्द्रपुत्र्या
वीतावष्टम्भकुम्भोदरकरयुगलोदस्तमुक्तातपत्रः।
गायद्गन्धर्वनृत्यत्सुरगणिकपुरोभागघोषन्मृदङ्गो
गङ्गाभृत्युत्तमाङ्गे शशिशकलधरः शंकरः संनिधत्ते॥ ९॥

अपि च।
मौलिन्यस्ताञ्जलीनां दरमुकुलितदृङ्नियदानन्दबाष्प-
क्लिद्यद्गण्डस्थलानामविरलपुलकालंकृतस्वाकृतीनाम्।
वेदान्तप्रायभूरिस्तुतिमुखरमुखाम्भोजभाजामृषीणां
पङ्क्त्या पाश्चात्यभागो झटिति निबिडितो दृश्यतामस्य शंभोः॥ १०॥

**राजा**—मन्त्रिन्, इतः परं प्रणिपातादिना भगवन्तं प्रसाद्य स्वाभीष्टमर्थं प्रार्थयिष्ये।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मन्त्री**—अनितरसाधारणमेतस्य भक्ताभीप्सितप्रदानचातुर्यम् । यः प्रसादितवते पार्थाय पाशुपतमस्त्रं प्रतिपादितवान् । येन च निखिलक्षत्रियकुलजिघृक्षवे भार्गवाय प्रसादीकृतः परशुः ।

**राजा**—उपपन्नमिदम् । एवमपरिमितानि महान्त्याश्चर्यचरितानि देवस्य । यच्च कपिलभसीकृतप्रपितामहसंघसमुत्तारणकृतप्रयत्नभगीरथप्रसादितायाः सुरापगाया भुवमुत्तरन्त्या गर्वभञ्जनं नाम मृत्युंजयस्य चरितं तदपि परमाद्भुतमेव ।

**मन्त्री**—जगत्प्रसिद्धमेवेदम् । तथाहि ।

वेगाकृष्टोडुचक्रानुकरणनिपुणश्वेतडिण्डीरखण्ड-
श्लिष्टोर्मीनिर्मितोर्वीवलयविलयनाशङ्कसातङ्कदेवा ।
विभ्रम्याकाशगङ्गा विधिभुवनभुवः सर्वदुर्वारगर्वा
निर्विण्णा धूर्जटीयोद्भटघटितजटाजूटगर्भे निलिल्ये ॥ ११ ॥

किं च । अध्वरविधावपराधिनो दक्षप्रजापतेः शिक्षणावसरे रोषसंधुक्षितेन नीललोहितेन विसृष्टः स्वांशभूतः प्रभूतकोपविधूतविनयमुद्रो वीरभद्र एव किं न कृतवान् । तथाहि ।

शूलाग्रक्षतदक्षकण्ठरुधिरैः शोणे रणप्राङ्गणे
कीर्णो दन्तगणश्चपेटदलितादर्कस्य वक्त्रान्तरात् ।
वीरश्रीकरपीडनोत्सवविधावेतस्य वैश्वानर-
प्रक्षिप्तोज्ज्वललाजविभ्रमकरो नालोकि लोकेन किम् ॥ १२ ॥

**राजा**—किमिति वर्ण्यतामयमाश्चर्यचर्यो भगवान् ।

क्रोधारूढभ्रुकुटिरलिके क्रूरखड्गप्रहार-
श्छिन्नग्रीवत्रिदशनिकरच्छन्नसङ्ग्रामभूमिः ।
शक्रश्रीशद्रुहिणशरणालाभविद्राणविद्या-
दानोन्निद्रः प्रणतजनताभद्रदो वीरभद्रः ॥ १३ ॥

कः पुनरस्य स्वरूपं तत्त्वतः शक्नोत्यवधारयितुं यदन्तर्वाणयः सर्वेऽपि स्वच्छन्दानुरोधात्कलयन्ति स्वरूपमेतस्य । तथाहि—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्तारं कतिचित्किलानुमिमते कार्यार्थमुर्व्यादिभिः
केऽप्याहुः पुरुषस्य यस्य पुरतः सृज्यं प्रकृत्या जगत् ।
क्लेशैः कर्मभिराशयैश्च सकलैरस्पृष्टरूपोऽखिल-
प्रज्ञोऽनादिगुरुः स ईश्वर इति व्याख्यन्ति केचित्तु यम् ॥१४॥

अपि च ।

श्रुतमिति निगमान्तेष्वेकमेवाद्वितीयं
निरवधि परिपूर्णं ब्रह्म सच्चित्सुखात्म ।
विलसति किल यस्मिन्विश्वमेतत्तमिस्रे
स्रजि फणिवदबोधादित्थमाहुः किलान्ये ॥ १५ ॥

**मन्त्री**—तत्तादृशमेनमवाङ्मनसगोचरमहिमानं पङ्कजासनपाकशासनप्रभृतयो देवाः प्रणमन्ति भगवन्तम् । अतः सेवावसरं प्रतिपालय क्षणमात्रम् ।

**राजा**—सम्यङ्निरूपितममात्येन ।

नमदमरसहस्रमौलिमालापरिगलितैर्भुवि पारिजातपुष्पैः ।
अलिकुलमनवाप्तदिव्यगन्धग्रहणकुतूहलि कृष्यते समन्तात् ॥१६॥

**मन्त्री**—अवसरोऽयमखिलसुरासुरगुरोः सरोरुहाकरसंवेशविद्यादेशिककलाशेखरस्य सेवनाय देवस्य । अत एव

संभ्रान्तनन्दिकरघूर्णितवेत्रपात-
भीतापगत्वरगणव्रजवर्जितेन ।
एतेन कीर्णकुसुमेन पथा महेशं
सेवस्व भक्तिमदुर्लभसंनिधानम् ॥ १७ ॥

(ततः प्रविशति यथानिर्दिष्टः परमेश्वर्या सह परमेश्वरः ।)

**परमेश्वरः**—अयि गिरीन्द्रसुते,

अनितरसाधारणया भक्त्या जीवस्य मामनुसरतः ।
सपदि मयास्य पुरस्तत्संनिहितं सपरिवारेण ॥ १८ ॥

**देवी**—देव, तुरिअं तुह आगमणं एव्व दंसेदि अणण्णतुल्लं भत्तिमत्तणम् । (क)

(क) देव, त्वरितं तवागमनमेव दर्शयत्यनन्यतुल्यं भक्तिमत्त्वम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**राजा**—(मन्त्रिणा सह त्वरितमुपसृत्य ।)

विधिहरिविषमेक्षणात्मकः सन्सृजति बिभर्ति निहन्ति यो जगन्ति ।
तदहममलमेकमेव सच्चित्सुखवपुषं परमेश्वरं नतोऽस्मि ॥ १९ ॥

(इति प्रणमति ।)

**भगवान्**—वत्स, मन्त्रिणा सममभिमतेन युज्यस्व ।

**जीवः**—(मन्त्रिणा सहोत्तिष्ठन् । शिरस्यञ्जलिं बद्ध्वा ।)

जय जय जगदीश देवासुरावध्यतादर्पवेगोद्धृतत्वत्पदाङ्गुष्ठनिष्पीडनस्तब्धकैलासमूलात्तदोर्विंशतिप्रस्तुतस्तोत्रपुष्यद्दयारक्षितोन्मुक्तलङ्कापते निष्प्रपञ्चाकृते

जननमरणलाभपौनःपुनोदीततद्भञ्जनारब्धघोरव्रतप्रीणितत्वत्कठोरश्रवःप्रार्थनाजातकोपोत्थशापामिषाशीभवत्तापसत्राणकृद्रामरूपग्रह स्वेषु सानुग्रह ।

अनुपमितगृहीततारुण्यलक्ष्मीनिरीक्षोन्मिषद्दारुकारण्यनारीव्रतभ्रंशकुप्यन्मुनीन्द्राभिचारोत्थितं तुङ्गनादं कुरङ्गं ज्वलज्ज्वालमग्निं कराभ्यां वहन्दृश्यसे सद्भिरामृश्यसे

कलशभवमहर्षिवातापिनिर्वापणादक्षिणोर्वीभरापादनाविन्ध्यसंस्तम्भनासिन्धुनाथाम्बुनिःशेषनिष्पानशक्तिप्रदायिस्वपादाम्बुजध्यानमाहात्म्य शंभो नमस्ते नमस्ते ॥ २० ॥

पुनः

प्रसूनशरदाहिने प्रबलकालकूटाशिने
कृतान्तपरिपन्थिने त्रिपुरगर्वनिर्वासिने ।
जटापटलयन्त्रितामरतरङ्गिणीस्रोतसे
प्रपन्नभयहारिणे प्रमथनाथ तुभ्यं नमः ॥ २१ ॥

निष्क्रियस्यापि देवस्य जगत्सृष्ट्यादिकर्मणि ।
प्रवृत्तिं कुर्वतीं देवीं प्रपद्ये भक्तवत्सलाम् ॥ २२ ॥

**देवी**—णाह, इमस्स मणोरहं पुच्छिअ झत्ति तं णिवत्तेहि ।(क)

---

(क) नाथ, अस्य मनोरथं पृष्ट्वा झटिति तं निर्वर्तय ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भगवान्**—प्रिये, किमत्र प्रष्टव्यम्। विदितमेव। यक्ष्मराजः कैश्चिदसाध्यरोगैः सहानुगतो विकुर्वाणो निर्मूलं छेत्तव्य इत्येतस्य मनोरथ इति तत एतस्मै योगसिद्धिमुपदिश्य निर्जितनिखिलरोगं ब्रह्मरन्ध्रस्थितचन्द्रमण्डलनिःष्यन्दमानामृताप्लुतशरीरं निजानन्दानुभवतुच्छीकृताखिलप्राकृतसुखान्तरं सफलमनोरथमेनं कृतार्थयिष्यामि।

**देवी**—(सहर्षम्।) सरिसं खु एदं तुम्हकेरस्स भत्तवच्छलस्स। (क)

**भगवान्**—वत्स जीव, योगसिद्धिमुपदिशामि ते।

**जीवः**—भगवन्, को नाम योगः कीदृशी वा तस्य सिद्धिः।

**भगवान्**—वत्स, श्रूयताम्। योगश्चित्तवृत्तिनिरोधः। चित्तं नामान्तःकरणम्। यच्चक्षुरादिकरणद्वारा बहिर्निगच्छद्विषयाकारेण परिणमति। यत्तादात्म्यापन्नो द्रष्टापि तद्रूपाकार एव परिभाव्यते। तदुक्तम्—

'ध्यायन्त्यां ध्यायतीवात्मा चलन्त्यां चलतीव च।
बुद्धिस्थे ध्यानचलने कल्प्येते बुद्धिसाक्षिणि॥' इति।

'ध्यायतीव लेलायतीव' इति श्रुतिः। तस्य वृत्तयो नाम कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्याद्याः श्रुतीरिता आन्तराः, बाह्याश्च शब्दस्पर्शादिविषयग्राहिण्यः। सत्त्वरजस्तमोरूपगुणत्रयात्मिकानां च तासां दैवासुरसंपद्रूपत्वेन द्वेधा विभाग उक्तो गीतायाम्—

'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥'

इत्यादिर्दैवी संपत्। 'दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च' इत्यादिरासुरी संपत्। तत्र दैवी संपत्सात्त्विकी। आसुरी तु रजस्तमःप्रधाना। 'दैवी संपद्विमोक्षाय निबन्धायासुरी मता'। तासां च सर्वासामान्तरीणां बाह्यानां च चित्तवृत्तीनां निरोधो नाम स्वविषयेभ्यः प्रतिनिवर्त्य क्वचित्सगुणे निर्गुणे वा वस्तुनि चित्तस्य समवस्थानम्। तच्च दृढतरवैराग्यसत्कारनिरन्तरसेवनाभ्यां सबलेन लभ्यते। तदुक्तम्—

(क) सदृशं खल्वेतद्युष्मादृशस्य भक्तवत्सलस्य।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥' इति ।

एतादृशस्य योगस्य सिद्धिर्नाम ध्येयवस्तुसाक्षात्काररूपावस्थितिः ।

**मन्त्री**—भगवन्,

एवंभूताः क इव घटते चित्तवृत्तीर्निरोद्धुं
वैराग्येणाभ्यसनविधिना स्याच्चिरात्तन्निरोधः ।
जेयः शीघ्रं रिपुरपरथा न स्थितिर्नः पुरेऽतो
योगे सिद्धिर्भवति च यथानुग्रहस्ते तथास्तु ॥ २३ ॥

**जीवः**—भगवन्,

स्मृतिस्ते सकलाभीष्टं दत्ते किमुत दर्शनम् ।
तत्प्राप्तममितैः पुण्यैः सद्यः सिद्धिं ददातु मे ॥ २४ ॥

**देवी**—(सदयम् ।) देव, संकप्पादो जेव्व से जोअसिद्धी होदु त्ति अणुगेह्णीअदु एसो । (क)

**भगवान्**—वत्स, देव्यैवमनुगृहीतोऽसि । संकल्पादेव ते योगसिद्धिर्भवतु ।

**मन्त्री**—राजन्, भगवत्या भगवता च संकल्पादेवाखिलयोगसिद्धिरनुगृहीता । तत्सर्वथा कृतार्थाः स्मः ।

**राजा**—(सप्रणामम् ।) अनुगृहीतैवेयम् । यतः ।

या प्रत्यक्षपदार्थमात्रविषया सा योगसंस्कारतः
संस्कारान्प्रतिबध्नतीतरकृतान्धीः कापि मे जृम्भते ।
सूक्ष्मं यत्तु विदूरमव्यवहितं सर्वान्विशेषान्स्फुटं
पश्याम्येष यथावदद्य परमार्थोद्भूतया प्रज्ञया ॥ २५ ॥

आश्चर्योऽयं भगवत्प्रसादमहिमा ।

**भगवान्**—देवि, एवं संप्रज्ञातसमाधिरेतस्य प्रादुर्भूतः, य एवमालम्बनामनुभवति ऋतंभरां नाम प्रज्ञाम् । अतः परं निर्बीजयोगसंज्ञमसंप्रज्ञातसमाधिमस्यानुगृह्णामि ।

(क) देव, संकल्पादेवास्य योगसिद्धिर्भवत्वित्यनुगृह्यतामेषः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवी**—अणुगेह्णीअदु अप्पणिव्विसेसो एसो । (क)

**जीवः**—(सहर्षोल्लासरोमाञ्चम् ।) आश्चर्यमाश्चर्यम् ।

भगवन्करुणासमित्समिद्धे दृढनिर्बीजसमाधियोगवह्नौ ।
प्रविलापितसर्वचित्तवृत्तिः परमानन्दघनोऽस्मि नित्यतृप्तः ॥ २६ ॥

**भगवान्**—देवि, झटिति विघटिताखिलपराग्वृत्तिः प्रत्यगात्मैक्यानुभवरूपोऽसंप्रज्ञातसमाधिराविर्भूतो वत्सस्य । यत एवमनुभूतमर्थमनुवदति ।

**देवी**—देव, किदत्थो खु एसो जो एवंविधस्स देवाणुग्गहस्स भअणं जादो । (ख)

**भगवान्**—संप्रत्येनं व्युत्थाप्य प्रकृतकार्यप्रवणं करोमि । (जीवं प्रति ।) वत्स, अन्यदपि किंचिदनुशासनीयोऽसि ।

**जीवः**—(व्युत्थाय ।) भगवन्, अवहितोऽस्मि ।

**भगवान्**—

प्राचीनः सचिवः प्रियस्तव सुहृद्यो ज्ञानशर्मा मुनिः
सोऽन्यस्यापि सुदुर्लभः स भवता मान्यः सदाहं यथा ।
श्रेयःसंघटनाय हन्त भवतः सत्यं स एवार्हति
प्रेयस्त्वैहिकमातनोतु सततं विज्ञानशर्मापि ते ॥ २७ ॥

शश्वज्ज्ञानादभिन्नः सन्विज्ञानमपि मानय ।
एवं सति घटेयातां भुक्तिमुक्ती करे तव ॥ २८ ॥

**राजमन्त्रिणौ**—(साष्टाङ्गं प्रणम्योत्थाय ।) अनुगृहीतौ स्वः ।

**देवी**—सुमरणमेत्तसंणिहिदं णाणसम्भाणं सचिवं विण्णाणेण मुत्तविरोहं करिअ दुवे वि मन्तिणो रण्णो हत्थे समप्पअन्तेण भअवदा बहुलीकिदं भत्तवत्सलत्तणम् । (ग)

---

(क) अनुगृह्यतामात्मनिर्विशेष एषः ।

(ख) देव, कृतार्थः खल्वेष य एवंविधस्य देवानुग्रहस्य भाजनं जातः ।

(ग) स्मरणमात्रसंनिहितं ज्ञानशर्माणं सचिवं विज्ञानेन समं मुक्तविरोधं कृत्वा द्वावपि मन्त्रिणौ राज्ञो हस्ते समर्पयता भगवता बहुलीकृतं भक्तवत्सलत्व

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नेपथ्ये ।)

जीवे शिवप्रापितयोगसिद्धौ कालो जनान्ध्येन समं तमोवत् ।
पापो विषूच्या सह राजयक्ष्मा गदैरसाध्यैः सह नाशमेति ॥ २९ ॥

ईशानस्य निदेशात्प्राप्ता साप्यत्र शांकरी भक्तिः ।
चत्वारोऽपि पुमर्थाः पुंभिर्यस्याः प्रसादतो लभ्याः ॥ ३० ॥

**मन्त्री**—(आकर्ण्य ।) प्रियं नः प्रियम् । भगवान्काल एष एवं नः प्रियमाचष्टे ।

**राजा**—(सहर्षोल्लासम् ।)

मूर्धन्यमण्डलनिकेतसुधांशुबिम्ब-
निःष्यन्दिशीतलसुधास्रुतिनिर्वृताङ्गः ।
मेघावृतिव्यपगमे गगनं यथाच्छं
चैतन्यमावरणवर्जितमस्मि तद्वत् ॥ ३१ ॥

**मन्त्री**—एवमेवायं जीवो राजा भगवतोः प्रसादान्नीरोगो नित्यमुक्तो निराबाधो बहुकालं जीयादिति प्रार्थये ।

**भगवान्**—तथैवास्तु ।

**देवी**—तह होदु । (क)

**राजा**—(सहर्षविस्मयं मन्त्रिणं प्रति ।)

मन्त्रिञ्जन्मैव दोषः प्रथममथ तदप्याधिभिर्व्याधिभिश्चे-
ज्जुष्टं कष्टं बतातः किमधिकमपि तु त्वन्मतेर्वैभवेन ।
देव्या भक्त्याः प्रसादात्परमशिवमहं वीक्ष्य कृच्छ्राणि तीर्णः
सर्वाणि द्राक्कदत्यद्भुतमिह शुभदं संविधानं तवेदम् ॥ ३२ ॥

**मन्त्री**—राजन्,

बहुजन्मार्जितैः पुण्यैस्तावकैरेष तोषितः ।
सर्वाभीष्टं ददातीशः संविधानं किमत्र मे ॥ ३३ ॥

**भगवान्**—वत्स, किमतः परमन्यत्तव प्रियं कुर्मः ।

(क) तथा भवतु ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा—देवदेव भगवन्, सर्वमपि प्रियमाचरितमेव ।

सर्वेऽपि मे प्रशमिता रिपवः पुरेऽभू-
दारोग्यमैक्षिषि भवन्तमुमासहायम् ।
योगं ततस्त्वदुपदिष्टमवाप्य जीव-
न्मुक्तोऽस्मि ते करुणया किमतः प्रियं मे ॥ ३४ ॥

तथापीदमस्तु भरतवाक्यम् ।

पर्जन्यः समयेऽभिवर्षतु फलं वाञ्छानुरूपं महीं
प्रौढामात्यनिरूपिते पथि महीपालाः पदं तन्वताम् ।
कर्णालंकृतये भवन्तु विदुषां कान्ताः कवीनां गिरो
भूयादस्य कवेश्चिरायुररुजो भक्तिश्च शैवी दृढा ॥ ३५ ॥

(इति निष्क्रान्ताः सर्वे ।)

कृतिरियं श्रीमद्भारद्वाजकुलजलधिकौस्तुभस्य श्रीनरसिंहरायमन्त्रिवरनन्दनस्य श्रीमदानन्दरायमखिनः[1] ।

**समाप्तोऽयं ग्रन्थः ।**

---

१. अयं जीवानन्दनप्रणेता श्रीमदानन्दरायमखी नृसिंहरायाध्वरिसूनुर्त्र्यम्बकदीक्षितस्य भ्रातृव्यस्तञ्जौरनगरमहीपतेरेकक्षितिपालवंशतिलकस्य शरभापरपर्यायस्य श्रीशाहराजस्य मन्त्रिप्रवर आसीदित्यादि सर्वं जीवानन्दनस्यैतत्प्रणीतस्यैव विद्यापरिणयनाटकस्य च प्रस्तावनातः प्रतीयते. स च शरभमहीपतिः खिस्ताब्दीयसप्तदशशतकपूर्वार्धे आसीदिति स एवास्य समयः. एतत्कृतिषु जीवानन्दनं विद्यापरिणयं चेति नाटकद्वयमस्माभिरुपलब्धम्. जीवानन्दने यद्यपि नास्ति कवित्वचमत्कारस्तथापि संविधानकमनुच्छिष्टं चिकित्साशास्त्रानुकूलमिति कृत्वैवास्य काव्यमालायां प्रवेशः. तत्र जयपुरराजगुरुकुलप्रसूतभट्टश्रीकृष्णकुमाराणां संग्रहादेकमेवास्य शुद्धं पुस्तकमुपलब्धम्. चिरं विहितेऽप्यन्वेषणे पुस्तकान्तरालाभात्तस्मादेव पुस्तकादेतन्मुद्रणमकारीति भद्रम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only